DESCRIPTIVE CATALOGUE

OF

SANSKRIT MANUSCRIPTS

Volume Thirteen

VIŚVABHĀRATĪ COLLECTION
[II]

COMPILED BY
DR. E. R. SREEKRISHNA SARMA

THE ADYAR LIBRARY AND RESEARCH CENTRE

GANGANATHA JHA KENDRIYA
SANSKRIT VIDYAPEETHA LIBRARY
ALLAHABAD

गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठ-पुस्तकालय,
प्रयाग ।

Acc. No. 15717

Call No. ~~H 020 Adv / D.C. 13/H~~
M082, DES/DC

THE ADYAR LIBRARY SERIES

VOLUME ONE HUNDRED AND THREE

DESCRIPTIVE CATALOGUE OF
SANSKRIT MANUSCRIPTS

DESCRIPTIVE CATALOGUE
OF
SANSKRIT MANUSCRIPTS

Volume Thirteen

VIS'VABHĀRATĪ COLLECTION
II

Compiled by
Dr. E. R. SREEKRISHNA SARMA

THE ADYAR LIBRARY AND RESEARCH CENTRE

© 1976 The Adyar Library and Research Centre
The Theosophical Society, Adyar, Madras 600 020, India

SBN: 0-7229-7353-5
ISBN: 0-8356-7353-7

Agents

AMERICAS, JAPAN

The Theosophical Publishing House,
P. O. Box 270, Wheaton, Illinois 60187, U. S. A.

EUROPE, THE UNITED KINGDOM

The Theosophical Publishing House,
68 Great Russell Street,
London, W. C. 1B 3 BU, England.

INDIA AND OTHER COUNTRIES

The Theosophical Publishing House,
Adyar, Madras 600 020, India.

PRINTED IN INDIA

At the Vasanta Press, The Theosophical Society, Adyar, Madras 600 020.

CONTENTS

		Page
Veda, etc.	...	3
Itihāsa, etc.	...	132
Kāvya-s	...	174
Nyāya, etc.	...	206
Sāṃkhya, etc.	...	218
Mīmāṃsā	...	222
Vedānta	...	225
Vyākaraṇa	...	257
Lexicography	...	267
Prosody	...	271
Alaṃkāra	...	272
Saṃgīta, etc.	...	277
Āyurveda	...	279
Gaṇita, etc.	...	238
Āgama-s	...	297
Kalpa-Vrata-s	...	323
Pūjā-s	...	338
Mantra-s	...	347
Stotra-s	...	366
Index	...	417

APPENDIX

VB 10 (b) श्रीसूक्तभाष्यम्

Beginning:

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।।
(सं)प्रणम्य श्रियं देवीं सर्वलोकेश्वरेश्वरीम् ।
पुमर्थसिद्धचै श्रीसूक्तं व्याकुर्वे श्रीप्रसादतः ।।
अत्रोच्यते मया किंचिद् वक्तव्यं संप्रद(यतः) ।
श्रुतिस्मृतिपुराणादिप्रसिद्धं सार्वदेशिकम् ।।
ऋग्वेदशाकलाधीतसंहितायां तु(री)यके ।
सूक्तं पञ्चदशर्चं च श्रीसूक्तं नाम नामतः ।।
श्रीदैवत्यं श्रीसुतार्षं प्रायेणानुष्टुभं महत् ।
ससप्तदशकात् सूक्तसहस्रात् पादसंयुतात् ।।
भिन्नेषु खिलसूक्तेषु पठ्यते बह्वृचोत्तमैः ।
रात्रिशेषायुष्यसर्पशिवसंकल्पसूक्तवत् ।।
काम्येष्टिश्रौतकर्मादौ विनियोक्तव्यमेव च ।
स्मार्ते तु नित्यपूजादौ काम्ये होमादिकर्मणि ।।
लैङ्गचोक्तलक्ष्मीदानादापन्नदानोक्तकर्मसु ।
नैमित्तिके च शान्त्यादौ रजोविघ्नादिसंकटे ।।
न्यासादिकं तु कर्तव्यं पूर्वादौ वक्ष्यतेऽग्रतः ।
मन्त्रार्थः सर्वमादौ तु ज्ञातव्यो वेदवित्तमैः ।।

अथ ऋग्वेदशाकलसंहितायां चतुर्थेऽष्टके चतुर्थाध्याये अच्छावद बलित्थ इति सूक्तद्वयमध्ये, सपादसप्तदशाधिकऋक्संहितासूक्तसहस्रसंख्याबहिः खिलसंहितान्तर्वर्ति रात्रि-सूक्तशेषायुष्यसूक्तशिवसंकल्पादिसूक्तवत् सकलश्रुतिस्मृतिपुराणादिषु श्रीसूक्तं नाम सर्वदेशेषु प्रसिद्धम् । तच्च पञ्चदशर्चम् । **हिरण्यवर्णामित्यादि** । तथा चोक्तं खिलसूक्तानुक्रमण्यां **शौनकेन**—

अच्छावदबलित्थे(ति) सूक्तमध्यगतं खिलम् ।
हिरण्यवर्णामिति श्रीसूक्तं पञ्चदशर्चकम् ।। इति ।

इदं श्रीसूक्तं श्रीपुत्रैरानन्दकर्दमचिक्लीदैर्दृष्टं श्रीदेवताप्रस्तावकम् । अतस्तदार्षं तस्य दैवतं च यस्य वाक्यं सर्षिः या तेनोच्यते सा देवतेति वचनात् । अनुष्टुप् छन्दः । चतुर्थीप्रस्तार-पङक्तिः, पञ्चमीषष्ठचौ त्रिष्टुभौ, अन्ता बृहती । हिरण्यवर्णां + + + म आवह ।।

End:

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थान् चतुरो देयाद् विद्यातीर्थमहेश्वरः ।।

Colophon:

इति **श्रीविद्यामाधव**रचितं श्रीसूक्तभाष्यं संपूर्णम् ।

After the colophon:

यस्या . . . भाग्याच्चतुर्वर्गं लभेन्नरः ।
लक्ष्मीः करोतु सा नित्यं मङ्गलं मम देवता ।।
प्रमोदूताब्दवर्षर्तुसिंहमासचतुर्दिने ।
श्रीसूक्तभाष्यं लिखितं रामस्वामिविपश्चिता ।।

सूत्रसंख्या—

बोधायनं च कौण्डिन्यमापस्तम्बं च काठकम् ।
वैखानसं भरद्वाजं सत्याषाढं च शाखिनम् ।।
माध्यंदिनं वैनतेयं लोक . . . कुसीदकम् ।
कात्यायनं च वाधूलमाग्निवेश्यकमित्यपि ।।
यजुःसूत्राणि संख्यातं दश पञ्च च पण्डितैः ।
ऋग्वेदो भागमूलानि सूत्राणि त्रीणि तानि तु ।।
शौनकीयं च . . . माश्वलायनमित्यपि ।
सामसूत्राणि जैमिन्यं द्राह्यायणमिति स्मृतम् ।।
आथर्वणानि मूलानि सूत्राणि त्रीणि तानि तु ।
पैठीनसीयमागस्त्यं पाणिनीयमिति स्मृतम् ।
एतानि सूत्राण्याहृत्य त्रयोविंशतिधा स्मृताः ।।

28

VB 737 (h) **अक्षरलक्षणपरिभाषा**

The following is the full text of the work:

गणेशवाग्गुरून् नत्वा रामं चाक्षरलक्षणम् ।
करोति सुखबोधाय . . . स्यैकेन वर्णितः ।।

शिखामणिरिदं नाम्ना पदस्य दशनिर्णयम् ।
पदपद्येतिकाराश्च सितुसेन्तानि चात्र तु ।।
विसर्जनीयनतमाः पदपद्यान्तरा दश ।
बालपाठक्रमेणात्र स्वराश्च व्यञ्जनानि च ।।
स्वरा दश विजानीयादृकारऌकारवर्जितान् ।
अकाराद्याः स्वराः पञ्च आकाराद्याश्च पञ्च च ।।
पञ्चशो गणितानां तु पदसंख्यान्त्यपञ्चके ।
एकद्वित्रिचतुःपञ्चपदानि स्वरसंख्यया ।।
सितुसेन्तानि संगृह्य गण्यन्ते चैकरूपतः ।
स्वरपञ्चकयोस्यन्तं समं च विषमं क्रमात् ।।
नैकाक्षरं पदं तत्र गणयेदिति पण्डिताः ।
कादीनां पञ्चवर्गाणां प्रथमाश्च तृतीयकाः ।।
याद्यास्त्रयश्चतुर्भिस्तु वर्गा ङणनमैः सह ।
तकाराश्चेतिकाराश्च गण्यन्ते चैकरूपतः ।।
गृहीते विषमे वर्णे विषमास्तु समाः समे ।
पद्यनान्तविसर्गास्तु कशयोर्विषमाः समाः ।।
. . . वनान्ताष्टे विसर्गाश्च ङेपद्याश्च समाः स्मृताः ।
ते पद्यापो विसर्गाश्च ये नान्ता विषमा इह ।।
विषमं वा समं वैकं यत्र तत्रान्यथा द्वयम् ।
संपातेन तमान्तानां निर्णयात् पूर्वयोर्द्वयोः ।।
विषमं वा समं वापि शेषं मान्तमिहेष्यते ।
नान्तादीनामभावे स्यात् समं पद्यपदान्तयोः ।।
यत्रानेकं पदे रूपं तदनेकत्र गण्यते ।
त्रियम्बकं च भद्रं न ऋतं चैव प्रजापते ।।
अर्धर्चास्तु पदस्थाने ज्ञेया अन्ताश्च नादिकाः ।
प्रोक्ता तु परिभाषैषा लक्षणस्य यथामति ।।
सम्यग्वाप्यन्यथा वेदं ग्राह्यं विद्वद्भिरादरात् ।

37

VB 737(d) **ऋग्वर्णक्रमलक्षणम्**

Beginning:

मोमेशविघ्नेशरवीन् प्रणम्य स्वप्रातिशाख्योक्तविधीन् विलोक्य ।
ऋग्वेदवर्णक्रमलक्षणं हि ब्रूते **जगन्नाथ** इदं यथाधि ।।

किंचिल्लक्ष्यं प्रातिशाख्याज्ज्ञेयं व्याकरणादिह ।
उभयानुगतं प्राप्य एवं लक्षणमुच्यते ।।
ज्ञेया विकारा वर्णानां पञ्चापि स्वरभक्तयः ।
विवृत्तयश्चतस्रोऽन्या वर्णक्रममभीप्सता ।।
अजनुस्वारपूर्वं हल् द्वित्वमाप्नोति हल्परम् ।
अनुस्वारविसर्गान्यिद् विरामे च स्वरेन्दनौ ।।
ह्रस्वपूर्वौ मकारस्तु विरामे ह्रस्वपूर्वकः ।
सोष्मणो द्वित्वसंप्राप्तौ तत्पूर्वस्य सकृच्छ्रुतिः ।।
स्वरे द्वित्वं शकारोऽपि मा ह्रस्वाभ्यां परोऽश्नुते ।

End:

पाकवत्युभयह्रस्वा द्वयोर्दैर्घ्ये पिपीलिका ।
दीर्घवत्सानुसार्यादौ वत्सानुसृतिरन्तिमे ।।
दीर्घात् परस्यानद्वित्वं शकटेन मतेन हि ।
प्लुतानां प्रगृह्याणां च पाठे वर्णक्रमस्य च ।।
हरिः प्रणवयोर्मध्ये संधिर्न स्यात् कदाचन ।
इत्थं वर्णक्रमं ज्ञात्वा वेदाध्यायफलं लभेत् ।।

Colophon:

इति ऋग्वेदवर्णक्रमलक्षणम्

38

VB 737(c) ऋग्(वेद)वर्णक्रमलक्षणव्याख्या

Beginning:

पदक्रमविभागज्ञो वर्णक्रमविचक्षणः ।
स्वरवर्णः स्वरोमात्रा विनियोगोऽर्थ एव च ।।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ।

'मन्त्रो हीनः स्वरतो वर्णतो वा' इत्यादिना वैदिकवर्णानां ज्ञेयत्वावगमात् तज्ज्ञानस्य चाध्ययनमात्राद् दुःशकत्वात् प्रातिशाख्यव्याकरणयोश्च बाहुल्याद् विस्तृतत्वाच्च संक्षिप्तमिदं लक्षणमारभ्यते—**मोमेशेति** । अत्र वेदग्रहणाद् वाह्यादावपि । **किंचिदिति** । व्याकरणानुक्तं प्रातिशाख्योक्तं ह्नयाम्यग्निमित्यादौ हद्वित्वम् । प्रातिशाख्येऽप्यनुक्तं वैदिकपाठबललभ्यम् । तस्मिन् न्यङ इत्यादौ नङयोर्द्वित्वम् । उभयानुगतं यङ कुठारेत्यादौ मस्य ङत्वं ज्ञेयम् इति गतार्थः ।।

End:

नाभ्या आसीत् । देवा एतस्यां . . . ता ईम् । वत्सानुसारिणी । आ उ । या इन्द्र । ता अस्य । वत्सोऽमृतः । वत्सानुसृतिः । य आनयत् । स ईम् । य ऊर्ध्वया । य एनं य ओ . . . . . शौनकः कालाव्यवायेन स्वरान्तरं तु विवृत्तिः सा धा स्वरभक्तिकालेति । संक्षेपसारेऽपि—

पाकवत्युभयश्रुति . . . द्दीर्घा पिपीलिका ।
वत्सानुसार्यादिति या वत्सानुसृतिरन्तिमे ।। इति ।

Colophon:

व्याख्या समाप्ता

40

VB 737(g) जटालक्षणम् (विकल्पकौमुदी)

Beginning and end are same as in TCD Vol I, no. 34 (K) (pp 89—90).
At the end of folio 28 b:

तर्जन्यादौ कनिष्ठादौ तथैवानामिकान्तिमे ।
मध्यमाङ्गुलिमध्ये च ह्यङ्गुष्ठेनैव दर्शयेत् ।।
. . . . . श्रेष्टचग्ने क्षैप्र उच्यते ।
तेऽवर्धन्ताभिनिहितः प्रशिष्टो हीन्द्र . . . वर्णः ।।
तिरो . . . विष्कंभितं तैरेवं जन ऊतये ।
पादवृत्तकरं वेदस्वरसंनिधिदर्शनम् ।।

45

VB 120(a) अनिङ्गचम् (अखण्डमञ्जरी)

Beginning:

सजलाम्बुदसंकाशं विमलाम्बुजलोचनम् ।
सकलाभीष्टदं देवं कमलापतिमाश्रये ।।
येष्विङ्ग्यपदसादृश्यात् संदेहो जायते भृशम् ।
पदानि तान्यनिङ्गचानि ज्ञातुं वक्ष्यामि लक्षणम् ।।
वा . . . . . श्चेति प्रवादवदिहेष्यते ।
अदीर्घौ भावपूर्वेभ्यो भिभ्यां स्वन्दन्न यत्पदम् ।।
गोदुन्दु सुरपूर्वं तु विना नित्यं तदिङ्ग्यकम् ।
इवान्तकं च नित्यं स्यादथ संगृह्यते पदम् ।।

द्रव्यादिषालन्तमृधाद्यसश्च . . . . . सयादि ।
अश्रा शिवा वादि सी सा सदीद्यादिदृक्षवप्रादि च दुस्तरादि ।।
विद्यादिदीध्यादि च नानदादि सपर्यनाभादिकमप्यनिङ्ग्यम् ।

End:

सपन्तःससृजावश्रत् सरजन्तं स्वदादि च ।
स्वात्मानवाक् सस्वत्ता न चक्रुं परं सने ।।
मञ्चसामन्यः सश्चतः स्वपन् सहावान् ।
आद्युदात्तं स्या सने यं स्नीहितीषु च . . . ।।
ससूदादि सरण्यादि अस्नुत्यश्रुत् सनेमि च ।
सत् सत् समनवागेह् सदान्वे स्वानि नः सहन् ।।
सलणकं वचन श्रृ सच थाय ससध्यै च ससाद सरयुस्सभाम् ।
सभेयं च सुराश्वस्तभायन् स्वादोर्हरिद्रवः ।।
हृणायन्तं हि यानश्रुन् हृषीवन्तो हृषीवतः ।
हरिद्रवःशुद्धिरीमान्नारायणो हिरीमशः ।।
विकृताद्यन्यकारेण न तावदेव योरिति ।
इत्येषा दर्शिताऽखण्डमञ्जरी नातिविस्तृता ।।

Colophon:

प्रिया सभा च कल्यब्दे श्रीषडमर्षणजन्मना ।
साङ्गत्रयीविदा **शेषनारायण**मनीषिणा ।।

93

VB 12(c) पुरुषसूक्तभाष्यम्

(Additional matter in the Ms.)

Beginning:

चकारौ पुण्यपापोपभोगार्थमिति सूचयतः । अकल्पयत् इत्यनुषङ्गः, स्वःशब्दः स्वरोपरितनलोकवचनः सर्ववचनो वा । अथोशब्ददर्शनात् लोकत्रयं प्रथमं कल्पयित्वा । अथोऽनन्तरम् अन्यानपि लोकानतलवितलादीन् महर्लोकादीन् तद्वर्त्तीनि दैवमनुष्यतिर्यगादीनि भूतानि सर्वाणि धाता कल्पयामास । तथा च **मनुः**—

ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे ।
मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम् ।। (१.१३)

कालं कालविभक्तिं च नक्षत्राणि ग्रहांस्तथा । (१. २४)
सर्वेषां तु समानानि कर्माणि च पृथक् पृथक् ।।
वेदशब्देभ्य एवाशु पृथक् संस्थांश्च निर्ममे । (१.२१)
यं तु कर्मणि यस्मिन् स न्ययुङ्क्त प्रथमं प्रभुः ।।
स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः । (१. २८) इत्यादीनि
विश्वस्य सृष्टिरुद्दिष्टा संक्षेपेणाघमर्षणे ।
सूक्तेषु पौरुषे सैषा सृष्टिः स्पष्टं निगद्यते ।।
तच्चेदं पौरुषं सूक्तं ऋषिभिर्विनियुज्यते ।

96

VB 60(a) तैत्तिरीयमन्त्रविनियोगसंग्रहः

Beginning:

वत्सापाकरणमन्त्राः । इषे त्वा । हविराहरणमन्त्राः—यज्ञस्य घोषदसि . . . . . .
. . . . . .
कर्मणे वाम्, हविः प्रोक्षणवाहनमन्त्राः देव । हविः पेषणमन्त्राः अव धूतं रक्षः ।
प्रथमः प्रश्नः । अष्टमः प्रश्नः । प्रथमः काण्डः ।

End:

. . . . . ब्रह्मसायुज्यनिरूपणम् ।
सविता भूत्वा । आरण्यकेऽष्टमः प्रश्नः ।।
आरण्यकः समाप्तः ।
अपां स्रष्टा पाप . . . यज्ञब्रह्म तन् . . .
. . . कार्थसंक्षेपात् प्रीणातु कमलापतिः ।।
श्रीश्रीनिवासगुरुणा गुरूणां कृपया कृतः ।
तैत्तिरीयकशाखार्थविनियोगस्य संग्रहः ।।

Colophon:

तृतीयेऽष्टके नवमः प्रश्नः । तृतीयोऽष्टकः समाप्तः ।
स्वर्गापवर्गफलदो मन्त्रब्राह्मणपुष्पवान् ।
शाखार्थानां संग्रहेण प्रीयतां विष्णुभूरुहः ।।
श्रियं श्रीशं श्रीनिवासं श्रीकामं श्रीनिधिं सदा ।
श्रीदं श्रीपतिकृत्सामयज्ञरूपं श्रये श्रिया ।।
श्रियं पत्नीं श्रियः श्रीशां श्रीनुतां श्रीस्वरूपिणीम् ।
व्याप्तां सह श्रिया श्रीदां श्रीवत्सस्थां श्रये श्रियम् ।।

शब्दार्थरूपिणौ तार्क्ष्यशेषौ तदधिपं भजे ।
विष्वक्सेनं वेदयज्ञौ श्रीनारायणरूपिणौ ।।
आपस्तम्बमुखाचार्यान् सूत्रभाष्यकृतो मुनीन् ।
वेदव्यासं भजे वाचं ब्रह्माणं च स्वयंभुवम् ।।
शतक्रतुं तातगुरुं वेदवेदान्तपारगम् ।
वेदान्तानां गुरुन् . . वेदान्ताचार्यलक्ष्मणान् ।।
श्रीश्रीनिवासगुरुणा शतक्रतुतनूभुवा ।
चतुराम्नायषट्सूत्रीपारगेण हरेर्मुदे ।।
शीघ्रं वेदार्थबोधाय क्रियते ब्रह्मवादिनाम् ।
तैत्तिरीयकशाखाया विनियोगस्य संग्रहः ।।

अथ सावित्रं चयनम् ।।

135

VB 463(f) **नारायणोपनिषद्व्याख्या (उपनिषन्मङ्गलाभरणम्)**

Beginning:

अथाष्टमी प्रकीर्णकला नारायणोपनिषत् । अथ पुरुष इत्यादि । अथ चतुर्युगसहस्रान्तस्वरात्रिव्युष्टच . . . यनन्तरं ह वै (प्रसिद्धः) पुरुषो महाविराट्पुरुषो नारायणः, अम्भस्य पारे; अद्भ्यः संभूतः पृथिव्यै रसाश्चेत्यादिः ।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
सा यदस्यायनं प्राहुस्तेन नारायणः स्मृतः ।।

इति स्मृतेश्च (मनु. १.१०) । महाविराडण्डकटाहमहाजलप्रतिष्ठितस्थूलभ्रमविग्रहवतो नारायणाख्यमाद्यं हिरण्यगर्भं ब्रह्म स्वाहरादौ प्रजाः सृजेयेत्यकामयत । तस्मादेवं संकल्पयितुः सत्यसंकल्पात् प्रथमकलोक्तरीत्याहरादौ स्वशक्त्याशेषतत्तदादि(मिथु)नरूपं . . . द्वारा तत्तत्स्थूलपुरुषात्मकाद् नारायणाद्विराजः प्राणो जायते सूक्ष्मविग्रहात्मा ।

End:

एतदथर्वशिरो योऽधीते स प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतपापं नाशयति । माध्यंदिनादित्याभिमुखोऽधीयानः पञ्चपातकोपपातकात् प्रमुच्यते । स सर्ववेदपारायणपुण्यं लभते । नारायणसायुज्यं प्राप्नोति । आवृत्तिरुपनिषत्समाप्तौ ।

Colophon:

इति श्रीमदुपनिषन्मङ्गलाभरणे षोडशकले प्रकीर्णकलायामष्टमी नारायणोपनिषत्कला समाप्ता ।।

145

VB 463(e) कालाग्निरुद्रोपनिषद्व्याख्या (उपनिषन्मङ्गलाभरणम्)

Beginning:

अथ सप्तमी प्रकीर्णकला कालाग्निरुद्रोपनिषत्। अथ कालाग्निरुद्र इत्यादि। अथ शंभु-दक्षिणामूर्तिरुद्रस्याङ्गिमूलविद्यानुष्ठानावगत्यनन्तरम् अङ्गं शांभवं व्रतं जिज्ञासुः सनत्कुमारः स्कन्दः। तं स्कन्दं इत्याचक्षते। इत्यन्यत्र च श्रुतम्। भगवन्तं निष्कलादिविद्यैश्वर्यज्ञानानन्दं निजपितरं कालाग्निरुद्रम्। कालः ज्योतिर्मयब्रह्ममण्डलीयकालोपसर्जनाग्निप्राधान्येन रुद्राख्यं महेश्वरं पप्रच्छ। किमिति। हे भगवन् त्रिपुण्ड्रविधिं त्रिपुण्ड्रानुष्ठानप्रकारमधीहि। मदनुग्रहाय स्मृत्वोपदिश। अपि तु तत्त्वं प्रथमादिपुण्ड्राणां वक्ष्यमाणगार्हपत्यादितत्त्वोपेतम्। तथा तत्र त्रिपुण्ड्रविधौ किं द्रव्यं साधनभूतम्, किं स्थानं देहावयवेषु, किं पुण्ड्रानुष्ठानस्य स्थानम्। कियत् प्रमाणम् का रेखा किं संख्या के पुण्ड्रकरणाय मन्त्राः का शाक्तिः. . . . इतिः प्रश्नसमाप्तौ।

End:

वानप्रस्थो यतिर्वा त्रिपुण्ड्रं भस्मना करोति नतु शृङ्गारार्थं चन्दनादिना। स महापातकोपपातकेभ्यः पूतो भवति। सर्वतीर्थेषु स्नातो भवति। स सर्वान् देवान् ध्यातो भवति। अनुष्ठित-सर्वदेवताध्यानो भवतीति यावत्। सततं रुद्रजापी भवति। सततं श्रीरुद्रजापिफलभाग् भवतीति यावत्। सकलभोगभुगिहेति शेषः। देहं त्यक्त्वा शिवसायुज्यमेति। न च पुनरावर्तते। अङ्गि-मूलमन्त्रानुष्ठाननानुष्ठानयोरिदं फलम्। आवृत्तिर्दार्ढ्याय इत्याह भगवान् कालाग्निरुद्रः। उपनिषदमिमां यः श्रुत्वा आचार्यमुखाद् अधीते सोऽप्येवमेव भवति। अपुनरावृत्तिशिवसायुज्य-भाग् भवति। ओमेवमुपनिषदनुष्ठानफलम्, सत्यम् परमार्थो न सर्ववादमात्रं फलमिति सशपथं निर्धार्यत इत्यर्थः। इत्युपनिषत्। एवं कालाग्निरुद्रोपनिषत्। परिसमाप्तेति यावत्॥

Colophon:

इति श्रीमदुपनिषन्मङ्गलाभरणे षोडशकले प्रकीर्णकलायां सप्तमी प्रकीर्णकला कालाग्नि-रुद्रोपनिषत् समाप्ता॥

175

VB 916(a) बृहदारण्यकोपनिषद्भाष्यवार्त्तिकम्

The first nine stanzas are omitted as they are in the printed edition.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकरभगवत(पाद)शिष्येण श्रीमत्**सुरेश्वराचार्येण** कृतं श्रीबृहदारण्यकभाष्यवार्त्तिकं समाप्तम्।

Post colophon remarks:

रामो वैकुण्ठनिर्याणे तत्रत्यं सचराचरम् ।
वैकुण्ठं नीतवान् यः स ससीतो मत्परायणम् ।।
महादेवाश्रमाणां श्रीचरणौ शरणं मम ।
येषां कटाक्षलेशेन महादेवत्वमागतः ।।
श्रीज्ञानानन्दतीर्थानां दर्शनादेव नौमि तान् ।
विगताज्ञानतत्कार्यो ज्ञानानन्दत्वमागतः ।।
ज्ञानानन्देश्वरप्रीत्यै लिखितं वार्त्तिकामृतम् ।
रामचन्द्राश्रमेणाश्वे मास्यब्दे चित्रभानुके ।।

176

VB 1184 बृहदारण्यकोपनिषद्भाष्यटीका

Colophon:

इति परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितायां बृहदारण्यकभाष्यटीकायामष्टमोऽध्यायः ।।

A fly leaf at the beginnig furnishes the following information:

सिद्धार्थ्यब्दे मेषमासे दत्तं पञ्चदशे दिने ।
टिप्पणं बृहदारण्यभाष्यस्य शिवतुष्टये ।।
संगमक्षेत्रवास्तव्यश्रीमद्भास्करसूनवे ।
षष्ठ्यामसितपक्षस्य वेङ्कटेश्वरसूरिणा ।।

तृतीयसप्तमाष्टमानां बृहदारण्यभाष्यटीका ।

191

VB 129(a) बैड्लक्षणरत्नम्

Beginning:

ओं यजूंषि प्रति पञ्चाशत् प ..... कारपदान्तनकारयोः पदान्ततकारप्रग्रहयोः इङ्ग्यपदाद्याकारयोः संहितावसानस्य सांहितषत्वणत्वयोश्चैकदशोत्तरपदाद्यैकारौकारपदान्तदकाराणां च पदान्तसमानाक्षरदीर्घत्रयस्य च समविषमसंख्याद्योतकं विसर्जनीयसंख्याप्रतिपादकं प्रति पञ्चाशदेकैकमक्षरं प्रत्यनुवाकमेकैकं वाक्यं वैण्णामलक्षणं रत्नं वक्ष्यामः । अत्र प्रवर्तका

वर्णाः अकाराद्युकारपर्यन्ताः प्लुतवर्जिताः स्वराः पञ्च। ऊकाराद्यौकारपर्यन्ताः ऋऌवर्जिताः स्वराः पञ्च। अत्र प्रवर्तका हलश्च कगौ चजौ टडौ तदौ पबौ मनौ लवौ शसौ चेति ।।

End:

अभिजित्या इति। शि। यः प्राणतः। शै। य आत्मद ... आ ब्रह्मन्। ल्यम्। आक्रान्। चे। पारयादित्यः। मू। जज्ञि। बीजं। के। आग्नेयोऽष्टाकपालः। त। अग्नये हो मुचे। शा। अग्नये सं। भो। वरुणोऽद्भिः। ट्। ये ते। दि। यो।. . . श्ये। सम. .। उदरं। मु। ५४. सप्तमकाण्डः प्रलिखितः।

वत्सरेऽस्मिन् युवे दक्षिणाध्वन्युत द्योमणौ चापमासं गते मित्रभे।
शुक्रवारे तु बैड्लक्षणं पूर्णितं रावणेनोदितं **शेष**पुत्रेण हि ।।
बैड्दशग्रीवरचितं लक्षणं लिखितं मया।
शेषाद्रिसूनुना **वेङ्कटसुब्रह्मण्येन** सूरिणा ।।
बिन्दुशृंगाक्षरैर्हीनं लिखितं बाहुना द्रुतम्।
क्षम्यतां सज्जनैरेतत् कृपाम्बुनिधिभिर्बुधैः ।।
अस्मन्नमनं गुरुसज्जनाननत्वा कस्मिन् विषये यायात्।

193

VB 1073(c) **वर्णक्रमदर्पणम्**

Beginning:

उच्चप्रदेशिन्युरुमध्यरेखां कनिष्ठिकाद्यां निहितं पराग्रतः।
अनामिकान्त्या स्वरितं च निर्दिशेत् सुमध्यमामध्यगतां . . . तं परे ।। १ ।।
हृद . . दं निशि स्थानं भक्तेः यः पर उच्यते।
स्वरमुच्चमिदोर्ध्वं च ह्यनामिकान्तरान्त्ययोः ।। २ ।।

Folio 2:

व्याघ्री यथा हरेत् पुत्रं दंष्ट्राभ्यां न च पीडिता।
भीता पतनभेदाभ्यां मुखे पार्श्वेन . . . ।।
सभाव. . . . . नाथीरथीरथः।
जातु जाल . . . काण्डप्रश्नानु(प)पदाक्षराः ।।

इति वर्णक्रमदर्प(ण)प्रकरणम्।

वर्णानां संहिताकाले संधिकार्यं विधीयते।
संधिकार्यं न कुर्यात्तु . . . . प्रदर्शने ।।

वर्णान्ते. . . . साधकं . . . संयुतम् ।
अन्यत्र. . . . . वर्तन्ते अत्यन्तं सूक्ष्ममाचरेत् ।।

End:

. . र्थस्य नकारस्य ऊकारस्तैत्तिरीयके ।
तकारः शनयोर्मध्ये काठके परिकीर्तिते ।।

250

VB 431 धारणम्

Beginning:

गौतमस्य पक्र्कः । ओग्ना इ । तत शरथ्य च च्य शरात्यटि शटि शरकि चरट्ट ख्यशि । खश । म । कश्यपस्य बर्हिषीयम् । अग्न आयाहि वी । तुषी । रुत शरच्यशटीत्यराटचख्य शिरहरवर । म । गौतमस्य वै पक्र्कः । अग्न आयाहि वां शतया इ । कृति शरधूपशाखिणा ट शरा झ फच राश्य । हा इ सौपर्ण च त्वमग्ने यज्ञानां त्वमग्ना इ । षित्र शषि । आत्यरलत्य क्यच् । क आ ख प्ल रु प्ल श्य । हो इ दा म । वैश्वमनसञ्चादित्यसाम वा अग्निं दूतं तीषा रुषच् च्यश्यरिटि तव्यतरि ओ औ हो वा ।।

End:

कयुटच राथ्यर्चक कूल्रु . . . . . । मर्ष्टस्य धारया सुताः । . . . शुभी शयटचराटच च य हो टतर का क च क टचरव परि प्ल शटचम । एषास्य धारया सुताः । फीश्य का रथ्यर्च. . . . . गा यत्र परशु च । एषा । कुवाटचा रखप्ल रष्टकर्च कम्य खरी जटरवुरहं पाटीखर । म । सन्तिनीं च । एषा मु । त्यत शरवादिरख . . . . वाटीरखश ऋतु खराता शाख्य शम । ३१६.

इति सद्भाप . . . .

Colophon:

इति **सभापतिकृतौ धारणे** आग्नेयं पर्व समाप्तम्

Scribe adds:

कृष्णेन लिखितं पुस्तकमिदम्

253

VB 414 प्रतिहार (निदान) सूत्रवृत्तिः

Beginning: (4 folios missing)

. . . . . देतदुक्तमित्यर्थः . . . . . स्तोत्रमित्यनयोः प्रथमं द्रष्टव्यं बर्हिनिधनाभावे कथं कर्तव्यमित्याशङ्कचाह—त्रैधमन्तर्निधने ऋगन्तर्भूतमार्चकमेवाक्षरं निधनं

यास्मिन् तास्मिन्नृक् . . . . . यपदं त्रयं कर्तव्यम् । तत्रोदाहरणमाह—यथा गोराङ्गि-रसस्य कस्य नूनमित्यनयोराद्यस्य साम्न इत्यर्थः । चत्वार्यक्षराणि प्रतिहार . . . .

Folio 6

इति प्रथमः खण्डः ।।

[II Khaṇḍa] beginning:

एवं प्रतिहारस्य न्यायमुद्देशमुक्तम् । अथ समाननामधेयानां विनियोगनियमाङ्ग-सूत्रचतुष्टयम् ।

End:

. . . आयनीयस्य प्रतिहारस्य निर्मिता ।
वृत्तिर्**वरदराजेन** वामनार्यस्य सूनुना ।।
उपग्रन्थस्य वै **वृत्तिर्माधवार्येण** या कृता ।
तस्या वरदराजेन शेषापि क्रियतेऽधुना ।।
. . . श्चोक्ता कल्पब्राह्मणसूत्रं संहृत्य क्रतुषु विहितानाम् ।
अपि चैकार्षेयाणामिह विनियोगव्यवस्थोक्ता ।।
का तस्य छन्दोदैवता विनियोगानां तु . . . . ।
आर्षेयकल्पवृत्तौ क्रतुप्रयोगः क्रमानुसारेण ।।

Colophon:

इति प्रतिहारसूत्रभाष्यं संपूर्णम् ।
सामाब्धिपारगेण **वेङ्कटपतिना** श्रीवेङ्कटसुतेन ।
लिखितं . . . प्रतिहारभाष्यं सुसंपूर्णं **वरदराजकृतम्** ।।

Note:

This is a commentary on the pratihāra portion of *Upagrantha sūtra* of Kātyāyana MGR 649(a) in 14 Khaṇḍa-s. ALDC 1, no. 909 records the extent of commentary as 1-13 Khaṇḍa-s. TD No. 2044 gives the name as *Pratihāra nidāna sūtravṛtti*.

254

VB 432(b) **छन्दोगऋक्स्वरलक्षणम्**

Beginning:

अथ **छन्दोगऋक्**स्वरलक्षणम् । उदात्तस्वरितप्रचयानुदात्तभेदाच्चत्वारः स्वराः । केचित् स्वररूपमिच्छन्ति । उदात्तस्वरितानुदात्तभेदात् । तेषां क्रमेणोदाहरणम् । केचित् स्वरद्वयं

वदन्ति। उदात्तस्वरितभेदात्। केचित् सप्तस्वरं वदन्ति। उदात्तस्वरितप्रचयानुदात्तति-रोविरामक्षैप्रकम्पभेदात्। एतेषां क्रमेणोदाहरणम्। चतुष्टयपक्षे उदात्तस्वरितानुदात्तानां द्वैविध्यम्। प्रचयस्य त्रैविध्यम्।

सामवेदऋक्स्वरोच्चारणभेदः कथ्यते। अनेकोदात्तेभ्यः परस्योदात्तशिरस्कस्यानुदात्तस्य स्वरिततेत्यवगन्तव्यम्। यथा निहोता सत्सि बर्हिषि। समिद्धः शुक्र आहतः। . . . इत्यादि ।।

End:

अनुदात्तादुदात्तो भवति प्रचयोऽपि तिरोविरामश्च। प्रचयात् कम्पः। अनुदात्तो भवति तिरोविरामात् परश्च। प्रचयात् पर उदात्तो वा स्वरितो वा न भवति। स्वरितान्तरं भवति। स्वरितात् परं प्रचय एव न स्वरान्तरं स्वररेखा अङ्गुष्ठाग्रम् उदात्तस्य तर्जनीमध्यमाप्रचयस्वरित-कम्पानां मध्यमा मध्यरेखा अनुदात्ततिरोविरामयोः। एवं स्वरस्थानानि। अनुदात्तात् परं रङ्गप्लुतो भवति।

शतानि पञ्चाशीतिश्च पञ्च चाप्याखिला ऋचः।
इत्यारण्यकसामर्चे षट्पञ्चाशच्च विश्रुताः ।।
त्रिचेऽत्र शाक्वरे तिस्रः द्विपदाः पञ्चकानि षट्।
आग्नेयमाद्यं पर्वेन्द्रपावमाने ततः परे ।।
त्रिपर्वं सामवेदस्य सुहितेयमितीर्यते।
ओम्।
दीर्घस्था ते त्वाद्युदात्तः पर्वण्यभ्यास . . . दृतः ।।
मात्रास्थाने पदं तु स्यात् पदछलमितीरितम्।
त्रिकत्रिकविसर्गा ये दीर्घादिस्थानतां गताः ।।
तेषु सर्गफलं ज्ञेयं विसर्गज्ञातृभिर्बुधैः।
वर्गैस्तु दीर्घं विज्ञेयं व्यञ्जनैः पर्ववर्गगैः ।।
अञ्भिर्गात्रा च विज्ञेया तद्विशेषोऽभिधीयते।
पञ्च पञ्च च संख्याते शिष्टभूते च पञ्चके ।।
पञ्चवर्गास्तु विज्ञेया एवं दीर्घे च पर्वणि।
मात्रायां तु स्वरैः संख्या विज्ञेया दशभिस्तथा ।।

262

VB 947(e) षट्प्रश्नोपनिषद्भाष्यटीका-व्याख्या

Beginning:

जयतीर्थपूज्यचरणो गुह्यार्थषट्प्रश्नोपनिषद्भाष्यव्याख्यां कर्तुकामो ग्रन्थादौ मङ्गल-माचरति—**पान्तु न इति**। कमलायाः कबरीभारः तस्य सुरभीकरणे उद्यता इति विग्रहः।

नन्विति । कर्तव्यताभागपूरकब्रह्ममीमांसायामेव तथाविधन्यायानामुक्तत्वात् किमेतद्भाष्येणेति चेन्न । तत्राविशदानामुक्तानामप्यनुक्तन्यायत्वात् सूत्रभाष्येऽप्यसाकल्येन व्याख्यातत्वादत्र विशदीकरणेनाप्येतद्वीत्या शिष्याणामन्यत्रापि ते सुग्रहाः स्युरिति युक्तमेतत्करणमिति भावः ।।

End:

सुप्तौ जागर्त्यसौ नान्यः स्वप्ने रुद्रोऽपि चित्तगः ।
सुप्तौ सर्वाश्रयः प्राज्ञसङ्गोद्भूतसुखः स्वदृक् ।।
समग्रोंकारविज्ञानपूर्वकोपासना हरेः ।
मोक्षदान्यान्यफलदा तस्मादाद्यां समाचरेत् ।।
प्राणश्रद्धाशिवेन्द्रेन्दुवरुणाग्निगणाधिपाः ।
मरुत्पावकपर्जन्यस्वाहाबुधउषाः शनिः ।।
पुष्करश्चेति च हरौ कलाः षोडश संस्थिताः ।
इत्याद्यर्थपरिज्ञानं कोनेर्यायैः प्रयच्छतु ।।
षट्प्रश्नोपनिषद्भाष्यव्याख्याटीकां व्यधामहम् ।
श्रीनिवासाभिधो दासः **कोनेर्यार्यस्य** सद्गुरोः ।।
इति षट्प्रश्नोपनिषद्भाष्यटीकागङ्गासङ्गिगवचः समाप्तम् ।

290

VB 463(c) **अथर्वशिखोपनिषद्व्याख्या (उपनिषन्मङ्गलाभरणम्)**

Beginning:

अथ तृतीया प्रकीर्णकलाथर्वशिखा । अथ हैनं पैप्पलाद इत्यादि। अथ ह प्रागुपदिष्टोपास्त्यादिज्ञानानन्तरमेनं ह प्रसिद्धमथर्वाणं भगवन्तमुपसन्नः पैप्पलादः । पिप्पलादस्यापत्यं पैप्पलादः । स आङ्गिरसाः । स च सनत्कुमारो ब्रह्मपुत्रश्चोवाच । किमिति । हे भगवन् षाऽगुण्यपरिपूर्णं किं वस्तु आदौ ब्रह्मविद्याभ्यासादौ प्रयुक्तं कृतप्रयोगं सध्यानं ध्यानसाधनं स्वयमपि ध्यातव्यम् । आत्वाभावः छान्दसः । ध्यातव्यमपि भवति । एवमेकः प्रश्नः । किं तत् ध्यानं, ध्येयवस्तु ध्यानस्वरूपिणी देवता च का इति द्वितीयः । को वा ध्याता ध्येयवस्तुनो ध्यातृस्वरूपं च किम् इति तृतीयः । कश्च ध्येयः, उक्तध्यानादिपरिकरध्येयपदार्थश्च क इति चुतुर्थः प्रश्नः । एवं पृष्टः स भगवानथर्वा एभ्यः पैप्पलादादिभ्यः प्रत्युवाच——क्रमात् चतुःप्रश्नोत्तरं तत्र प्रथमप्रश्नोत्तरम् ओमित्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यातव्यमिति ।

End:

अपि च सर्वध्यानयोगध्यानानां योगजज्ञानानामिति यावत् । तेषां यत् फलं स्वर्गापवर्गादिरूपं तत्सर्वमोंकारः । तदुपासको वेदपर ईशो वा परमेश्वरो वा साक्षाद्भवति । यदेवमतः शिव एको

ध्येयः। शिवंकरो मोक्षप्रदः। सर्वमन्यत् तद्ध्यानप्रत्यूहं सर्वमपि स्त्रीपुत्रादिसंसारं **संन्यस्य**। समाप्ताऽथर्वशिखा तदाख्योपनिषत्। एतामुपनिषदमधीत्य द्विजो गर्भवासाद्विमुक्तः सन् विमुच्यते। आतुर्याशेषोपाधिभ्यश्च मुक्तः शुद्धातितुर्यं ब्रह्मैव भवति इत्येवमुपदिष्ट ओमोंकारः। सार्थः सफलः सत्यं सनातनं परमार्थप्राप्तिः साक्षात् साधनमित्यर्थः। तत्त्वमपि सत्यं परमार्थः। ओम्। इत्यु**पनिषन्मङ्गलाभरणे** षोडशप्रकीर्णकलायां तृतीया **अथर्वशिखा** समाप्ता ॥

296

VB 463(d) **अथर्वशिरउपनिषद्वचाख्या (उपनिषन्मङ्गलाभरणम्)**

Beginning:

अथ षष्ठी प्रकीर्णकला अथर्वशिरः। ओं देवा ह वा इत्यादि। ह वा ऐतिह्ये। देवा इन्द्रादयो ह वै स्वर्गं ब्रह्मलोकमगमन् विविदिषवः। गत्वा च ते देवास्तत्र नित्यप्रतिष्ठितं रुद्रं भगवन्तं दक्षिणामूर्तिरुद्रमादिगुरुं अपृच्छन्। किमिति। को भवानिति। कीदृक्स्वरूपस्वभावोऽसीति। एवं पृष्टः स भगवानब्रवीत्। किमिति। सोऽहं प्रथमं सृष्टेः प्राक् एक एवाद्वितीय एवासम्। सृष्ट्यनन्तरं सृष्टप्रपञ्चात्मना मृदिव घटाद्यात्मना वर्तामि च; संहारानन्तरं पुनश्च यथापूर्वमनेन प्रपञ्चात्मना भविष्यामि च। नान्यः कथंचिन्मत्तो व्यतिरिक्तः। एवंस्वरूप इति यतः तस्मात् सोऽहमेवान्तरान्तरमान्तरादन्तरपदार्थादप्यन्तरं सर्वान्तरं प्रत्यक् तत्त्वमेव प्राविशम्।

End:

अथोत्क्रान्त्यनन्तरं यो देवोऽध्यक्षः कोशः समुपपन्नः स्वशक्तये शरीरमात्रया समुत्पन्नः तस्य तच्छरीरमर्चिर्मार्गतः प्राणमण्डलं प्राप्तम्। प्राणो भगवान् ब्रह्मा मण्डलस्थोऽभिरक्षतु। ततो ब्रह्मलोकावृतं श्रयति (ततो ब्रह्मलोकं प्राप्तस्य) ब्राह्मलौकिकं सालोक्यसंपत्तिप्राप्तं निरतिशयैश्वर्यमन्नं ब्राह्मलौकिकं सर्वकामभोग्यकमथो तत्साधकं मनः ब्राह्मलौकिकसाक्षाद्विद्यापरिकरमभेदं च रक्षतु। सर्वापि रक्षाप्रमाणमण्डलायुक्त्यादरादत्यासश्रियमन्नमधो मन इति। अथो विद्यां तुर्यसंपत्तिकरीं सविभूतिभगवत्तादात्म्यरूपिणीम् अन्नमथो मनः व्याकृतं मोक्षम् अतितुर्यशुद्धतत्वसंपत्तिरूपं तस्य च परिरक्षणं नाम परिकरविलाससंकल्पानुदयरूपं तत्र त्वन्नं भोग्यं भूमानन्दमतितुर्यं ब्रह्मैव ॥

Colophon:

इति **श्रीमदुपनिषन्मङ्गलाभरणे** षोडशकले प्रकीर्णकलायां पञ्चदश्यां षष्ठी प्रकीर्णकला **अथर्वशिरउपनिषत्** समाप्ता ॥

320

VB 1101 **बोधानन्दगीता**

A metrical treatise summarizing the ten principal Upaniṣad-s.
Beginning:

ब्रह्मानन्दयतीन् नत्वा वाणीं गणपतिं तथा ।
दशोपनिषदामर्थः श्लोकरूपेण कथ्यते ।।
सर्वेषां सुखबोधार्थं **बोधानन्दा**ख्यसूरिणा ।
मुमुक्षूणां मोक्षकारी मुक्तानां मोदकार्ययम् ।।
तस्मादत्र प्रयत्नो मे रोचते विबुधोत्तमाः ।
दृष्ट्वेमं मोदमायान्तु साहसं च क्षमन्तु मे ।।
ईशावास्यमिदं सर्वं यत्किञ्चिद् दृश्यते जगत् ।
ईशोऽहमिकया भाति तस्मादहमिदं जगत् ।।
ज्ञानमेतत् पालयेथाः संत्यक्तेषणवान् भवेत् ।
तज्ज्ञानानधिकारीयं कुर्वन् वर्णाश्रमोदितम् ।।
नित्यनैमित्तिकं कर्म तेन शुद्धो भवेदयम् ।
कर्म कृत्वा वर्तमानो ह्यासुरेष्वेव जन्मसु ।।
जायमानो म्रियमाणो ब्रह्मादिष्वात्महा च सः ।
सर्वमन्त्रोदितं ब्रह्म चानेजन्मनसो जवम् ।।
इन्द्रियाणामगम्यं च तान्यतीत्येव गच्छति ।
तिष्ठत्यस्मिन् निर्विकारे मातरिश्वा जगत्प्रसूः ।।
सच्छब्दवाच्यं सकलं दृष्टवानिति हि श्रुतिः ।
सोपाधिकं तच्चलति नेजत्तन्निरुपाधिकम् ।।
अज्ञानामतिदूरे तत् सुज्ञानामात्मरूपकम् ।
अन्तर्बहिश्च परितः व्याप्य सर्वं व्यवस्थितम् ।।
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
यः पश्येन्न जुगुप्सेत तस्य शोकादिकं न हि ।।
तत् पर्यगात्तद्धि शुक्रं तद्हेहनयवर्जितम् ।

इति श्रीदशोपनिषदर्थतात्पर्यप्रकाशक-बोधानन्दगीतायां द्वितीयोऽध्यायः ।

End:

ब्रह्मानन्द इति ध्यानं खमध्य इति चापरम् ।
मूलमन्त्रः पूर्वमुक्तः तदर्थ इह कथ्यते ।।

वाय्वादि रमते यत्र वायु : . . उदाहृतः ।
निश्चलः परमाकाशः पुराणं खमिहोच्यते ।।
आनन्दपरमाकाशावभिन्नावद्वयत्वतः ।
अतः सुखं पराकाशः खं ब्रह्मेति प्रकाशितः ।।
कोटिदोषा विनश्यन्ति सकृदस्य प्रपाठतः ।
खं ब्रह्मेति महामन्त्रः सर्वमन्त्रफलप्रदः ।।
प्रज्ञानं ब्रह्म संध्यायन् खं ब्रह्म त्वं सदा स्मर ।
इति संबोधितो राजा विदेहानां प्रणम्य तम् ।।
त्वं पिता त्वं हि मे बन्धुरात्मानन्दं तवान्यतः ।
सहात्मना विदेहांस्त्वं गृह्णीष्वेत्यर्पयन् मुदा ।।
स च दत्तं समादाय पुनस्तं प्राह सादरम् ।
मद्दत्तराज्यं संरक्षन् सुखं विहर भूपते ।।
इत्युक्त्वा तं समापृच्छ्य स्वाश्रमं प्रजगाम सः ।
सोऽपि राजा महानन्दनिर्भरस्वान्त आस ह ।।
ओं तत् सत् ।
इति गीता महानन्ददायिनी श्रुतिगर्भिणी ।
ब्रह्मानन्दार्यशिष्येण बोधानन्दाख्ययज्वना ।।

Colophon:

इति बोधानन्दगीतायां द्वादशोऽध्यायः

325

VB 428 (a) भरद्वाजशिक्षा (व्याख्यासहिता)

Beginning as in ALDC I, p. 315.

End:

यत्स्थले यादृशः शब्दः तादृशः परिकीर्तितः ।

यथा मनसैव तद्यज्ञम् । यो वै यज्ञं योग आगत इति । पराङ्वाव यज्ञः । एष यो वै यज्ञं प्रयुज्यत । यमत्वन्ते देवाः । यमो वा इदमभूत् । इत्येकवचनात् । बिभ्यत इन्द्रमुपाधावन् ते देवाः । अमन्यन्त, इन्द्रो वै चतुष्पाद्धयश्वः समृद्धचै । अप्सु योनिर्वा अश्वः । अश्वःश्यामेवैनं । पचन्तू-रवे । मित्रैतां मुखं पचैषा । त्रिः सादयति सप्त । यद्गार्हपत्य उपसादयेत् । उभयोरुप-साधयति सर्वतः । यस्यैवमग्निराधीयते । यस्य वा अयथादेवतम् । संवत्सरोऽष्टादशः । यत् संवत्सरमेव तैः । कश्चिद्धवै । कश्चित्स्वं लोकम् । स प्रति इत्यादि ।। ११५ ।।

लिङ्गविभक्तिरूपैश्च वर्णा ज्ञेया विचक्षणैः ।

यथा याच्चैवास्य । ऋध्नोत्येव । य एषामेवं बन्धुतां वेद इत्यादिपुंलिङ्गबहुवचनत्वादित्यादि विज्ञेयम् ।।

क्रम इंग्यं च कण्ठोक्तिर्यजुरादि पदद्वयम् ।
पदसांख्यं सर्वसांख्यमवधानाष्टकं विदुः ।।
यो जानाति **भरद्वाजशिक्षा**मर्थसमन्विताम् ।
ब्रह्मस्थानं स आप्नोति गृहमेधी गृहं यथा ।।
व्यासलक्ष्मीभरद्वाजशंभ्वापिशलिनिर्मिताः ।
कौकलेयकालात्रेयारण्यशिक्षा नव स्मृताः ।।

Colophon:

भरद्वाजशिक्षा संपूर्णा ।।

Scribe adds:

सर्वजिन्नामसंवत्सरचैत्रशुद्धसप्तमी अटिवाण्ड्लु नाल्लु गोडवर्ति शिङ्करराचार्येण एतत्पुस्तके भरद्वाजशिक्षाव्याख्यानं लिखितम् ।।

330

VB 427 **सर्वसंमतशिक्षा (व्याख्यासहिता)**

Beginning:

अविघ्नमस्तु ।

गणेशं वरदं देवं प्रणिपत्य गजाननम् ।
द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसंमतम् ।।

गणेशमिति । गणेशं गणपतिं वरदम् इष्टदं देवं विघ्नानां विजिगीषुं गजाननं गजवक्त्रं प्रणिपत्य भक्तितो नत्वा द्वित्वादीनां द्वित्वमादिर्येषां द्वित्वपूर्वागमविकारादीनां सर्वेषां तैत्तिरीयशाखोपयोगिनां प्रातिशाख्यप्रभृतीनां लक्षणानां संमतं समानार्थं, लक्ष्यन्ते प्रकाश्यन्तेऽनेनेति लक्षणं, प्रवक्ष्यामि । निर्दोषं प्रपञ्चयिष्यामि । 'स्वराद् द्वित्वमवाप्नोति व्यञ्जनं व्यञ्जने परे' । स्वरादिति । अथ वर्णसमाम्नाय इत्यारभ्य व्यञ्जनशेषो घोषवानित्यन्तानि वर्णसंज्ञापराणि सूत्राणि अनुसृत्य व्यवहरन्त्याचार्याः । स्वरादुत्तरं व्यञ्जनं, व्यञ्जने परे सति द्वित्वं, द्वयोर्भावं समानाक्षरं वर्णद्वयमवाप्नोति, यथा यज्ञस्य उरु प्रथस्व । स्वरादिति किं? प्रजननं ज्योतिः । व्यञ्जनमिति किं? प्रउगं, उकारे माऽभूत् । व्यञ्जने पर इति किम्? जातवेदसं, प्रातिशाख्ये स्वरपूर्वव्यञ्जनं द्विवर्णं व्यञ्जनपरमिति ।।

End:

स्वरवर्णानिति तत्र तत्रेति पुराणादावित्यर्थः ।। १३१ ।।

हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ।। १३२ ।।

हस्तेनेति स्पष्टोऽर्थोऽसावेव ।

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम् ।। १३३ ।।

पदक्रमेति—पदादिवित्, वर्णलक्षणज्ञानी च । स्वरादिवेत्तापि ब्रह्मविष्टपसभां यायात् ।

सूरिदेवबुधेन्द्रस्य नन्दनेन महात्मना ।
प्रणीतं **केशवार्येण** लक्षणं सर्वसंमतम् ।।

सूरिदेवेति । एष तु स्पष्टोऽर्थः ।। इत्याभू**रिमञ्चिभट्ट**विरचितं सर्वसंमतशिक्षाविवरण-मतिनिर्मलम् ।। हरिः ओम् ।।

संवत्सरेऽस्मिन् युवनाम्नि याम्ये पथि स्थिते चापमशीतभानौ ।
भागोऽप्युडौ मन्ददिने समाप्ता व्याख्या मता सर्वजनस्य शिक्षा ।।
सर्वसंमतशिक्षाया व्याख्यानं लिखितं त्विदम् ।
शेषाद्रिसूनुना वेङ्कटसुब्रह्मण्येन सूरिणा ।।
विसर्गबिन्द्वक्षरश्रृङ्गपादहीनं मया यल्लिखितं प्रमादात् ।
तत्क्षन्तुमर्हन्ति दयालवालाः सन्तः सदा हस्तकृतापराधम् ।।
गुरुचरणजलभवं सकलाज्ञानध्वान्तसहस्रकिरणम् ।
प्रणतभक्तजनवाञ्छताधिकप्रदं मद्धृदयाब्जे
दिवानिशं संनृत्यतु ।। तमेव विश्वसिमो वयम् ।।

346

VB 73(a) आश्वलायनश्रौतप्रयोगः (कर्मप्रदीपिका)

Beginning:

श्रीनृसिंहं महादेवं महागणपतिं क्रमात् ।
प्रणम्य मातापितरौ लिखामि ब्रह्मदीपिकाम् ।।

तत्र प्रथमं दर्शपूर्णमासयोः प्रयोग उच्यते । अथ ब्रह्माणं त्वामहं वृण इति यजमानेन वृतो भूत्वा, वृतोऽस्मि करिष्यामि इति संकल्प्य, आहवनीयस्येशानदिग्भागे प्राङ्मुखोऽवस्थाय तत्रैवोपविश्याचामेत् ।

Fol. 12a

अथ संस्थाजपेनोपतिष्ठते । उदवसानीयाया इष्टिकरणपक्षे कृ . . . . . प्रकृतिवत् । पूर्णाहुतिपक्षे तु न किंचिद्ब्रह्मप्रयोगः ।

उक्तः पश्विष्टिसोमानां ब्रह्मकर्मप्रदीपकः ।
ऋक्च्छाखिनां हितायैष **श्रीकण्ठेन** मनीषिणा ।।
आश्वलायनसूत्रस्य वृत्तिं नारायणोदिताम् ।
दृष्ट्वा कृतममुं ग्रन्थं शोधयन्तु विपश्चितः ।।

इत्यग्निष्टोमः समाप्तः ।

अग्निष्टोमोक्थ्यसंस्थायां ब्रह्मकर्म प्रकीर्तितम् ।
अत्राग्निष्टोमादिसंस्थाया अधुना क्लृप्तिरुच्यते ।।

आग्निमारुतान्तं अग्निष्टोमवत् ।

Fol. 12b End:

अतिरात्रे षोडशिरात्रान्ते षोडशिवत् । मृगतीर्थेन सर्पणम् । रात्रिपर्याये द्वादशस आश्विने च समाख्याभक्षणम् । अप्तोर्यामे सर्वमतिरात्रवत् । षोडशिमृगतीर्थसर्पणवर्जम । अतिरिक्थ्येषु समाख्याभक्षणमविकृतम् । सर्वत्र यज्ञपुच्छं समानम् ।।

Colophon:

समाप्तोऽप्तोर्यामः

367

VB 359(a) **आश्वलायनश्रौतप्रायश्चित्तप्रयोगः**

Beginning:

अथ स्विष्टकृत्प्रायश्चित्तान्युच्यन्ते ।

गणेशं शंकरं नत्वा कल्पकारं ततः परम् ।
प्रायश्चित्तानि वक्ष्येऽहं कर्मवैगुण्यशान्तये ।।
शान्त्यादि प . . ञ्च प्रस्तोता स्खलितो यदि ।
पुनर्हुत्वा तदाज्येन महाव्याहृतिभिर्हुनेत् ।।
इष्टचंगसाम्नां भ्रेषश्चेद् विशेषोऽत्र प्रकथ्यते ।
विष्ण्वर्चमुक्त्वा . . . ता जुहुयात् सर्पिषाहुतीः ।।
प्रवर्ग्योद्वासनात्पूर्वं प्रायश्चित्तानि यानि च ।
प्राग्वंशे तानि सर्वाणि हुनेदाहवनीयके ।।

प्रवर्ग्योद्वासनात्पूर्वं प्रायश्चित्तक्रियां बुधः ।
वह्नावुत्तरवेदेश्च प्रकुर्यात् स्रुवसर्पिषा ।।
यजुर्मन्त्रास्तु ये लुप्ताः प्रमादाद्यदि तान् पुनः ।
उद्गातारो जपित्वाथ जपेयुर्व्याहृतित्रयम् ।।
आप्यायने निह्नवने यद्यप्यन्तरिते पुरा ।
सु ब्रह्मण्यात् पुनः कुर्युस्तदूर्ध्वं तज्जपः स्मृतः ।।
गायत्र्याः पाद . . . मधुपर्को भवेद्यदि ।
उद्गाता तां ततः कुर्याद् व्याहरेद्वचाहृतीस्ततः ।।
देवताव्यत्यये लोकद्वारसामसु संमतः ।
भ्रष्टे च कुर्या . . प्रायश्चित्तं विचक्षणः ।।
सर्वप्रायश्चित्तमिति समस्तान्ताहुति स्मृता ।
आदौ तु प्रणवं कृत्वा भूर्भुवःसुवरिति स्फुटम् ।।

End:

प्रातःसवने ऐन्द्रं वैश्व . . . . व्यजिने मरुत्वतीयमाहेन्द्रौ तृतीयसवने वैश्वदेवान्ततो ग्रहाः हुताहुतहोमसंसर्गे परिध्यन्तरेऽङ्गारात् प्र . . . हुतस्य चेत्यादिना होमः ।। भक्षणार्थमाहृते सोमे केशकीटाद्युपहते तमुत्तरपूर्व उपरवे प्रजापतये जुहोति सामवेदविहितजुहुतौ उद्गातैव कर्ता । भक्षणस्य लोपः हिरण्योदकं कृत्वा । केचित् भक्षणं कुर्वन्ति । तत्र सर्वप्रायश्चित्त . . . भक्षणार्थमाहुते सोमे वर्षबिन्दुनोपहते इन्दुरिन्द्रमुपागात्तस्य इन्द्रबिन्दुपीत . . . . . .

अनाज्ञातप्रायश्चित्तेषु अनाज्ञातं पुरुषसंमित इति द्वे स्रुवाहुतीर्जुहुयात् । अन्वाहिताग्नेश्चोरव्याघ्रादिभ्यो न क्षणमात्रमस्मिन् ग्रामे . . . . . स्थातुं शक्यमिति बलवद्बाधकप्रयाणप्रसक्तौ तुभ्यं ता अङ्गिर+येमिरे स्वाहा अग्नये कामायेदमित्याहवनीये हुत्वा ।

स्वाहेति सर्वेषु वा निमित्तेषु प्रतिनिमित्तद्वयं तु भूयात् । तद्धिरण्यं ब्रह्मणे देयं . . . . इति प्रायश्चित्तानि ।

368

VB 385 आश्वलायन-श्रौतप्रायश्चित्त-प्रयोगः ।

Beginning:

विध्यपराधप्रायश्चित्तम् । विधिशब्देन विहितमुच्यते । विहितस्याकरणे अन्यथाकरणे प्रायश्चित्तिः+संधानं वि . . . नष्टसंधानं प्रायश्चित्तिरित्युक्ता भवति । तथा च विध्यपराधप्रायश्चित्त . . . यद्विहितमस्ति तदेव कर्तव्यम् । नास्ति चेद्वचाहृतिहोमः कर्तव्यः । एतदेव

सर्वप्रायश्चित्तमुच्यते । एवं च सति यथाकथंचिद् विधिसंपादने सति प्रायश्चित्ताभाव उक्तो भवति । प्रायश्चित्तकालस्तु निमित्तानन्तरमेवेत्युत्सर्गः ।।

End:

तृचं ब्रूयात् । समिद्धस्ते ह्यथ वाग्यतो विहृता ज्वलतो श्रुत्वा आचम्य आहिताग्निस्तीर्थेन गत्वा आहवनीयस्य वायव्यदिश्यवस्थाय विश्व दानिमा भ+रिषाम गार्हपत्ये । अयमग्निः पुरीष्ये रयिर्मा पुष्टिवर्धनः अग्निः पुरीष्याभिद्युम्नमभि सह आयच्छ स्वाहा । दक्षिणाग्नौ अभयं नो अभयं मे अस्त्विति पूर्ववदुपस्थाय । . . . रामथगाथित्वा भूर्भुवः सुवः इति वाचं विसृजेत् । दशरात्रादूर्ध्वं प्रवा समापद्येत । तदा चतुर्गृहीतमाज्यं हुत्वा । मनो ज्योतिः+घृतेन स्वाहेति मनसे ज्योतिष इदमाज्य . . . . ननं तूष्णीम् अग्निहोत्रहोमे च विच्छेदाहुतिमिमां जुहुयात् । प्रतिहोममेके । . . . . वोऽस्मासु च प्रजायध्वम्, मा च वो गोपातिरीषदिति प्रतिपद्यते । गृहानहं सुमनसः प्रपद्ये । वीरघ्नो वीरवतः सुवीरान् वहत त . . . मुक्षमाणास्तेष्वहं सुमनाः संविशानीति ।।

Colophon:

इति श्रौतप्रायश्चित्तम् ।

373

VB 76(c) आपस्तम्बश्रौतसूत्रम्

Beginning:

अक्षय्यं वै चातुर्मास्ययाजिनः सुकृतं फलं भवति । फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजते । पूर्वस्मिन् पर्वणि पञ्चहोतारं मनसानुद्रुत्याहवनीये संग्रहं हुत्वान्वारंभणीयामिष्टिं निर्वपति वैश्वानरं द्वादशकपालं पार्जन्यं (च) चरुम् ।

End:

तेनेष्ट्वा सौत्रामणीर्यजेत । मैत्रावरुण्या चामिक्षाया यावज्जीवं न केचन प्रत्यवरोहेत् वृहस्पतिसवेन वा प्रत्यवरोहणीयेन यजेत । श्वेतच्छत्री भवतीति विज्ञायते ।।

Scribe adds:

सुब्रह्मण्यमहीन्द्रेण लिखितो जयवर्षके ।
पशुप्रश्नो नभोमासि सौरे वारे जयत्यलम् ।।
सुब्रह्मण्यमहीसुरो लिखितावांस्तस्मिन् पशुप्रश्नके
वर्णादक्षरपङ्क्तिहीन . . . . . मतोऽपि . . . ।।
. . . . रुसंज्ञे सप्तमे वर्षे मासि श्रावणसंज्ञिके ।
पौर्णमास्यां रवेर्वारे पशुप्रश्नो ऽलिखत् स्वयम् ।।

सुब्रह्मण्येन लिखितं दर्शादिश्रौतसंपुटम् ।
चातुर्मास्यादिसूत्रेण सहितं प्रीतिरादरात् ।।

405

VB 378(b) **आपस्तम्बश्रौतसूत्र-भाष्यवृत्तिसंग्रहः**

Beginning:

नमस्त्रैलोक्यनिर्माणत्राणसंहृतिकर्मणे ।
चित्सदानन्दरूपाय विष्णवे परमात्मने ।। १ ।।
आपस्तम्बमुनिं धूर्तस्वामिनं च कपर्दिनम् ।
श्रीरामं हरदत्तार्यं सोमपं तालवासिनम् ।। २ ।।
एतान् महात्मनो नित्यं प्रणमामि पुनः पुनः ।
मयूरवाटग्रामस्थावधानान्वयसंभवान् ।। ३ ।।
श्रीचोक्कनाथयज्वादीनस्मद्वंशप्रदीपकान् ।
श्रीवामदेवयज्वानं वेदवेदान्तपारगम् ।। ४ ।।
सर्वक्रतुविदं पौण्डरीकयाजिनमुत्तमम् ।
अस्मत्तातं सदा सम्यगसकृत्प्रणमाम्यहम् ।। ५ ।।
भाष्यवृत्तौ च तात्पर्यगूढत्वाद् ग्रन्थविस्तरात् ।
श्रीरामवृत्तिमालोक्य बालानां सुखबुद्धये ।। ६ ।।
नृसिंहयज्वना वृत्तिसंग्रहः क्रियते मया ।
आदौ कालस्ततः संस्थाविशेषास्त्विधान्यपि ।। ७ ।।
द्रव्याणि सूत्रक्रमतो भात इत्यादि च स्फुटम् ।
पर्वप्रतिपदोः संधौ विप्रकर्षः परः स्मृतः ।। ८ ।।
विप्रकर्षः पौर्णमास्याममायां संनिकर्षकः ।
विप्रकर्षः परश्चन्द्रादित्ययोः सर्प उच्यते ।। ९ ।।
स कालो वर्तते रात्रौ संध्यायां वापराह्णके ।
तत्रैव चन्द्रमाः पूर्णस्तद्युक्तदिवसे वसेत् ।। १० ।।

Fol. 3. Colophon:

नृसिंहयज्वना रामवृत्तौ रचितसंग्रहे ।
प्रथमे प्रथमः प्रश्ने वृत्तिसार उदीरितः ।।

End:

यज्ञसंबन्धविच्छेदबुद्ध्यान्तर्वेदिसाधनम् ।
अभिचरेद्योपवेष इत्यादिनिरमुं नुद ।।

पञ्चभिस्तिसृभिर्ऋग्भिर्यजुर्द्वयमुदीरितम् ।
विमोचनं जपित्वैव संख्यायोद्वासनं मतम् ।।

411

VB 42 आपस्तम्बश्रौतसूत्रवृत्तिः (प्रयोगरत्नमाला)

Beginning:

यो वेद वपुराचारावयवो दर्शनेन्द्रियः ।
मामुन्नयन्नन्तरास्ते तं विज्ञानगुरुं भजे ।।
कर्म . . . . . पले ।
व्याख्याति **चौण्डपाचार्यः** साङ्गमाधानमादरात् ।।

तत्र तावत् श्रुतिस्मृत्याचारैः सर्वश्रौतकर्म . . . . . योग्यतासिद्धयर्थं प्राणाधानादधिकारिशुद्धिः कर्तव्यतया विज्ञायते । तत्राग्न्याधानं प्रकृत्य भगवतीति श्रुतिः ।

End:

तत्राश्वलायनः—

तृतीयं सामिधेन्या वा वपते प्रागुपोक्त(त्त)मायाः ।
पृथुपाजा अमर्त्य इति द्वेधा . . . . . क्तः ।।
एते प्रतीयात् पुष्टिमतावग्निना रयिमश्नवत् ।
गयस्फानो अमी वहेत्यग्नीषोमाविन्द्राग्नी विष्णुरिति ।।

413

VB 43 आपस्तम्बश्रौतसूत्रवृत्तिः (प्रयोगप्रदीपिका)

Beginning:

वेदवेद्याय नाथाय जगतामादिहेतवे ।
नमो विज्ञानदेहाय शिवाय परमात्मने ।।
आपस्तम्बाय मुनये . . . सूत्रकृतां पुरः ।
चिन्तामणित्वमभ्येत्य ब्रह्मभूयमुपेयुषे ।।

आपस्तम्बसूत्रस्य धूर्तस्वामिव्याख्यानुसारेण शास्त्रान्तरसिद्धानविरुद्धानप्युपसंहृत्य दर्शपूर्णमासादारभ्य वाजपेयपर्यन्तानां कर्मणां प्रयोगवृत्तिः क्रियते । तत्र सोमान्तानि नित्यान्यफलार्थिनापि कर्तव्यानि नैमित्तिकमेतत् . . . संस्तुतमिति **वसिष्ठ**वचनात् । सर्वाङ्गोपसंहारस्यासमर्थ-

स्यापि कर्तव्यानि । अन्धपङ्ग्वादीनां निवृत्तिरेव । केचित् तेषामपि कर्तव्यानि श्रोत्रियस्य कृतदारस्य । कर्तव्यानि अनधीतस्यापि साधोः । दर्शपूर्णमासशब्दौ कालविशेषयोर्वचनौ तयोः कालविशेषयोराग्नेयादीनि क्रियन्त इति लक्षणया वृत्तिः । नापि मुख्यकर्मणि लक्षणेति **मीमांसकानां** मतम् ।

Colophon:

चतुर्थः पटलः

End:

संस्कृति . . . स्सुत्यामा देवता अनागतपशोरन्यं तद्रूपवर्णपयसमुपाकृत्य यजेत । यदि वपाहोमविधानं वा स्कन्धे . . . आ . . . तम पुष्कलदानं कृत्वा . . . हुत्य . . . . . इति जुहोति । अग्निर्देवता आ शु . . . . . न्न पुष्कलदानं कृत्वा भूपतयं इत्यादि . . . . . .

414

VB 49 **आपस्तम्बश्रौतसूत्रवृत्तिः (प्रयोगप्रदीपिका)**

Beginning:

अथ सोमप्रयोग उच्यते । शोधयित्वाऽऽत्मानं सरान् प्रशाम्य सर्वहवनानि पवित्रेष्ट्यादीनि यः करोति स सोमयागवान् । सोमः ओषधिविशेषः । तत्कर्मनामधेयं, तेन यक्ष्यमाणः तस्य सोमेन यक्ष्यमाणस्य पिता पितामहो वानिष्टप्रथमयज्ञः स. . . न्द्राग्निनेष्ट्वा सोमेन यजेत ।

End:

एषा त्रैविद्यवृद्धेन **तालवृन्तनिवासिना** ।
सोमपेन कृता वृत्तिः **प्रयोगस्य प्रदीपिका** ।।

Colophon:

इत्यापस्तम्बसूत्रे प्रयोगवृत्त्यां तालवृन्तनिवासिना कृतायां प्रयोगप्रदीपिकायामग्निष्टोमः समाप्तः ।।

423

VB 378(d) **आपस्तम्बश्रौतसूत्रवृत्तिः**

Beginning:

एकाहेष्वहीनेष्विति . . . प्राकृतीर्दक्षिणा ददाति । एकाहेष्वहीनेषु निर्दिष्टदक्षिणेषु च प्राकृतीर्दक्षिणा ददाति चोद . . . . . वादः सर्वक्रतूनां प्रकृतिरग्निष्टोम इति वक्ष्यति । तेषां

द्वादशाहेनाहीनभूतेन कल्पो व्याख्यात इति। यथासमाम्नातं वा। यस्तु यत्र ऋतुसंयोगेन चोद्य . . . . श्वश्चतुर्यादृक्षिणा। अश्वः श्वेतो दक्षिणा। . . . उपहन्तीत्यतिरिक्तो यावतीर्वा ऋतोः स्तोत्रीयास्तावत्यो दक्षिणा एतद्धि यज्ञक्रत्व ऋतपेयेन यजेतेत्युक्त्वा मितं सो . . . पशनूनां न दद्यात् अनृतं कुर्यादिति। एवमादीनामेवं तत्र प्रकृतीनां प्रस्वाम्नानात् प्रतीयेत ।।

End:

आदशमाहनम्। अश्वसहस्रमुत मेऽश्वशतं वा। तत्र गावः। तेन सर्वाम् ऋद्धिमा . . . ति। परमेष्ठितां गच्छतीति फलवादः । परमेष्ठिस्थानं गच्छतीत्यर्थ :। अथ वा कर्मजदेवत्वे कर्म भूयः परमेष्ठितामेतीति स्यात्। अभ्यासङ्गचः षडहश्चतुष्टोमोऽग्निष्टोम इति व्याख्यातः। अभ्यासङ्गचश्चतुष्टोमाः त्रयश्छन्दोमा अतिरात्रः। अथैकाहमभ्यासङ्गचः पञ्चाहश्चत्वारश्छन्दोमाः महाव्रतम्। विश्वजित्सर्वपृष्ठोऽतिरात्रः। एतदपि व्याख्यातम्। षष्ठमहतो क्रियत इति। सप्तमः पटलः। अथ सवनानां व्याख्या . . .

425

VB 55 आपस्तम्बश्रौतसूत्रवृत्तिः (सूत्रदीपिका)

Beginning:

. . . . . समानं भयहरं श्रियावृतमनुत्तमम्।
भक्तानामभयं दातुमुद्यन्तं तं भास्करं . . . . .
. . . रचिताया दीपिकायास्सदा
दीप्तावक्षर . . धिकघृतैः संपूरितुं संगते. . . .
आज्ञाश्रुतिस्मृती यस्य यस्य यज्ञास्सभाजनाः।
नमः परस्मै विश्वस्मात्तस्मै श्रीवत्सवक्षसे।।
आदिमं ब्रह्मणः कोशमध्यस्थितपरावरम्।
अपास्ताशेषपाप्मानमापस्तम्बं मुनिं स्तुमः ।।

Fol. 4a.

इत्येवमाचतुर्थात् कर्मणो येऽनुसंधीयन्ते पदार्थाः ते अध्वर्युगृहाः। य एवं वेद। य एते अध्वर्युगृहा इति वेद सोऽपि गृहवान् भवतीत्यर्थः। . . . . .

. . . र्थत्वात् फलवचनं प्ररोचनार्थं यथा यो वा अध्वर्योः प्रतिष्ठां वेद यो वा अध्वर्योरायतनं वेदेत्यादौ। . . . . .

. . . व्यं यजमानस्येदमेवं विदुषः फलमिति। चतुर्थग्रहणं यावच्छक्त्यस्योपलक्षणम् अनुसंधानाधिक्ये गुणाधिक्यात्। तथा अध्वर्युग्रहणमपि सर्वर्त्विजामु . . . . . साम्यात्।।
प्रथमः पटलः।।

End:

यथाऽह **बोधायनः**—सायंप्रातरग्निहोत्रे प्रतिजुहोतीति। सूत्रकाराभिप्रायस्तु सायमाहुति-श्रुतिस्तावन्नित्याया एव सायमाहुतेरतिपन्नकालाया गौणकालानुज्ञार्था प्रातराहुतिश्रुतिरपि प्रसङ्गात् भाविन्याः प्रातराहुतेरनुवादिका, न त्वग्निहोत्रविधायिकेति। अत एवोक्तं . . .

काले प्रातर्होममिति। केचित्तु सोमाङ्गमेवोभयमिच्छन्ति। संतिष्ठते अग्निष्टोम इत्युत्तरत्र वचनात्। तथा चोदवसानीयां प्रकृत्याह **कात्यायनः**। तदन्ते सायमाहुतिः। सोमाङ्गं संनिधि-विरोधाभ्यां नित्या व . . . प्रागुदवसानीयेष्टेः अग्निहोत्रेऽनधिकारात्। यथोक्तं श्रुतौ। एतया पुनराधेयसंमितया . . . . जुहुयादिति। सर्वप्रायश्चित्तं तु होतव्यम्। उदवसानीयोत्कर्षात् . . . क्रतुवशाद् उत्कर्षो नात्र प्रायश्चित्तम्, यथातिरात्रादौ। **भारद्वाज**स्तत्राह—सुत्या यदाग्निहोत्र-कालोऽप्यतीयात् सायमग्निहोत्रप्रभृत्यग्निहोत्राण्यतिपन्नानि प्रति जुहुयान्न वा प्रतिजुहुयादिति॥

गतः। संतिष्ठतेऽग्निष्टोमः। त्रयोदशे सप्तमः पटलः।

Colophon:

इति **भट्टरुद्रदत्त**प्रणीतायाम् आपस्तम्बसूत्रवृत्तौ **सूत्रदीपिकायां** त्रयोदशः प्रश्नः॥

Scribe adds:

कोदण्डं त्रिदशेन्द्रमुख्यविबुधप्रत्यूषमस्मिन् गते
भानावब्दसहस्रपूजनफलाद् देवैकवारार्चने।
विद्वज्जीवितरुद्रदत्तरचितश्रीदीपिकालेखनै-
र्ब्राह्मीपूजनमक्षराक्षतसुमैर्द्रग्धिर्मराजोऽकृत॥
यन्नामधेयदम्भोलिकेलिसंतुष्टमानसाः।
लोकास्तं परमात्मानं वन्दिषीमहि भास्करम्॥
. . . . . संजाता पुनीते जाह्नवी जगत्।
भक्तप्रसन्नं श्रीकृष्णं तं सभाजयिषीमहि॥
भास्करायाखिल . . . . . .

453

VB 76(b) **आपस्तम्बश्रौतप्रयोगः**

Contents:

1. दर्शपूर्णमासप्रयोगः 2. आधानप्रयोगः 3. पशुबन्धप्रयोगः 4. मृगारेष्टिप्रयोगः 5. पवित्रेष्टिप्रयोगः 6. आग्रयणेष्टिप्रयोगः 7. विभ्रष्टेष्टिप्रयोगः 8. पथिकृन्मुखप्रयोगः 9. अन्वारम्भणीयेष्टिप्रयोगः 10. सौत्रमणिप्रयोगः 11. चातुर्मास्यप्रयोगः (कारिका-सहितः)

Beginning:

अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य संकल्पं करोति । दर्शेन यक्ष्ये अनुनिर्वाप्यैन्द्र इवैति . . . धे . . . अह . . . पूर्णमासेन यक्ष्ये, तेन परमेश्वरं प्रीणयामि ।

Fol. 53b.

सुब्रह्मण्यमहीन्द्रेण लिखितो जयवर्षके ।
पशुप्रश्नो नभोमासि सौरे वारे जयत्यलम् ।।
सुब्रह्मण्यमहीसुरो लिखितावांस्तस्मिन् पशुप्रश्नके ।
वर्णादक्षरपङ्क्तिहीन. . . . . तितोपि ।।
कस्संज्ञे सप्तमे वर्षे मासि श्रावणसंज्ञके ।
पौर्णमास्यां रवेर्वारे पशुप्रश्नोऽलिखत्स्वयम् ।।

End:

तस्मिन् पशुसोमौ चातुर्मास्याङ्गभूतौ उच्येते । पशुसोमयोरन्यतरेण निष्ठावन्त आगामि फाल्गुन्याश्चैत्या अर्वाक् दोषो नास्ति । तयोरतिक्रमे सर्वप्रायश्चित्तं केचित् पथिकृद्वैश्वानरी चेति । यः सकृदेव चातुर्मास्यं प्रयुङ्क्ते तस्य सोमः पशुः ।

Colophon:

चातुर्मास्यप्रयोगः समाप्तः ।।

465

VB 352(c) **आपस्तम्बश्रौतप्रयोगः**

Beginning:

अग्निहोत्रं व्याख्यास्यामः । संकल्पः । धृष्टिरसि ब्रह्मयच्छेत्युपवेषमादाय । हे उपवेष (त्व)त्वं धृष्टिरसि । प्रगल्भोऽसि । अग्नेः प्रादुष्करणे उद्धरणे च समर्थोऽसि । ब्रह्मा । वेदं तं प्रादुष्करणम् उद्धरणरूपं कर्म यच्छ धेहि । साधयेति यावत् । गार्हपत्यमभिमन्त्रयते सुगार्हपत्यो विद . . . न्नरात् सुधेहि ।

End:

आपो ह श्रीरस्तु वर्चस इति शिरस्यप आनयति । आपः । आपो नाम श्लेष्मस्वपदार्थ-संधायकं वस्तु । प्रथमं सर्वापेक्षया अग्नि . . . . ष्टिकाले उत्पन्नमभूत् । येन उदकेन वरुणः अधस्ताद् धृतः । येन उदकेन मित्रः सूर्य उपरिष्टाद् धृतः । येन देवाः इन्द्रं स्वराज्यमभ्यषिञ्चन् । येन उदकेनाहं मामभिषिञ्चामि ।।

468

VB 356(a) **आपस्तम्बश्रौतप्रयोगः**

Beginning:

... न्नमावास्यायां पौर्णमास्यां च सुत्या यथा स्यात् तथोपक्रमः कर्तव्यः। एका दीक्षापक्षे एकादश्यामुपक्रमः। तिस्रो दीक्षापक्षे नवम्यामुपक्रमः। यस्य पित्रादयो निष्ठा ऐन्द्राग्नेन इष्ट्वा। अथ सोमेन यजेत। अपि वा अग्नीषोमीयस्योपालम्ब . . . र्थाद्यून . . . वीरान् . . . वाचोनङ्ग . . . नाम् तेभ्यः सोमं प्राह। दर्भेष्वासीनः, दर्भान् धारयमाणः, पत्न्या सह, प्राणानायम्य, संकल्पं करोति। अस्यां पुण्यतिथौ त्रिपुरुषसोमपीतविच्छेदप्रायश्चित्तार्थं ऐन्द्राग्नं पशुं . . . पत्यनिर्हरणार्थम् आश्विनं च पशुम् अग्नीषोमीयेण पशुना सह उपालम्भं कुर्वति सोमेन यक्ष्ये ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरसाम्ना एकविंशतिदक्षिणेन स्वर्गं लोकमवाप्नुवानीति संकल्पः।

End:

चित्तिस्रुक् आस्मासु नृम्णंधा स्वाहा। वाचस्पतये ब्रह्मण इदम्। तमग्निं परित्यज्य। अथ सायमग्निहोत्रं होष्यामि। धृष्टद्या दानादिमार्जनान्तं काले प्रातर्होमम्। संतिष्ठतेऽग्निष्टोमोऽग्निष्टोमः।

Colophon:

सोमपञ्चकं समाप्तम्।

Scribe's note:

ईश्वर-ऐष्पशि १३, सोमपञ्चकं समाप्तम्। गणपतिसुब्रह्मण्यस्वहस्तलिखितम्।

474

VB 375(b) **आपस्तम्बश्रौतप्रयोगः**

Beginning:

अथातः पैतृमेधिककर्मोच्यते। यस्य कस्य पुरुषस्य स्त्रियो वा मरणसंशयः, स्नापयित्वा धौतवासः परिधाय . . . यथोक्तसर्वप्रायश्चित्तं कृत्वा गोमयेनोपलिप्य कुशास्तृतभूमौ दक्षिणशिरसं निधाय, कर्ता प्राणानायम्य; एवंगुणविशेषणविशिष्टायां पुण्यतिथौ पितुः, गोत्रस्य शर्मणः सुखेन प्राणोद्गमनसिद्धयर्थम् उत्क्रान्तिसंज्ञकगोदानं करिष्ये। इति संकल्प्य, ब्राह्मणमभ्यर्च्य . . .

End:

पुनश्चतुर्गृहीतेन सोमाय स्त . . . म वाहुतः अशिताभ . . . हव्या गृभाय स्वाहा। सोमायेदम्। पुनश्चतुर्गृहीतं गृहीत्वा मही द्यौः पृथिवी च नभ+प्रपूर्व्यजे+वरूथं स्वाहा। द्यावापृथिवीभ्यामिदं, तमग्निं परित्यज्य। एवं सर्वास्वापत्स्विति वचनात्।

Colophon:

आहिताग्निविषयः समाप्तः

484

VB 1024(b) आपस्तम्बश्रौतप्रयोगः

Beginning:

काठका उच्यन्ते । प्रथमं तावत् सावित्रस्य कर्मोच्यते—सावित्रम् इति । चित्योऽग्निः पशुबन्धे चीयते । अमावास्यायां चतुर्दश्यां पौर्णमास्यां चतुर्दश्यां वा प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य संकल्पं करोति ।

End:

मित्रावरुणयोरहं जेमानमिन्द्रियावी वा प्रत्याक्रम्य न पार्वणहोमो नारिष्टान् हुत्वा स्विष्टकृदादिसꣳस्रावान्ते वाजिनयागः । अन्वाहार्यो दक्षिणा । यज्ञो बभूव यज्ञ शं च म वर्जमिष्टः समाप्यते ।।

491

VB 66(a) अग्निहोत्ररक्षामणिः (सव्याख्यः)

Beginning:

. . . . तस्यैवोन्नयनाधिकारवत् । उद्धरेति सूत्रव्याख्यानावसरे भाष्यकारेण कण्ठत एवोक्तम् । स्वयं होमे चेति । यदा च यजमानासंनिधाने अध्वर्युरेव करोति तदा तेनापि वक्तव्यम् । न्यायसाम्यादिति । ततो भूरादिमन्त्रेण क्रमात् स्वाम्यभिमन्त्रणं प्राच्यस्याहृनेति सायं तु रात्र्येति । अन्नोषसि कुर्वन् ततः स्वामी यजमानः प्रभुः स्व रूद्रीयमाण इति मन्त्रेण प्राच्यस्याहवनीयस्याभिमन्त्रणं कुर्यात् ।

End:

अग्निहोत्रे कदाचित् प्रायश्चित्तानि उक्तानि मया प्रदर्शितानि, अन्यान्यपि तत्तन्निमित्तानुसारेणोत्तरत्र भाष्यार्थविद्भिः ज्ञेयानि । निमित्तानां नैमित्तिकानां च उक्तात् शृङ्गग्राहितया सर्वेषां वक्तुमशक्यत्वात् सूत्रभाष्याद्युक्तन्यायानुसारेण स्वयमेव बोद्धव्यानि । अतः स्वग्रन्थेऽन्यग्रन्थशङ्का न कार्येति भावः । इति सर्वमवदातम् ।।

Colophon:

इति पदवाक्यप्रमाणपारावारीण-भरद्वाजकुलतिलक-श्रीमदनन्तसोमयाजि-अवरतनयस्य **रामचन्द्रदीक्षितस्य** कृतौ अग्निहोत्ररक्षामणौ पञ्चमो मयूखः

Scribe adds:

भारद्वाजकुलस्य ह्यापस्तम्ब्युत्तमेन लिखितमिदं श्रीपुरभास्करभट्टप्रभवेन च वैद्यनाथभट्टेन लिखितम् । सिद्धार्थि-मार्कळि-१३.

493

VB 1126(f) अग्निहोत्रस्थालीपाकविधिः

The following is the full text of the work:

द्विर्जुहोति द्विर्निमार्ष्टि द्विःप्राश्नाति त्रिरप्याचामयति निर्लेढीति अग्निहोत्रविधिना पौर्णमासस्थालीपाकेन यक्ष्ये इति संकल्प्य यत्र क्वचनेति विधिना अग्निं प्रतिष्ठाप्य प्रज्वाल्य परिसमूह्य दर्भैरग्निं विधिवत् परिस्तीर्य अग्नेः पश्चात् प्रागग्रं बर्हिरास्तीर्य तूष्णीं समन्तमग्निं परिषिच्याधिश्रिताभिघारितोद्वासितप्रतिष्ठिताभिघारितेन हविषा प्रधानहोमस्विष्टकृत्प्राशन-भक्षणार्थं दर्वीं संपूर्य बर्हिष्यासाद्याग्नावेकां समिधमादाय प्राण्यापान्य निमील्य वीक्ष्य समिधो द्व्यङ्गुलमतीत्य हविःपूर्णां दर्वीमादाय अग्नये स्वाहेति मध्येऽन्नमाहुतिमात्रं विभज्य हुत्वा पुनश्च तां बर्हिष्यासाद्य आकाशमुद्वीक्ष्य दर्व्यास्ततो लेपमादाय बर्हिषि लेपं निमृज्य हुतशेषं विभज्य स्विष्टकृतं हुत्वा दर्व्याग्निं त्रिरुदञ्चयति । (प्राचीनावीती) । दर्व्याः पुनर्लेपमादायाग्नेर्दक्षिणतो भूम्यामवाचीनपाणिः लेपं निमृज्य अप उपस्पृश्य (उपवीती) दर्व्यास्ततो लेपमङ्गुल्यादाय प्राश्याभिहार्यातो आचम्य एवं पुनः प्राश्याचम्य उदगन्ताप्रत्योः सव्यदर्व्यवशिष्टं कृसरं हवि-रादाय निष्क्रम्य भक्षयित्वा तां निर्लेह्याचम्य दर्वीं प्रक्षाल्य भुवः स्वाहेति हुत्वा अनाज्ञातत्रयं च जपित्वा तूष्णीं समन्तमग्निं परिषिच्य उपतिष्ठते ।।

494

VB 53(e) यागकालनिर्णयः

Beginning:

. . . तु तद्वशेन श्रुतिसंकोचो युक्तः । रामाण्डार् फक्किकापि प्राशस्त्यपरत्वेन संभवाभि-प्रायेण व्याख्यायाम् । दक्षिणायने सोमानुष्ठानं वार्त्तिककारसंमतं च । तथा हि उदगयनपूर्वपक्षाहः पुण्याहेषु दैवानि स्मृतिरूपान्यार्थदर्शनादिति षाष्ठसूत्रस्थदैवपदं भाष्यकारेण उपनयनादिपरं व्याख्यातम् ।

End:

अमावास्यायां यजनीये वा दीक्षा पौर्णमास्यां यजनीये वा सुत्यमहः इत्यापस्तम्बसूत्रस्य मासापवर्गं पक्षापवर्गं च स्वीकारपक्षे+च (दीक्षा)कालाव्यतिरिक्तसर्वकाल . . . भव . . . घण्टाघोष एवा . . . दापोऽपि दक्षिणायने निर्विवादम् । शिष्टैरद्य यावदनुष्ठीयत इति स्पष्टम् । प्रमाणकृतैरत्राङ्गीकृतमित्यलमतिप्रसङ्गेन ।।

Note:

An extra leaf at the end contains a copy of a grant in Tamil made in 1775 by Vāsudeva Dīkṣita in favour of Śaṃkaranārāyaṇa Dīkṣita of Tulajerpura in Tanjore Dt.

496

VB 9(a) **आपस्तम्ब-श्रौतप्रायश्चित्तप्रयोगः**

Beginning:

. . . गृहान्तरवासः प्रवासः । प्रवासं करिष्यन् अ . . . . राभयं मे . . . . स्ति मेऽस्तु, अभयं मे अस्तु । गार्हपत्यमुपस्थाय मा प्रता . . . धो वयमायज्ञादिन्द्रसोमिनो मान्तस्थूर्णो अरातयः उदस्तामुत्तरां तया अग्ने घृतेनाहुत रायस्पोषेण संसृज । प्रजया च बहून् कृधि इति मन्त्राभ्यां वाग्यतो गच्छेत् । यत्राग्निहोतृगृहं न दृश्यते तत्र वाचं विसृजते । गन्तव्यग्रामान्तरं गत्वा पुनरागत्य वाग्यतः समित्पाणिः अग्निसमीपं गत्वा कृतशौचः समित्पाणिः । विश्व दानी+रिषाम । नमस्ते अस्तु मीडुषे नमस्त उपसद्मने । अग्ने शुंभस्व तन्वस्तंमा रय्या सृज । द्वाभ्यामग्न्यगारं प्रविश्य अभयंकरा अभयं मे कुर्विति पूर्ववत् गार्हपत्यमुपस्थाय बहिर्निर्गत्य गृहा मा बिभेथ मा वेपिढ्वमूर्जं विभ्रत एमसि । ऊर्जं बिभ्रद्वसुवनिः सुमेधा गृहानैमि मनसा मोदमानः येषामभ्येति प्रवसन्येषु सौमनसो बहुः । गृहानुपह्वयामहे । ते नो जानन्तु जानतः । उपहूता भूरिधनास्सखायः स्वादु संमुदः । अरिष्टाः सर्वपुरुषा गृहा नःसन्तु सर्वदा । उपहूता इह गाव उपहूता अजावयः । अथो अन्नस्य कीलालं उपहूतो गृहेषु नः । मन्त्रचतुष्टयेन गृहानभ्येत्य क्षेमाय वः शान्त्यै प्रपद्ये शिवं शं मां शंयोः शंयोः । गृहं प्रविश्य, ऊर्जं बिभ्रत एमसि । ऊर्जं बिभ्रद्वसुमनाः सुमेधा गृहानागां मनसा मोदमानः ।।

End:

अवभृथकाले प्रेतमवभृथदेशं नीत्वा प्रोक्ष्य तूष्णीं पत्नीं स्नापयित्वा उन्नेतारं पुरस्कृत्य तूष्णीं प्राग्वंशं प्रेतं नीत्वा साङ्गं क्रतून् समापयन्ति ऋत्विजः । यजमानस्य मरणादूर्ध्वं आयुराशास्त इत्यादेर्लोपः । भक्षस्य सोमरसस्य मार्जालीये प्रक्षेपः । पुरोडाशादेरुत्करे त्यागः । पत्नी ऋत्विग्भ्यो दक्षिणां दद्यात् । अर्थलुप्तानि शुक्वान्वारम्भादीनि याजमानानि निवर्तन्ते । इत्थं क्रतुसमाप्ते

सति प्रेते मात्या इत्यादि पितृमेधप्रवृत्तिः। एतावदेकाहे भ्रातृपत्न्याः मीमांसकैः स्वामित्वस्य साधितत्वात् पत्नीवदस्या अग्निहोत्रं भवतीति। युक्ता मे यज्ञमन्वासातै यदि सीमन्ते आदित्यो अस्तमियात् . . इत्यादिभिः पत्न्याः प्रवासानुपपत्तेश्च प्रोषितो यजमानमरणोक्तप्रायश्चित्त-व्यतिरिक्तं पत्नीमरणेऽपि समानम्। याज्ञिकास्तु पत्न्या अङ्गत्वमभ्युपगच्छन्तः यजमानमरणो-क्तप्रायश्चित्तं भवति। सोमव्यतिरिक्तकर्ममध्ये पत्नीमरणे कथंचित् शेषसमाप्तिः सोममध्ये पत्नीमृतौ निर्मलं ध्यानमाह। . . . त्वा क्रतुः समापनीयः। तत्र शेषभक्षणं मार्जालीये प्रक्षेपः कार्य इति वदन्ति।

497

VB 92(b) आपस्तम्ब-श्रौतप्रायश्चित्तप्रयोगः

वाहिनीपतीयनामग्रन्थो लिख्यते (in margin)

Beginning:

दैवतानि कति सन्ति नावनौ नैव तानि मनसो मतानि मे।
दीक्षितं जडधियामनुग्रहे दक्षिणाभिमुखमेव [दैव-]तम् ।।
वटविटपिनिवासबद्धतृष्णं मुनिनिकराय विवेकमादिशन्तम्।
पशुपतिमगराजकन्यकायै स्मर हृदयाशु वितीर्णवामभागम् ।।
बीजापूरगदेक्षु + + + विशिष्टार्थदः।
पुस्तकजपपटुहस्ते + + + शोधयाशु मम चेतः ।।
वन्दे गुरूणां चरणारविन्दे संदर्शितस्वात्मसुखावबोधे।
जनस्य ये जाड्यगुलिकायमाने संसारहालाहलमोहशान्त्यै ।।
शुक्तौ रजतवद् यत्र मायया दृश्यते जगत्।
तद् ब्रह्मेति च विज्ञेयं सच्चिदानन्दविग्रहम् ।।
देशकालवयोऽवस्थाविद्यासामान्यमेव च।
ब्राह्मणानां समालोच्य ग्रन्थान् सर्वान् विनिर्मितान् ।।
आलोच्य सुलभान् पक्षान् तत्र तत्र विकल्पितान्।
संगृह्य सुखबोधाय कुर्वे **शंकरकिंकरः** ।।

अत्र पा(प)क्षयहेतुत्वात् प्रथमं ब्रह्मानुसंधानमाह शुक्तौ रजतमिति। अयमाशयः— श्रौतानां कर्मणामपचारेषु सत्सु शृङ्गग्राहिकया प्रायश्चित्तानि वक्ष्यन्ते। तानि तथैवाचरित-व्यानि। यत्र तु प्रायश्चित्तं नोक्तम्, उक्तमपि न प्रतीयते सर्वत्र तत्र ब्रह्माहमिति भावयेत्। तदेव सर्वप्रायश्चित्तम्। अत एव बह्वृचैः दुर्निमित्तानां स्वप्नानां प्रायश्चित्तान्यनुक्त्वा अन्ते सर्व(सा)धारण्येन यः सर्वेषां भूतानामन्तरः पुरुषः स आत्मेति विद्यादित्युक्तम्। प्रणवपूर्वकाया

महाव्याहृतेर्ब्रह्मौवार्थः। अत एव तदिदं सर्वप्रायश्चित्तं सर्वत्र क्रियते इत्याश्मरथ्यो यत्रानाम्नातं तत्र कियतेत्यालेखन इति भगवता आपस्तम्बेनोक्तम्।

End:

ध्रुवो राजा विशामयमित्येताभिश्चतसृभिः स्कन्नमभिमन्त्र्य ततो वरदानम्। यद्यसमर्थः समर्थश्चे . . . भूमिर्भूमिरिति ब्रह्माभिमन्त्रितमप्सु क्षिप्त्वा अन्यां को वो युनक्त्विति सादयित्वा शतमानमित्यादि पूर्ववत् सर्वप्रायश्चित्तम्। एवं नष्टे अपहृते च अपहृतस्य पुनर्बाधे . . .

498

VB 92(c) आपस्तम्ब-श्रौतप्रायश्चित्तप्रयोगः

Beginning:

अग्निहोत्रप्रायश्चित्तान्युच्यन्ते। तत्र प्रथममनुद्धरणप्रायश्चित्तमुच्यते। सायंकाले प्रातःकाले वा प्रणयनात्पूर्वं सूर्यास्तमिते उदिते वा तदा दृष्ट्वा दानादि अपरेणाहवनीयं कूर्चं साधयतीत्यन्तं कृत्वा; प्राणानायम्य अनुद्धरणप्रायश्चित्तं करिष्य इति संकल्प्य जुह्वां चतुर्गृहान्तं गृहीत्वा, मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहा। मनसे ज्योतिष इदं न मम। पुनः चतुर्गृहीतं गृहीत्वा त्रयस्त्रिंशत्तन्तवो ये वितत्निरे य इमं यज्ञं स्वधया ददन्ते तेषां छिन्नं प्रत्येतद् दधामि स्वाहा। धर्मो देवानप्येतु स्वाहा। देवेभ्य इदं . . . .

End:

यजमानस्यानुमन्त्रेण विस्मृतौ व्याहृतिजपं कृत्वा पश्चादनुमन्त्रणं कुर्यात्। चन्द्रसूर्योपरागे जुहुयात्। अप्सु मे सोमो अब्रवीदिति ऋचाप्यायस्व ऋचा चैव सोमायास्त इति द्विजैः सूर्योपरागे जुहुयात्। उदुत्यं जातवेतसं आसत्येनोद्वयं चेति त्रयो मन्त्रा उदाहृताः। इदं प्रायश्चित्तम् अन्वाधानादूर्ध्वं चन्द्रसूर्योपरागनिमित्तकम्। समाप्तानि अग्निहोत्रप्रायश्चित्तानि ॥

501

VB 416 बोधायनश्रौतसूत्रवृत्तिः

Beginning:

उपवसथ इत्यादि द्वैधानां पूर्वनिरपेक्षत्वम्। विशेषणविशेषित्वं विस्पष्टेषु विकल्पार्थं चेत्युक्तम्। अमावास्या न वेत्यत्र क्वचित् कल्पे संदिग्धेनोक्तम्। द्वैधस्य . . . मुत्थानम्। यथाप्तो प्रस्कन्दन इति होतृचमसाद्वासती परान् कलशादित्यप्सु मैत्रावरुणचमसे प्रस्कन्दयतीत्य-

विशेषितत्वादुभयथा संभवस्तथाकल्पेऽनुक्तस्य ब्राह्मणोक्तस्य विशेषितस्य विशेषणार्थमुत्थानं तथाभिकामं जुहोतीति सर्वेणाभिक्रामेदित्यादि ।

Colophon:

इति **भवस्वामि**कृतौ द्वैधवृत्तौ प्रथमस्य दशकस्य (प्रथमो)ऽध्यायः ।।

[Note: According to Caland's edition of the *sūtra-s* the 1st chapter ends after 2 more *sūtra-s*]

Colophon:

इति **भवस्वामि**कृतौ द्वैधविवरणे प्रथमस्य दशकस्य दशमोऽध्यायः । प्रथमः प्रश्न :।।

Beginning:

ओम्, अथातश्चातुर्मास्यानीत्यादि ।

Colophon:

इति **भवस्वामि**कृतौ द्वैधविवरणे द्वितीयस्य दशकस्य प्रथमोऽध्यायः ।

Colophon:

इति भवस्वामिविरचितायां द्वैधवृत्तौ द्वितीयस्य दशकस्य दथमोऽध्यायः । द्वितीयप्रश्नः समाप्तः ।।

अथात इष्टिकल्पं व्याख्यास्यामः ।
इति भवस्वामिकृतौ द्वैधविवरणे चतुर्थस्य दशकस्य प्रथमोऽध्यायः ।
सर्वतोमुखस्य द्वैधवृत्तिरन्वेष्टव्या ।।

Beginning:

पञ्चतयेन कल्पमवेक्षतेत्यादेः कर्मान्त इत्यन्वर्थसंज्ञा । कर्माणामन्त इति समाप्तिरत्र कर्माणि समाप्यन्ते किंचिदविशेषेणोक्तं विशेष्यते ।

Colophon:

इति भवस्वामिकृतौ कर्मान्तविवरणे प्रथमस्य कर्मान्तस्य प्रथमोऽध्यायः ।

End:

. . . परिलिखति तदेतदु . . उपवसथीयेऽह्नचेवाग्नीषोमीय दिवस एवैतदप्येकादशयूपानुच्छ्रयन्ति पतन्त्येवमय . . . . . .

502

VB 68(b) **बोधायनश्रौतसूत्रवृत्तिः (सुबोधिनी)**

Beginning:

स जयति कुञ्जरवदनो देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां राशिं नाशयति विघ्नानाम् ।।

इष्टेर्वृष्टिरित्यादि + चन्द्रिकाम् ।

अत्रादौ सप्रमाणं धर्मस्तदधिकार्यादि च निरूप्येते । तत्र **जैमिनिः** चोदनालक्षणोऽर्थो धर्म इति । विधिप्रमाणकश्रेयःसाधनताको धर्म इति पर्यवसितोऽर्थः । कर्मजन्योऽभ्युदयनिःश्रेयस-हेतुरपूर्वाख्य आत्मगुणो धर्म इति **हरदत्तः** । **मनुरपि**—

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यस्तं धर्मं निबोधत ।। इति (२. १)

आपस्तम्बश्च 'न धर्माधर्मौ चरत आवां स्व इति; न देवगन्धर्वा न पितर इत्याचक्षतेऽयं धर्मोऽयमधर्म इति; यं त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मो यद् गर्हन्ते सोऽधर्मः' इति ।

End:

मनुरपि—

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।। (२. २८)
वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् ।। (४. १४)

इति

513

VB 355(c) **बोधायनशुल्बोपधानकारिका**

Beginning:

अथोपधानं शुल्बोक्तमिष्टकानां प्रदर्श्यते ।
पाद्यार्ध्ययोर्दीर्घतरं पार्श्वं यत्तत् भसंज्ञकम् ।। १ ।।
शिरोऽग्रे स्याद् हंसमुखी पश्चात् पाद्याचतुष्टयम् ।
तासां पश्चाच्चतुर्थी स्यात् प्रकारोऽन्यतरस्त्वयम् ।। २ ।।
दक्षिणाश्चोत्तराश्चास्याः चतुरश्रास्त्रिकास्त्रिकाः ।
एकैका पादिकान्तर्भा तासां पूर्वोपधीयते ।। ३ ।।

प्राग्भे पादेऽष्टके पश्चाच्छिरसः प्रत्यगग्रके ।
पश्चादेवानयोस्तिस्रः प्रत्यग्भा व्यतिषक्तवत् ।। ४ ।।
पुच्छस्यापि पुरस्ताम्नः पञ्चपाद्यास्तथा स्मृताः ।
अनयोः पादिकारीत्योरात्मशेषस्तु मध्यगः ।। ५ ।।
त्रिंशता तु चतुर्थीभिः षडर्ध्याभिश्च चीयते ।
मध्यतोऽर्ध्याद्वयं तासां आत्मसूक्तिषु चेतरान् ।। ६ ।।
पुच्छस्य परभागे षट् चतुर्थ्योर्ध्ये च पार्श्वयोः ।
षोडशासां पुरः पाद्यास्तद्वत् पार्श्वार्धिके स्मृते ।। ७ ।।
चतुर्थ्यौ पुरतस्तासां पाद्या द्वन्द्वे च पार्श्वयोः ।
पक्षाङ्गुलीषु पञ्चार्ध्याः प्राग्दक्षिणदिशास्थभाः ।। ८ ।।
उत्तरस्तु चतुर्थ्योऽष्टौ ताभ्यो रीतिद्वयाश्रिताः ।
तासां पुरस्ताद् द्वे अर्ध्ये पार्श्वे कृत्स्ने च पश्चिमे ।। ९ ।।
निर्णामसूत्रमभितस्त्वर्ध्या रीतिद्वयाश्रिताः ।
ताः षोडशैव पाद्यानामष्टकं पुरतस्ततः ।। १० ।।
संश्लिष्टभाः संहताग्राः निर्णामाग्रे परस्परम् ।
चतुर्थ्य उत्तरास्तिस्रस्तिस्रोऽर्ध्याः पुरतस्ततः ।। ११ ।।
चतस्रश्च चतुर्थ्यः स्युः उत्तरा अन्ततोऽर्ध्यया ।
एतेनोत्तरः पक्षोऽपि व्याख्यातस्तूपधानतः ।। १२ ।।
पक्षपुच्छात्मपार्श्वस्था या अर्ध्या बाह्यभास्तु ताः ।
चतुर्दशशिरस्युक्ताः षट्चत्वारिंशदात्मनि ।। १३ ।।
पुच्छे द्वात्रिंशदष्टौ च शतं चापि च पक्षयोः ।
द्विपञ्चाशत्तु पाद्या स्युः चतुरश्राश्च षट् तथा ।। १४ ।।
चतुर्थ्यो नव षष्टिःस्युरर्ध्या द्वासप्ततिस्तथा ।
एका हंसमुखी सेयं प्रस्तारो द्विशतो भवेत् ।। १५ ।।
बर्हिर्भे द्वे शिरोग्रेऽर्ध्ये ता एवाष्टौ ततः पराः ।
तासां पञ्च चतुर्थीनां तिसृणां तिसृणां ततः ।। १६ ।।
प्रत्यङ्मुख्यौ ततः पश्चात् हंसमुख्यौ प्रचक्षते ।
तयोः पश्चात्तु ते एव प्राङ्मुख्यौ संहताग्रके ।। १७ ।।
तासां पाद्याद्वयं मध्ये पार्श्वयोर्द्वे च बाह्यभे ।
आत्मपूर्वार्धवत् पश्चाच्चतुर्थीनां तुरीयके ।। १८ ।।
प्रत्यगग्रं तु पञ्चात्मसंख्यौ हंसमुखीद्वयम् ।
तयोः पाद्याद्वयं पश्चात् प्रागग्रं व्यतिषक्तवत् ।। १९ ।।
तिस्रश्चतुर्थ्यः पश्चात् स्युस्ततः पश्चात्तु पञ्च ताः ।
पुच्छस्य पार्श्वयोरर्ध्या द्वन्द्वमेव पृथक् पृथक् ।। २० ।।

पुच्छस्य पश्चिमे भागे पाद्या दश च पञ्च च ।
तिर्यक् श्रोणीकृतास्ताश्च व्यतिषक्ताः परस्परम् ।। २१ ।।
आत्माध्यें दक्षिणेऽर्ध्याभिश्चतुर्दशभिरावलिः ।
चतस्रस्तु चतुर्थ्यः स्युरर्ध्याद्या दक्षिणावली ।। २२ ।।
. . . ष्टाग्रा बर्हिर्भाश्च तिस्रः पाद्या अतः पुरः ।
निर्णामादौ च तद्वत् स्यात् प्रत्यगग्रं तु तत्त्रयम् ।। २३ ।।
निर्णामाग्रे तु पाद्यैका प्रागग्रा वोपधीयते ।
पक्षस्य पाद्ययोरर्ध्या चतु . . . तथा ।। २४ ।।
पाद्ये बर्हिर्भे पार्श्वाभ्यां संश्लिष्टे द्वे तु कारयेत् ।
चतुरश्रं तु तद्दीर्घमर्ध्या पार्श्वेन योजयेत् ।। २५ ।।
श्येनस्य पुच्छवत् तत्स्यात् श्रोण्यंसैर्ह्रस्वदीर्घकैः ।
चतुर्थीनां दक्षिणतः प्राग्दीर्घावयवं क्षिपेत् ।। २६ ।।
तत् पक्षाग्रं भवेदेवमन्यान्यपि च कारयेत् ।
एवमुत्तरपक्षोऽपि प्रस्तारोऽयमुदाहृतः ।। २७ ।।
दशैव शिरसि प्रोक्ताः षट्षष्टिश्च तथात्मनि ।
पुच्छे त्रिंशच्चतस्रश्च नवतिश्चापि पक्षयोः ।। २८ ।।
षड्ढंसमुख्यः पाद्याश्च षट्पञ्चाशदिह स्मृताः ।
अष्टषष्टिश्चतुर्थ्योऽपि गण्यन्तेऽर्ध्यास्तु सप्ततिः ।। २९ ।।

इति प्रथमश्येनस्य बोधायनशुल्बोपधानकारिकाः ।।

श्रीभास्करतनूजेन दक्षिणामूर्तितुष्टये ।
बोधायनीयश्येनस्य कारिका लिखिता मया ।। १ ।।
मे शास्त्राम्नायतुरगः भरधीब्रह्मसारथिः ।
देवतासार्वभौमोऽव्यान्मामयं मन्मथान्तरः ।। २ ।।
करहृदयाञ्चितजातौ चक्रिण्यधिनाभिमुषितनयनविधौ ।
संसृत्युदधिदुरध्वापन्नतरौ नन्दकात्तभेतास्याम् (?) ।। ३ ।।

515

VB 374(h) बोधायन-श्रौतप्रायश्चित्तकारिका

Beginning:

श्रौते बोधायनोक्तानि प्रायश्चित्तानि यानि तु ।
व्याख्यातुननुसृत्यैषां समाहारो निगद्यते ।।

मन्त्राम्नातगणाम्नातभेदात् तानि द्विधाब्रवीत् ।
मन्त्रसामर्थ्यसिद्धानि मन्त्राम्नातानि भाष्यते ।।
ब्रह्मप्रतिष्ठा मनसो ब्रह्मेत्यादीनि तानि च ।
तादृङ्मन्त्रगणाम्नाताद् गणाम्नातत्वमिष्यते ।।
तान्युद्वयमुदुत्यं चेत्यादीनीह प्रचक्षते ।
प्रायो विनाशपर्यायः स चाप्यकरणाद्भवेत् ।।
अन्यथाकरणाद्वापि तत्संधौ चित्तिरुच्यते ।
पात्राणां सादनप्रोक्षावाज्यसंस्कार एव च ।।
स्रुक्सुवस्य च निष्टापो दर्भैः संमार्जनं तथा ।
एतत् सर्वेषु होमेषु श्रौते स्मार्तवदिष्यते ।।
होमेष्वनुक्तपात्रेषु जुह्वैव जुहुयादिह ।
ग्रहणेऽनुक्तसंख्याने सकृद् ग्रहणमिष्यते ।।
अनुक्तोऽग्निविशेषश्चेद् भवेदाहवनीयता ।
अध्वर्युमेव कर्तारं प्रतीयादविशेषणे ।।
दर्शादिषु तु सर्वत्र मन्त्रेणोपरिकल्पितम् ।
शाखा बर्हिश्च सान्नाय्यमित्यादीनि पतेदधः ।।
ब्रह्मप्रतिष्ठेत्यनया प्रतिष्ठाप्य च पूर्ववत् ।
स्रुवाहुतिं चैतय . . अहुत्वा वा स्थापयेत्ततः ।।
पुरस्तादुपरिष्टाद्वा प्रायश्चित्तादनन्तरम् ।
व्यापन्नमिति कर्तव्यमेष साधारणो विधिः ।।
अर्थलोपादतिक्रान्ता छिन्नलूनाद्यनादरम् ।
छेदनं भेदनं दोहमवघातं च पेषणम् ।।

End:

अग्निहोत्रं तु जुहुयादाहितार्ग्नि तु पालयेत् ।
चतुर्थे दिवसे स्नात्वा त्यक्त्वा वासो रजस्वला ।।
. . सु दीक्षाप्रभृत्येव कर्म पुण्य . . . . ।
. . . . . वीतरागाद्रजस्वला ।।
द्व्यहं हविष्यमश्नीयान्न तस्यै दोहयेद् घृतम् ।
आप्रवर्ग्याच्चरेत् कर्म चतुर्थेऽहनि पूर्ववत् ।।
गोमूत्रेण तु . . . . . .
प्रवर्ग्येण सरक्ता चेद् घृतमप्सु क्षिपेत्तु तम् ।
आप्रवर्ग्याच्चरेत् कर्म स्नातायां स्यात् प्रवर्जनम् ।।

प्रवर्ग्ये तु प्रवृत्ते स्याद्यदि पत्नी रजस्वला ।
. . . . . त्यशासनात् ।।
उपरम्य ततः स्नात्वा कृतं चारभते ततः ।
एकस्तनव्रतप्रैषप्रभृति स्याद्रजस्वला ।।
कुर्यादावभृथात् कर्म सर्वमेवाप . . . . . ।
. . . . . ततः स्नाने निर्वपेद्वारुणं ततः ।।
सुत्ये ह्यौपवसथ्ये च मार्जालीये वसेदियम् ।
सिकताप्ते . . . . . पत्नी शालायामितरेषु च
प्राग्र . . . . . रजस्वला ।
रजस्वलाविधिं कृत्स्नं सूतिकायाश्च कारयेत् ।
वासं देशं भविष्यादिनियमेष्टचास्तु नेष्यते ।
. . . . तिक्रामेद्यद्यप्युत्तरतः क्रिये ।।
. . . . . पर्याप्तं वर्धयेत् क्रतोः ।
प्रायश्चित्तसमाहार इत्युक्तः श्रौतकर्मसु ।।
. . . . र्हन्तु तत्सन्तः सन्तु . . . . . ।
आचार्यायाखिलाचार्यकरसंपीडितांघ्रये ।।

516

VB 417(a) **मण्डपद्रुमः**

Beginning:

ब्रह्मेशानं परं नत्वा समूलो मण्डपद्रुमः ।
वास्तुशास्त्रवनाद्रम्यान्महादेवेन रोप्यते ।।

अथादौ सूक्ष्मगणनां दूषयति ।

इयं हस्तक्रिया शैल्पी न च वादक्रिया खलु ।
तस्मादण्वादिसूक्ष्मोक्तेर्गिरा नात्र प्रयोजनम् ।।
मुखेन गण्यतेऽण्वादि न च हस्तेन गृह्यते ।
तस्मात् प्राङ् मालवाद् ग्रामात् प्रवृत्ता सूक्ष्मतात्र न ।।

End:

इत्येवं खलु मण्डपद्रुममहो मुन्धापुरे गुर्जरे
विख्याते भुवि मण्डपौधजननं संवर्धमानं धिया ।
शालाशास्त्रवनात् प्रगृह्य च महादेवार्य आनीतवान्
कृष्णो देवतरुं यथामरवनात् शार्दूलविक्रीडितात् ।।

Colophon:

इति श्रीमत्सकलशास्त्रपारीण-परमपण्डितमकुटपद्मराग-मणिलवाराचार्यसूनु-**महादेवसूरि**-विरचिते मण्डपद्रुमे नवकुण्डिकाफलप्रकारस्तृतीयः

517

VB 417(b) **वेदिलक्षणम्**

Beginning:

वास्तुदीपे—

भूमिशुद्धिरिति ख्याता वक्ष्यते वेदिकाष्टधा ।
चतुर्भूमा चतुर्वक्त्रा चतुरश्राथ पद्मिनी ।।
तथा शिखरिणी वेदी षष्ठी तु शशिशेखरा ।
मालिनी वरदा श्रान्त्या कथिता विश्वकर्मणा ।।

End:

तथाष्टस्तम्भिका कार्या मध्यकूटारदाश्रिका ।
तत्तदाकारशिखरा कुर्याद्व . . . . . स्त्रवित् ।।
कुर्यात्स्तम्भ . . हिष्टप्रपद्य . . . . . तामिति ।
वेदीनां लक्षणं प्रोक्तं वक्ष्ये . . . . ।।

Colophon:

इत्यष्टधा वेदीनां लक्षणानि

522

VB 372(a) **द्राह्यायणश्रौतप्रयोगः**

Beginning:

शानचि कृथोऽसि जनथायः । नभोऽसि प्रतक्वा । असंमृष्टोऽसि हव्यसूदनः । विभूरसि प्रवाहणः । वह्निरसि हव्यवाहनः । श्वत्रोऽसि प्रचेताः । तुथोऽसि विश्ववेदाः । उशिगसि कविः ।

End:

ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः अतप्रतनूर्न्न तदा जो अश्नुते । श्रुतात्स इद्बहन्तः सं तदाशतप्रशं कृण इति देशमनीषास्मदृथः सुतष्टो नवाज्यं युषे मे पवस्व वचसे मे पवस्वदुः पृथिव्यादि . . . . .

523

VB 84 छन्दोगश्रौतप्रयोगवृत्तिः (प्रदीपिका)

Contents:

१ अग्निष्टोमः २ अत्यग्निष्टोमः ३ बृहत्पृष्ठप्रयोगः ४ पवमानेष्टिप्रयोगः ५ गवामयनप्रयोगः ६ अतिरात्रप्रयोगः ७ अप्तोर्यामप्रयोगः

Beginning:

छन्दोगसूत्रे प्रयोग उच्यते। द्राह्यायणीय-पातञ्जल-वाररुच-माशकानुपसंगृह्य केवलं पञ्चविंशब्राह्मणोक्तमपि उपसंगृह्य षड्विंशोक्त सासि सुब्रह्मण्यादीनुपसंगृह्य उपनिषदोक्तलोकद्वारादीनुपसंगृह्य शाखान्तरीयानविरुद्धानवेक्षितानप्युपसंगृह्य मखस्वामिरुद्रस्कन्दादीनप्युपसंगृह्य ज्योतिष्टोममारभ्य विश्वसृजामयनपर्यन्तानां यज्ञक्रतूनां प्रयोग उच्यते।

End: (Folio 27a)

माध्यंदिने तृतीये च स्तोता हर्ता च केवलम्।
होमादिसर्पणं चैव कुर्यात् तामेव कश्चन ॥
छन्दोगस्य प्रदीपस्य वृत्तिरेषा प्रदीपिका।
कृता त्रैविद्यवृद्धेन **तालवृन्तनिवासिना** ॥

Colophon:

इत्यग्निष्टोमः समाप्तः

524

VB 59(a) जैमिनीयश्रौतप्रयोगकारिकाः

Beginning:

एकाहाहीनसत्रक्रतुविधिफलपल्लाङ्कुरश्रेणिमाला-
शाखासाहस्ररूपप्रवरमुनिखगाक्रीडितोद्घुष्टनादः।
संसेव्यो यज्विपान्यैरभिमतफलदो योगिपूगैरुपास्यः
पायात् सामाभिगानं स परमपुरुषात्सामकल्पद्रुमो वः ॥
नारायणं शशिवर्णं प्रणम्य शुक्लाम्बरं शार्ङ्गदारिशङ्खम्।
अग्न्याधानाद्याक्रतु ..... समाप्तेरारब्धे सामक्लृप्ति प्रवक्तुम् ॥
वन्दे हयग्रीवतनुं हरिं च शिवं च शैलेन्द्रसुतार्धदेहम्।
विरिञ्चिवक्त्राम्बुजषट्पदीं च सरस्वतीं .....॥

पातामतो जैमिनिवृत्तिकारौ यं सूत्रवृत्त्या . . . . . ।
. . . . . क्षरेणानुपदिश्य कर्म शुकं मुनिं व्यास . . . . ।।
नमोऽस्तु सामदुग्धा . . . . . भूभृते ।
श्रीकुमाराभिधानाय गुरवे गुणराशये ।।
ज्योतिष्टोमादियज्ञाङ्गा . . . . दि क्रियाक्रमम् ।
निर्लज्जं संजिघृक्षुर्मामनुगृह्णन्तु साधवः ।।
विदुषां नोपकरोत्ये . . . मध्यानां क्वचिदेव . . . ।
मादृशानां तु मन्दानां बोधायैवारभामहे ।।
सूत्रवृत्त्यनुरोधेन शिष्टैराचरितं क्रमम् ।
वक्ष्यामि वृत्तितः श्लोकानालम्ब्यैषां च संगतिः ।।
अग्न्याधानं प्रवक्ष्यामि प्रथमं सर्वकर्मणाम् ।
महर्त्विग्भिः सहो . . . . पूतः स्नानं समाचरेत् ।।
पुण्याहमादौ कुर्वीत ततश्चार्घ्यं समाचरेत् ।

End:

वारवन्तीयमाग्नेयमिदं विष्णोस्तु वैष्णवम् ।
पूर्वोक्तप्रतिहारोऽयं मध्यमेनोद्भिदादिना ।।
अप्तोर्यामो यदि भवेदहीने दाशरात्रिके ।
तत्रैवाहनि तत्रापि पृष्ठेष्वेवेति नो गुरुः ।।
श्रुतो गर्भोऽधिकोक्त्या तु निरमीतोऽन्यदीपकः ।
तस्मादतुल्यश्रुतिलिङ्गमानविद् गर्भस्वहीनेष्विति वृत्तिकृज्जगौ ।।
व्यवस्थापितमाचार्येणाप्तोर्यामद्वये सति ।
ऐकाहिके केवलः स्यादहीने शिल्पवानिति ।।
यदा तु मैत्रावरुणी पाशावाशं तदुच्यताम् ।
पाशं पशौ पशोर्होमे . . . . . वागिति ।।
गायेत् पयश्चाप्येकस्मिन् वशामिक्षासमुच्चये ।
पशोः पूर्वा . . . . . नत्वात् पाशं गीत्वा पयो . . . दे ।।

525

VB 68(g) **चयनकारिका:**

Beginning:

नाभ्यादित्रितयं कृत्वा व्युष्टे स्नानादिपञ्चकम् ।
श्रद्धास्नानादिषट्के तु पशुपव्याहृतिर्भवेत् ।।

आरोप्योदवसायाग्नि मथित्वा विहृतिर्हवः ।
याः पुरस्तादिति नव संकल्पोऽन्यनुरूपतः ।।
होत्रादिस्वरुकृत्यन्तं षड्विंशत्यङ्गुलैः पदम् ।
तेन मेया पशोर्वेदिर्दशकद्वादशाष्टकैः ।।

End:

आमिक्षोद्वासनादि स्यादेडाभक्षणमार्जनात् ।
आरभ्य कंससंस्कारं वाजिना सादनं भवेत् ।।
अनूयाजप्रभृतिकं पाशुकं कर्म चाखिलम् ।
पाशुकस्रग्विमोकान्ते यागः स्याद्वाजिनस्य च ।
पशावेवंविधा क्लृप्तिः काठकाग्नेरुदीरिता ।।

526

VB 374(f) **चयनकारिकाः**

Beginning:

तथाप्यस्याः प्राणभृतः संयतोऽपानभृद्गणः ।
पञ्चाश्वनि ऋतव्याश्च प्राणभृद्वृष्टिसत्यपि ।।
मूर्धन्वतीर्वयस्याश्च द्वितीयायां चितौ गणान् ।
दशदिग्भ्यां प्राणभृतो बृहतीर्वालखिल्यका ।।
पञ्चाक्षणया च स्तोमीया सृष्टिर्व्युष्टिस्तुरीयके ।
सप्ता सपत्नाः पञ्चम्यां विराजश्च भवन्ति हि ।।
स्तोमगा नाकसदनाश्चेडाच्छन्दांसि कृत्तिका ।
अथ वृष्टिसनीश्चापि आदित्याश्च घृतेष्टकाः ।।

End:

आमिक्षा चेद्वशा तत्र प्रातर्दोहक्रिया द्वयोः ।
पूर्वं तु वशया यागः पश्चादितरया भवेत् ।।
स्विष्टकृत्तन्त्रमेव स्यादिडान्तोऽग्निविमोचनम् ।
यजमानमुपस्थानमाप्तयः स्युश्चतुष्पदः ।।

Colophon:

अग्निचयनकारिका समाप्ता

527

VB 374(d) चातुर्मास्यकारिकाः

Beginning:

चातुर्मास्यप्रयोगाः स्युश्चत्वारस्तत्र आदिमः ।
यावज्जीवप्रयोगः स्याद् द्वितीयश्चाब्दिकः स्मृतः ।।
द्व . . . प्रयोग . . . . . द्यथा क्रमात् ।
चतुर्णां . . . त्वात् सर्वान्ते स्यात् समापनम् ।।
फाल्गुन्यां पौर्णमास्यां वा चैत्र्यां वा . . . . . ।
उत्तरायणशुक्ले वा . . . . . ।।

End:

. . . . . न्द्राग्नौ निरूढच्छाग एव सः ।
सवनेष्टचन्तपक्षे स्यादाग्नेयोऽष्टाकपालकः ।।
एकादशकपालेन्द्रस्य द्वादशकपालकः ।
वैशा . . . . . समाप्यते ।।

Colophon:

इति चातुर्मास्यकारिकाः

528

VB 1165(b) चातुर्मास्यकारिकाः (प्रयोगरत्नावलिः)

Beginning:

गणेशं शंकरं नत्वा षण्मुखं कल्पकारकम् ।
वक्ष्यामि चातुर्मास्यानां प्रयोगं कृत्स्नतः क्रमात् ।।
अधिमासयुते वर्षे नारम्भोऽधिकमासतः ।
चतुर्ष्विति विधिश्चातुर्मास्ययाजी परः स्मृतः ।।
वत्सरप्रतिमा त्वेकद्वादशाहापवर्गकः ।
यथा प्रयोगपक्षौ तु षडहः पञ्च वा मतः ।।
तत्पक्षे नान्तरालार्हद्विद्विर्द्वादशके तथा ।
फाल्गुन्यां वा चैत्र्यां वेति चतुर्मासविधौ स्मृतः ।।

End:

श्रीवत्सगोत्रोद्भवकच्छपेशयज्वात्मभूलक्ष्मणदेशिकस्य ।
तनूभुवा ह्यध्वरिणेति चातुर्मास्यप्रयोगः सकलं वितेने ।।
श्रीगार्ग्यगोत्रोद्भववासुदेवयज्वा समस्तक्रमवित्तमो यः ।
अध्यात्मविद्यानिरतः सदाभूत् त्रयीविदां च प्रवरो यशस्वी ।।
यः पौण्डरीकाध्वरवांश्च तस्य पुत्रो **नृसिंहो** विधिनेष्टवांश्च ।
यो वाजपेयाध्वरवांश्च चातुर्मास्यप्रयोगस्य तु संग्रहेण ।।
पूर्वोदितत्वादिह तेन विस्तृता प्रयोगरत्नावलिरीदृशी कृता ।
कृतं करेणागसमत्र सर्वमर्हन्तु सन्तः क्षमितुं विमत्सराः ।।

530

VB 374(c) **पशुकारिकाः**

Beginning:

पक्षादौ पक्षयोः संधेः संनिकृष्टतरं दिवा ।
पौर्णमास्यां प्रधानानि कर्तव्यान्यत्र नो गुरुः ।।
यागान्वाधानयोर्मध्ये पर्वसाध्वेव पक्षयोः ।
किं तु संधेः प्रधानानां संनिकृष्टोऽनपेक्षितः ।।
अन्यो दिवान्ते रात्र्यां वा प्राहेष्टिं संधियागयोः ।
संनिपातमतस्तेन काले होमेऽप्यनादृतः ।।
अमावास्यास्य पूर्वेद्युरदृष्टेन्दुः प्रशस्यते ।
दृष्टचन्द्रमसा गौणं यागः स्यादपरेऽहनि ।।
इति द्वेधोदिताः पक्षा भवस्वामिमतानुगाः ।

End:

यजमानं कुसीदादि केचित् पूर्णाहुतिं विना ।।
यद्वा विष्णुक्रमादर्वाक् कृत्वा यज्ञो बभूव ह ।
शूलचर्या कुसीदादि दत्वा पूर्णाहुतौ वरम् ।
यज्ञो बभूव . . . . . णतर्पणम् ।।

Colophon:

इति पशुकारिका समाप्ता

531

VB 40(b) **वरुणप्रघासकारिकाः**

Beginning:

मनुष्यवद्यज्ञं सुधिता हवींषीला देवी घृतपदी जुषन्तावौ । ये हे देव त्वष्टर्यद्ध चारुत्वमाने-ड्यदङ्गिरसामभवः स चाभूः । स देवानां पाथ उप प्रविद्वानुशन् यक्षि द्रविणोदः सुरत्नावौ । ये हे वनस्पते रशनया निधूया देवानां पाथ उप वक्षि विद्वान् । स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मा इवौ

End:

अथापरो योगपृष्ठ्यां तयोर्मध्ये च शङ्कून् निहत्य चैतद्विशेषमभ्यस्य लक्षणं कृत्वा-र्द्धमागमयेदन्त्ययोः पाशौ कृत्वा मध्ये सविशेषं प्रतिमुच्य पूर्वस्मिन्नितरं लक्षणेन दक्षिणमंस मायच्छेदुन्मुच्य पूर्वस्मादपरस्मिन् प्रतिमुच्य लक्षणेनैव दक्षिणां श्रोणिमायजदेवमुत्तरौ श्रोण्यंसौ ।

532

VB 378(f) **वाजपेयकारिकाः**

Beginning:

प्रयोगो वाजपेयस्य वक्ष्यते सविशेषकः ।
शरद्ग्रीष्मवसन्तानां पर्वण्यागूः सुतोऽपि वा ।।
छन्दोगात् साग्निचित्काले वाजपेयस्त्रिधा भवेत् ।
दक्षिणा बहुलाव्याप्तः संकोचात् कुरुवाचकः ।।
सप्तसंस्थावन्तर्चस्तु संस्थावानिति निश्चितः ।
कुर्यात्तयोर्न भेदः स्याद्दीक्षाकल्पचतुष्टयम् ।।
संस्थापद्येकदीक्षादि षोडश्यन्तमवैकृतम् ।
कुर्यात्तयोः सप्तदश त्रयोदश चतुर्दश ।।
तिस्रोऽथवान्ततः साग्नौ दीक्षाकल्पं त्रयं भवेत् ।
महाग्निरहिते त्वादौ दीक्षाकल्पद्वयं तथा ।।

End:

सौत्रामण्यामिक्षया मैत्रावरुण्या यजेत च ।
न कंचन प्रत्युत्तिष्ठेद्यावज्जीवं व्रतं भवेत् ।।
बृहस्पतिसवेनात्र प्रतिष्ठाता निमित्ततः ।
यजेत चेत्तदा प्रत्युत्थानं कार्यं न संशयः ।।

वाजपेयाङ्गभूतेन बृहस्पतिसवेन हि ।
बृहस्पतिसवयुतो वाजपेयस्तदा यदि ।।
प्रत्युत्थानं हि यष्टुः स्याद्यदा तद्रहितः ऋतुः ।
प्रत्युत्थानं न तु तदा यष्टुः ऋत्वङ्गतो व्रतम् ।।
श्वेतच्छत्रीह भवतीत्यस्यास्तीति समासतः ।
एवार्थे तुहशब्दः स्यात् पूरणार्थेऽपि वा मतः ।
विज्ञायते ब्राह्मणोक्तविधानार्थमितीष्यते ।।

533

VB 39(b) **वेदिमानकारिकाः**

Beginning:

त्रयोदशाङ्गुलैः सार्धैर्भ्रमणं गार्हपत्यके ।
तन्मण्डलाग्रे पुरतः शङ्कुस्तस्य तु पूर्वतः ।।
अष्टाचत्वारिंशदङ्गुल्या . . रज्जुद्विपाशकौ ।
लक्षणं त्रिंशदङ्गुल्यां तस्यां कृत्वाथ पाशकौ ।।
आमुच्य पूर्वयोः शङ्क्वोर्लक्षणं दक्षिणा नयेत् ।
लक्षणे रज्जुमाबध्य नयेद्दक्षिणतस्ततः ।।

End:

सा नित्या मण्डलं यावद्दीयते तावदागतम् ।
त्रयोदशाङ्गुलयुता त्वष्टादशतिलान्विता ।।
या च रज्ज्वा परिलिखेन्मण्डलं पश्चिमस्य तु ।
दक्षिणाग्नेर्गार्हपत्याहवनीयान्तरालकम् ।।

534

VB 72(a) **वेदिमानकारिकाः**

Beginning:

प्राचीं निश्चित्य तत्पश्चाद् मध्यान्मन्वङ्गुले सति ।
अर्धयुक्तैश्च दशभिस्तिलैर्हीनेन वंशिना ।।
सूत्रेण भ्रामयेद् गार्हपत्यायतनमुच्यते ।
तद्बहिः पूर्वे . . न्यष्टौ दत्वा तु चतुरश्रकम् ।।

End:

षोढा गन्तुं विभज्यैकं वेधायामेव निक्षिपेत् ।
कर्षणः पञ्चमो भागश्चतुर्थे श्रोणिरुच्यते ।
अंसौ तृतीये विज्ञेयावेवं श्रोण्यंसयोर्मितिः ।।

536

VB 53 **श्येनकारिकाः**

Beginning:

परश्येने पक्षवर्जं षोडशोदीच्यरीतयः ।
तत्राद्या पञ्चमी कुर्यात् सप्तमी द्वादशी तथा ।।
चतुर्दशी षोडशी च पाद्यामुरसि चाग्रिमा ।
षोडशीभिर्द्वितीया स्यादणुके तत्र पार्श्वयोः ।।
अणुकाभिस्तृतीया स्यादेवं षष्ठी त्रयोदशी ।
तृतीयास्त्र्यश्रयस्तासां षोडश्यःस्तुत्यरीतिकाः ।।
प्राच्यो द्वादश मध्यस्था आत्मनः पक्षयोः स्फुटम् ।
षष्टिरात्मनि षण्मूर्ध्नि पक्षयोश्च चतुःशतम् ।।

End:

प्राच्यौ शिरसि षोडश्यौ सूत्रवत्पक्षयोर्द्वयोः ।
पुच्छेऽष्टादश संप्रोक्ता द्वे षष्ठी पक्षयोस्तथा ।।
आत्मनि द्व्यूनपञ्चाशत् शीर्षे द्वे परिकल्पिते ।
अष्टाशीतिशतं चैवं द्वितीया चितिरीरिता ।।
चतुर्थेऽप्येवमेव स्यादेषा भाष्यकृदुक्तितः ।
प्रस्तारपञ्चकेन स्यादिष्टकानां सहस्रकम् ।।

537

VB 1159 **श्येनकारिकाः**

Beginning:

प्रणम्य दक्षिणामूर्तिं विघ्नेशं भारतीं गुरून् ।
अग्नेः श्येनकृतेर्वक्ष्ये पञ्चपत्रस्य चेष्टकाः ।।
पत्न्यां स्वायतनस्थायां संपूज्य गणनायकम् ।
समे स्वायतने देशे समकायः पुरोमुखः ।।

यज्वा तिष्ठत्यूर्ध्वबाहुः प्रसारितकराङ्गुलिः ।
यावान् भवति मन्थेन तावत्यं वैणवेन तु ।।
स्वमध्यमाङ्गुल्यग्रास्तया देहं मिनुयात्ततः ।
तत्तुल्यां सुदृढां कांचित् रज्जुं श्लक्ष्णां विधाय ताम् ।।
विभज्य पञ्च . . . योऽन्यः सोऽरत्निरुच्यते ।
चतुर्विंशत्यङ्गुला सा प्रादेशो द्वादशाङ्गुलः ।।
उक्तमन्यचतुर्था . . . . . ।
. . . तदर्धमत्रोक्तं तत्तु पञ्चदशाङ्गुलम् ।।
एकेवाङ्गुलिशब्देन गृह्यतेऽङ्गुलिरत्र तु ।
. . . . . त्रिंशत्तिलाः स्मृताः ।।

Folios 23, 24:

पुरीषवत्यास्त्वैशानी प्राजापत्येष्टका भवेत् ।
तत्पश्चिमैव वृषभाकारलेखा स्वलंकृता ।।
पुच्छात्यरीकौ याम्यार्ध्या भवेल्लोके पृणादिमा ।
मध्यषष्ठीचितेः पूर्वपश्चिमे ब्रह्मयज्वनोः ।।
उपाध्वर्योरुदक्पात्रपश्चिमा क्षीरधारिणी ।
पूर्वाङ्गात्पश्चिमाध्वर्यो . . . लोके पृणोत्तमा ।।
अत्रापि मण्डलारेता सिचौ पूर्वचितीरिते ।
प्राजापत्या पुरोगैव चतुर्थी चोत्तमेष्टका ।
कर्णहीनाङ्गनाकारलेखयालंकृता हि सा ।।

Colophon:

पूर्वाचार्यैः पञ्चपत्रविषया कारिका तु या ।
कृता तद्वृत्तिरूपेण श्लोकाश्चैते मया कृताः ।
भवेदत्रान्यथोक्तं चेद् वाञ्छा तच्छोध्यतां बुधैः ।।
\+ \+ \+
प्रणम्य दक्षिणामूर्ति विघ्नेशं भारतीं गुरून् ।
अग्नेः श्येनकृतेर्वक्ष्ये षट्पत्रस्येष्टकाः क्रमात् ।।
पत्न्यां स्वायतनस्थायां संपूज्य गणनायकम् ।
समे स्वायतने देशे समकायः पुरोमुखः ।।

End:

. . . नां पुरोगा या यजमानस्य सा भवेत् ।
याम्यार्ध . . . . . ।।

. . . . . प्रतिप्रस्थातरीष्यते ।
शिरोगताध्वर्ययोः सौम्या त . . . . . त्तमा ।।
इहापि मण्डलारेतः सिचौ पूर्वचितीरिते ।
मण्डलेशानदिक्स्थाया वि . . . . . ।
कर्णहीनाङ्गनाकारलेखयालंकृता हि सा ।।

Scribe adds:

बिन्दुविसर्ग . . . . . पदहीनदूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं क्षन्तुमर्हसि समीक्ष्य . . . . . ।।
. . . . . ग्रन्थहरिचतुर्थी स्याच्चतुर्विंशशतविंशी च पञ्चमी ।
द . . . . . षट्त्रिंशत्प्रथमाचिता ।।

538

VB 374(c) **सोमकारिकाः**

Beginning:

सोमेन यक्ष्यमाणस्य यस्य पित्रादयस्त्रयः ।
नेजिरे सोमयागेन स स्याद्विच्छिन्नसोमकः ।।
आलभेत स ऐन्द्राग्नमवशीर्णगवं पशुम् ।
यस्य वेदश्च वेदी च विछिद्येते त्रिपूरुषम् ।।
स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः ।
विच्छिन्नसोमपानो वा स ब्राह्मण उदाहृतः ।
आलभेताश्विनं धूम्रं ललामं सत्वजं पशुम् ।।

End:

कुर्याच्चोभयतःपाशा रज्जुर्मध्ये च लक्षणम् ।
पाशावन्तिमयोः क्षिप्त्वा दक्षिणाकृष्य लक्षणम् ।।
लक्षणे लक्षणं कृत्वा पाशौ मध्यमके क्षिपेत् ।
लक्षणोपरि चाकृष्य शङ्कुरिष्टे यथा भवेत् ।।
एष त्रिशङ्कुमार्गः स्याद्विष्ण्योऽपरवकादिषु ।

Colophon:

सोमकारिका समाप्ता

539

VB 378(c) **सोमकारिकाः**

Beginning:

ओं सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयान् ऋत्विजो वृणीते । यूनः स्थविरान् वानूचानानूर्ध्व-वाचो . . . . . तेभ्यः सोमा प्राह—

श्यामला धातुनिष्ठ्यूता क्षीरिणी त्वचि मांसला ।
कृष्णला वमनी वल्ली सौम्याख्या छागभोजिनी ।।
अतो लता विशेषश्च साधनात् कर्मनामकः ।
सामान्यसिद्धेऽपि पुनर्ब्राह्मणाच्चमसर्त्विजः ।।
हरदत्तमताद्वाजपेययाजिनः क्षत्रियस्य च ।
आर्त्विज्यतोऽत्र वचनाद् ब्राह्मणा एव चर्त्विजः ।।
ऋषिर्वेदस्तमर्थं यो वेत्त्यार्षेयः स उच्यते ।
वेदितार्थेऽधीतवेदे शुश्रुवांसि च विद्यते ।।
प्रवरे स्वानृषीन् ये च त आर्षेया विदुः स्मृताः ।
यूनो बालनिषेधार्थं केचिन्मिश्रनिषेधकम् ।।

End:

व्रतान्तराधिकानां तु प्राप्तावान्तरदीक्षितौ ।
संतरासंहततरातप्तमुष्णं पयोव्रतम् ।।
दैवमित्यत्र चोष्णाभिर्याते मन्त्रविशेषतः ।
याते अग्ने नये देवा अत ऊर्ध्वं चतुस्तने ।।
मार्जनं तृ . . . . . याते अग्ने व्रतेऽपि च ।
दुर्ब्राह्मणश्चानूचानो ब्रह्मवर्चसकामकः ।।
तेषां पुमञ्जनं नित्यमाद्ययज्ञेऽपि वाचनात् ।

540

VB 374(g) **सौत्रामणिकारिकाः**

Beginning:

शुक्लेऽथ पक्षे सुरतारिकासु सौत्रामणी चेष्टिरथ त्रिधातुका ।
रामाह्वया . . वृषलीत्वसंस्कृता देहातकीं चेतरिदं व्रतद्वयम् ।।

अथ त्रैधातवीयायां सहस्रं दक्षिणा गवाम् ।
न सहस्रं सुवर्णस्य पाण्यादिः सादनं तथा ।।
तार्प्यं वासो घृताक्तं स्यात् केचिद् वृक्षत्वं विमः ।
अन्वाधानं च तद्वहिः पाण्यादिः सादनं तथा ।।
पिष्टपात्रद्वयं साद्यं व्रीहीणां च यवस्य तु ।
प्रयोगभेदनं तन्त्रे यथादेवसुवां तथा ।।
त्वचं गृहीत्वा पूर्वं . द्वितीयादेरथ क्रिया ।
पिण्डादिस्त्वग्रहात् तत् स्यान्मध्ये यवमयोर्भवेत् ।।

End:

पितृनव . . मुपतिष्ठेरन् प्राचीनावीतिनः सुराः ।
पशुः स्विष्टकृतेष्वाथ हवींष्युद्वास्य वा यजेत् ।।
उरुं हि राजे . . . . . सुदितिनिवर्तकम् ।
कृत्वा निष्कासयोः स्थाने . सरोऽवभृथः स्मृतः ।।
समानमेव वरुणप्रघासवदिहेतरत् ।
यथाकल्पं समानोऽन्यः सोऽयमग्निः समाप्य वै ।।

545

VB 91(c) प्रायश्चित्तशतद्वयी (प्रायश्चित्तप्रदीपिका)

Beginning:

प्रसादये वारणराजवक्त्रं गोक्षीरशुभ्रं शशिखण्डचूडम् ।
विनायकं विष्णुमहं प्रणम्य वक्ष्यामि सारं श्रुतिलक्षणोदितम् ।।

तत्र प्रथमं भाष्यकारेण श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते इत्येतावान् ग्रन्थः सूत्रद्वयात्मना व्याख्यातम् । अनन्तरमेकसूत्रतया च प्रयोजनवशात् सूत्रद्वयात्मना कृतस्य व्याख्यानस्यायमर्थः । श्रुतिलक्षणं प्रायश्चित्तमित्येकं सूत्रम् । अस्यायमर्थः—यस्य पुरोडाशः क्षामवति यदेकदेवत्य आलब्धो भूयान् भवति । यद्यष्टापदीत्यनुबध्येतेत्येवमादिर्लक्षणमात्रमेव यस्य प्रायश्चित्तस्य श्रुतौ व्यपदिश्यते तच्छ्रुतिलक्षणमिति । अतश्चिह्नमात्रमस्यैवोपदेशात् पुरोडाशयोः । पुरोडाशानां च क्षामे वा द्वादशपद्यां षोडशपद्यां चेदं प्रायश्चित्तं भवति ।

End:

अत्र ज्ञानमात्रमेव न प्रायश्चित्तम् । यस्मिन् कस्मिंश्चाग्नौ पञ्चाहुतौ प्रधानाहुतौ पिङ्गलवर्णो धूमो यदि दक्षिणां दिशमभिगच्छेद्वातो वाप्रसव्य धूममावेष्टयेत्तदा . . . नाग्नीये

ततं मर . . सर्वप्रायश्चित्तं जुहुयात् । भूर्भुवः स्वाहेति स्मार्तभ्रेषे सर्ववेदभ्रेषे चेदं सर्वप्रायश्चित्तं बहु . . . मिब्राह्मणे चोक्तम् ।। १४३ ।।

बिन्दुर्दुलिपिविसर्गवीथिकाशृङ्गभङ्गपदभेददूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं क्षन्तुमर्हथ समीक्ष्य सज्जनाः ।।

552

VB 482(b) आश्वलायन-पितृमेधप्रयोगः

Beginning:

पैतृमेधिकप्रयोगः । अथ पैतृमेधिकप्रयोगो वक्ष्यते । यस्य कस्यचिन्मरणसंशये यथोक्त-सर्वप्रायश्चित्तं कृत्वा सायमनाहिताग्नेः पात्रचयने . . . मौपासनाग्निं दह . . तीति वचनात् । अथातः पैतृमेधिकमनाहिताग्नेः मरणसंशये मध्यमारणिनाद्भिः स्नापयित्वा यथोक्तसर्वप्राय-श्चित्तं कृत्वा औपासनविच्छिन्नश्चेद् अग्निसंधानं कुर्यात् ।

End:

कृच्छ्रत्रयं प्रकुर्वीत उत्तरीयविपर्यये ।
तत्र कर्म पुनः कुर्यान्मनुः स्वायंभुवोऽब्रवीत् ।। इति

गौतमोऽपि—

उत्तरीयशिलापात्रद्वयनाशोदपात्रकौ ।
पुनः संपाद्य तत्सर्वं प्राजापत्यत्रयं चरेत् ।।

556

VB 99(a) आश्वलायन-स्मार्तप्रदीपिका

Beginning:

अथाश्वलायनानां सुखबोधाय नारायणीयादिग्रन्थानवलोक्य श्रीलक्ष्मीनृसिंहं नत्वा स्मार्तप्रदीपिकां वक्ष्ये । कर्ता स्नातो धौतानार्द्रवासा नैकवासा बद्धशिखो यज्ञोपवीत्याचान्तः कृतनित्यक्रियः शुचौ देशे प्राङ्मुख आसीनः कर्म कुर्यात् । तत्कर्मान्तेऽप्याचामेत् ।

Colophon on Fol. 78:

. . न्येन चिन्दुकूरुवास्तव्य पुराणं तिरुमलयज्वनन्दनेन तिरुमल-सोमयाजिना विरचिता शुभस्मार्तप्रदीपिका ।

End:

सप्तविंशतिभिराज्येन चरुशेषेण स्विष्टकृतं वक्ष्ये। आयुषे विश्वतो दद्यादिति कलशे आयुर्दे . . मानो महान्तं, मानस्तोके।

Scribe adds:

इदं पुस्तकं लक्ष्मीनारायणन् स्वहस्तलिखितम्। इदं लक्ष्मीनारायणन् पुस्तकम्।

557

VB 370 **प्रयोगपारिजातः**

Beginning:

नमो लक्ष्मीसनाथाय नरपञ्चाननात्मने।
यस्यासीद्देवतासंघपालनं परमव्रतम्॥

अथेदानीं महानाम्न्यादिव्रतत्रयविधिरभिधीयते। तत्राहा**श्वलायना**चार्यः—

प्रथमं स्यान्महानाम्नी द्वितीयं स्यान्महाव्रतम्।
तृतीयं स्यादुपनिषद्गोदानाख्यं ततः परम्॥
क्रिया व्रतानां कार्याः स्युर्यथाप्रोक्तं महाद्विजैः।

इति। तत्र तावत् तिथिनिर्णय उच्यते **श्रीधरीये नृसिंहे** च—

तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणम्।
चौलवत् सर्वमाख्यातं सगोदानव्रतेषु च॥

End:

ततो वरः वसन्तादिषडृतून् कुमुदाद्यष्टगजान् इन्द्रादिलोकपालांश्च प्रणवादिचतुर्थ्यन्त-मध्यनमोन्तनाममन्त्रैः संप्रार्थ्य ब्राह्मणैर्बन्धुभिः सह तज्जलमभिषिच्य सर्वं स्तम्भबलिं ब्राह्मणेभ्यो दत्त्वा यथाशक्ति दक्षिणां दत्त्वा बन्धुभिः सह भुञ्जीत।

Colophon:

इति श्रीनृसिंहीये प्रयोगपारिजाते षोडशकर्मकाण्डे स्तम्भबलिप्रकरणम्।

श्रीनंजुण्डेशस्वामिकारुण्याब्धौ तस्येश्वरनाम्नः परिणेतुः।
ध्वान्तादन्तेवासिकलापस्वातीनाम्नः प्रीतात्माहं प्रणमामि पदाब्जम्॥

Scribe adds:

Copied in Krodhana year, Puṣya month, Śuklapakṣa Aṣṭamī, Monday.

569

VB 730(a) **आपस्तम्बगृह्यप्रयोगः**

Beginning:

आपस्तम्बाय मुनये वेदशास्त्रार्थवेदिने ।
नमः पू . . . विदुषे सत्कर्मफलदायिने ।।
. . . . . नुग्रहेण स्मार्तप्रयोग उच्यते ।

सर्वशुभकर्मणां यथोक्तफलसिद्धचर्थं नवग्रहाणां प्रीत्यर्थं गृह्यज्ञं करोति ।

End:

सदेशं + भगवन्तं शनैश्चरमावाहयामि । कया नश्चित्र आ भुवदूती सधावृधः सखा । कया शचिष्ठया वृता . . .

571

VB 982(a) **आपस्तम्ब-गृह्यप्रयोगकारिकाः**

(विवाहवेदिलक्षणम्, पुण्याहकारिका in the margin)

Beginning:

हस्तोन्नता हस्तचतुष्टयेन विस्तीर्णता मन्दिरवामभागे ।
सौमण्टपस्तम्भचतुष्टयेन सोपानरम्यं च विवाहवेदी ।। १ ।।
षट्सु प्रादेशमात्रं स्यात् त्रिषु चाङ्गुलिमात्रकम् ।
आर्द्रक्षीरासमायुक्तमित्येते पीठलक्षणम् ।। २ ।।
मलिनं जीर्णवस्त्रं च रक्तनीलविवर्जितम् ।
शुभवस्त्रसमायुक्तं यजमानः शुभावहम् ।। ३ ।।

End:

ततश्चौपासनं कुर्याद्यावज्जीवमतन्द्रकम् ।
एवं संसृष्ट एवाग्नौ सीमन्तादिक्रिया अपि ।। ४७६ ।।
यदि कश्चन संसर्गं न करोति द्विवह्निमान् ।
नित्यमग्नी पृथग्धार्यौ तत्सिद्धचर्थं पृथक्क्रिया ।। ४७७ ।।
कन्यादानशतं सहस्रतुरगं गोकोटिदानं शतं
श्रीविष्णोः प्रतिमादिकोटिशतकं हेमाद्रिकोटीशतम् ।
. . . यैकादशलक्षकं प्रतिदिनम् आराधयेच्छ्रीधरं
तत्तत्कोटिशताधिकं गिरिसुते सोमे च नक्तं फलम् ।। ४७८ ।।

दुष्पारकुक्षिपरिपूरणे पौरव सात् (?)
कर्पूरगौरवपुषं पुरुषं विहाय ।
अन्यं किमाश्रयसि हन्त सखे मनस्तं
धन्यं भजस्व सततं तरुणेन्दुचूडम् ॥ ४७९ ॥
क्ष्मापवित्रसहस्राक्षं मृगारं होम . गणैः ।
पावमान्यश्च कूष्माण्डैः वैश्वानर्या रुचस्तथा ।
एतैरुद्धृत्य जुहुयात् सप्ताहं सवनत्रयम् ॥ ४८० ॥

573

VB 103(a) **आपस्तम्बपूर्वप्रयोगः**

Contents:

1. पुण्याहवाचनम् 1 2. नान्दी 4a 3. जातकर्म 4b 4. नामकरणम् 6b 5. अन्नप्राशनम् 7b 6. अङ्कुरार्पणम् 8 7. चौलम् 9b 8. उपनयनम् 11 9. श्रावणहोमः 16b 10. जयादि 22 11. समावर्तनम् 25b 12. पाणिग्रहणम् 28 13. कन्यादानम् 29b 14. विवाहमङ्गलाष्टकम् by कालिदास 30b 15. स्मार्तप्रयोगलक्षणविधिः 38 16. आशीर्वादः 44

Beginning:

. . . वासितं च गोमयेनोपलिप्य च ।
मध्ये प्रादेशमात्रं च कुर्याद्वर्णं तु गौरकम् ॥ १ ॥
केवलैस्तण्डुलैर्वापि तन्यूनेन मृदापि वा ।
गौरवर्णेन कुर्वीत स्थण्डिलं चतुरश्रकम् ॥ २ ॥
प्रादेशमात्रं चतुरश्रमादौ कृत्वा ततः स्थण्डिलमा समन्तात् ।
वहिष्परिस्तीर्य दशाङ्गुलाश्च बहिस्ततश्चोत्तरतश्च तद्वत् ॥ ३ ॥

End:

अग्निपात्रं तु भिन्नं स्यात् प्रमाणं तूद्वहे यदि ।
स प्राक्कपालमादाय जले भूमौ तु निक्षिपेत् ॥ १३३ ॥
प्रायश्चित्तमभिन्ने तु जुहुयाद्व्याहृतिद्वयम् ।
अन्यपात्रे तु निक्षिप्य तथा तन्त्रं प्रयोजयेत् ॥ १३४ ॥

585

VB 1078(a) **अग्निमुखम्**

Beginning:

तिस्रस्तिस्रो रेखा लिखित्वा अद्भिरपोक्ष्य शेषमुत्सृज्य भूर्भुवः सुवरोमित्यग्निं प्रतिष्ठाप्य भूर्भुवः सुवरोम् अग्निं प्रज्वाल्य

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्तहस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आविवेश ।।
सप्तहस्तः चतुःशृङ्गः सप्तजिह्वो द्विशीर्षकः ।
त्रिपात् प्रसन्नवदनः सुखासीनः शुचिस्मितः ।।
स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा ।।

End:

आज्योपहारं निवेदयेत् ।

यस्य स्मृत्या च नामोक्त्या + मन्त्रहीनं क्रियाहीनं + प्रायश्चित्तान्यशेषाणि + यस्य स्मृत्या च +

अनेन उपाकर्महोमेन भगवान् सर्वात्मकः सर्वं श्रीयज्ञेश्वरः प्रीणातु । न्यनातिरिक्तं सर्वं संपूर्णमस्तु । ओं तत्सत् ।।

Colophon:

मुखान्तं समाप्तम्

588

VB 1163(a) **आपस्तम्ब-पूर्वप्रयोगकारिका (सव्याख्या)**

Beginning:

केवलैस्तण्डुलैर्वापि तच्चूर्णेन मृदापि वा ।
गौरवर्णेन कुर्वीत स्थण्डिलं चतुरश्रकम् ।।

गौरवर्णेन मृदा . . . गौरवर्णद्रव्यमिश्रिततण्डुलादिना वा । तस्य प्रमाणमुच्यते—

द्वादशाङ्गुलमायान्तं स्थण्डिलस्य समन्ततः ।
उत्सेध . . गौर . . स्थण्डिलस्य च लक्षणम् ।।

उत्सेधः. . . . . एकाङ्गुलान्वितम् । एवं वितस्तिमात्रप्रमाणस्थण्डिलमित्युक्तम् ।

End:

जयादि प्रतिपद्यते. . . . स्थालीपाकं विना ध्रुवक्षितिरिति. . . . . आचारमतिक्रमात् । दर्शयेत् तामाग्नेयस्थालीपाकेन जयादयः स्विष्टकृतः, व्याहृतीनामनन्तरं सदसस्पतिमग्निं च प्रधान . . . . . तन्त्रं स्मृत्वा, अत्र एवमिष्यते ।

589

VB 1163(b) **आपस्तम्ब-पूर्वप्रयोगवृत्तिः**

Beginning:

श्रीशं श्रिया . . . . .यामुनार्यं गुरूत्तमम् ।
महापूर्णं यतीन्द्रार्यं गोविन्दं कुरुकाधिपम् ।।
श्रीपराशरभट्टार्यवेदान्त . . . . . गुरून् ।
श्रीकृष्णपादयुग्मं च . . . चार्यं. . त्तमम् ।।
. . . . . रम्यजामातृमुनिपुंगवम् ।
वरनारायणार्यादीनस्मद्गुर्वन्तकान् गुरून् ।।
प्रणम्य मनसा वाचा कायकेन पुनः पुनः ।
गृह्यसूत्रप्रयोगस्य वृत्तिं कुर्मि यथामति ।।

सर्वत्र कर्मादौ स्नात इति । चन्द्रिकायाम्–

अस्नात्वा नाचरेत् कर्म जपहोमादिकं न च ।

तत्रैव—

स्नात्वा कर्माणि कुर्वीत ब्राह्मणो विजितेन्द्रियः ।।

शुभ्रवस्त्रधर इति । **मात्स्ये**—

एवं स्नात्वा ततः पश्चादाचम्य च विधानतः ।
उत्थाय वाससी शुक्ले शुष्के तु परिधापयेत् ।।

धापयेद्धारयेदित्यर्थः ।

End:

विष्णुधर्मे—

महारात्रौ न भुञ्जीत चन्द्रसूर्यग्रहे तथा ।
मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कुर्यात् ततः परम् ।।

. . . . बालवृद्धातुरविषये च . . . अपराह्णे न मध्याह्ने . . .

593

VB 379 **प्रयोगपद्धतिः**

Contents:

गर्भाधानम् अभ्युदयम् पुंसवनम् रक्षाबन्धनम् जिह्वास्थानम् होममुद्रालक्षणम् समिद्धोमलक्षणम् सीमन्तोन्नयनम् जातकर्म नामकर्म अन्नप्राशनम् पाहित्रयोदशहोमः चौलम् उपनयनम् पालाशकर्म उपाकर्म ।

वेदव्रतानि––प्राजापत्यम् सौम्यम् आग्नेयम् वैश्वदेवम्

Colophon:

इति पेच्चर्ल शिङ्गय्यसूरिविरचितायां आपस्तम्बशाखिनां लोकोपकारकसमन्त्रक-प्रयोगपद्धतौ व्रतचतुष्टयं समाप्तम् ।

समावर्तनम् । अङ्कुरार्पणम् विवाहः मधुपर्कम् कन्यादानम् मुहूर्तम् तण्डुलप्रयोगः कन्याऋतुप्रयोगः प्रधानहोमः औपासनारम्भात्पूर्वमग्निरनुगते तन्मार्गमध्ये श्मशानादिभाण्डाभिन्नं यदृतादिहोमः गृहप्रवेशहोमः आग्नेयस्थालीपाकम् मरणे यदि नित्यौपासनम् औपासनाग्निरनुगते विवाहमध्ये पूर्णिमा अन्वारम्भणीया प्रथमपर्व प्रतिपदि स्थालीपाकः विभ्रष्टेष्टिः विवाहशेषहोमः दम्पत्योश्चित्तसंसर्गाः वैश्वदेवस्थालीपाकविधिः वैश्वदेवम् वैश्वदेवप्रयोगः आग्रयणम् द्विभार्याग्नि-संसर्गविधिः

593

VB 379 **प्रयोगपद्धतिः**

Beginning:

विनायकमहं वन्दे महातातमहर्निशम् ।
सहायं महतां शश्वदहत्यादुहितुः पतिम् ।।
महागणपतिं वन्दे गुहाग्रजमजार्चितम् ।
अहार्यतनयानन्दं सहायमसकृत् सताम् ।।
पेञ्जर्लमञ्चनार्यस्य सुतः **शिङ्गय**कोविदः ।
प्रयोगपद्धतिं वक्ष्ये मन्त्रपूर्वं क्रियोत्तरम् ।।

अत्रायं कर्मक्रमः––

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।
नामान्नप्राशने चौलं मौञ्जीव्रतचतुष्टयम् ।।
गोदानाख्यं स्नातकं च विवाहः पैतृमेधिकम् ।

इति । एतानि षोडशकर्माणि । इतोऽतिरिक्तानि वैश्वदेवश्रावणहोमादीनि । प्रायश्चित्तानि कथ्यन्तें । तत्रादौ सर्वकर्मसाधारणमग्निमुखमुच्यते । तत्प्रकारः––

आसनें सम्यगासीनो वामेनापूर्य नो . . ।
कुम्भकेन त्रिरावृत्त्या दक्षिणेन विरेचयेत् ।।
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ।

अनेन प्रकारेण प्राणायामं कृत्वा तत्कर्मनिर्देशं कृत्वा इदं कर्म करिष्य इति संकल्पं कुर्यात् । तथाह **कपर्दी**—

श्रुतिस्मृतिप्रचोदितं करिष्यते यदा तदा ।
स्वकर्म यत्तदादितो यतासुरागुरुं वदेत् ।।

End:

यात्रा—

प्रतिपद्गमनं नष्टं द्वितीयं कार्यसिद्धिदम् ।
तृतीयं क्षेममारोग्यं चतुर्थी मरणं ध्रुवा ।
पञ्चम्यां राजयोगश्च षष्ठी कलहमेव च ।
अन्नपानसमायुक्ता भोज्यं भुञ्जीत सप्तमी ।
अष्टम्यां व्याधिपीडा च नवम्यां चार्थनाशनम् ।
दशम्यां भूमिलाभं च एकादश्यां हिरण्यदम् ।
द्वादश्यां प्राणसंदेहः सर्वसिद्धिस्त्रयोदशी ।।
चतुर्दश्यां महाभीतिः पौर्णम्यां बहुलाभदम् ।
अमावास्यां च गमनं कार्यनाशश्च निश्चयः ।।

Extra 4 folios Contain:

Upanayana-maṅgala verses and vivāha-pradhāna-āhutihoma.

596

VB 375(a) **आपस्तम्बापरप्रयोगः**

Beginning:

अथातः पैतृमेधिकविधिं व्याख्यास्यामः । दहनम् । अनाहिताग्निर्मरणसंशये द्वि . . . . सर्वप्रायश्चित्तैः कृत . . . . . दक्षिणशिरसं निवेष्टयित्वापि . . . . इत्या . . . . . कर्ता प्राणानायम्य पितुः गोत्रस्य शर्मणः प्राणोत्क्रमण . . . तिसंज्ञकगोदानं करिष्ये ।

End:

नमो वः पितर इति जपित्वा गृहान्नः पितरो दत्तेति पितॄन् उपस्थाय ऊर्जं वहन्तीरिति पिण्डानामुदकं निनयेत् । मनो न्वा हुवामहे इत्युपस्थाय पिण्डार्चनं कृत्वा गोत्रशेषादिकं पार्वण-वत्कुर्यात् । इति कृष्णार्पणमस्तु ।।

Colophon:

अपरप्रयोगः समाप्तः

599

VB 1030(a) **आपस्तम्बापरप्रयोगः**

Beginning:

आहिताग्नेर्मरणसंशये यथोक्तं सर्वप्रायश्चित्तं कृत्वा अत्रान्तर . . . . नं कृत्वा ब्रह्मविदाप्नोति परं—भृगुर्वै वारुणिः . . . . क्षणे क्षणे जपति । आहिताग्ने . . . . औपासनाग्नि संधाय सर्वा . . . . . अलौकिकारणिभ्यामग्निं मथित्वा श्रोत्रियो गानात् . . . . . प्रेतसंनिधौ निधाय प्रेतपत्नीमपरेणाग्निं, दर्भेष्वासीनो मृतं भर्तारं अन्वारभ्य प्राणानायम्य संकल्पं कुर्यात् ।

End:

न केवलं लोष्टचितिः पुरुषस्य किं तु स्त्रिया अपि । अग्निचि . . . इत्यविशेषणोक्तस्त्रियाश्चैवमिति वचनात् । भवन्त्येवं शास्त्रमर्यादाः । न ते गुरवः । गृहे नित्यपुण्याहं वाचयित्वा ब्राह्मणान् भोजयेत् । अत्र नान्दीसंप्रदायात् ।

Colophon:

इति **श्रीहरविदुषा कवितोडरमल्लेन राममहापात्रेण** लोष्टचितिसमये गुरुमुखात् ज्ञात्वा **लोष्टाचितेः पद्धतिः ।**

Scribe adds:

विकारिनामसंवत्सरं श्रावणशु° १० आदिवारं ब्रह्ममेधं लोष्टचयनं श्रीरामार्पणंगाब्राशेनु ।।

602

VB 1191(d) **आपस्तम्बापरप्रयोगकारिका**

Beginning:

उत्तरस्मार्तकारिकाः ।

स्त्रीपिण्डं भर्तृपिण्डेन संयोज्य विधिवत् पुनः ।
द्विधा विभज्य तत्पिण्डं पुनस्त्रेधा विभज्य च ।। १ ।।
स्त्रीपिण्डं भर्तृपिण्डेन तत्तद्वर्गेण योजयेत् ।
उत्तरीयशिलापात्रे कर्तृद्रव्यविपर्यये ।।
पूर्वदत्ताञ्जलिं पिण्डान् पुनरित्याह **गौतमः** ।। २ ।।
वायसासहितें पिण्डे शुना शूद्रेण सेविते ।
प्राजापत्यं चरित्वा तु पुनः कर्म समाचरेत् ।। ३ ।।

अपुत्रस्य पितृव्यस्य भ्रातुश्चैवाग्रजन्मनः ।
एकोद्दिष्टं न कर्तव्यं कर्तव्यं च त्रिपूरुषम् ।। ४ ।।
पित्रोर्मातामहानां च भार्यायाश्च विशेषतः ।
औपासनाग्नौ करणं कुर्यादन्यत्र लौकिके ।। ५ ।।

End:

प्रथमोपक्रमे प्राप्ते कुलीरस्थे रवौ सति ।
उपाकर्म न कुर्वीत कुर्यात् सिंहगते रवौ ।। ९६ ।।
. . . . . सूर्यसंयुक्ते उपाकर्म तु दक्षिणे ।
नर्मदोत्तरदेशे तु कर्तव्यं सिंहयुक्तिथौ ।। ९७ ।।
मलमासे निपतिते सूतके मृतकेऽपि वा ।
ग्रहणे संक्रमे वापि मौढ्ये तु गुरुशुक्रयोः ।। ९८ ।।
प्रोष्ठपद्यामथाषाढ्यामुपाकरणमिश्रिते ।
प्रोष्ठपद्यामुपाकुर्यात् श्रावणं दूषितं यदि ।। ९९ ।।
आषाढे वापि कर्तव्यं प्रोष्ठपद्याश्च दूषणे ।
मासत्रयेऽपि दोषश्चेत् श्रावण्यामेव कारयेत् ।। १०० ।।

Colophon:

इत्युत्तरस्मार्तधर्मे ग्रन्थशतं समाप्तम्

603

VB 108(d) **आपस्तम्ब-पितृमेधकारिका**

Beginning:

प्रयोगस्य विधिं वक्ष्ये पैतृमेधिककर्मणि ।
मरणे संशये नृणां दक्षिणाशिरसो भवेत् ।।
कृच्छ्राणि दश दानानि कृत्वैव च ततः परम् ।
उत्क्रान्तितिलपात्रं च कर्णमन्त्रान् जपेत्ततः ।।
ब्रह्मविदायुषः प्राणमिति कर्णे च दक्षिणे ।
मरणानन्तरं नृणां कर्ता स्नानं समाचरेत् ।।
परिषद्दक्षिणा दद्याद् विप्रानुज्ञानपूर्वकम् ।
षण्णिमित्तं ततः कृत्वा प्रेताधानं चरेत् ततः ।।
पुत्रः पौत्रः प्रपौत्रश्च पुत्रिकापुत्र एव च ।
पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा ।।

भगिनी भागिनेयश्च सपिण्डो धनहार्यपि ।
पूर्वपूर्वप्रभावे स्यादुत्तरोत्तरपिण्डदाः ।।

End:

चतुष्पात्रविधानेन पूर्ववत् परिषिच्य च ।
चतुर्गृहीतमापूर्य चाग्रतो बलया स्रुचा ।।
आनन्दाय न वै तत्र जुहुयादाहुतिद्वयम् ।
जुहूस्रुवौ प्रहृत्याग्नौ पूर्ववत् परिषिच्य च ।।
तस्मिन्नग्नौ चरुं पक्त्वा यवोऽसीति यवोदनम् ।
प्राश्याचम्य शुभे कुम्भे वारुणं पूजयेत् ततः ।।
पानीयं पल्लवोपेतं हरिद्राक्षतशोभितम् ।
कुम्भं ताम्रमयं शुद्धं पुष्पमालादिभूषितम् ।।
. . . पाणिनाधाय धारयत्यमलीकृतम् ।।
पुण्याङ्गनां पुरस्कृत्य मङ्गलध्वनिपूर्वकम् ।
गच्छेयुः स्वगृहान् सर्वे पुरुषा वृद्धपूर्वकम् ।।

Colophon:

जनिवेन्द्रकुलेनैव **औबलेश्वरसू(?त्रि)रिणा** ।
कारिका पैतृमेधस्य कृता सर्वोपकारिका ।

605

VB 110(b) **आपस्तम्ब-पितृमेधकारिका (सवृत्तिः)**

Beginning:

आपस्तम्बमुनिं नत्वा प्रयोगः पैतृमेधिकः ।
न्यायं कर्पदिभाष्योक्तमनुस्मृत्याभिधीयते ।।

सूत्रकारमाचार्यमा**पस्तम्बं** नमस्कृत्य तत्प्रसादाद् भाष्यकारस्य **कर्पदिस्वा**मिनो मतमनुसृत्य पितृमेधप्रयोगोऽभिधीयत इत्यर्थः ।

End:

अष्टमपटलस्यापेक्षितोऽर्थः प्रागेवोक्तः । लोष्टचयनान्तं कर्माध्वर्यवम् । अध्वर्युः स्वकर्मान्ते ऋत्विग्भ्यो नम इत्युक्त्वा मृतस्य पुत्रादिभिः संतोषितो गच्छेत् ।

Colophon:

समाप्ता पितृमेधकारिका

Then are added a few lines on *garbhiṇīsaṃskāra*.

607

VB 110(d) **पितृमेधसारः**

Beginning:

अथातोऽवभृथेर्ष्टि व्याख्यास्यामः । तत्र देहः परमं हविः पुरुषाहुतिर्ह्यस्य प्रियतमेति विज्ञायते । न्यासो यज्ञः तस्याज्ञा यजमानः श्रद्धा पत्नी शरीराद्युपकरणानि. . . . स्थानं दीक्षा देहान्तो वर्णत इति हि श्रूयते । तत्खलु न्यासाध्वरविधायिनां पुण्योऽवभृथो महोत्सव उपलाल्यते । अत्र **याज्ञवल्क्यः**—

निजधर्माविरोधेन यस्तु सामयिको भवेत् ।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ।। (२. १५. १८६)

End:

ताम्बूलं भुक्तिदक्षिणां च दत्वान्नशेषमनुज्ञाप्य प्रणम्योपचारं कृत्वा. . . दर्भान्वारम्भणेन सदेवान् पितॄन् उत्थाप्य विसृज्य अथ विश्वेदेवांश्चासीमान्तमनुव्रज्यागत्य अग्नेर्दक्षिणत उच्छिष्टसंनिधौ सैधं दक्षिणा दर्भान् संस्तीर्य दक्षिणाभिमुखः सव्यञ्जनान् पूर्ववद्दर्भेष्वेतत्ते ततासावित्यदिभिः पश्चिमदर्भेष्व. . . . . .

611

VB 1144(f) **ब्रह्ममेधकारिका**

Beginning:

ब्रह्ममेधमथो वक्ष्ये सर्वं तु पितृमेधवत् ।
विशेषो वक्ष्यते कर्णे ह्यायुषः प्राणमित्यथ ।।
ब्रह्मविद्भृगुरित्येतावनुवाकौ जपेत् ततः ।
सर्वस्येति ऋचा दर्भानग्नेः पश्चान्निधाय च ।।
संवेशयित्वा तेष्वेनं दक्षिणा शिरसं तथा ।
अन्वारभ्य स्रुवेणैव परेयुवांसमित्यथ ।।

End:

यद्वै देवस्य गच्छेयुर्या राष्ट्रादिति मन्त्रतः ।
कर्ता तु तोरणं भित्त्वा निरस्याप उपस्पृशेत् ।।
उद्वयं तरणिर्द्वाभ्यामुपस्थाय दिनेश्वरम् ।
धातेत्वायुष्ट इत्युक्त्वा स्नानमन्यत्समं भवेत् ।।

612

VB 108(e) ब्रह्ममेधविधिः (कारिकासहितः)

Beginning:

ब्रह्ममेधः सर्वप्रायश्चित्तम् । उत्क्रान्तियात्रादानम् । प्राणसंशये आयुषः प्राणं संतनु + दिवः सुवं संतनु । ब्रह्मविदाप्नोति परम् । इत्युपनिषत् । भृगुर्वै वारुणिः + इत्युपनिषत् । कर्ता स्नात्वा प्राणानायम्य संकल्प्य प्रधानसंकल्पः । प्रेतौपासनाग्निना ब्रह्ममेधविधिना संस्करिष्य इति संकल्प्य सर्वस्य प्रतिशीवरीति प्रेतमन्वारम्भणम् ।

End:

धाता पुनातु + वर्चसा । यीयुष्टेये + पश्यान् । यद्यज्ञातयो वाहकाः सभां परीत्य प्रणम्यानुज्ञप्ताः कालशेषं बहिर्वासं पञ्चगव्यप्राशनम् । कृच्छ्रं चाचरेयुः । बहिर्वासमात्रं ज्ञातयः ।

Colophon:

ब्रह्ममेधः समाप्तः

Beginning:

ब्रह्ममेधकारिका

ब्रह्ममेधविधिं वक्ष्ये सर्वं तु पितृमेधवत् ।
विशेषो वक्ष्यते हुत्वा परेयुवांसमित्यथ ।।
संग्रहान् दश होत्रादीन् पर्वादीन् जुहुयात् ततः ।
पूषात्वादिषु भर्ता संभ्रियमाणोऽनुवाकतः ।।

End:

प्रकेतुनेति शंसित्वा परमं हरन्तमित्यथ ।
अश्वन्मती तथाप्यायस्वेति संगाहनं ततः ।।
उद्वयं तरणिर्वृभ्यां उपस्थाय दिनेश्वरम् ।
धाता च त्वायुष्टेत्युक्त्वा स्नानमन्यत्समं भवेत् ।।

Colophon:

इति ब्रह्ममेधकारिका संपूर्णा

616

VB 102(a) **बोधायनगृह्यप्रयोगः**

Beginning:

शुक्लाम्बरधरं विष्णुं + शान्तये। उमामहेश्वराभ्यां नमः। सर्वेषां शुभकार्याणां देवानां कर्मणः पूर्वं नवमे सप्तमेऽह्नि मनुष्याणां पञ्चमे तृतीयायां कर्तव्यः। पञ्चपात्रिकाः प्रक्षाल्य शुचिदेशाहृतैर्मृत्सिकतैः पूरयित्वा

दूर्वामश्वत्थपत्रं च शिरीषं बिल्वपत्रकम्।
तासां मूले तु बध्नीयात् श्वेतसूत्रेण वेष्टयेत् ।।

प्राणानायम्य पवित्रपाणिः अस्य वरदराजशर्मणः विवाहकर्माङ्गमङ्कुरार्पणकर्म करिष्य इति संकल्प्य।

तृतीयपरिणये चैतत् कृत्वा . . य कल्पयेत्।
तस्य मायाविवाहेन सा तु सत्कर्मकारिणी ।। इति

End:

विश्वामित्रगोत्र नारायणशर्मन् प्रेत एतत् तिलोदकमिति संबुद्ध्या दद्यात्। ततो यज्ञोपवीती अनूयाजसमिधमाधाय जयप्रभृति सिद्धमाधेनुवरप्रधानात्। संतिष्ठते सपिण्डीकरणम्।

मृतप्रिया चेत् प्रमदा तु तस्याः
पठन्ति सन्तः पतिपिण्डयोगम्।
जीवप्रियायाश्च तथैव पिण्डं
श्व- - -दिपिण्डैः सह संसृजेद्धि ।।

Scribe adds:

शोट्टै आळवानुपाध्यायर् पुत्रन् कालहस्ति सर्वधारिवर्ष तैमासं व्याख्यानं मुटिन्ततु

620

VB 102(b) **बोधायनापरप्रयोगः**

Beginning:

पितृमेधप्रयोगो वक्ष्यते—मातरं पितरमाचार्यं पत्नीं पुत्रं शिष्यमन्तेवासिनं पितृव्यं मातुल-सपिण्डसमानोदकं सगोत्रं वा पितृमेधविधिना संस्कुर्यात्। त एव भर्तारो दायं च गृह्णीयुः। अभिषिक्तस्य राजन्यस्य पुरोहितः संस्कर्ता। अनभिषिक्तानां सहस्रदक्षिणाः। पितृमेधसंस्कारः

कर्तुः ब्रह्मणो होतृसंस्कारः । कर्तुः पञ्चदश दक्षिणा । ततो वैश्यस्य । राजन्यस्य विषये दक्षिणा सप्तगुणा वैश्यस्य । पुत्रादीनां पूर्वभावे उत्तरोत्तरः ।

End: Same as in Ser. no. 616.

622

VB 106(d) **बोधायनापरप्रयोगकारिका**

Beginning:

षडाननं स्वामिनमाम्बिकेयं मूर्ध्ना नमस्कृत्य सुदीप्तशक्तिम् ।
बोधायनाचार्यमतानुसारी ब्रूते सपिण्डीकरणप्रयोगम् ।।
सायं हुताग्निर्विहिता सुयामः पूर्वेद्युराहूय निमन्त्र्य विप्रान् ।
आहूय च श्वः कृतपादशुद्धिरभ्यञ्जनाद्यैः प्रतिपूजयेत् सः ।।

End:

सो ये समाना अभि ये सजाता द्वाभ्यामुपस्थाय निमित्तपिण्डान् ।
संक्षालनेनाञ्जलिमान् विषिञ्चंस्त्रिरेव सव्यं तिलतोयशेषम् ।।
प्रेतस्य नाम चोच्चार्य संबुद्धया पितृभिः सह ।
एतत्तिलोदकं चोक्त्वा निनीयाथ जयादिकान् ।।

हरिः ओम् । सपिण्डीकरणं समाप्तम् ।

पौष्टिकं पञ्चभिर्दर्भैश्चतुर्भिस्त्वाभिचारिकम् ।
त्रिदर्भैः पैतृकं कुर्याद् द्वौ दर्भौ नित्यकर्मणि ।।
प्रेतकार्ये तथा चैको दर्भसंख्या विधीयते ।।

624

VB 59(b) **जैमिनीयपूर्वप्रयोगकारिका**

Beginning:

सुव्यक्तं स्वं प्रवक्ष्यामि गृह्यं जैमिनिनां मतम् ।
(बालाना)मल्पमेधानामत्यनुग्रहकारणात् ।।
गोमयेनोपलिप्तां तु भूमिमभ्युक्ष्य सैकतम् ।
स्थण्डिलं लेखितं प्रोक्ष्य प्रहृत्याग्निं निधापयेत् ।।

औपासने च नैयत्यं पूर्वमेव कृतं हि तत् ।
पूर्णपात्रस्रुवाज्यस्थाल्याज्येध्मार्बर्हिषां चरोः ।।

End:

इत्यमुकः सुता सः. . . . हंसिनस्तदो गाय मार्गीयतं तु तत् । माध्यंदिनस्य गायत्री बृहती त्रिष्टुबित्यपि छन्दांसि ।।

631

VB 105 (b) आतुरसंन्यासविधिः

Beginning:

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ।।

अथाङ्गिरसोक्तसंन्यासविधिं व्याख्यास्यामः—

आतुराणां विशेषोऽस्ति न विधिर्नैव च क्रिया ।।
प्रैषमात्रं तु संन्यासमातुराणां विधीयते ।।
आतुराणां तु संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं तदोच्चार्य संन्यासं तत्र पूरयेत् ।।

इति वा पाठः ।

End:

केशवादिद्वादशनामभिः प्रणवादिचतुर्थ्यन्तेन स्वाहाकारान्तैर्द्वादशाहुतीर्हुत्वा स्विष्टकृतादिहोमशेषं स्वगृह्योक्तविधिना समाप्य द्वादशनामभिः प्रतिनाममेकं द्वौ त्रींश्चतुरो वा यथासंभवं ब्राह्मणान् भोजयित्वा संन्यासिनश्च यथाशक्ति पूजयेत् । तदनन्तरं पाकान्तरेण पूर्वाश्रमगोत्रनामनिर्देशपूर्वकं पितृपितामहप्रपितामहक्रमेण पार्वणश्राद्धं कुर्यात् । परेऽह्न्याराधनं कुर्यात् ।

633

VB 112(a) आतुरसंन्यासविधिः

Beginning:

अथ संन्यासविधिः ।

स्नात्वा प्रक्षालितपादपाणिः वस्त्रं संधार्याचम्य स्नानाशक्तौ मन्त्रस्नानं कुर्यात् । तत्प्रकारः आपोहिष्ठेति नवभिर्वाक्यैः ।

भुवि मूर्ध्नि तथाकाशे मूर्ध्न्याकाशे तथा भुवि ।
आकाशे भुवि मूर्ध्नि स्यान्मन्त्रस्नानं विदुर्बुधाः ।।

आकाशे हृदि भुवि पादयोः । औपासनं कृत्वा अग्निमात्मनः या ते अग्न इति समारोप्य आहिताग्निश्चेत् प्राजापत्येष्टिस्थाने प्रजापत इति पुरोऽनुवाक्यया स वेदेति याज्यया पूर्णाहुतिं चतुर्गृहीतेन हुत्वा ।

End:

अतः किं वाच्यं । प्रेतशब्दस्य संन्यासिव्यतिरिक्तमृतवाचकत्वमिति वाच्यम् । तस्मात् संन्यासिनां मृतानामाशौचं पुत्रादीनां न कार्यमिति शिष्टसंमतसरणिः । अन्येन खननपूजादिके कारयिते मध्ये आशौचापगमे स्नानानन्तरं समाधिवेदिकायां लिङ्गं स्पृष्ट्वा भूमिर्भूमिमगादिति प्रधानमन्त्रं जपित्वा अतीतदिनपूजादिकं कृत्वा परदिनप्रभृति यथाक्रमेण कुर्यात् । इति सर्व-स्मृतिसर्वशिष्टसिद्धान्तः ।। हरिः ओम् ।

Complete:

ओम् शुभमस्तु । स्मृतिकौस्तुभं समाप्तम् ।

637

VB 471(b) आतुरसंन्यासविधिः

Beginning:

अथ आतुरसंन्यासविधिमाह । तत्र द्विविधम् । आतुरमत्यातुरं चेति ।

व्याघ्राग्निदस्युसर्पाद्यैः संपन्नमरणस्तु यः ।
महता व्याधिना वापि पीडितो वा मुमूर्षति ।।
तेनैव कुर्यात् संन्यासं (विधिना) ऽविधिनापि वा ।
संन्यस्तमिति यो ब्रूयात् कण्ठस्थप्राणवानपि ।।

End:

तथा चान्यान् अनुमान्य ताम्बूलादिकं दत्वा यज्ञेन यज्ञ इति विसृजेत् । इत्याह भगवान् **विखनाः** ।

एवं यः कुरुते भक्त्या यतेराराधनं परम् ।
सर्वान् कामानवाप्नोति अन्ते हरिपदं व्रजेत् ।

Colophon:

पराशरकुलोद्भूत**कृष्णमाचार्य**यज्वना ।
यतेश्च क्रमधर्मस्य वृत्तिर्विरचिताधुना ।।

Date:

शुभकृन्नामसंवत्सरमार्गशीर्षमास्यसित—

पक्षकैकादश्यां गुरुवासरे वीरराघवशर्मणा ।
लिखिता यतिधर्मस्य वृत्तिः सर्वार्थसाधनी ।।
दत्ताग्निहोत्रवंशाय वेङ्कटाचार्यनामने ।

639

VB 112(b) **आहिताग्निनिर्णयः**

Beginning:

पूर्वपक्षमरणसंशये विद्यमानाग्नेः कर्तव्यमाह । रात्रावेव प्रातरग्निहोत्रं हुत्वा प्रेतेऽमात्या इत्यादि कुर्यात् । अपरपक्षे मरणसंशये शेषहोमन्यायेन पर्वस्थं सायंकालपर्यन्तान् सायं होमान् हुत्वा तदानीमेव प्रातर्होमान् प्रतिपदि प्रातःकालपर्यन्तान् हुत्वा दर्शेष्टिः कर्तव्या ।

End:

आहिताग्निः संन्यासं कुर्वन् प्राजापत्यं वैश्वानरीं त्रैधातवीयां वा सर्वस्वदक्षिणामिष्टिं कुर्यात् । तदशक्ताविष्टिदैवतायाहवनीये पूर्णाहुतिं हुत्वा मन्त्रेणाहवनीये दारुमयानि प्रज्वाल्य मृन्मयान्यश्ममयानि चाहस्सु प्रक्षं प्यायन्त अयं ते योनिर्या ते अग्न इति द्वाभ्यामात्मनि समारोप्य संन्यसेत् । प्राजापत्येष्टिः समाप्ता ।

The owner of the MSS: Anantakrishnan:

अनपरप्रयोगं आहिताग्निविषयं अन्तकृष्णन् पुस्तकम् ।

642

VB 420(a) **काम्यवृषोत्सर्जनप्रयोगः**

Beginning:

अथ काम्यवृषोत्सर्जनम् । कार्तिक्यां पौर्णमास्यां क्रियेत, अपि वाश्वयुज्यां वैशाख्यां . . . मध्ये ब्राह्मणान् अन्नेन परितुष्य पुण्याहं स्वस्तिमति वाचयित्वा; अथ देवयजनोल्लेखप्रभृत्यग्निमुखान्तं कृत्वा, पक्वाज्जुहोति पूषा गा अन्वेतु नः इति ।

End:

वृषभस्य लोमत्वङ्मांसरुधिरदहनदोषप्रायश्चित्तार्थं तिलवस्त्रस्वर्णोदकुम्भदानानि करिष्ये । दानानि कृत्वा जपदक्षिणां दत्त्वा भूरिदक्षिणां च दद्यात् । ब्राह्मणान् भोजयेत् । आशीर्वादः । आचार्याय विशेषतः । एवं कृते सर्वान् कामान् अवाप्नोति इत्याह भगवान् **बोधायनः** ।।

Colophon:

इति काम्यवृषोत्सर्जनं समाप्तम् ।

651

VB 1187(b) **गृहार्चाप्रतिष्ठाविधिः**

Beginning:

शौनकसंहितायाम्—

पूर्वस्थापितबिम्बस्य न पुनः स्थापनं स्मृतम् ।
अङ्गभङ्गादिसंधाने प्रतिष्ठां पुनराचरेत् ।
जलाधिवासरहितं नेत्रोन्मीलनवर्जितम् ।
खनने चाग्निदहने चिरलुप्ते च पूजने ।
चण्डालसूतकोदक्या शवपातकदूषिते ।
विण्मूत्राश्रेष्ठसंस्पर्शैः संप्रोक्ष्यैव समर्चयेत् ।।
अन्यथा निष्फला पूजा महान् दोषश्च जायते ।
संप्रोक्षणावसानस्य न कालनियमः स्मृतः ।।

End:

सांनिध्यं कुरु मे देव सर्वदा सर्वकामद ।।
द्रव्यमन्त्रक्रियाभक्तिश्रद्धाहानिं सह प्रभो ।।
इति सांनिध्ययाचनम् ।
मन्त्रो यागःसमाह्वानकरपुष्पोपदर्शनम् ।
बिम्बोपवेशनं चैव योगविग्रहचिन्तनम् ।।
प्रणामश्च समुत्थानं स्वागतं पुष्पमेव च ।
सांनिध्ययाचनं चैव तत्राह्वानस्य सत्क्रिया ।।

652

VB 982(c) **गृहदेवताप्रतिष्ठाविधिः**

Beginning:

आपूर्यमाणपक्षे तु शुभवारे शुभे दिने ।
शुभर्क्षे शुभलग्ने च चन्द्रताराबलान्विते ।।

स्नात्वा धौताम्बरं धृत्वा नित्यकर्म समाचरेत् ।
कर्ता च प्राङ्मुखो भूत्वा आसने उपविश्य च ।।
प्राणानायम्य संकल्प्य कृत्वा पुण्याहवाचनम् ।
ताम्बूलफलपुष्पाद्यैः ब्राह्मणान् प्रार्थयेदथ ।।

End:

महीं कन्यां हिरण्यं च दश दानानि दापयेत् ।
आचार्याय च गां दद्याद्वस्त्रमाल्यादिभूषणैः ।।
दीनान्धकृपणादिभ्यः यथाशक्ति प्रदापयेत् ।
ब्राह्मणान् भोजयेत् पश्चादाशिषो वाचयेत्ततः ।।

Colophon:

इति श्रीभरद्वाजसंहितायामुत्सवखण्डे गृहदेवताप्रतिष्ठाविधिर्नाम पञ्चविंशोऽध्यायः ।।

669

VB 899(b) **पुत्रीयचरुहोमकल्पः**

Beginning:

शुभमस्तु । श्रीनृसिंहाय नमः ।
सुखसंतानसिध्यर्थं. . . . मानन्दमन्दिरम् ।
वन्दे संतानगोपालं गोपीबृन्दविहारिणम् ।।

श्रीभगवानुवाच—

मन्त्राः सर्वे मया प्रोक्ताः सर्वकामफलप्रदाः ।
अद्येमं शृणु. . . . . गोपाल. . . मनुः ।।
वर्णानां ब्राह्मणादीनां मद्दत्ता . . . संशयः ।
मन्त्रस्यास्य प्रभावेन संतानं स्यादिह. . . . ।।
जन्मान्तरार्जितैः पापैः संतानं प्रतिबध्यते ।
एतन्मन्त्रजपे भक्त्या तत्तत्पापक्षयं भवेत् ।।

End:

श्रद्धा हि सर्वसंकल्पसंजीवन्यभिधीयते ।
अश्रद्धा हि भवेत्सर्वसंकल्पवनपावकः ।।
श्रद्धावान् विन्दते क्षेमं श्रद्धाया विन्दते यशः ।
श्रद्धया विन्दते . . . श्रद्धया किं न साध्यते ।।

Colophon:

इति श्रीमार्कण्डेयमहामुनिप्रोक्तः पुत्रीयचरुहोमकल्पः समाप्तः ।।

672

VB 104(b) **प्राणाग्निहोत्रविधिः**

Beginning:

प्राणाग्निहोत्रविधिः । भद्रं कर्णेभिः । ओं शान्तिः ।

विनयेनोपसंगम्य ब्रह्माणं नारदोऽब्रवीत् ।
प्राणाग्निहोत्रं विधिवद्वद लोकपितामह ।।

पितामह उवाच—

प्राणाग्निहोत्रं वक्ष्यामि सर्वयज्ञेषु दुर्लभम् ।
यज्ज्ञात्वा मुच्यते जन्तुर्जन्ममृत्युजरादिभिः ।
परिज्ञानेन मुच्यन्ते नराः पातककिल्बिषैः ।।
विधिना भुञ्जते येन मुच्यते च ऋणत्रयात् ।

End:

भोक्ता भोजयिता चैव उभौ तौ स्वर्गगामिनौ इति ।
दातुश्चैव भवेत्पुण्यं भोक्तुश्चैव तु यत्कृतम् ।
तत्फलं समवाप्नोति विष्णोः सायुज्यमाप्नुयात् ।।

Colophon:

इति ब्रह्मप्रोक्ते नारदवाक्ये प्राणाग्निहोत्रविधिः समाप्तः ।

Then reads the following (in Telugu) verse of Raghuvamsa:

तमध्वरे विश्वजिति क्षितीशं निः शेषविश्राणितकोशजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी . . . . . ।।

675

VB 426(a) **महान्यासविधिः**

Beginning:

गणानां त्वा + सादनम् । ओं नमस्ते रुद्र + ते नमः । ओं नमो भगवते रुद्राय । पश्चिमान्त—रुद्राय नमः । अं कं खं घं ङं ।

प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यंङ्गमनंङ्गदेहदहनज्वालावलीलोचनम् ।
विष्णुब्रह्ममरुद्गणार्चितपदं . . . . . दयं
वन्देऽहं सकलं कलङ्करहितं . . . मुखं पश्चिमम् ।।

Folio. 3:

व्यक्ताव्यक्तनिरूपितं च परमं षट्त्रिंशतत्त्वाधिकं
तस्मादुत्तरतत्त्वमक्षरमिति ध्येयं सदा योगिभिः ।
ओंकारादिसमस्तमन्त्रजनकं सूक्ष्मादिसूक्ष्मं परं
वन्दे पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम् ।।

ओं औं ऊर्ध्वमुखाय नमः ।।

Folio. 4:

हरिः ओम् । याते रुद्र इति शिखायाम् । अस्मिन् महत्यर्णव इति शिरसि । सहस्राणीति ललाटे । हंसः शुचिषद् इति भ्रुवोर्मध्ये ।

Folio. 9:

अथैनमाशिषमाशास्ते । आयुराशास्ते । अस्यश्रीरुद्राध्यायप्रश्नमहामन्त्रस्य ।

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकजपहोमार्चनाभिषेकविधिं व्याख्यास्यामः । या ते रुद्र इति शिखायाम् ।

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तयानस्तनुवा शंतमया गिरिशंताभिचाकाशीहि ।।

शिखायै नमः ।

End:

प्रणवसंपुटितजपेन विशेषफलाधिक्यमस्ति ।

अस्य श्लोकः—

आद्यन्तयोर्यः प्रणवेन पूर्वं श्रीरुद्रसूक्तं प्रजपेदघघ्नम् ।
तस्याङ्घ्रिरेणुं शिरसावहन्ति ब्रह्मादयस्त्वाघनिवृत्तिकामाः ।।

676

VB 645(h) **महामृत्युंजयहोमविधिः**

Beginning:

अथ मृत्युंजयहोमं व्याख्यास्यामः । कृत्याद्रोहे आभिचारे दीर्घरोगे ग्रहपीडायां मृत्युप्राप्तौ महाव्याधौ महापदि चन्द्रार्कग्रहणदोषे च . . . ग्रहदोषे जन्मनक्षत्रे विषनाड्यां कुहूं व्रजेद्वान्येष्

महाभयेषु वा तेषां परिहारार्थं मासि मासि जन्मनक्षत्रे प्राप्ते संवत्सरे संवत्सरे वा आचार्यमुखेन स्वयं वा आयुष्यकामो महामृत्युंजयहोमं कुर्यात् । स्नात्वा पुण्याहं वाचयित्वा प्राणानायम्य सदाशिव—शर्मणो मम आयुष्कामार्थं महामृत्युंजयहोमं करिष्ये इति संकल्प्य ।।

End:

' आयुरसि सर्वायुरसि सर्वमायुरसि सर्वं म आयुर्भूयात् सर्वमायुर्गोषम् ', इति सर्वचरुशेषं प्राश्य आचम्य जठरमभिमृश्य ' यत इन्द्र स्वस्तिदा अभयंकर ', इत्येतान् जपित्वा गुरवे वरं दत्त्वा दशदानं दत्त्वा अवेक्ष्याज्यं दत्त्वा, ऋत्विग्भ्यो दक्षिणां दत्त्वा ब्राह्मणान् भोजयेत् । अपूपैर्घृतपायसैरेवं कृते आयुष्मान् भवति । अयुतहोमात् दीर्घायुर्भवति । लक्षहोमात् सहस्रायुर्भवति ।।

हरिः ओम् । शुभमस्तु

680

VB 105(a) मृत्तिकास्नानविधिः

Beginning:

अथातो मृत्तिकास्नानविधिं व्याख्यास्यामः । ब्रह्मचारी गृहस्थो वानप्रस्थः परिव्राजकानामश्वक्रान्ते सहस्रपरमा देवीति भूमी दूर्वे अभिमन्त्र्य उद्धृतासीति नदीतटे लोष्टमादाय काण्डात्काण्डात्प्ररोहन्तीति द्वाभ्यां दूर्वामादाय मृत्तिके हन मे पापमिति दूर्वां लोष्टे प्रतिष्ठाप्य

End:

तेषां सर्वाविरोधेन ब्रह्मकर्म समारभे इति दर्भासने सोममण्डलमुपविष्टोऽस्मीति स्मृत्वा त्रीन् प्राणायामान् धारयित्विाष्टोत्तरशतगायत्रीं जपन् ब्राह्मणः पूतो भवति । रोगी रोगात् प्रमुच्यते । द्वादशसाहस्रगायत्रीजपो ब्रह्महत्यागोवधगुरुतल्पगसुरापानस्वर्णस्तेयादिसर्वपापप्रणाशनमिति विज्ञायते । ध्यात्वादिदेवं नारायणं प्रभुं पश्यत इत्याह भगवान् बोधायनः ।।

687

VB 118(b) यतिसंस्कारविधिः

Beginning:

अथ यतिसंस्कारविधिं वक्ष्यामः । शिष्यः पुत्रोऽन्यो गृहस्थो वा यतिसंस्कारं सर्वमुपवीती कुर्यात् । अथ कर्ता स्नात्वा प्राणानायम्यामुं यतिं खननकर्मणा संस्करिष्ये इति संकल्प्य पुरुषसूक्तेन यतिं संस्थाप्य गन्धमाल्यादिभिः श्रीमदष्टाक्षरेणालंकृत्य श्रीचूर्णपरिपालनं कारयित्वा उदुत्यं

जातवेदसमिति शिक्ये यति समारोप्य नदीतीरं गिरिमनूपमश्वत्थमूलं वा जयशब्देन सह नीत्वा तत्रानुपहतदेशे भूर्भुवः सुवरिति पुरुषप्रमाणं गर्तं खात्वा सप्तव्याहृतिभिः संप्रोक्ष्य ।

Colophon of the first Khaṇḍa:

इति हरितकुलतिल**कवैदिकसार्वभौमस्य** कृतिषु यत्यनुष्ठानविधौ प्रथमः खण्डः ।

End:

त्रिदण्डिमरणे प्राप्ते तत्र स्नानं समाचरेत् ।
ज्ञातिपुत्रकलत्राणां नाशौचं नोदकक्रिया ।।
स्नात्वा गृहस्थः शुद्धात्मा यतिसंस्कारमाचरेत् ।
पुत्रः कुर्यात्तु पुत्री वा संनिकृष्टापि चेत्तदा ।।

688

VB 461(p) **यतिसंस्कारविधिः**

Beginning:

अथ यतिसंस्कारविधिं व्याख्यास्यामः । कर्ता स्नात्वा गृहस्थःशुद्धात्मा यतिसंस्कारमाचरेत् ।

पुत्रः कुर्यात्तु पुत्री चेत् संनिकृष्टापि चेत् तदा ।
पञ्चामृतैः स्नापयित्वा प्रणवेन ततः . . . . ।।
विष्णुसूक्तैस्तथैव च ।
त्रियम्बकैश्च मन्त्रैश्च शुद्धाद्भिः स्नापयेत् तदा ।।

End:

श्रुतिं योऽधीतधर्मेण पुत्रा वै परिवर्तने ।।

Colophon:

इति यतिसंस्कारविधिः ।

705

VB 125 **संध्यावन्दनमन्त्रदीपिका**

Beginning:

नत्वा महो जगद्भूतिविभूतिरिव मूर्तिभृत् ।
लौहित्यनीलकण्ठेन क्रियते मन्त्रदीपिका ।।

आपो हिष्ठेति मन्त्रस्य सिन्धुद्वीप ऋषिः स्मृतः ।
छन्दो गायत्रमापस्तु देवता प्रोक्षणे च सा ।।

आपो हिष्ठा मयोभुवः । हे आपः यूयं मयोभुवः ष्ठाहि । सर्वस्य भूतजातस्य सुखमयाः खलु । यद्वै शिवं तन्मय इति श्रुतेः ।

End:

सर्वमिदं जगद् अव्यक्तात् संभूतम् । अव्यक्ते प्रलीनमिति ज्ञापनार्थम् । एवं ध्यात्वा जपेत् ।

706

VB 130 **संध्यावन्दनमन्त्रभाष्यम्**

Beginning:

संध्याभाष्यमिदं गुह्यं ब्रह्मज्ञानप्रदीपकम् ।
शंकरार्येण भगवत्पादाचार्येण निर्मितम् ।।

सिद्धमिह देवतिर्यङ्मनुष्याणां संज्ञानामात्मवतां भगवान् आत्मेति । कुतः भगवच्छेषत्वाद् भगवत्प्रकारत्वाच्च । भगवांश्च तेषां जीवात्मनां स्वामीति सिद्धम् । कुतः । तेषां नियामकत्वात् तदाधारत्वाच्च आत्मपरमात्मनोः शरीरशरीरिभावेन तादात्म्यम् । तद्यथा अन्तर्यामिब्राह्मणे यमात्मनि तिष्ठन्, आत्मनोऽन्तरोऽयमात्मा न वेद यस्यात्माशरीरं य आत्मानमन्तरो यमयति एष त आत्मान्तर्याम्यमृत इति ।

End:

विपश्चित् सर्वज्ञः स भगवान् क्षीरसागरशायी नारायणो मनसा अस्मद्विषयप्रसादप्रवणेन चित्तेन मां स्वाराधनयोग्यत्वाय पुनः पुनातु । पूर्वोक्तानां पश्येमेत्यादिबहुवचनानां मामित्यनेनैकार्थत्वेऽपि वाक्यभेदेन सामानाधिकरण्याभावादस्मानिति विपरिणामो न कृत इत्यखिलमनवद्यम् ।।

Colophon:

इति श्री**मच्छंकर**भगवत्पूज्यपादविरचितं संध्याभाष्यं समाप्तम्

707

VB 425 **संध्यावन्दनमन्त्रभाष्यम्**

Beginning:

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ।।

श्रीमते निगमान्तमहादेशिकाय नमः ।

पुण्डरीकासनासीनं पाण्डराभ्रेन्दुसंनिभम् ।
अखण्डबोधजनकं हयग्रीवमुपास्महे ।।
नमामि शठजिद्योगिचरणाम्बुरुहं हि मे ।
यत्प्रसादेन वेदार्थो हस्तामलकतां गतः ।।
आपो हिष्ठादिमन्त्राणां व्याख्याः सन्ति सहस्रशः ।
त्रय्यन्तार्थानुसारेण व्याख्यानं क्रियते मया ।।

आपो हि ष्ठेति मन्त्रस्य सिन्धुद्वीप ऋषिः गायत्री छन्दः आपो देवता शिरःप्रोक्षणे विनियोगः ।

End:

'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।'

इतिवद् उत्तरोत्तरं तव प्रीतिवर्धकाः त्वदिच्छानुविधायिनः त्वत्स्वरूपरूपगुणविभूत्यनुभवैकरसा भवेम इत्यर्थः ।।

षष्टिप्रबन्धनिर्माता **शठकोपमुनी**शितुः ।
दासो **नारायणमुनि**र्नित्यमन्त्रानुदञ्चयत् ।।

Colophon:

श्रीमन्नारायणमुनिकृतिषु नित्यमन्त्रभाष्यं संपूर्णम् । हरिः ओम् । शुभमस्तु ।

यो देवः सवितास्माकं धियो धर्मादिगोचराः ।
प्रेरयेत् तस्य यद्भर्गः तद्वरेण्यमुपास्महे ।।
देवस्य सवितुर्मध्ये यद् भर्गो नो धियः क्रमात् ।
प्रचोदयात् तद्वरेण्यं धीमहीत्यन्वयः क्रमात् ।।

708

VB 424 संध्यावन्दनमन्त्रभाष्यम् (निर्णयकल्पवल्ली)

Beginning:

यस्मिन् दर्पणबिम्बजृम्भितपुरीसंदर्भतुल्यं जगद्
भान्तं यत्परसंविदो यत इदं रूप्यादिवल्लीयते ।
यस्याज्ञानविजृम्भिता परभिदा वारीन्दुभेदादिवत्
तं भूमानमुपास्महे हृदि सदा वामार्धजानिं शिवम् ।।
पूर्णानन्दस्वरूपाय दक्षिणामूर्तये नमः ।
अज्ञान् प्राज्ञान् करोमीति दीक्षिताय स्वचिन्तया ।।

मुकुन्दाश्रमयोगीन्द्रपादपङ्कजमाश्रये ।
यत्संदर्शनमात्रेण प्राशस्त्यं जायते नृणाम् ।।
श्रीमत्कटाक्षस्य सुवीक्षितानां वाणी सुवाणी रसनाञ्चले चला ।
प्रवर्तते तान् प्रणमामि नित्यं श्रीकृष्णविद्वन्मणिदेशिकेन्द्रान् ।।
अरुन्धतीव पतिभाग्यशालिनी लक्ष्मीरभून्मे जननी जनैर्नुता ।
श्रीरामभट्टस्तु पितामितागमस्तावद्य वन्दामि सदेष्टसिद्धये ।।
श्रीमद्राघवदैवज्ञवंश्यः श्रीकृष्णपण्डितः ।
प्रकाशयाम्यहं स्पष्टं **संध्यावन्दनपद्धतिम्** ।।
भाष्याणि वेदस्य विलोक्य निर्मिता विद्वत्प्रिया **निर्णयकल्पवल्ल्यसौ** ।
गंभीरसंशोभिपदानुगुम्फिता लब्धागमश्रेणिबुभुत्सया मया ।।

इह खलु सकलसत्कर्मपरिगणनायामादितः परिगणनार्हस्य संध्यावन्दनकलापस्य स्वरूपविशेषजिज्ञासा यथाकथंचिद्विगुणोऽपि ' श्रेयान् स्वधर्मो विगुणो ' ऽपि यस्मादिति भगवदुपदेशात् स्वधर्मत्वेन श्रेयसीति हृदि निधाय निरन्तरशुश्रूषापरितोषितसदाचार्यमुखकमलोदीरितसिद्धान्तसारान्निर्गलितश्रुतिरहस्यमाकलय्य यथायोगं प्रकाश्यते । तत्र तावत् संध्यावन्दनं नित्यम्; ' अहरहः संध्यामुपासीत ' इति श्रुतौ वीप्सावशात् ।

* * * * * *

किंतु यथोक्तप्रायश्चित्तमेव कृत्वा तत्कालोचितानुष्ठानमेव कार्यमिति स्मृतिविदां स्थितिः । अतोऽप्यन्यत् स्मृतिवशाद्विज्ञेयम्, ग्रन्थविस्तरभयान्नेह बहु प्रपञ्चितमिति सारम् ।।

Colophon:

श्रीकृष्णं जगदेकपण्डितमणिः **श्रीरामभट्टारकः**
श्रीलक्ष्मीरपि यं जजान तनयं प्रत्यक्प्रबोधोज्ज्वलम् ।
तन्न्यग्रोधसमीपवासिभगवन्मन्त्रानुचिन्ताफले
संध्यावन्दननिर्णये निरगमद् गुच्छोऽयमादिः स्फुटम् ।।

End:

वचोभिः संध्यादेवताभिवादनस्यानुक्तत्वाद् द्विजाद्यभिवादनस्यैवोक्तत्वाच्च तदभिवादनं प्रस्तुतवाक्यार्थः संध्याया अपि गरीयस्याः पुनरभिवन्दनमस्त्विति ।।

इति चतुर्थो गुच्छः ।।

साहित्यादपि शास्त्राणि विशिष्टानीति मन्मतिः ।
ततोऽपि वेदाध्ययनं ततोऽपि हरिकीर्तनम् ।।

709

VB 118(a) संन्यासविधिः

Beginning:

तुर्याश्रमस्वीकारयोग्यतासिद्धयर्थम् अनाश्रमि . . . च कृच्छ्रचतुष्टयं कृत्वा उत्तरायणे शुक्लैकादश्यां पूर्णिमायां वा यस्यां कस्यांचित् तिथौ स्वानुष्ठानानन्तरं गोविन्देत्यादि अस्यां तिथौ तुर्याश्रमस्वीकारार्थं तदङ्गभूतान्यष्टौ देवादिश्राद्धानि नान्दीमुखविधानेन करिष्ये इति संकल्प्य ।

End:

भूमिर्भूमिमगात् मातरमप्यगात् भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि समिध्यतामिति बृसीं गृह्णीयात् । पुनः प्रैषमन्त्रं पूर्ववदुच्चरेत् ।

Colophon:

इत्यापत्संन्यासविधिः

721

VB 1061 छन्दोनिर्णयः

Beginning:

अष्टविधानि छन्दांसि । प्राजापत्यदैवासुरार्षयजुःसामर्गृब्राह्मभेदात् । तानि प्रत्येकं सप्तविधानि, गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीभेदात् । तेषां लक्षणानि । प्राजापत्यान्यष्टाक्षरादीनि चतुर्भूयांसि । दैवान्येकाक्षरादीन्येकैकोत्तराणि । आसुराणि पञ्चदशाक्षरादीन्येकैकवर्जितानि । आर्षाणामुपरिष्टाद्वक्ष्यामः । यजुषां छन्दांसि षडक्षरादीन्येकैकोत्तराणि । साम्नां द्वादशाक्षरादीनि द्वयुत्तराणि । ऋचामष्टादशाक्षरादीनि त्र्युत्तराणि । ब्राह्माणि षट्त्रिंशदक्षरादीनि षडुत्तराणि । आर्षाणि तु छन्दांसि षड्विंशतिविधानि । यथा माप्रमाप्रतिमोपमासममागायत्र्युष्णिगनुष्टब्बृहती-पङ्क्तित्रिष्टुब्जगत्यतिजगती-शक्वर्यतिशक्वर्यष्टचत्यष्टिधृत्यति-धृतिकृतिप्रकृत्याकृतिविकृतिसंकृत्याभिकृत्युत्कृतिभेदात् । तानि चतुरक्षरादीनि चतुरुत्तराणि चतुःशतान्तानि । अथ सर्वेषां छन्दसामङ्कक्षेपः । प्राजापत्यानाम् 8, 12, 16, 20, 24, 28, 32, दैवानाम् 1, 2, 3, 4, 5, 6, 7, आसुराणाम् 15, 14, 13, 12, 11, 10, 9 आर्षाणाम् 4, 8, 12, 16, 20, 24, 28, 32, 36, 40, 44, 48, 52, 56, 60, 64, 68, 72, 76, 80, 84, 88, 92, 96, 100, 104 यजुषाम् 6, 7, 8, 9, 10, 11, 12 साम्नाम् 12, 14, 16, 18, 20, 22, 24 ऋचाम् 18, 21, 24, 27, 30, 33, 36 ब्राह्माणाम् 36, 42, 48, 54, 60, 66, 72 इति छन्दसां निर्णयः ।

हरिः ओम् । श्रीशिवरामानन्दसरस्वतीचरणारविन्दाभ्यां नमः । इदमस्मदीय प्रातिशाख्ये प्रतिपादितं छन्दसां स्वरूपं सुबोधमिह लिखितम् । श्रीः ।।

End:

छन्दः । गायत्री । दैव्येकम् । आसुरी पञ्चदश । प्रजापत्याष्टौ । यजुषां षट् । साम्नां द्विः । ऋचां त्रिः द्वौ द्वौ साम्नां वर्धेताम् त्रयस्त्रय ऋचाम् । चत्वारश्चत्वारः प्राजापत्यायाः । एकैकं शेषे । जह्यदासुरिन्युष्णिगनुष्टुप्बृहतीपङ्क्तित्रिष्टुप्जगत्यः । तिस्रः तिस्रः सनाम्न्यो ब्राह्मचः प्राग्यजुषामार्ष्य इति छन्दसां निर्णयः ।

आ	गा	उ	अ	बृ	प	त्रि	ज
	24	28	32	36	40	44	48
दै	1	2	3	4	5	6	7
आ	15	14	13	12	11	10	9
प्रा	8	12	16	20	24	28	32
य	6	7	8	9	10	11	12
सा	12	14	16	18	20	22	24
ऋ	18	21	24	27	30	33	36
ब्रा	36	42	48	54	60	66	72

729

VB 1191(c) **पराशरस्मृतिसंग्रहः**

Beginning:

अथातो हिमशैलाग्रे देवदारुवनालये ।
व्यासमेकाग्रमासीनमपृच्छन् मुनयः पुरा ।। १ ।।

मानुषाणां हितं धर्मं वर्तमाने कलौ युगे ।
शौचाचारं यथावच्च वद सत्यवतीसुत ।। २ ।।
तच्छ्रुत्वा ऋषिवाक्यं तु सशिष्यस्त्वर्कसंनिभः ।
प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ।। ३ ।।
न चाहं सर्वतत्त्वज्ञः कथं धर्मं वदाम्यहम् ।
अस्मत्पितैव प्रष्टव्य इति व्याससुतोऽब्रवीत् ।। ४ ।।
ततस्ते ऋषयः सर्वे धर्मतत्त्वार्थकाङ्क्षिणः ।
ऋषिं व्यासं पुरस्कृत्य गत्वा बदरिकाश्रमम् ।। ५ ।।
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ।। ६ ।।

End:

शाकमूलफलानां तु धान्यवच्छुद्धिरिष्यते ।। ७८ ।।
कौशेयाविक्रयारूपैः कुतुपानामरिष्टकैः ।
श्रीफलैरंशुपट्टानां क्षामाहिङ्गारसर्षपैः ।। ७९ ।।
शौचव. . . शृङ्गाणामस्थिदन्तमयस्य च ।
शुद्धिर्विधानता कार्या गोमूत्रेणोदकेन वा ।। ८० ।।
प्रोक्षणात् तृणकाष्ठानि पलालं च विशुद्धयति ।
मार्जनैश्चोपलैर्वेश्म पुनः पाकेन मृन्मयी ।। ८१ ।।
संमार्जने भाजनेन सेकेनोल्लेखनेन च ।
गवां चोपरिवासेन भूमिं शुद्धयति पञ्चभिः ।। ८२

Colophon:

इति पराशरस्मृतौ अशीतिग्रन्थः समाप्तः

730

VB 135 **मनुस्मृतिः**

Beginning:

मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ।।
भगवन् सर्ववर्णानां यथावदनुपूर्वशः ।
अन्तरप्रभवानां च धर्मान्नो वक्तुमर्हसि ।।

End:

तस्यास्यनिर्गतं धर्मं विचार्य बहुविस्तरम् ।
ये पठन्ति द्विजाः केचित् सर्वपापोपशान्तिदम् ।।

Colophon:

इति मानवे धर्मशास्त्रे भृगुप्रोक्ते द्वादशोऽध्यायः

After the colophon are given the following verses:

श्रीमान् **धर्मशिवार्यो** विलसतु लोके स पालयन् साधून् ।
यस्मिन्नन्यदुरापा शंभोः पूजा शरणता. . . . . ।।
योगिनां प्रवरो धर्मशिवाचार्य इति क्षितौ ।
विख्यातः शोभते यस्तु तस्येयं मानवी स्मृतिः ।।

743

VB 170(f) **अघनिर्णयः (सव्याख्यः)**

Beginning:

सुरासुरशिरोरत्नं ब्रह्मरुद्रादिसेवितम् ।
प्रणम्य पुण्डरीकाक्षं वक्ष्याम्याशौचनिर्णयम् ।।

अनेन श्लोकेन प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचार-परिपालनाय च सर्वस्मात्परः सर्वनमस्कार्यपुण्डरीकाक्षरूपस्वेष्टदेवताप्रणामरूपं मङ्गलं कृत्वा स्वकृतिनामाप्यकीर्तयत् ।। १ ।।

द्वितीयश्लोकेनाशौचशब्दार्थं वदति—

निमित्तं पिण्डदानादेः पुरुषस्थमशुद्धिकृत् ।
कालस्नानापनोद्यं यत्तदाशौचमितीर्यते ।।

अस्यार्थः—मुख्यकर्तुर्दशाहसपिण्डीकरणान्तं तत्प्रेतस्य च पिण्डसपिण्डसमानोदकानाम् उदकाञ्जलिप्रदानस्य च केवलबन्धूनां स्नानमात्रस्य च हेतुभतं पुरुषस्थं पुरुषोपलक्षिततदाश्रित-द्रव्यस्थं च कर्मानर्हत्वरूपाशुद्धिकरं च पक्षिण्यहस्त्र्यहदशाहादिकालापनोद्यं च केवलबन्धूनां स्नानापनोद्यं च यद् एवंविधस्याशौचमिति संज्ञा ।। २ ।।

End:

अथाशौचकालेऽतीते शुद्ध्यर्थं सर्ववर्णानां प्रतिवर्णं व्यवस्थया कर्तव्यविशेषमाह—

अघान्ते संगमे स्नात्वा विप्रः स्पृष्ट्वाम्बु शुद्धचति ।
नृपादिर्वाहनादीनि नान्यथेत्यब्रवीन्मनुः ।।

अस्यार्थः—आशौचकाले गते सति विप्रः संगमे स्नात्वा आज्यं स्पृष्ट्वा शुद्धो भवति । क्षत्रियो वाहनं स्पृष्ट्वा शुद्धो भवति । वैश्यो वृक्षादिस्पर्शेन शुद्धो भवति । शूद्रो वस्त्रद्वयेन स्नात्वा शुद्धो भवति । अन्यथा अशुद्धो भवतीति मनुनोक्तमिति यावत् । इदानीं स्वकृतौ प्रवृत्त्यर्थं वैलक्षण्यं प्रतिपादयन् प्ररोचयति—

एकत्र सुखबोधार्थं सुसमीक्ष्य बहुस्मृतीः ।
कृतोऽघनिर्णयः स्पष्टं गृह्यतां तद्बुभुत्सुभिः ।।

अत्र श्लोके बहुस्मृतिपर्यालोचनया सुखबोधार्थं अस्यां स्मृतेः प्रतिपत्तृणां. . . . . स्मृतिरुपादेयेति भावः । स्वस्य प्रसिद्धचर्थं स्वगोत्रस्वीयनामविद्याश्च कीर्तयन् स्वकृतिमुपसंहरति—

हारीतवेंकटाचार्यः श्रुतिस्मृतिविचक्षणः ।
व्यक्तं श्लोकशतेनेत्थमकरोदघनिर्णयम् ।

स्पष्टमेतत् ।

Colophon:

श्रुतिस्मृतिसदाचारनियतेन च यज्वना ।
कृता **रामानुजेनेत्थमघनिर्णयदीपिका** ।।

आशौचदीपिका समाप्ता ।

आशौचविषयः

Beginning:

स्मृत्यन्तरेषु विशेषवचनानि ।
अल्पाशौचे दिनं सद्यस्त्यहैका. . . शौचिनोः ।
पक्षिण्यघेष्वघान्तश्चेदेककालोऽन्यदाप्लवः ।।
मातापित्रोर्भगिन्योर्वा भ्रातृपितृव्ययोस्तथा ।
अनेकाब्दान्तरायेऽपि पक्षिणी नैव हीयते ।।

स्मृतिकौमुद्यां **शाटचायनः** मातुलादीनाम्—

बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति ।
सद्य एव विशुद्धिः स्यान्नाशौचं नैव सूतकम् ।।

End:

धर्मप्रदीपे—

सोदर्यायाः सुतायाश्च ऊढायाः पक्षिणी भवेत् ।
मातुः सपत्न्यां तुल्यायामतुल्यायामहो भवेत् ।।

तुल्या सवर्णा । अतुल्या असवर्णा ।

मातुले श्वशुरे मित्रे गुरौ गुर्वङ्गनासु च ।
आशौचं पक्षिणी रात्रि मृता मातामहा यदि ।।

इति **बृहन्मनुः** । स्वगृहे त्रिरात्रम् । **प्रचेताः**—

मातृष्वसामातुलयोः श्वश्रूश्वशुरयोर्गुणी ।
मृते चर्त्विजामाज्ये च त्रिरात्रेण विशुद्धयति ।।

मातुलश्वशुरेत्यादि विष्णुवचनं तु नादेशसापत्न्यानुपनीतादिविषयम् ।

747

VB 139(b) अघपञ्चषष्टिः (सव्याख्या)

Beginning:

गर्भस्रुतिर्मासचतुष्टये चेत्
स्नानं पितुः पञ्चमषष्ठयोश्चेत् ।
ज्ञातेश्च सा चेत्कठिना त्रिरात्रं
तयोर्दशाहं त्वथ सप्तमादौ ।।

अस्यार्थः—गर्भाधानमासमारभ्य चतुर्थमाससमाप्तेः प्राक् यदि दोषवशेन गर्भस्रावो जातः, (तर्हि) गर्भाधातुः स्नानतः शुद्धिर्भवति । स स्रावो यदि द्रवरूपेण पञ्चमे षष्ठे वा मासे जातः, तदा ज्ञातीनां पितुश्च स्नानतः शुद्धिर्भवति । यदि कठिनरूपेण, तदा तेषां दिनत्रयमाशौचं भवति । यदि सप्तमादिमासेषु स गर्भः पतितः, तदा तेषां दशरात्रमाशौचं भवति । केचित्तु—संनिधाने कठिनस्रावे त्रिरात्रम् । असंनिधाने त्वेकरात्रमिति वदन्ति ।

मातुरत्र कथमाशौचमित्यपेक्षायामाह—मासत्रय इति—

मासत्रये त्रीणि दिनानि माससमानसंख्यानि दिनानि पश्चात् ।
गर्भच्युतौ मासि तु सप्तमादावघं वधूनामथ सूतिकावत् ।। २ ।।

End:

क्रियादूषितविषयेऽपि सद्यः शुद्धिमाह—पाषण्डेति ।

पाषण्डषण्डौ पतिताभिशस्तौ स्वैरिण्य इत्यादिजनस्य मृत्यौ ।
उद्बन्धनाम्बुज्वलनप्रवेशविषादनादेर्मरणेऽपि सद्यः ।।

अस्यार्थः—वेदवैदिकविद्वेषी (पाषण्डः) षण्डः पतितः अभिशस्तः स्वैरिणी व्यभिचारिणी नित्यादिकर्मत्यागी निन्दिताचारनिरतः, उद्बन्धनमृतः, अम्बुमृतः वह्निविषयोगमृतः, शस्त्रहतः इत्यादिजनविषये तत्संबन्धिजनानां स्नानतः शुद्धिरिति ।। ६६ ।।

Colophon:

अघविवेचनं समाप्तम्

Four extra leaves at the end contain some miscellaneous passages on pollution. There is this last verse:

मक्षिका मशका बाला स्त्रीमुखे वेदबिन्दवः ।
इक्षुदण्डे तिले सोमे नोच्छिष्टं मनुरब्रवीत् ।।

Scribe adds:

कान्त त्वदङ्गपरिरम्भणरोधभीत्या
मुक्तावलीं स्तनतटे न तु विक्षिपामि ।
अद्यावयोर्विधिवशेन बतान्तराले
तिष्ठन्ति नाथ नगराद्रिनदीशतानि ।।

748

VB 169 **अघपञ्चषष्टिः (सव्याख्या)**

Beginning:

मायूरनाथमभयाम्बिकया समेत-
मागस्त्यसैकतगणेश्वरषण्मुखाभ्याम् ।
अन्तर्विभाव्य गुरुभिर्विवृणोत्यघाना-
माशौच**वीषि**कृतसंग्रहणं मृदूक्तया ।।
ज्येष्ठैः पितृव्यतनयैर्विवृतोऽप्यसौ मे
श्रीरामचन्द्रविबुधैरवधानिसाग्नेः ।
मूलप्रतीकविवृतिस्थपदाविवेक-
बालप्रबोधकतया सफलः प्रयासः ।।

इह वैदिकहिताय चिकीर्षितग्रन्थनिर्वर्तकचन्द्रकलावतंसस्फुरणरूपमङ्गलमाचरन्नेव स्वग्रन्थे प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजनाधिकारिसंबन्धान् ख्यापयन् **स्मृतिसिद्धान्तसुधाख्यं** चिकीर्षितग्रन्थं शिष्यावधानाय प्रतिजानीते—कलानिधिरिति ।

कलानिधिः कौशिकवंशवार्धेः
श्रीवीषिनाथो विबुधो मथित्वा ।
धीमन्थनेन स्मृतिदुग्धसिन्धुं
ददाति सिद्धान्तसुधां बुधेभ्यः ।।

End:

इत्यादि जनविषये तत्संबन्धिजनानां स्नानतः शुद्धिरिति ।

श्लोकैः षट्षष्टिसंख्यैर्मधुमधुरपदैर्वीषिनाथोऽघभेदान्
व्याचख्यौ साधुतुष्टचै विवरणमफलं यद्यपि स्यात् तथापि ।
प्रत्यक्षस्यापि भानोः प्रतिकृतिविधिवत् प्रस्तराद्यैर्जनानां
युक्तं व्याख्यानमस्याप्यसदृशमथवाप्यग्निचिद्यज्वनो मे ।।

749

VB 119(c) **अघविवेकः**

Beginning:

अथानेकर्षिवाक्यानि संगत्यादाय केवलम् ।
संग्रथ्य कौशिकादित्यो लिखत्याशौचनिर्णयम् ।।
पितृगेहादतोऽन्यत्र यदि कन्या प्रमीयते ।
पक्षिणी तत्र पित्रोः स्यान्नान्येषामिति निर्णयः ।।
असंनिधौ तु मरणे पित्रोरेकाहमिष्यते ।

इति च स्मृतेः अन्यगृहे प्रसूतिर्मृतिर्वा न तस्याघम् । प्रसूतान्यगृहे सूता मृता वा तस्य नास्त्यघमिति वचनाद् अन्यगृहस्यापि नाशौचम् । तथाच **देवलः**—

द्रव्याणि स्वामिसंबन्धात्तदघे त्वशुचीनि वै ।
स्वामिशुद्धचैव शुध्यन्ति वारिणा प्रोक्षितान्यपि ।।

Fol. 7 Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभाद्वैतविद्याचार्याप्पयदीक्षितसूनोर्नीलकण्ठदीक्षितस्य कृतौ अघविवेचने पूर्णाशौचप्रकरणं समाप्तम् ।

अथ त्रिदिनाशौचम् । समानौदक उत्पन्ने उपनयनादूर्ध्वं मृते च त्रिदिनमघं संग्रहे जाते च सोदके प्रेतेत्यघं सद्यो व्रतादय इति ।

End:

विशुध्यन्ति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ।
यद्यन्नमत्ति. . . . . तस्मिन् गृहे वसेत् ।।
अलंकृत्य वाहनं च . . . दिन . . .

753

VB 140(a) अभिनवषडशीतिः (धर्मप्रदीपिकाव्याख्यासहिता)

Beginning:

वागीशवासुदेवादिवरदानविशारदम् ।
वारं वारमहं वन्दे वारणेन्द्राननं महः ।।
सौजन्यं सुमनोऽभिनन्द्यममृतं सत्यं तु वेलातटं
स्वाचारः सहजो महामधुरिमा धर्मः सुराणां द्रुमः ।
यत्राद्यः कुलदेवतापदमितः **श्रीवेंकटेशो हरिः**
सोऽयं सर्वमनोरमो विजयते पोन्दूरुवंशार्णवः ।।
सुधांशुस्तत्र संभूतः **सुब्रह्मण्य**सुधीरिति ।
अजस्रपरिपूर्णाभिः कलाभिरुपशोभते ।।
कुलशीलविवेकादिप्रशस्तगुणजन्मभूः ।
वेंकटाम्बा महाभागा जननी यस्य पावनी ।।
वेंकटेशाह्वयो यस्य पिता सज्जनपूजितः ।
पवित्रकीर्तिरत्यन्तमहनीयगुणोज्ज्वलः ।।
तर्कादिप्रौढतन्त्रप्रविततगहनप्रक्रियादुर्गमार्ग-
स्थानस्वैरप्रचारप्रवलमृगपतिर्भूरिसद्ग्रन्थबन्धः ।
काव्यालंकारजालप्रचुरपरिचयो यः सुधासिन्धुपूर-
प्रेङ्खत्कल्लोलजालप्रतिभटकवितामाधुरीसाधुरीतिः ।।
सोऽहं साधुजनानां संततसंतोषसंविधानचणाम् ।
सदसद्विवेकजननीं सकलस्मृतिभिः प्रतीतसंवादाम् ।।
आशौचनिर्णयाख्यामभिनवषडशीतिमात्मना रचिताम् ।
व्याकुर्वे मन्वादिव्यवहारानप्युदाहरन् विशदम् ।।

ननु **चन्द्रकामाधवीयादि**निबन्धेषु तत्तन्मुनिवचनानि संकलय्य सर्वैकमत्योपपादनपूर्वकं सर्वे धर्माः सम्यगेव व्यवस्थिताः ।

End:

तेन कृतैषा व्याख्याभिनवषडशीतिभावबोधाय ।
धर्मप्रदीपिकाख्या व्याख्या जीयादतीव विख्याता ।।

Date:

क्रोधननामसंवत्सर आश्वियुजबहुल५आदिवारं मुद्दप्प वेंकय्यगारिकि भट्टिप्रोलु अहोबलं व्राशिन अभिनवषडशीति संपूर्णम् । ग्रन्थं २६२० ।।

754

VB 170(b) अघदशकम् (सव्याख्यानम्)

Beginning:

मातुर्गर्भविपत्स्वघं त्रिदिवसं मासत्रये चेत्तदा
मासाघं त्रिषु सूतिकाविधिरतः स्नानं पितुः सर्वदा ।
ज्ञातीनां पतनादिजातमरणे पित्रोर्दशाहं सदा
नाम्नः प्राक् तदुपैति सूतकवशाद् भ्रातुर्दशाहं परम् ।।

. . . . . .

आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं तु नारीणां तथा प्रसव इष्यते ।।

इत्युक्तस्रावपातादिगर्भविपत्स्वाशौचनिर्णय उक्तः । तत्रायमनुष्ठेयोऽर्थः । तिसृष्वपि गर्भविपत्सु मातुरेवाशौचम् । नतु पितुः, नापि सपिण्डानाम् । तत्रापि प्रथमादित्रिषु मासेषु त्रीण्यहोरात्राण्याशौचानि । चतुर्थपञ्चमषष्ठेषु मासेषु मासतुल्यानि । सप्तमादिषु सूतिविधिः ।

End:

शूद्रैः समाः संकरा इति । संकराः प्रतिलोमजाः संव्यवहार्याः । ते शूद्रैः समाशौचा इत्यर्थः । असंव्यवहार्याः संकराश्चण्डालादयः । तेषां नित्याशौचित्वान्नेह ग्रहणम् ।

Colophon:

इत्यघसंग्रहे दशश्लोकीव्याख्यानं संपूर्णम्

756

VB 170(a) आशौचनिर्णयः

Beginning:

आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिः स्याद् दशाहं सूतकं भवेत् ।। इति

अत्र स्रावे आद्यमासत्रये मातुस्त्रिरात्रमाशौचम् । उपरि आषष्ठमासं संख्यादिना आशौचः । चतुर्थे चत्वारि । पञ्चमे पञ्च । षष्ठे षडित्यर्थः । सपिण्डानां तु स्नानेनैव शुद्धिः स्रावे । पाते तु त्रिरात्रम् । सप्तममासप्रभृति तु स्वस्वजात्युक्ताशौचादि । **माधव**स्तु सूतिकास्वतिरिक्तानां सप्तमे सप्तरात्रम् । अष्टमेऽष्टरात्रम् । नवमप्रभृति तु दशरात्रमित्याह । जन्माशौचमध्ये शिशु-मरणे मृताशौचं नास्त्येव ।

End:

आहिताग्नेस्तु कृतिदाहे सपिण्डानां दशाहमेव । इदं चाशौचं चतुर्विधम् । अस्पृश्यत्व-प्रयोजनं कर्मानधिकारलक्षणं च । पुत्रे जाते पितुः स्नानमस्पृश्यता । मातुर्दशाहम् । सपिण्डानामस्पृश्यता नास्त्येव कर्मानर्हतामात्रम् । सूतिकायां तु पुत्रजनने सति विंशतिरात्रं कर्मानर्हता । कन्याजनने तु मासम् । पुत्रजन्मदिवसे पितुः दानादौ वचनादधिकारः । तथा च **शङ्खलिखितौ**—कुमारप्रसवे नाभ्यामुच्छिन्नायां दानप्रतिग्रहादिष्वदोषस्तदहनीत्येक इति । जन्मादौ देवतापूजायामपि प्रथमषष्ठदिवसेषु वचनादधिकारः । मृताशौचेषु सर्वेषामस्पृश्य-त्वमौत्सर्गिकम् । प्रकारान्तरप्रायश्चित्तनामाशौचं नास्ति । पूर्वप्रवृत्तचौलोपनयनादिसंस्कारेषु यज्ञदेवताप्रतिष्ठारामाद्युत्सर्गादिष्वप्येवमिति ।

Colophon:

इति श्री**भट्टोजिदीक्षित**कृताशौचनिर्णयः

Then are some passages on funeral rites and pollution:

मासिकानि सपिण्डं च दर्शश्राद्धं तथाब्दिकम् ।
कृतचूडोऽपि कुर्वीत जातदन्तश्च संस्थितः ।।
तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेत् ।।

अत्र आद्ये वर्षेऽपि दाहसंस्कारनिमित्तं जलादिकं त्र्यहाशौचमिति चेदित्यर्थः । आद्धि-वर्षमरणाधिकारे **मनुः**—

'अरण्ये काष्ठवत् त्यक्त्वा क्षपेयुस्त्र्यहमेव तु'। (५. ६९)

अत्रापि दाहवत् ज्ञातव्यम् ।

श्राद्धे संभृतसंभारे दैवाद्वा मानुषादपि ।
मृतके सूतके जाते विघ्नोपशमने क्षणे ।
एकादश्यां च दर्शे वा मृता चेत् श्राद्धमाचरेत् ।

757

VB 369(g) **आशौचनिर्णयः**

Beginning:

आशौचनिर्णयं व्याख्यास्यामः । जननसमाशौचिनः संध्यावन्दनम् । अर्घ्यमात्रमुच्चारयेत् । होममन्येन कारयेत् स्वाध्यायजपार्चनदानपूजादयोऽस्य निवर्तन्ते । पुत्रजन्मदिवसे दानं कुर्यात् । अधिनोऽन्नं न भोज्यम् । दधिक्षीरघृतादि ग्राह्यम् । शाकेनाङ्गस्पर्शः ।

End:

हीनवर्णशवानुगमनं न कुर्यात् । सूतकान्ते सङ्कवत्स्नानम् । ब्राह्मणो जलं स्पष्ट्वा शुद्धचेत् । क्षत्रियो वाहनं स्पृष्टवा । वैश्यः प्रतोदम् । शूद्रो यष्टिम् ।

Colophon:

इति **कौशिकगोविन्दाचार्य**कृत अशौचनिर्णयः समाप्तः

Additional verses on Jyotiṣa after colophon:

Beginning:

चतस्रो विष्णुपद्यस्तु चतस्रः षडशीतयः ।
अयने द्वे विषू द्वे च संक्रान्त्यो द्वादश स्मृताः ।
अयने विंशतिःपूर्वे मकरे विंशतिः परे ।
वर्तमानतुलामेषे नाड्यस्तूभयतो दश ।।

End:

ग्रस्त एवास्तमानं तु रवीन्दू प्राप्नुयाद्यदि ।
ततोऽपरेद्युरुदये स्नात्वाभ्यवहरेन्नरः ।।
चन्द्रसूर्यग्रहे काले पितृणां श्राद्धमाचरेत् ।
पक्वान्नेन न कर्तव्यं हेम्ना वामेन कारयेत् ।।
गृह्यमाणे रवौ स्नानं मुच्यमाने निशाकरे ।
स्नानं दानं च कर्तव्यं मध्ये होमं सुरार्चनम् ।।

758

VB 480(b) **आशौचनिर्णयः**

Beginning:

पराशरस्मृतिः । गणाधिपतये नमः । शुभमस्तु । अविघ्नमस्तु ।

अशौचनिर्णयम् । तत्राशौचशब्देन वर्णाश्रमानुष्ठानप्रसिद्धो धर्मः कालस्नानापनोद्यः पुरुषगतः कश्चनातिशय उच्यते । स च द्विविधः । जननप्रयुक्तो मरणप्रयुक्तश्चेति । द्विविधोऽप्य . . . . पादकः । पिण्डता . . . . . सोदकानां च तत्र पिण्डभागिनः पितृपितामहप्रपितामहाः । तदुपरि त्रयो. . . . . । तदुपरि त्रयः सोदकाः । कर्ता नु प्रथमः ।

End:

प्रमादादकृते तत् त्रीन् द्वादशैकादशेऽहनि उत्तरोत्तरकालेषु यथासंभवं मा . . . . तत्सपिडीकरणनिर्णयः समाप्तः ।।

Colophon:

इत्यौर्ध्वदेहिकस्मृतिसंग्रहः पराशरस्मृतेः समाप्तः

761

VB 1141(e) **आह्निकम्**

Beginning:

. . . . . .

श्रुतिस्मृतिभ्यां सहितानि कुर्वन्
कर्माणि तिष्ठेन्न तु निन्दितानि ।। १६ ।।
यल्लोकविद्विष्टमथात्मनश्च
प्रियं विकल्पे सति यच्च कर्म ।
कु . . . . तं यं न भवेत्तदेतत्
सर्वं त्यजेत् पौरविरोधि यच्च ।। १७ ।।
स्वभावतः कृष्णमृगाश्च यस्मिन्
वसन्ति देशे स तु धर्मदेशः ।
महानदी वा प्रवहेच्च यत्र
तत्रैव तिष्ठेन्न तु कीकटेषु ।। १८ ।।
तपस्विनो यत्र वसन्ति वृद्धाः
तपस्वितो बन्धुजनाश्च शिष्याः ।
समृद्धिरन्नस्य च यत्र नास्ति
न तत्र तिष्ठेत् क्षणमग्रजन्मा ।। १९ ।।
ब्राह्मे मुहूर्ते स्वगुरुं प्रबुध्यन्
ध्यात्वाथ संगृह्य गृहस्थकृत्यम् ।
ब्रह्मा मुरारिस्त्रिपुरान्तकारी-
त्यादीनि पाठ्यानि पठेत्ततश्च ।। २० ।।

End:

अकारादिहकारान्त. . . . न्ताश्च मातृकाः ।। ८७ ।।
. . . नारायणमाधवगोविन्दविष्णवः ।
मधुसूदन . . . . त्रिविक्रमवामनाः ।। ८८ ।।
श्रीधरश्च हृषीकेशः पद्मनाभस्तथा परः ।
दामोदरो वासुदेवः संकर्षण इतीरितः ।। ८९ ।।

प्रद्युम्नश्चानिरुद्धश्च स्वराणां मूर्तयस्त्विमाः ।
पश्चाच्चक्री गदी शार्ङ्गी . . . गदी पुनः ।। ९० ।।
मुसली . . . . . पाशी स्यादङ्कुशी तथा ।
कुमुदो नन्दजो नन्दी नरो नरकजिद्धरिः ।। ९१ ।।
कृष्णः सत्त्वः सात्त्वतश्च शौरिः शूरो जनार्दनः ।
भूधरो विश्वमूर्तिश्च वैकुण्ठः पुरुषोत्तमः ।। ९२ ।।
बली बल्यात्मजो वालो विषघ्नश्च कृषिः पुनः ।
हंसो वराह . . . . . मूर्तयो हलाः ।। ९३ ।।
केशवाद्या इमे श्यामाः शङ्खचक्रलसत्कराः ।
कीर्तिः कान्तिः स्मृतिः पुष्टिर्धृतिः कान्ति . . . . ।। ९४ ।।
मेधा सहर्षा सख्यः स्युर्लज्जा लक्ष्मीः सरस्वती ।
प्रीता रती रमा प्रोक्ताः क्रमेण स्वरशक्तयः ।। ९५ ।।
जया दुर्गा प्रभा सत्या. . . . . ।

765

VB 100(c) **एकादशीनिर्णयः**

Beginning:

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे ।।
अष्टाब्दादधिको मर्त्यो संपूर्णाशीतिवत्सरः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।।
मातृहा पितृहा चैव गुरुहा गुरुतल्पगः ।
एकादश्यामुपोष्याथ तत्तत्पापैः प्रमुच्यते ।।

End:

संकटे विषमे प्राप्ते द्वादश्यां पारणा कथम् ।
अद्भिश्च पारणां कुर्यात् पुनर्भुक्तिर्न दोषकृत् ।।
उत्थाने शयने चैव मदङ्गपरिवर्तने ।
शाकाहारं तु यो भुङ्क्ते हृदि शल्यं ममार्पति ।।
बहुना किमुतोक्तेन संदेहो जायते यदि ।
एकादशीं परित्यज्य द्वादशीं समुपोषयेत् ।।
पारणां तु त्रयोदश्यां न कर्तव्यं फलार्थिभिः ।
पारणं तु त्रयोदश्यां निष्कामानां विमुक्तिदम् ।।

Colophon:

इत्येकादशीनिर्णयः

766

VB 369(b) **एकादशीश्राद्धनिर्णयः**

Beginning:

. . . एतेन स्मृत्यपेक्षया श्रुतेः प्राबल्यादेकादश्यां श्राद्धकरणमित्युक्तं निरस्तम् । स्मृत्यपेक्षयात्यन्तप्रबलश्रुतिनिषिद्धं . . . . कत्यागादपि . . . . . सूतकादौ यथा श्राद्धं सूतक . . . श्राद्धं द्वादश्यां तु विधीयते ।

End:

अतः श्रुतिस्मृतीतिहासपुराणप्रामाण्यवादिभिः सर्वैरपि वैदिकैश्च एकादश्यां श्राद्धं न कर्तव्य मिति सिद्धम् । वैष्णवाधिकवाराहनारदीयपुराणादिषु एकादशीश्राद्धनिषेधकवचनानि परःसहस्राणि दृश्यन्ते, ग्रन्थविस्तरभयान्न लिख्यन्ते । **वेदान्ताचार्यैः हरिदिनतिलकाख्यग्रन्थे** एकादशीश्राद्धनिषेधः कृतः, तत्रैव द्रष्टव्यः । तस्मादधिकृतशास्त्रप्राबल्यस्य निराबाधकतयाधिकृतशास्त्रविहितपिष्टपशुयजनमेव उचितमिति सिद्धम् ।

769

VB 100(b) **कृत्तिकादीपनिर्णयः**

Beginning:

अथात्रावसरे वक्ष्ये कृत्तिकादीपमुत्तमम् ।
वृश्चिकेऽर्के वृषे चन्द्रे पूर्णायामग्निभे वृषे ।।
दीपारोपः प्रशस्तः स्याद् वेधितर्क्षविवर्जिते ।
रोहिण्यां वा भरण्यां वा दीपं पर्वणि कारयेत् ।।
अपर्वणि कृतो दीपो राजराष्ट्रविनाशकृत् ।
रव्यस्तमनवेलायां दीपारोपः प्रशस्यते ।।

End:

उपरागे तु कुर्वीत महादीपप्ररोपणम् ।
कृत्तिकाभिरयोगे तु केवलैव तिथिर्भवेत् ।।
पर्वण्येव तदा कुर्याद् महादीपप्ररोपणम् ।
एवं यो विधिवत्कुर्यात् दीपारोपणमुत्तमम् ।।

राजराष्ट्रविवृद्ध्यर्थं कर्तुः क्षेमाय तद्भवेत् ।
सदा वर्षति पर्जन्यो रोगा नश्यन्ति भूतले ।
सर्वे च सुखिनो मर्त्या भवन्ति निरुपद्रवाः ।।

Colophon:

इति कृत्तिकादीपनिर्णयः

770

VB 170(i) **गोत्रप्रवरनिर्णयः**

Beginning:

ओं प्रवरान् व्याख्यास्यामः । आर्षेयं वृणीते । एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते न पञ्चादीन् वृणीत इति विज्ञायते । जामदग्न्यवैन्यगार्त्समद+वैतहव्याः वार्ध्रियश्वा गौतमभरद्वाजकपयो हारीताः काण्वा विरूपा मौद्गला विष्णुवृद्धा आत्रेया विश्वामित्राः काश्यपा वसिष्ठा अगस्त्या इत्यष्टादश गणाः स्युः ।

End:

शाक्तय-सांकृत्य-गौरिवीत-त्रयार्षेयप्रवरान्वित-संकृतिपूतिमाषगोत्रेति ।। ३६ ।।

अगस्त्यदार्ढच्युतेध्मवाहत्रयार्षेयप्रवरान्वितागस्त्यगोत्रेति । अगस्त्यैकार्षेयप्रवरान्वितागस्त्य-गोत्रेति वा ।। ४० ।।

771

VB 170(k) **गोत्रप्रवरनिर्णयः**

Beginning:

गोत्रप्रवरः—

भार्गवच्यवनाप्नवानौर्वजामदग्न्यवत्ससावर्णिजीवन्तिजाबाल्यैतिशायनवैरोहित्यावटमाण्डू-कप्राचीनयोग्यार्षिषेणत . . . सकश्रीवत्सदेवरातभृगवो न मिथो विवाह्याः । भार्गववीतहव्य-सावेदसयास्कवाधूलमौनमौकभृगवो न मिथो विवाह्याः ।

End:

भारद्वाजगणस्यापि तथा कपिगणस्य च ।
कपिगोत्रेण कर्तव्यं नान्योन्यं पाणिपीडनम् ।।
स्वतन्त्रकपिगोत्रं तु भारद्वाजैः प्रयुज्यते ।
अस्वतन्त्रकपेर्गोत्रं न साध्यं विबुधैरपि ।।

कपिप्रसिद्धावुदितौ विवाह्यौ
स्वतन्त्र एकस्त्वपरोऽस्वतन्त्रः ।
तत्र स्वतन्त्रस्य कपेर्विवाहं
मिथो भरद्वाजकुलस्य चाहुः ।।
जामदग्न्याभिधा वत्सा आर्षिषेणस्तथैव च ।
पञ्चावर्त्तिन एवैते सर्वेऽन्ये चतुरवर्त्तिनः ।।

अप्यजामदग्न्यो जामदग्न्यमामन्त्र्य पञ्चावर्त्तं कुर्वीतेति सूत्रात् । स्वतन्त्रकपिगोत्रस्य भरद्वाजगणे विवाहः भरद्वाजगणस्थित कपिगोत्रत्रयस्वतन्त्रं कपिगोत्रम् । कपिप्रसिद्धा + चाहुः ।

772

VB 119(a) गोत्रप्रवरनिर्णयः (कारिकासहितः)

Beginning:

अथातोऽष्टादशगणाः प्रवरसूत्रकारेणोक्ताः । तेषां गणानामेवं क्रमः । भृगूणामेव पञ्च-गणाः । . . . . . सानां त्वष्टौ गणाः । इतरेषां त्रिः । विश्वामित्रकाश्यपवसिष्ठा-गस्तीनां गण एकैकः । तस्मात् संभूयाष्टादश गणाः ।

End:

वसिष्ठे . . . . . द्वसुपराशक्तिकुण्डिनमित्रावरुण . . . . संकृतिपूतिमाषगुरुवीता एते . . . अन्यै . . णैर्विवाह्याः ।। १८ ।।

Colophon:

इति प्रवराः समाप्ताः

After the Colophon are given the following verses:

प्राग्वीतहव्यान्न मिथो विवाह-
स्ततःपर . . . . . थश्चतुर्णाम् ।
विवाह इष्टस्तु सदा भृगूणां
पूर्वैश्च नित्यं मुनयो वदन्ति ।। १ ।।
आङ्गीरसानां तु भृगोः परेषा-
मा वामदेवान्न मिथो विवाहः ।
नातः परेषां हरितादधस्ता-
न्मिथो विवाहस्तु कपीनपास्य ।। २ ।।

प्रागाजमूदात्तु शनैः परेषा-
माङ्गीरसानां न मिथो विवाहः ।
प्राग्भार्गवो गौतमतस्तदादि-
राङ्गीरसोऽत्रेस्तु भवेत् पुरस्तात् ।। ३ ।।
अत्रेस्तु वंशः पटलान्त इष्टः
श्वामित्र वंशोऽथ विशब्दपूर्वः ।
आकाश्यपात् कश्यप आ . .
वसिष्ठ आगस्तिभवात्ततोऽपि ।। ४ ।।
नृणां द्वयामुष्यायणवंशजानां
स्मृत्वा कृतो नोभयतो विवाहः ।
मिथोऽपि कौत्सात्परतश्चतुर्णां
विवाहमिच्छन्ति कपर्दिशिष्याः ।। ५ ।।
विश्वामित्रस्य तु शैशिरास्तु तैः
शुङ्गादिभिर्नास्ति मिथो विवाहः ।

773

VB 170(j) **गोत्रप्रवर-निर्णयकारिकाः**

Beginning:

स्मृतिकौमुद्याम्—

भृग्वङ्गिरःकाश्यपात्रिवसिष्ठागस्त्यगाधिजाः ।
सप्तब्रह्मर्षयस्तेभ्यो गणा अष्टादशाभवन् ।।
भृगोः पञ्चगणाः पूर्वमष्टावाङ्गिरसा गणाः ।
अन्ये त्वेकैकगणिन इत्यष्टादश तद्गणाः ।।
जामदग्निः वीतहव्यस्तथा गृत्समदाभिधः ।
. . . . गौतमश्च भरद्वाजाह्वयः कपिः ।।
वार्ध्यश्वो वैन्य इत्येते भृगूणां च गणाः स्मृताः ।।
प्राग्जामदग्न्यो वत्सश्च श्रीवत्सश्चवनाह्वयः ।
ततो मण्डव्यमाण्डूकमण्डवो ह्यैतिशायनः ।।

End:

आश्वलायनः—

द्वयामुष्यायणकस्यैव नोद्वाहो गोत्रयोर्द्वयोः ।
तदपत्यस्य तज्जन्म गोत्रमेव विदुर्बुधाः ।।

गुरोः सगोत्रप्रवरा नोद्वाह्याः क्षत्रवैश्ययोः ।
स्वगोत्रा हृच. . . . .ज्ञैश्च निजैराचार्यगोत्रजाम् ।।
असंप्रज्ञातबन्धूनामाचार्यप्रवराः स्मृताः ।
पक्षे चास्मिन् विवाहेऽपि सगोत्रैः सह नेष्यते ।।
अ. . . . . .चोद्वहेत् ।
समानप्रवरां कन्यां मातृवत् परिपालयेत् ।।

774

VB 170(m) **गोत्रप्रवर-निर्णयकारिकाः**

Beginning:

आश्वलायनगृह्ये—

भृगूणां न विवाहोऽस्ति चतुर्णामादितो मिथः ।
श्यैतादयस्त्रयस्तेषां विवाहो मिथ इष्यते ।।
षण्णां वै गौतमादीनां विवाहो नेष्यते मिथः ।
दीर्घतमाश्च औचत्थ्यः कक्षीवांश्चैकगोत्रजाः ।।

End:

कूटस्थादन्यसंबन्धाद् माता वा भगिनी तु वा ।
पुत्री वा यदि वास्यापि विवाहः शुभदो भवेत् ।।
यत्र सापिण्ड्यसंबन्धिभगिनीं मातरं विना ।
अन्यत्र भगिनीमाता न दोषः स्फुट उद्वहेत् ।।

780

VB 13(h) **जपविधिः ।**

Beginning:

जपदेशमाह **याज्ञवल्क्यः—**

अग्न्यागारे जलान्ते वा जपेद्देवालयेऽपि वा ।
पुण्यतीर्थे गवां गोष्ठे सिद्धक्षेत्रेऽथवा गृहे ।।
अश्वत्थबिल्वतुलसीवने पुष्पान्तरावृते ।
सूर्याग्निरुद्रदेवानां गुरूणामपि संनिधौ ।।
अन्येषां च प्रशस्तानां मन्त्रानभिमुखे जपेत् ।

शङ्खः—

गृहे त्वेकगुणं प्रोक्तं नद्यादौ द्विगुणं स्मृतम् ।
गवां गोष्ठे दशगुणमग्न्यागारे शताधिकम् ।।

End:

प्रपञ्चसारे न्यासस्थानमभिहितम्—

काननवृत्तद्वचक्षिश्रुतिनासागण्डोष्ठदन्तमूर्ध्वास्ये
दोःपत्संध्यग्रेषु च पार्श्वद्वयपृष्ठनाभिजठरेषु ।
हृद्दोर्मूलापरगलकक्षेषु हृदादिपाणिपादयुगे
जठराननयोर्व्यापकसंज्ञा न्यसेदथाक्षरान् क्रमशः ।।

द्विशब्दः अक्षिश्रोत्रनासिकागण्डोष्ठदन्तेषु प्रत्येकं संबध्यते । दोःपत्संध्यक्षरणि विंशतिः । दोर्मूलं दक्षिणं पादिक्षान्ता व्यापकसंज्ञाः दश, तैः व्यापकं न्यासमपि कुर्यादित्यर्थः ।। अथ प्राणायामविधिः ।।

781

VB 100(a) **जयन्तीनिर्णयः**

Beginning:

श्रीकृष्णजयन्तीनिर्णयः—

अतः परं प्रवक्ष्यामि श्रीजयन्त्यादिनिर्णयम् ।
श्रावणे मासि रोहिण्यां कृष्णाष्टम्यां च हर्षणः ।।
बुधवारे वृषे लग्ने जातो देवकिनन्दनः ।
शुद्धा विद्धेति मुनिभिर्जयन्ती द्विविधा मता ।।
शुद्धा मुमुक्षुभिर्ग्राह्या न तु विद्धा कदाचन ।
अष्टमीसप्तमीविद्धा रोहिणी कृत्तिकायुता ।।
विद्धेति प्रोच्यते तत्र नोपवासादिकं चरेत् ।
सूर्योदये कृत्तिकायां विद्धा स्याद्रोहिणी यदि ।।
प्रातःकालीनवेधोऽयं वर्जितो व्रतकर्मणि ।
अर्कोदये यदा किंचित् सप्तमीवेधिताष्टमी ।।

End:

सर्वेष्वपि हि धर्मेषु प्रधानो वैष्णवः स्मृतः ।
विष्णोराराधनं भक्तैर्जयत्यां संप्रशस्यते ।।
तत्राप्यविद्धां गृह्णीयान्न तु विद्धां कदाचन ।
विशुद्धायां विशेषेण विष्णुमभ्यर्च्य वैष्णवः ।।

विष्णोर्व्रतानि तत्रैव कुर्याद्विष्णुपरायणः ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च मुनिसत्तम ।
विशुद्धोपोषणं कार्यं नित्यं विष्णुपरायणैः ।।

Colophon:

इति भगवच्छास्त्रे ब्रह्मनारदसंवादे जयन्तीनिर्णयः

785

VB 985(b) **दत्तपुत्रविषयः**

Beginning:

. . . . . भर्त्रानृण्यरूपफलसिद्धेः ।

बह्वीनां तु पत्नीनां. . . . . स्मृतः ।
एका चेत् पुत्रिणी तासां सर्वासां पिण्डदस्तु सः ।।

इति **बृहस्पतिवचने** पुत्रिणीत्यनेन गौणमुख्यसाधारणपुत्रवत्ताप्रतीतेरेतस्यैव पितृपत्न्यः सर्वा मातर इति **गौतमोक्तन्यायेन** सर्वासां मातृत्वाविशेषात् सर्वमातृक्रियाकर्तृत्वप्रतीतेः ।

End:

अत्र दाय इत्यस्य. . . . . वचनविरोधापत्तेः । यदपि कामान्न दद्यात् गृह्णीयात् . . . ज्येष्ठं पुत्रं. . . ग्रहप्रशंसापरम् । नतु ज्येष्ठकनिष्ठयोरात्यन्तिकनिषेधपरम् । . . . .

At the end two leaves add Akṣayacaturdaśīnirṇaya.

786

VB 170(e) **दत्तमीमांसा**

Beginning:

दत्तपुत्रसंततेरुपनयननिर्णये प्रमाणानि प्रत्यक्षमनुमानमागमश्च । दत्तपुत्रसंततेः पालकगोत्रप्रवरेणैवोपनयनादिकार्यमित्यस्मिन्नर्थे प्रत्यक्षमनुमानमागमश्च प्रमाणानि वर्तन्ते । प्रत्यक्षं दर्शयामः ।

End:

एतद्वचनं निष्कामुकोत्तमाधिकारिविधवाविषयम् । सकामुकविधवाया दत्तपुत्रस्वीकरणं कार्यमेवेति भावः । एतदपि पित्राद्यनुज्ञामूलकविषयम्, न तु स्वातन्त्र्येण ; स्त्रिया यावज्जीवमस्वातन्त्र्यमेवेति दिक् ।।

Colophon:

नन्दविरचिता दत्तमीमांसा समाप्ता

787

VB 1144(d) **दत्ताशौचविषयः**

Beginning:

कन्यकाजनने भ्रातृपितृतद्भ्रातृतत्सुताः ।
पितामहश्च तद्भ्राता शुद्धयन्ति दशरात्रतः ।।
आत्मपुत्रपितृभ्रातृपितृव्यस्त्रीप्रसूतिके ।
शुद्धयन्ति दशरात्रेण सर्वेषां सूतकं भवेत् ।।
पुत्रपुत्री तथा भ्रातृपुत्री च भगिनी तथा ।
पितुः सहजपुत्री च पञ्चानां सूतिकाविधिः ।

End:

ज्येष्ठपुत्रस्य दाने पुत्रान्तरसद्भावेऽपि ज्येष्ठ एव पित्रोर्जनयित्रोः दाहादि सर्वं कुर्यादिति **त्रिकाण्ड्या**मुक्तम् । तथा **पारस्करः**—

दत्तोऽपि न हि तत्पुत्र्या धनं गोत्रं च सर्वदा ।
दत्तस्य तूभयत्रापि संबन्धं मनुरब्रवीत् ।।

इति ।

Clophon:

इति दत्तपुत्रविषयः संपूर्णः

After the colophon:

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ।।

श्रीरामार्पणमस्तु । इयम् आन्ध्रस्मृतिः संपूर्णा ।

789

VB 473 **दानशान्तिकल्पः**

Beginning:

. . . . . नारसिंहवक्त्रं नराङ्गकम् ।
दंष्ट्राकरालवदनं लोलजिह्वं सुभीषणम् ।।

व्यक्ताक्षं जटिलं ग्रन्थिमालीढं पीनवक्षसम् ।

\+ + +

स्कन्द उवाच—

श्रीमूर्तिदानं दानानामुत्तमोत्तममीरितम् ।
ईश्वरेण त्वया तात दानं देयं विशेषतः ।
. . . . . संभारं. . . गृह्णीष्व मे गुरो ।
सर्वेषामपि दानानां फलदायि सनातनम् ।

ईश्वर उवाच—

श्रीमूर्तिदानम्:

सर्वाभीष्टप्रदं पुंसां स्त्रीणां चापि कुमारकम् ।
श्रीमूर्तिदानं कर्तव्यं द्वादश्यां सर्वदा भुवि ।।

End:

अजदानम्:

अग्नेस्त्वं वाहनं साक्षादपमृत्युनिवारणम् ।
दानेनानेन मे देव रक्ष मृत्युभयादितः ।।

महिषीदानम्:

कालमृत्युस्वरूपान्ते महिषीं रक्तभूषिताम् ।
सालंकारामिमां तुभ्यमतः शान्ति प्रयच्छ मे ।।

कालमृत्युमहिषीदानम्:

कालमृत्युस्वरूपां तां महिषीं रक्तभूषिताम् ।
सालंकारामिमां तुभ्यमतः शान्ति प्रयच्छ मे ।।

गोदानम्:

अत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यं संप्रददे धेनुमिमामुत्क्रान्तिसंज्ञिताम् ।।
गवामङ्गेषु तिष्ठन्ति . . . इति च ।

वैतरणी-गोदानम्:

यमद्वारे पुरे घोरे तप्ता वैतरणी नदी ।
तामहं तर्तुमिच्छामि कृष्णां गां प्रददाम्यहम् ।।

ताम्बूलदानम्:

ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम् ।
अस्य प्रदानाद् ब्रह्माद्या श्रियं ददतु पुष्कलाम् ।।

Colophon:

इति **हेमाद्रौ** दानविधिः समाप्ता

795

VB 368(b) **धर्मशास्त्रविषयः**

Contents:

रजस्वलाशुद्धिः, आतुरशुद्धिः, सूतिकारजस्वलामृतसंस्कारविषयः, पर्णदाहक्रिया, धनिष्ठा-पञ्चकमरणद्वारविषयः, ग्रहणश्लोकाः ।

Beginning:

स्नाता रजस्वला या तु चतुर्थेऽह्नि शुद्ध्यति ।
कुर्याद्व्रजोनिवृत्तौ तु दैवपित्र्यादिकर्म च ।। इति ।।
शुद्धा भर्तुश्चतुर्थेऽह्नि स्नाता नारी रजस्वला ।
दैवे कर्मणि पित्र्ये च पञ्चमेऽह्नि शुद्ध्यति ।।
आद्वादशाहं नारीणां मूत्रवच्छौचमिष्यते ।
अष्टादशाहात्स्नानं स्यात् त्रिरात्रं परतो शुचिः ।।

End:

अश्विन्यौ वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
चन्द्रोपरागसंभूतं दोषमाशु व्यपोहतु ।। ११ ।।
अर्केन्दुकुजसौम्याश्च गुरुशुक्रशनैश्चराः ।
राहुश्च केतवस्ताराः पीडामाशु हरन्तु मे ।। १२ ।।

सूर्यग्रहणे तु—

सूर्योपरागसंभूतं दोषमाशु व्यपोहतु ।

Colophon:

इति ग्रहणश्लोकः समाप्तः

796

VB 745(g) **नवग्रहदानविधिः**

Beginning:

नवग्रहदानम् । **ब्रह्माण्डे** सूतः—

अतः परं प्रवक्ष्यामि दानं सर्वार्थसिद्धिदम् ।
ग्रहशान्तिकरं नृणां सर्वपापप्रणाशनम् ।।

तत्कृत्वा सुभगः श्रीमानायुरारोग्यमाप्नुयात् ।
पुरुषोऽप्यथवा नारी स्वर्गं मोक्षं च विन्दति ।।
नक्षत्रग्रहपीडासु दुःस्वप्नानां च दर्शने ।
निमित्तानन्तरं कार्यं नैमित्तिकमिति स्थितिः ।।

End:

पश्चिमोत्तरतः केतुं संनिवेश्य यथाविधि ।
तान् सर्वान् गन्धपुष्पाद्यैरर्चयेत् स्वस्वमन्त्रकैः ।।
दानं शूद्रोऽथवा कुर्यात् स्त्री वा तत्र तु नारद ।
भूलेपनादि यत्कार्यं सर्वं विप्रेण कारयेत् ।।

797

VB 1126(b) **नित्यग्रन्थः**

Beginning:

श्रीभाष्यकारनित्यम् ।

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ।।

अथ परमैकान्तिनो भगवदाराधनं वक्ष्ये । भगवत्कैंकर्यरतिः परमैकान्ती भूत्वा भगवानेव स्वशेषभूतेन मया स्वकीयैश्च देहेन्द्रियान्तःकरणैः स्वकीयैरेव कल्याणतमैरौपचारिकसांस्पर्शिकाभ्यवहारिकैर्भोगैरखिलपरिजनपरिच्छदान्वितं स्वात्मानं प्रीतं कारयितुम् उपक्रमत इत्यनुसंधाय ।

End:

मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ।।
प्रदक्षिणसमेतेन त्वेवं रूपेण सर्वदा ।
अष्टाङ्गेन नमस्कृत्य उपविश्याग्रतो विभोः ।।

इत्युक्ताष्टाङ्गप्रणामः । शरणागतिप्रकारश्च पूर्वोक्तः । ततोऽर्घ्यजलं प्रदाय भगवन्तमनुज्ञाप्य पूजां समापयेत् ।

Colophon:

इति श्रीभगवद्रामानुजविरचितं **नित्यं** समाप्तम्

802

VB 985(a) **प्रपन्नधर्मसारसमुच्चयः**

Beginning:

. . . . . .
पाद्मं पद्मोद्भवं चैव पुष्करं वैभवं तथा ।
नलकूबरं नारदीयं सनत्कुमारं तु सात्त्वतम् ।।
वासिष्ठं जनकं चैव ऐन्द्रं भुवनमोहनम् ।
भविष्यतिलकं चैव विजयं पारमेश्वरम् ।।
सद्वाक्यं परमं चेति अष्टादश त आगमाः ।

एते अष्टादशागमाः । श्रीरामायणादय इतिहासाः भारतं च । भारद्वाजसंहिता । अगस्त्यसंहिता । पराशरसंहिता । वासिष्ठसंहिता । इत्यादयः संहिताः ।

वैष्णवं नारदीयं च तथा भागवतं शुभम् ।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ।।
षडेतानि पुराणानि सात्त्विकानि मतानि वै ।।

End:

तत्पादगौ. . स्व. . . . . कृत्वा—

सांनिध्यं कुरु देवेश सर्वसंपत्करो मम ।
लक्ष्म्या सह जगद्धात्र्या धरण्या न्यस्य मूर्धया ।
सांनिध्यं कुरु देवेश सर्वदा सर्वकामद ।।
द्रव्यमन्त्रक्रियाभक्तिश्रद्धाहानिं सह प्रभो ।।

इति प्रार्थ्य । अर्घ्यात् दीपान्तरमभि . . . तादि पादान्तं संपूज्य, अथ देवस्य दक्षिणवक्षसि श्रियं वामवक्षसि भुवं च पूर्ववत् तत्तन्मन्त्रेणावाह्य षडङ्गन्यासार्घ्याद्याचामान्तमभ्यर्च्य मूलेन सं . . . . . मीति देवाय पीठं दत्वा आपोहिष्ठेति तिसृभिरर्घ्यं मूर्ध्नि । आपः पादेति पाद्यम् । शं नो देवीरित्याचमनीयं दत्वा अग्रतः व्रीहीन् परिस्तीर्य तदुपरि तदर्धं तण्डुलान् तदुपरि तदर्धं तिलान् . . . . . तत्र सप्तदश कलशान् सूत्रवेष्टितान् सकूर्चान् सफलपल्लव . . . . . .

Colophon fol. 25:

इति भारद्वाजकुलतिलकवङ्कीश्वरान्वयजातस्य श्रीमत्सुन्दरार्यपुत्रस्य **श्रीवैकुण्ठनाथस्य** कृतिषु प्रपन्नधर्मसारसमुच्चये परिभाषा नाम प्रथमः परिच्छेदः

803

VB 13(i) **प्राणायामविधिः**

Beginning:

अथ प्राणायामविधिः । तत्र **याज्ञवल्क्यः**—

एवं संमार्जनं कृत्वा बाह्यशुद्धयर्थमादरात् ।
अथाभ्यन्तरशुद्धयर्थं प्राणायामं समाचरेत् ।।

बृहस्पतिः—

बद्ध्वासनं नियम्यासून् स्मृत्वा चर्ष्यादिकं तथा ।
संनिमीलितदृङ् मौनी प्राणायामं समभ्यसेत् ।।

यत्तु **दक्षवचनम्**—

संध्यात्रयेऽपि कर्तव्यं प्राणायामत्रयं द्विजैः ।
आसीनस्तु भवेत् सायं मध्याह्ने स्थित एव वा ।।

End:

मनुः—

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ।। (६. ७०)

शौनकः—

प्राणायामं धारयेत् त्रीन् यथाविधि समासतः ।
अहोरात्रकृतं पापं तत्क्षणादेव नश्यति ।।

याज्ञवल्क्यः—

षोडशाक्षरकं ब्रह्मा गायत्र्यास्तु शिरः स्मृतम् ।
सकृत्प्रवर्तय प्र . . . . . पि मुच्यते ।।

Colophon:

इति प्राणायामविधिः

804

VB 368(c) **बोधायनामावास्यानिर्णयः**

Beginning:

बोधायनामावास्या-वचनम् । हरिः ओम् ।

बोधायनामावास्याक. . . . .नमतानुसारिणाममावास्यायां विशेषमाह **कात्यायनः**—

सिनीवाल्यपराह्णे चेदृगापस्तम्बसामिनाम् ।
सायाह्ने तु त्रिनाडी चेत् सा बोधायनकण्वयोः ।।

इति । श्राद्धेऽप्येवमेव तिथिर्ग्राह्या । यतः स एवाह—

चतुर्दशीदिनान्ते तु चतुस्त्रिघटिका यदि ।
अमाभूते च कर्तव्यं श्राद्धं वाजसनेयिभिः ।।

इति कालनिर्णये—अस्तमयादर्वाक् स्वल्पामावास्योपेतायामपि चतुर्दशीश्राद्धान्वाधाने कर्तव्ये इति ।

End:

अयमर्थः—संपूर्णचतुर्दश्यामविचारेणामावास्याबुद्धिं कृत्वा हविर्निर्वापे कृते तस्मिन् दिने उषःकाले पूर्वस्यां दिशि चन्द्रमा उदेति तदा दर्शकालस्याप्राप्तत्वात् कालापराधं निमित्तीकृत्य दर्शदेवतापनीयदात्रादिगुणविशिष्टान्याग्न्यादिदेवतान्तराण्युद्दिश्य यागो विहितः । **तैत्तिरीय-ब्राह्मणे**—यस्य हविर्निरुप्तं पुरस्तात् चन्द्रमा+पुरोडाशमष्टाकपालं कुर्यादित्यादिना सोऽयं दृष्टान्तः ।

811

VB 105(c) यज्ञोपवीतविधिः

Beginning:

कार्पासं तु समादाय शुचिक्षेत्रे विशोधयेत् ।
ब्राह्मण्याकारितं सूत्रं जीवभर्तृकयाथवा ।।
स्थूलसूत्रं तु कलहं सूक्ष्मं च व्याधिपीडितम् ।
तन्तुच्छेदेन मरणं समसूत्रं यशस्करम् ।।

End:

स्मृत्यन्तरे—ऋतुकाले उपवीती अनृतौ प्राचीनावीती ग्राम्यधर्मः ।

ब्राह्मणो यो न जानाति उपवीतस्य संस्थितिम् ।
मोहाद्वा वहते भारं पशुर्गौरिव सर्वदा ।।

जीर्णयज्ञोपवीतमादाय शिलायां बध्वा . . . सा ध्यात्वा अगाधं जले निक्षिपेत् । तूष्णीं तत्प्राजापत्यमिति श्रुतिः ।

कोपाद् बलाच्च. . . . सूत्रं छिनत्ति सः ।
स्नात्वा शुचि. . . . . ।।

. . . .पोताद्वहनानि यानि चान्यानि मनुष्यकार्याणि दक्षिणे कर्णे सक्तं निवीतमित्याह भगवान् **बोधायनः**। यज्ञोपवीत इति वचनात् व्याख्यानम्। दक्षिणहस्तः स यज्ञ इति। यज्ञ इत्ययं शब्दः संगतकरणदानेषु यस्मादेतानि कुर्वते तस्माद्यज्ञ इति।

देवागारे तथा गोष्ठे नद्यां वान्यत्र वा शुभे।
चतुरङ्गुलमूलेन सप्तप्रणवपूर्वकम्॥
आवेष्टच्य वाग्यतो भूत्वा संख्याषण्णवतिस्तथा।
तावत् त्रिगुणितं कुर्यात् प्राङ्मुखोदङ्मुखोऽपि वा॥
प्रक्षाल्य तन्तुसूत्रं तु आपोहिष्ठादिभिस्त्रिभिः।
सूत्रं सलोमकं स्याच्चेत् ततः कृत्वा विलोमकम्॥

813

VB 157(a) **यतिधर्मसमुच्चयः**

Beginning:

श्रीमाञ् जयति लोकानां नायको गरुडध्वजः।
पाषण्डेभ्यस्त्रयीत्राता येन प्राप्य त्रिलिङ्गताम्॥
संन्यासविषयाः सर्वाः समाहृत्य श्रुतिस्मृतीः।
क्रियते यादवेनायं यतिधर्मसमुच्चयः॥
विधिः कर्तृदशालिङ्गं प्रयागो मुख्यकर्म च।
अहोरात्रक्रियाचारो लिङ्गधर्मगतिस्थिती॥
प्रायश्चित्तानि संस्कार इत्येकादशपर्वकः।
यतिधर्मः क्रमादत्र धर्मशास्त्रेभ्य उद्धृतः॥

End:

कृत्वा प्रदक्षिणं तांश्च अनुज्ञाप्यान्नशेषकम्।
दक्षिणेनाग्निमास्तीर्य प्रागुदग्दर्भकांस्तथा।
एतत्ते केशवाद्यैर्द्वादशभिर्बलिमावहेत्।
ततः स्विष्टकृदाज्यं तु कुर्याद्यदवधानतः।
पुत्राद्या विधिमेतं तु कृत्वा सिद्धिमवाप्नुयुः॥

Colophon:

इति **यादवप्रकाशीये यतिधर्मसमुच्चये** संस्कारविधिर्नाम एकादशं पर्व

The scribe adds:

जयवर्षे नभोमासि कृष्णपक्षेऽष्टमीतिथौ।
बुधवारेऽग्निनक्षत्रे योगे व्याघातवर्जिते॥

श्रीनिवासमुदे तेन प्रेरितेन यथामति ।
लिखितो वरदार्येण यतिधर्मसमुच्चयः ।।
कृत्वानवद्यं निगमान्तभाष्यं
निराकृतं येन भयं श्रुतीनाम् ।
प्रतारितानामबहुश्रुतैस्तं
रामानुजं योगिनमाश्रयामः ।।

815

VB 111 रोगप्रायश्चित्तविधिः

Beginning:

रोगापकर्षणम् । आचार्य उदङ्मुखः स्थित्वा रोगिणं प्राङ्मुखमुपवेश्य, आचार्यः दर्भ-पाणिः सन् धन्वन्तरिमूलमन्त्रम् ऋष्यादिपूर्वकं ज्ञात्वा रोगापकर्षणं कुर्यात् ।

End:

ब्राह्मणा जङ्गमं तीर्थं तीर्थभूता हि साधवः ।
तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ।।
ब्राह्मणा यानि भाषन्ते भाषन्ते तानि देवताः ।
सर्वदेवमयो विप्रो न तद्वचनमन्यथा ।।

इति । मनुः—

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं न किंचिदश्नीयात् प्राजापत्यं चरन् द्विजः ।। (११. २११)
कृच्छ्रप्रतिनिधिं कुर्याद् गोभिरेव सवत्सकैः ।
गवामभावे निष्कं स्यात् तदर्धं पादमेव वा ।।
पादहीनं न कर्तव्यमिति शातातपोऽब्रवीत् ।
तस्य स्वरूपतोऽनुष्ठानाशक्तेः प्रतिनिधिरेवानुष्ठेयः ।
यद्यप्यसकृदभ्यस्तं बुद्धिपूर्वमघं बृहत् ।
तच्छुध्यत्यब्दकृच्छ्रेण महतः पातकादृते ।। इति ।।

Two fly leaves at the beginning have the contents of the work:

रोगापकर्षणम् । अक्षिभ्यामिति मार्जनम् । मार्जनमन्त्रभाष्यम् । रोगप्रतिमादानपूजा । सूर्यपूजा । सूर्यप्रतिमादानम् । गणपतिप्रतिमादानम् । आकर्षणम् । कृच्छ्रस्वरूपम् ।

Two leaves at the end contain Gaṇapatidhyāna and Vātasūktam.

818

VB 484(a) **विवाहदीपिका**

Beginning:

बोधायनभरद्वाजावापस्तम्बाश्वलायनौ ।
कात्यायनश्च वाधूलः सत्याषाढस्तथा मुनिः ।।
पैठीनसिश्च ग . . . . . कौण्डिन्य एव च ।
मत्स्यरूपी च भगवान् देवदेवो जनार्दनः ।।
कालरज्वाग्निवेश्यौ च प्रवराध्यायकारिणः ।
मतानि तेषामालोच्य धर्मशास्त्राण्यशेषतः ।।
पुराणानि च सर्वाणि सेतिहासानि वीक्ष्य च ।
विवाहदीपिका नाम क्रियते सर्वसंमता ।।
भृग्वङ्गिरोऽत्रयश्चैव विश्वामित्रश्च काश्यपः ।
वसिष्ठश्चाप्यगस्त्यश्च सप्तैते गणनायकाः ।।
अन्तर्गणाश्च पञ्चैव भार्गवे समुदाहृताः ।
अष्टावाङ्गिरसे प्रोक्ता . . . षान्नान्तरागणाः ।।
अष्टादशैवमाख्याता गणा ब्रह्मर्षिसत्तमैः ।
तेषां गणानामन्योन्यो विवाहो न निषिध्यते ।।

End:

इति बोधायनोक्तत्वाद् भार्गवेष्वाङ्गिरसस्य च ।
वीतहव्यहरीतादेर्गोत्रत्वव्यवहारतः ।
इति गोत्रार्थ. . . . . प्रतिप्रवरा इमे ।।
व्यवस्थायोपदिश्येरन् न हि ते प्रवरर्षयः ।
एकस्य शुनकस्यैव हरितस्य तथैव च ।।
उक्तः प्रवर . . . . . ।
. . . . . संभवेत् ।।
समानप्रवराभा. . . . सगोत्रस्याप्यभावतः ।
अपेक्षिता इह . . . . . स्फुटत्वतः ।।

819

VB 154(b) **वैदिकाचारप्रशंसा**

Beginning:

अथ कर्माण्याचाराद्यानि गृह्यन्ते इति गृह्यसूत्रारम्भे । अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः । धर्मज्ञसमयः प्रमाणम् ।

End:

मनीषी वैदिकाचारं मनसापि न लङ्घयेदिति प्रपत्त्यध्याये भगवदनुशासनम् । स्वस्त्यस्तु विश्वस्य . . . प्रसीदताम् । . . . श्रीवेदान्तगुरवे नमः

On the back of the last leaf is written:

पूर्वं चिन्नपट्टणे राजगोपालनामा कश्चन भ्रान्तः एतादृशातिक्रमादिकं चिकीर्षुः स्ववक्षसि स्वयमेव वेद्धिसंज्ञकं बाणं प्रक्षिप्य ममार । एतच्च जगत्प्रसिद्धम् । एवमेवात्युत्कटपापिनामिहैव शिक्षयित्वा साधुजनसंरक्षणं कुर्यात् श्रियःपतिः ।

820

VB 499(b) **व्यवहारदशश्लोकी**

Beginning:

श्रीमद्वरदराजस्य कौशिकस्य महात्मनः ।
शिरसा धारयाम्येतौ पादौ परमपावनौ ।।
स्वेच्छातः स्वयमार्जिते तु विभजेदर्थे स्वभार्यासुतान्
आत्मानं च समं क्रमागतधने पुत्रेच्छयाप्यस्पृहः ।
यद्येकस्तनयः पिता द्विगुणभाग् भार्या निराशा तदा
प्रेते तस्मिन्नितरसमा . . . . पितृकाः पौत्राः पितृद्वारतः ।।

End:

यः साधारणमुद्धरेद्धृतमनुज्ञातस्तु तस्यैव तत्
कालं पित्र्यधनोपघातरहितं पित्रादिदत्तं तदा ।
पित्रर्थादनु जीवनेन परतः संप्राप्तविद्यार्जितं
नाल्पज्ञोऽर्हति तत्कुटुम्बभरणादर्थं न वर्तेत चेत् ।।
क्लीबाद्या निजकर्मधर्मरहितास्तद्योषितः कन्यका
भर्तव्यास्तु निरंशका हरतु निर्दोष . . .

822

VB 160 **व्यवहारमाधवीयसंग्रहः**

Contents:

१. राजोत्पत्तिप्रकारः २. व्यवहारनिरूपणम् ३. व्यवहारभेदाः ४. निर्णेतृनिर्णयः ५. साक्षिभेदाः ६. साक्षिदोषोद्भावना ७. साक्षिपरीक्षाविधिः ८. साक्ष्यायोजनविधिः ९. असाक्ष्यप्रश्नविधिः १०. साक्ष्यवादविधिः ११. साक्षिवचोविषयाः

Beginning:

राजोत्पत्तिप्रकारः।

गुणधर्ममतो राज्ञः कथयत्यानुपूर्वशः ।
धनिकर्णिकसंदिग्धौ प्रतिभूलेख्यसाक्षिणाम् ।।
विचारयति यः सम्यक् तस्योत्पत्तिं निबोधत ।
सोमाग्न्यर्कानिलेन्द्राणां वित्तापत्योर्यमस्य च ।।
तेजोमात्राः समुद्धृत्य राज्ञो मूर्तिर्हि निर्मिता ।
ततः सर्वाणि भूतानि चराणि स्थावराणि च ।।
भयाद् भोगाय कल्पन्ते स्वधर्मान्न चलन्ति वै ।
नाराज्ञि कृषिवाणिज्यं कुसीदपशुपालनम् ।।
तस्माद्वर्णाश्रमाणां तु नेतासौ निर्मितः पुरा ।

गीतासु—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।। (४. ७)

End:

बृहस्पतिः—

साक्षिद्वैधे तु बहवो ग्राह्याः साम्ये गुणान्विताः ।
गुणिद्वैधे क्रियायुक्तास्तत्साम्ये मतिमत्तमाः ।।

याज्ञवल्क्यः—

द्वैधे बहूनां वचनं ग्राह्या ये गुणवत्तराः ।

संग्रहे—

बहुत्वेन गुणानां वा तारतम्येन निश्चयम् ।
साक्षिविप्रतिपत्तौ चेत् सर्वसाम्ये प्रमाणता ।।

नारदः—

साक्षिविप्रतिपत्तौ तु प्रमाणं बहवो मताः ।
तत्साम्ये शुचयो ग्राह्यास्तत्साम्ये स्मृतिमत्तराः ।।
स्मृतिमत्साक्षिसाम्यं तु विवादे यत्र दृश्यते ।
सूक्ष्मत्वात् साक्षिधर्मस्य साक्ष्यं व्यावर्तयेत्ततः ।।

इति साक्षिवचोविषयाः।

824

VB 1153 **शासनरत्नमालिका**

Beginning:

वन्दे सिन्दूरभासं वरकरटगलद्दानलिड्भृङ्गमाला-
झंकारव्याप्तदिक्कं भुजनिवहलसद्बीजपूरादियुक्तम् ।

वन्दारुव्रातविघ्नाचलदलनपविं सुन्दरीरूपभाजं
चन्द्रार्धाबद्धमौलिं महितगुणनिधिं चिन्तयन् विघ्नराजम् ।।
मनुमुख्यमहार्णवाद् गृहीतैर्मणिभिः संशयसंतमःप्रदीपैः ।
रचयामि वचोमयैर्गुणाढ्यैरधुना शासनरत्नमालिकाम् ।।
गुरून् सन्तो धर्मप्रणयनपटून् गौतममुखान्
नमन्नेतद्यातेऽध्वनि जिगीषु . . . गिराम् ।
इनो लोके नृणामुपकृतिकृते शासनमणि-
स्रजं **वाभूनाभि**र्विरचयति वाणीमपि सुधीः ।।

End:

तामुक्तलक्षणां सभामित्यर्थः । पूर्वाह्णेऽप्याद्यघटिकाचतुष्टयादूर्ध्वमेव तस्याग्निहोत्राद्यर्थत्वात् । अत एव **कात्यायनः**—

आद्यादह्नोऽष्टभागाद्यदूर्ध्वं भागत्रयं भवेत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः ।। इति ।

825

VB 170(c) **शुद्धिचन्द्रिका**

Beginning:

विप्रक्षत्रिययोः सपिण्डजनने शुद्धिर्दशद्वादशा-
होरात्रैरथ पक्षकोपरि विशः शूद्रस्य मासात्परम् ।
पुत्रीमज्जनतोऽथ सर्वजननीस्पर्शे दशाहाच्छुचिः
कर्मार्हो द्विदशाहतः पुरुषसूर्मासात्परं स्त्रीप्रसूः ।।
तद्वत् सर्वसपिण्डिनां च कुरुते शुद्धिर्मृतेऽप्याचतुः-
पञ्चाश्वाहदशाहिकास्थिचयनात् खण्डे तृतीयांशकम् ।
अङ्गाशौचमथो मृताहगणनात् साग्नेस्तु दाहात्परं
सर्वे वा दशरात्रतोऽपि शुचयस्तत्संकराः शूद्रवत् ।।
संध्या पञ्चमहामघादिविहितं स्मार्तं च कर्म त्रिधा
त्याज्यं पैत्र्यमपि द्विधाप्यशुचिना प्रेताम्बुपिण्डं विना ।
श्राद्धे मासिकवार्षिके च निखिलं कुर्यात् तदन्ते पुनः
नाशौचं न मृतं न गोत्रमितरैर्भोज्यं . . . ।।

End:

स्वं वर्णं च वहेद्दहेदनुगतः स्पृष्ट्वा शवास्थ्नो रुदन्
स्नात्वान्यं यदि तत्समस्त्रिदिवसैर्दग्धेऽस्थि पार्णे नरे ।
बन्धोर्निर्हरणे त्र्यहैः सह वसन् यद्वान्यवासेऽन्नभुक्
तुल्यस्तैः शवसंस्कृतिं च विधिना कृत्वा क्रियां स्याच्छुचिः ।। २५ ।।

829

VB 1116(a) **श्रीवैष्णवाचारसंग्रहः**

Contents:

दीक्षाविधिः, अङ्कनविधिः, महासंकल्पः, ब्रह्ममेधसंस्कारः, चूर्णपरिपालनविधिः (पाञ्चरात्रे शुकप्रश्ने नारायणसंहितायां ४४, ४२ अध्यायौ) जीयर् पडि भगवदाराधनक्रमः ।

(There are quotations from many authors of Dharmaśāstra and Pāñcarātra Āgama-s).

Beginning:

. . . . . स यः ।
अधृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत् ।
प्रकृतस्पर्शरहितो वासुदेवो जनार्दनः ।।
तप्तेनैवाङ्कनं कुर्याद् ब्राह्मणस्य विधानतः ।
श्रौतस्मार्तादिसिद्धचर्थं मन्त्रसिद्धयै तथैव च ।।
हरेः पूजाविधानार्थं चक्रं धार्यं विधानतः ।
तस्मात्तु विधिना चक्रं धार्यं विप्रैः शुभानने ।।
ब्रह्मण्यमन्त्रसिद्धचै च ज्ञानसिद्धचै विमुक्तये ।
सर्वाश्रमेषु वसतां ब्राह्मणानां विशेषतः ।।
विधिना वैष्णवं चक्रं धार्यं हि शृणु चोदनात् ।

इत्यादीनि परःशतानि वचनानि द्रष्टव्यानि ।

End:

शीतोदकं समादाय श्रीशमभ्यर्च्य पूर्ववत् ।
सर्वेभ्योऽपि निवेद्यैषां विधाय करशोधनम् ।।
त्रिस्त्रिर्गण्डूषसलिलं दद्यादाचमनीयकम् ।
दत्त्वा पुष्पाञ्जलिं तेभ्यः क्रमात् कर्पूरसंयुतम् ।।
ताम्बूलं च निवेद्याथ गण्डूषाचमनादिकम् ।
दत्त्वा पुष्पाञ्जलिं श्रीशपदपङ्केरुहद्वये ।।
मङ्गलाशासनं कृत्वा स्वाचार्यानतिपूर्वकम् ।
समस्तपरिवाराय नमो नारायणाय च ।।
इत्युक्त्वा दण्डवद्भूमौ प्रणम्याथ यथासुखम् ।
विश्रमस्वेति तीर्थं च प्रसादमतिपावनम् ।।
स्वीकुर्यात् प्रीतिसंयुक्तः कृतार्थोऽस्मीति भावयन् ।

836

VB 474(a) **षडशीतिः (सव्याख्या)**

Beginning:

अनेकऋषिवाक्यानि संगत्यादाय केवलम् ।
संगृह्य **कौशिकादित्यो** लिखत्याशौचनिर्णयम् ।।

अथपदं मङ्गलार्थम् । ग्रन्थादौ मङ्गलाचरणं निर्विघ्नपरिसमाप्तिकारणमिति स्मृतेर्विद्यमानत्वाद् आदावथपदं दत्तवान् । अनेकर्षिवाक्यानि संगत्यादावादाय संग्रन्थ्य केवलं सारं संगृह्याशौचनिर्णयं लिखति ।

End:

व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः ।
भक्तिश्रद्धाविहीनस्य भस्मान्तं सूतकं भवेत् ।। ८९ ।।

Colophon:

इत्यनेकर्षिसंमतं षडशीतिसंज्ञकमशीतिधर्मशास्त्रं सव्याख्यानं संपूर्णम्

Extra two folios deal with Āśauca at the end.

837

VB 475(b) **षडशीतिव्याख्या**

Beginning:

यस्मिन् रामे स्वप्रकाशे जगदेतच्चराचरम् ।
सृष्टिस्थित्यन्तमाप्नोति तं भजे गुरुरूपिणम् ।।
अथानेकर्षिवाक्यानि संगत्यादाय केवलम् ।
संगृह्य कौशिकादित्यो लिखत्याशौचनिर्णयम् ।।

अथशब्दो मङ्गलार्थः ।

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ।।

इति भगवत्पादैरुक्तत्वात् । ग्रन्थादौ मङ्गलाचरणं निर्विघ्नेन परिसमाप्तिकारणमिति स्मृतेर्विद्यमानत्वाच्च आदावथपदं प्रयोजितम् । अनेकऋषिवाक्यानि—

विष्णुः पराशरो दक्षसंवर्तौ व्यासहारितौ ।
शातातपो वसिष्ठश्च मन्वापस्तम्बगौतमाः ।।

देवलः शङ्खलिखितौ भारद्वाजोशनोऽत्रयः ।
शौनको याज्ञवल्क्यश्च दशाष्टा स्मृतिकारकाः ।।

पैठीनसीकण्वाङ्गिरसबोधायनादीनि च संहृत्यादाय केवलमिति ।
आशौचभेदानाह ।

End:

अनुक्तेषु च सर्वेषु ऊहनीयं महात्मभिः ।
तेन शास्त्रानुसारेण चरितव्यं महात्मभिः ।।

इत्युक्तत्वाच्च । परिषन्निर्णयवाक्यमनुष्ठानपरमेवेति सिद्धम् ।

Colophon:

इति **श्रीरामचन्द्रसोमयाजिना** कृते षडशीतिनामके धर्मशास्त्रे आशौचनिर्णयव्याख्याने **सद्यःशौचप्रकरणं** समाप्तम्

इत्थं कौशिकाचार्येण षडशीत्यभिधानतः ।
धर्मशास्त्रमिदं सारं प्रोक्तमाशौचनिर्णयम् ।।

एवंप्रकारेणाशौचं द्विविधं प्रोक्तमित्यादिना तेषां भस्मान्तसूतकमित्यन्तं षडशीतिश्लोकैः मन्वादिधर्मशास्त्रेभ्यः सारमुद्धृत्य आशौचनिर्णयः आशौचमनुष्ठानवतां चित्तनैश्चल्यार्थं कौशिकार्येण धर्मशास्त्रप्रवर्तकेन कृतम् ।

मन्वदीनि प्रणीतानि तत्तद्भाष्याणि कृत्स्नशः ।
निबन्धनानि सर्वाणि सर्वव्याख्यानमेव च ।।
तत्रानुक्तं विरोधं च पर्यालोच्य पुनः पुनः ।
अपेक्षितानि संगृह्य लोकानां हितकाम्यया ।।
श्रीरामचन्द्राध्वरिणा कृता व्याख्या **बृहद्वरा** ।
विना मूलप्रमाणानि न कोऽप्यर्थोऽत्र निश्चितः ।।
निर्विशङ्कमयं ग्रन्थस्तस्माद् ग्राह्यो मनीषिभिः ।
उक्तानुक्तदुरुक्तं वा मन्दबुद्धचालसस्य वा ।।
सन्मार्गप्रवणानां वा क्षन्तुमर्हन्ति पण्डिताः ।
गोपालकृष्णाध्वरिणा विरूपाक्षस्य सूनुना ।।
गार्ग्यायणेन लिखितं तन्महद्भिः प्रदृश्यताम् ।

इति **श्रीरामचन्द्रसोमयाजिकृतं षडशीतिव्याख्यानं** समाप्तम् ।

यस्मिन् रामे + + + ।
. . . . . चेयुर्व्रीहियवान् नावहन्युरनापदि ।
. . . . पमेयुरपि तान्यन्नमेषां नदह्रदोद्गतम् ।।

हरिद्रा गोरसश्चूर्णं लवणं धान्यमौषधम् ।
न तेषां पाकदोषोऽस्ति क्रमुकस्य गुडस्य च ।।
अष्टौ धान्यव्रतघ्नानि आपो मूलं घृतं पयः ।
हविर्ब्राह्मणकामाय गुरोर्वचनमौषधम् ।।
नान्दीश्राद्धे कृतेनैव यावन्मातृविसर्जनम् ।
दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च ।।
उपवासं व्रतं चैव श्राद्धभोजनमेव च ।
. . . . . र्युः सपिण्डश्च मण्डपोद्वासनं विधिः ।।
सपिण्डो नैव कुर्वीत नैकग्राहोऽपि . . . . . ।
अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च ।।
ब्रह्मयज्ञं चाध्ययनं नदीसोमार्तिकेतनम् ।
वैश्वदेवजलैः कर्म वृद्धश्राद्धं तथैव च ।।
ग्रामान्तरे नैव दोषः स्वधाकारो भवेद्यदि ।
य . . . . सर्जनं यावत्कङ्काण . . र्जनम् ।।

Copied in the year Āṅgirasa, Āṭi month, 17th Tuesday, Ekādaśī of dark fortnight.

Scribe's note:

इन्द बृहद्वरणिव्याख्यानं ४०८ वर्ष आटि १७ . . . चेव्वाक्किळमयु एकादशियु कूडिन शुभदिनत्तिल् करुवै लक्ष्मीनारायणन् स्वहस्तलिखितं समाप्तम् । आङ्गीरसनामसंवत्सरं आषाढनलकृष्णपक्ष एकादशि शुभदिनमन्दु . . . . . .

Fifth folio colophon:

इति षडशीतिनामके धर्मशास्त्रे आशौचनिर्णये बृहद्व्याख्याने असगोत्रसवर्णाशौचप्रकरणं समाप्तम्

This commentary is not noticed in Madras, Tanjore, Trivandrum and Adyar MS. libraries.

845

VB 170(h) **सापिण्ड्यनिर्णयः**

Beginning:

अथ सप्तमपञ्चमयोः सापिण्ड्यं वर्ण्यते पिण्डेन सह वर्तत इति सपिण्डः । सपिण्डस्येदं सापिण्ड्यम् । तद् द्विविधम् । सगोत्रे चान्यगोत्रे च । सगोत्रविषये **मनुः**—

लेपभाजश्चतुर्थाद्याः पित्रार्थाः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपूरुषम् ।।

इति मनुनोक्तं ज्ञातिविषयं ज्ञेयम् । नान्यत्र । ज्ञातिव्यतिरिक्तसापिण्ड्यमन्यथोक्तवान् **भाष्यकारः**—

संतानं भिद्यते यस्मात्कन्यायाश्च सुतस्य च ।
तत्रैव सप्तमादर्वागन्यगोत्रात्तु जायते ।।

इति ।

End:

एवं च भार्यागामपि भर्तृकर्तृके पिण्डदाने सहकर्तृकत्वात् सापिण्ड्यसिद्धिः । अनेन प्रकारेण या मातापित्रोः सपिण्डा न भवतीत्यसपिण्डा सा परिणेया । तथाच **मनुः**—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ।। (३. ५)

इति ।

पञ्चमः पञ्चमां कन्यां नोद्वहेदिति यद्वचः ।
पितृपक्षे निषेधोऽयं मातृपक्षे न दोषभाक् ।।
मातृवंशोद्भवां कन्यां नोद्वहेन्मातृवंशजः ।
उद्वहेत्पञ्चमादूर्ध्वं स्वसारं मातरं विना ।।
. . . . . .
एकजन्ये तु कन्ये द्वे न दद्यादेकजन्मनोः ।
मातृभेदेन दोषः स्यादित्याह भगवान् भृगुः ।।

848

VB 154(a) **स्त्रीपुनर्विवाहविचारः**

Beginning:

वैद्यनाथदीक्षितीये वर्णाश्रमधर्मे कलियुगवर्ज्यप्रकरणे **पराशरः**—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत मातृजायां कमण्डलुम् ।।

इति । एतत् श्लोकस्थितगोवधपदस्य सामान्यतो यागपरत्वं न संभवति । 'न हिंस्यात् सर्वा भूतानि' इति सामान्यविधेः सत्वेऽपि 'अग्नीषोमीयं पशुमालभेत' इति विशेषविधेः संभवात् ।

End:

अथवा सप्तपदादर्वागेव दोषदर्शने अन्यस्मै दातव्यमित्यभिप्रायः । **वसिष्ठः**—पाणिग्रहे कृते कन्या । स्मृत्यर्थसारे—पुरा पुरुषसंयोगात् । **नारदः**—उद्वाहितापि सा कन्या इत्यादिवचनानामनेकश्रुतिस्मृतिविरुद्धत्वेन शिष्टाचारविरुद्धत्वेन च युगान्तरविषयत्वमित्यलमतिविस्तरेण ।

849

VB 497 **स्मृतिकौमुदी**

Beginning:

वागीश्वरीं हयास्यं च नत्वा विद्वदनुग्रहात् ।
सर्वलोकहितार्थाय क्रियते स्मृतिकौमुदी ।।

मन्वादिप्रणीतानामेव धर्मशास्त्राणां वेदमूलत्वात् तान्येव धर्मप्रमाणानीति तदधिगमोपयोगितया तच्छास्त्रप्रणेतारः प्रदर्श्यन्ते ।

ते तु मन्वङ्गिरोव्यासा गौतमोऽत्रिः शुभो यमः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ।।
विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो भृगुः ।
प्रचेता नारदो योगी बोधायनपितामहौ ।।

End:

अङ्गतर्पणस्य परेद्युः प्रातर्विहितत्वेन साङ्गपितृकर्मानिवृत्तेः । तथा च तत्रैव—

मृताशौचे तथा श्राद्धे मातापित्रोर्मृतेऽहनि ।
उपवासे च ताम्बूलं दिवारात्रौ विसर्जयेत् ।।
हिरण्यकेशिनः कुर्युः श्राद्धादौ वैश्वदेविकम् ।
तदन्ते याजुषाः कुर्युः श्राद्धमध्ये तु बह्वृचः ।।

भविष्ये—

कृत्वा श्राद्धं महाबाहो ब्राह्मणांश्च विसृज्य च ।
वैश्वदेवादिकं कर्म ततः कुर्यान्नराधिप ।।

इति ।

स्नाने तर्पणकाले च विवाहे यज्ञमण्डपे ।
दर्भहीनं तु यः कुर्यात् पुत्रदारधनक्षयम् ।।

Date:

पैङ्गलनामसंवत्सरं आश्वयुज ५ सोमवारं वङ्गलसुब्रह्मण्येन **स्मृतिकौमुदी** व्राशिनदि् ।

866

VB 166 **स्मृतिरत्नम्**

Beginning:

भारद्वाजान्वये जातो विष्णुः श्रीमाधवाह्वयः ।
यस्य प्रियतमा जाता श्रीरिव श्रीमती सती ।।

श्रीमायणात्सकलजीवनजीवभूताद्
धाता यथा समुदभूदरविन्दनाभेः ।
श्रीसायणः श्रुतिसुखप्रदवाक्प्रसारः
सत्यावभासकतयाखिललोकसेव्यः ।।
स्रष्टा सृष्टिविधौ विधाय विविधा वेदादिविद्याः क्रमात्
तत्संरक्षणतत्परः प्रतिकलं पर्याकुलश्चिन्तया ।
क्षोणीमण्डलमण्डनायितगुणं मन्त्रीन्द्रमात्मांशतो
मन्ये मायणसायणार्यमधुना निर्माय शर्माभजत् ।।
पुरा सोऽयं विष्णुर्यदुषु नृपवेषः क्षितिकृते
स एवायं जातो द्विजवरकुले सायणविभुः ।
न चेद्धर्मप्रीत्यै पुनरधिवसन् मन्त्रिपदवीं
सुखाकुर्वन्नास्ते विबुधजनतां कः कलियुगे ।।
भोक्तुं राज्यसुखं सुखेन गिरिजाजानिर्महीमण्डले
भूत्वा सायणमन्त्रिशेखरमणिः सत्यं समुज्जृम्भते ।
नो चेदस्य गिरि स्थितिः सुमनसां सर्वज्ञता स्यात्कथं
तच्चित्रं विबुधश्रिये प्रतिदिनं हेमादिदाने रतिः ।।
क्षान्त्या ह्लादनवैभवास्तव सुधा चन्द्रामरेन्द्रश्रियो
गाम्भीर्योन्नततातिरस्कृतनदीनाथावनी भूपतेः ।
औदार्यातिशयावधूतदिविजिद्रोणैर्मृगात्मोदयः
कोऽन्यो मायणसायणस्य सदृशीं ख्यातिं परां गाहते ।।
अमुष्मादायुष्मान् भुवनमहितात् **सायणविभोः**
समुद्रादुद्भूतः प्रकटितकलो **माधवविधुः** ।
सदैनं यो मूर्ध्ना वहति स भवेदीश्वरधिया
जगद्वन्द्यः ख्यातिं भजति भुवि सर्वज्ञ इति च ।।
नाकानोकहमात्मदोर्विलसनैः कुर्वन्नधः संततं
विश्वोद्भासि विधाय चार्जुनयशो यः पूर्णकामः पुरा ।
तं श्रीसायणनन्दनं बुधजनाः श्रीमाधवं माधवं
त्रातुं मध्यमलोकलोकमधुना प्राप्तोदयं मन्वते ।।
तमेकदा सायणमन्त्रिवर्यस्तनूद्भवं स्वप्रतिबिम्बरूपम् ।
श्रियो विशेषास्पदमार्यवर्यं मध्येसभं माधवमित्यवोचत् ।।
प्रायः प्राचीनमुनिभिः स्मृतयो दर्शिताः पुरा ।
तथापि तासां बाहुल्यान्मार्गास्ते खलु दुर्गमाः ।।
तत्तत्सारं समाहृत्य क्रोडीकृत्य विभागतः ।
यत्रादर्श इवाशेषधर्मसंदर्शनं भवेत् ।।

एवं पित्रा समादिष्टो माधवः कृतवान् कृती ।
अतिन्यूनं प्रयत्नेन स्मृतिरत्नमनुत्तमम् ।।

आदौ स्मृतिकर्तृनिरूपणम्—

मनुर्बृहस्पतिर्दक्षो गौतमोऽथ यमोऽङ्गिराः ।
योगीश्वरः प्रचेताश्च शातातपपराशरौ ।।
संवर्तोशनसौ शङ्खलिखितावत्रिरेव च ।
विष्ण्वापस्तम्बहारीता धर्मशास्त्रप्रवर्तकाः ।।
एतेऽह्यष्टादश प्रोक्ता मुनयो नियतव्रताः ।

End:

स्मृत्यर्णवः—

वेदाध्ययनहीनोऽपि श्रद्दधानो जितेन्द्रियः ।
आचारयुक्तो विप्रस्तु पुण्यां गतिमवाप्नुयात् ।।

वसिष्ठः—

आचारहीनं न पुनन्ति वेदा
यद्यप्यधीताः सह षड्भिरङ्गैः ।
छन्दांस्येनं मृत्युबिले त्यजन्ति
नीडं शकुन्ता इव जातपक्षाः ।।
एकाक्षरज्ञो हि विधानयुक्तः
परं पदं याति विधूतपापः ।
आचारात्प्रच्युतो विप्रो न वेदफलमश्नुते ।
आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत् ।।

Colophon:

इति श्रीराजाधिराजराजपरमेश्वरवैदिकमार्गप्रतिष्ठापकश्रीवीरहरिहरभूपालसाम्राज्यधुरंधरसायणाचार्यतनूद्भव**माधवाचार्य**विरचिते **स्मृतिरत्ने** संपूर्णमाह्निकम्

867

VB 485(b) **स्मृतिवचनसंग्रहः**

Beginning:

यदि द्वि . . . . . रोगीमुखे दण्डधनुः क्षयश्च ।
तत्रैव तस्मिन् यदि पापयुक्तश्चक्षुर्गतः संशय एव नास्ति ।। १ ।।
अङ्गानुजविशून्यः स्यात् धनधान्यसमृद्धिमान् ।
तृतीये महसामीशे बुद्धिमान् साहसप्रियः ।। २ ।।

End:

स्मृतिरत्नाकरे—

मातृपितृभ्रातृस्वसुर्भिन्नमपि पितुः स्वसुः ।
भिन्नमातृष्वसुर्भिन्नमातुलादि तथैव च ।
भिन्नज्येष्ठभगिन्योश्च क्षुरकर्म न कारयेत् ।।

\+ + + +

आशौचदीपिकायाम्—

मातापित्रोः कृते नाम्नि सोदराणां तथैव च ।
भिन्नोदराणामाशौचं दशाहमिति निश्चयः ।।
स्वस्थकाले त्विदं सर्वं सूतकं समुदाहृतम् ।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् ।।

868

VB 159(a) **स्मृतिसंग्रहः**

Beginning:

अग्नेश्चक्षुःश्रोत्राद. . . गविधिः ।

पत्रकाष्ठादि यच्छ्रोत्रं यत्र धूमस्तु नासिका ।
यत्राल्पज्वलनं नेत्रं यत्र भस्म च तच्छिरः ।।
यत्रैव ज्वलनज्वाला तत्र जिह्वासु होमयेत् ।
अग्निं हुत्वा तु तच्छ्रोत्रं कुर्याच्च व्याधिभिर्भयम् ।।
नासिकायां मनोदुःखं चक्षुषोर्नाशनं भवेत् ।
केशाद्दारिद्रमाप्नोति तस्माज्जिह्वासु होमयेत् ।।
मन्त्रतन्त्रविहीना चेदाचार्यं हन्ति निश्चितम् ।
मन्त्राणां स्वरहीनं च पत्नीं हन्ति न संशयः ।।
मन्त्राणामक्षरन्यूनं भ्रातृन् हन्ति न संशयः ।
हविर्न्यूने कुलं हन्यादात्मानं हन्त्यदक्षिणम् ।।

परिस्तरणाद्बहिरङ्गारविधिः ।

परिस्तरोत्तरे देशे दर्व्यामासनदक्षिणे ।
निरुह्याङ्गारकार्येषु विधिस्तुत्याज्यकर्मणि ।।

End:

कुर्यात् कुशैस्त्रिभिः सद्भिः पवित्रं वाथ पञ्चभिः
द्वाभ्यां वा शान्तिकार्येषु सर्वकर्मसु शस्यते ।।

शान्तिकं पौष्टिकं चान्यच्छुभं किमपि कर्म च ।
शान्तिकादीनि कर्माणि त्रीण्यमूनि विदुर्बुधाः ।।
चतुर्भिराभिचारेषु पितृकर्मसु चैकतः ।
तत्तत्कर्मानुरूपेण कृत्वा धृत्वा क्रियाश्चरेत् ।।
कुशालाभेऽश्ववालो वा विश्वामित्रोऽथवा यवः ।
दूर्वा चैतेषु यो लब्धस्तेन कर्म समाचरेत् ।।

869

VB 165(a) **स्मृतिसंग्रहः**

Beginning:

. . . . . प्रचोदितम् ।
तस्य . . . . . शास्त्रार्थ . . . . . ।।
. . . . . तेषु ग्राह्यम् । श्रौतेषु कर्मसु प्राचीदिशा . . . ह्य . . व्यामुदीची . . .
. . . . . क्त्वा वासीनोऽत्र च कर्मसु ।
. . . कर्ता . . नामनुक्तं तु दक्षिणाङ्गं भवेत्तथा ।।
कुत्सिते वामहस्तः स्याद् दक्षिणः स्यादकुत्सिते ।
यज्ञोपवीती . . . धार्यं सर्वकर्मसु दक्षिणम् ।।
अपसव्यं तु पित्र्यं स्यात् प्राचीनावीतिना तथा ।

End:

पराशरः—

मासाज्ञाने दिनाज्ञाने कार्यमाषाढमाघयोः ।
कुर्वीत . . . . . ।।

. . . त्यर्थः । यदा मरणदिनं ज्ञातं तदाषाढे माघे वा मृताहे तत्प्रत्याब्दिकं कार्यम् । पुनः प्रत्याब्दिकमप्याषाढी . . . . . ।

यदा मासो न विज्ञातो विज्ञातदिनमेव यत् ।
तदात्याषाढके मासि माघे वा तद्दिने भवेत् ।।

वसिष्ठोऽपि—

न दिन . . . . . ।
तदा माघेऽपि वा भाद्रे मार्गे वाषाढकेऽपि वा ।।
आब्दिकं विधिवत्पुत्रैः कार्यमावर्षसंक्षयात् ।

भविष्यत्पुराणेऽपि—

. . . . . नैव तु यो नरः ।
मार्गशीर्षे ऽथवा भाद्रे माघे वापि समाचरेत् ।।

व्यासः—

मृतमासान्न . . . . . ।

Then three folios Contain Arkavivāhavidhi.

870

VB 167 स्मृतिसंग्रहः

Beginning:

यो वर्णैरिज्यते नित्यैः कर्मभिश्चोदितैर्निजैः ।
तेभ्योऽपवर्गदो यश्च तन्नमाम्यद्वयं हरिम् ।।
. . . . . स्य भारत्याश्च गुरोरपि ।
मन्वाद्यनेकस्मृतिषु वचनानि निबन्धृभिः ।।
वचनानि समुद्धृत्य वक्ष्यते स्मृतिसंग्रहः ।
आदौ पूर्वाह्णिकं कृत्यं. . . . . ।।
. . . . ह्णे तथा मासपक्षादिः कालनिर्णयः ।
श्राद्धशौचनिषेकादिसंस्काराः शान्तिकं तथा ।।
प्रायश्चित्तं च दानानि यथावदनुपूर्वशः ।

. . . . देशानाह **मनुः** (२. १७)—

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तद्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ।।

End:

अत्र तन्त्रेण मातापित्रोः सपिण्डीकरणमुक्तम् । तत्पूर्वोक्तबहुवचनपर्यालोचनया तदशक्त-विषये योजनीयम् । उक्तं **स्मृतिसंग्रहे**—

दंपत्योरेकदा मृत्युर्दहेदौपासना उभौ ।
ततः पुत्रेण कर्तव्याः पृथक् पिण्डोदकाः क्रियाः ।।
एकोद्दिष्टं सपिण्डं च वह्निरेको द्विजः पृथक् ।
पित्रर्घ्यमुदकं पिण्ड . . . . . ।।

871

VB 168 **स्मृतिसंग्रहः**

Beginning:

अथ श्राद्धकाण्डमारभ्यते । मुख्यस्नानेऽशक्तो मुमूर्षुः मन्त्रादिस्नानमाचरेत् । तत ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा यथाचारं विभृयात् । तुलसीदलं रुद्राक्षं च बिभृयात् । तुलसीदलसंयुक्तं सालग्रामजलं गङ्गाजलं वा पिबेत् । आत्मनि च सिञ्चेत् । ततः स्वपापानुसारेण परिषदनुज्ञापूर्वकं द्वादशाब्द-कृच्छ्रं षडब्दकृच्छ्रम् अब्दकृच्छ्रं वा प्रतिनिधिना कुर्यात् कारयेद्वा । अत्यन्तदौर्बल्ये महतामा-शीर्वादादवलोकनाच्च शुद्धिः ।

End:

संग्रहे—

संकल्पं तु यदा कुर्याद् न कुर्यात् पात्रपूरणम् ।
विकिरं च न दातव्यं पिण्डांश्चैव न निर्वपेत् ।।
पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते ।
स्वधानयनलोपेऽत्र विकिरं च विलुप्यते ।।

स्मृत्यन्तरे—

आवाहनाग्नौ करणं स्वधानियमनं तथा ।
विकिरं पिण्डदानं च संकल्पं च विवर्जयेत् ।।

इति । आवाहनशब्देन मन्त्रवदावाहनमुच्यते । मानसावाहनस्य न निषेधः । स्वधानिनयनम् अर्घ्यम् । शेषं वक्तव्यम् ।

अत्यब्दे क्रियमाणानां पित्रोर्दाहादिकर्मणाम् ।
अहोभिर्द्वादशैरेव तत्पुत्रैः स्यादनुष्ठितिः ।।
सपिण्डीकरणात् पूर्वं मासिकानां त्रिधा भवेत् ।
तत्र त्रयोदशेऽह्नचेव चरेदाद्याब्दिकं सुतः ।।
प्रत्यब्दं तु तिथौ कार्यं श्राद्धं चार्यां तु या तिथिः ।
दैवं पित्र्यं च यत्कर्म ततः सर्वं प्रवर्तते ।

Colophon:

संग्रहस्मृतिः समाप्ता

द्विभार्याहिताग्निविषये—

Beginning:

आधानं च पुनः कुर्यात् सह पत्न्या द्वितीयया ।
द्वितीया यदि चेद् भार्या पूर्वं मरणमाप्नुयात् ।।
जीवन्त्यां प्रथमायां तु दहेन्निर्मथिताग्निना ।

इति ।

द्वितीयां वै तु यो भार्यां दहेद्वैतानिकाग्निभिः ।
तिष्ठन्त्यां प्रथमायां तु सुरापानं समं हि तत् ।।

इति । द्विभार्यानाहिताग्निविषये—

पत्न्योरेका यदि मृता तां दहेत् स्मार्तवह्निना ।
आदधीतान्यया सार्धमाधानं विधिना गृही ।।

इति । पत्न्योर्मध्ये एका मुख्या, ज्येष्ठेति यावत् ।

End:

अत्र प्रातरिति विशेषणात् सूर्योदयस्योपरि मुहूर्तत्रयं यागस्य मुख्यः काल इति ।

सिद्धिर्यस्य पराह्णे स्याद् यागं प्रातः परेऽहनि ।
कुर्वाणः प्रतिपद्भागे चतुर्थोऽपि न दुष्यति ।।

इति ।

चतुर्दशी तु संपूर्णा द्वितीया क्षयकारिणी ।
चरुरिष्टिरमायां स्याद् भूते कव्यादिकाः क्रियाः ।।

चतुर्दशी संपूर्णा अस्तमनपर्यन्तवर्तिनी अधिका वा । द्वितीया वा क्षयकारिणी सायाह्न-वर्तिनी । अत्र अमायां चरुः स्थालीपाक इष्टिश्च स्यात् । भूते चतुर्दश्यां कव्यादिकाः श्राद्धान्वाधाने इत्यर्थः ।

सिद्धिं गते तु पितरि संप्राप्ते सूतकान्तरे ।
कारयेद्यदि कर्माणि तदघं नैव विद्यते ।।
आशौचमध्ये पितरि सिद्धिं प्राप्ते तु पुत्रकः ।
तदघं संपरित्यज्य सर्वकर्माणि कारयेत् ।।
आशौचान्तरमालोच्य मौढ्याल्लोभाच्च पुत्रकः ।
तत्त्यजेद्यदि कर्माणि त्यक्ता चेत् किल्बिषी भवेत् ।।
ताते सिद्धिं गते कर्म कुर्यादाशौचवानपि ।
आशौचान्न स लिप्येत ब्रह्मीभूतस्य कर्मणि ।
वानप्रस्थो यतिर्ब्रह्मचारिणः शुचयः सदा ।।

Colophon:

स्मृतिसंग्रहः समाप्तः

872

VB 485(a) **स्मृतिसारसंग्रहः**

Contents:

1.	आब्दिकनिर्णयः	fol. 1-18
2.	सपिण्डीकरणनिर्णयः	19-28

3.	जातकर्मादिनिर्णयः	29-37
4.	मासिकादिनिर्णयः	38-73
5.	पुत्रस्वीकारनिर्णयः (दत्तमीमांसा)	73-88
6.	संघातमरणे सापिण्ड्यनिर्णयः	89. (**incomplete**)

Beginning:

प्रणम्य शिरसा देवं सर्वलोकेश्वरं शिवम् ।
विदुषां सुखबोधार्थं वक्ष्ये त्वाब्दिकनिर्णयम् ।।
मनुमाधवयाज्ञवल्क्यमुख्य-
स्मृतिसंघेषु च संप्रगृह्य सारम् ।
नवमाब्दिकनिर्णयं प्रवक्ष्ये
प्रमुदे सौरमतावलम्बिपुंसाम् ।।
श्रीवत्सान्वयविश्वनाथतनयो रामाभिधानो महान्
मन्वादिस्मृतिजालमीक्ष्य निपुणं संगृह्य सारं ततः ।
धीमानाब्दिकनिर्णयं त्वभिनवं चान्द्रादिमानोक्तम-
व्यक्तं सौरमतानुसारिजनसंमोदात्तनो . . . ।।

सौरावलम्बिनः केचिदब्दान्ते विद्यमानं विध्युक्तमृततिथिं विहायात्यब्दे विद्यमाने मामले दिवसेऽनागताब्दे मामले पुनश्च सौरेऽपि प्रथमाब्दिकं कुर्वन्ति । तेषां तद् भ्रान्तिमूलमिति दर्शयितुं सौरे च निर्दोषत्वं प्रतिपादयितुमिदमारभ्यते ।

यस्मिन् राशौ स्थिते सूर्ये यो मृतिं प्रतिपद्यते ।
पुनस्तद्राशिमापन्ने भानावाब्दिकमाचरेत् ।।

इति हेमाद्रौ स्मरणात् ।।

End of the first Pariccheda fol. 18b:

श्रुत्या स्मृत्या च युक्त्या च सौरमानं सुभूषितम् ।
तैस्त्विभिर्मामलं दुष्टं तस्मादेतदनादृतम् ।।
विश्वेशोत्तमनन्दनेन विदुषा **श्रीराम**नाम्ना कृतम्
श्रीवत्सान्वयभूषणेन सकलस्मृत्यर्थसंग्राहिणा ।
सन्तस्त्वाब्दिकनिर्णयं नवमिमं निर्मत्सराः पण्डिता
दृष्ट्वा प्रीतिमवाप्नुयुः करुणया सौराध्वसंदर्शिनः ।।

Colophon:

इति श्रीवत्सकुलतिलक-**विश्वेश्वर**सुत**श्रीराम**कृतसंग्रहे आब्दिकनिर्णयो नाम प्रथमः परिच्छेदः

fol. 19a:

सपिण्डीकरणनिर्णयः । कर्मप्रदीपिकायाम्—

गौतम्या दक्षिणे तीरे सौरसावनमेव च ।
नाक्षत्रं चान्द्रमाने च चरेदुत्तरतः स्मृतः ।।

इति । अथ सपिण्डीकरणकालनिर्णय उच्यते—तत्र तावत् संवत्सरान्तसपिण्डीकरणस्य मुख्यतां प्रतिपादयितुं कल्पसूत्रादाहृत्य प्रदर्श्यन्ते ।

End:

अत्र शङ्खः—

कृतेषु मासिकेष्वेषु सपिण्डीकरणं विना ।
संवत्सरे व्यतीते तु पुनस्तानि समाचरेत् ।।

कात्यायनः—

प्रधानस्याक्रियायां तु साङ्गं तत् क्रियते पुनः ।
तदङ्गस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया ।।

सपिण्डीकरणं प्रधानं पञ्चदशश्राद्धाङ्गम् ।

एवं रामनाम्ना विदुषां सुखबोधाय बहुभ्यः सारमुद्धृत्य एकत्र निर्णीतमिदं निर्मत्सरतया सर्वैरङ्गीकार्यम् ।

विश्वेशोत्तमनन्दनेन विदुषा **श्रीराम**नाम्ना कृतं
श्रीवत्सान्वयभूषणेन सकलस्मृत्यर्थसंग्राहिणा ।
पुत्रस्वीकृतिनिर्णयं नवमिमं निर्मत्सराः पण्डिता
दृष्ट्वा प्रीतिमवाप्नुयुः करुणया स्मृत्यर्थसंदर्शिनः ।।

Colophon:

इति श्रीवत्सकुलतिलकविश्वेश्वरसुत-श्री**राम**विरचितपुत्रस्वीकारनिर्णयः

873

VB 1025(a) **अनुरामायणम्**

Beginning:

यः पश्यन् वायसं भीतं ररक्ष करुणानिधिः ।
अभीतमपि मामव्याद् रामः सीतामते स्थितः ।।
विश्वत्राणाय विष्णुर्विधिमुखदिविषत्प्रार्थितो रामनामा
वंशे जज्ञे रघूणां दशरथवचनादन्वगाद् गाधिसूनुम् ।

मार्गे निर्जित्य दुष्टां मुनिवरवचसा पत्निभिः सुन्दभार्यां
दिव्यास्त्राण्येव तस्मात् सह रजनिचरैर्यः सुबाहुं निनाय ।।
मारीचं वारिराशेर्जठरमगमयत्कौशिकेनाधिगच्छन्
मध्येऽहल्यामपापामतनुत रजसा पादयोः पावनेन ।
भङ्क्त्वा त्रैयम्बकं तद्धनुरलभत तां मैथिलीं वीर्यशुल्का-
मार्कर्षद्दिव्यचापं समुपहितशरं जामदग्निं जिगाय ।।

End:

देव्या साकं दयालुर्जगदखिलमसौ सानुजः सत्यसंधः
स्वात्मानं वाजिमेधैरयजत बहुभिः स्वर्णसीतासहायः ।
पुत्रेषु न्यस्य राज्यं निशिचरपतये निष्क्रियं रङ्गनाथं
दत्त्वा भक्तैः परीतः पवनजरहितैः प्राविशद् ब्रह्मलोकम् ।।
अनुरामायणं पद्यैरष्टाभिः परिकल्पितैः ।
पठन् प्रतिदिनं भक्त्या नरो याति परां श्रियम् ।।

876

VB 735 जैमिनिरामायणम्

Beginning:

जैमिनिरामायणे महर्षीन् प्रति शौनकः—

अथातः संप्रवक्ष्यामि महदाश्चर्यकारणम् ।
इतिहासं पुरावृत्तं रामभक्तिविवर्धनम् ।।
शृणुध्वमृषयः सर्वे रामभक्तिप्रभावजम् ।
पुरा कृतयुगे काले सिद्धाश्च परमर्षयः ।।
शिष्यप्रशिष्यसहिता वेदशास्त्रविशारदाः ।
* * * *

इति जैमिनिरामायणे रामनाममाहात्म्ये व्याधसप्तर्षिसंदर्शनं नाम एकपञ्चाशः सर्गः ।।

End:

सङ्गो धरातलेन्दूनां चित्तं शीतलयत्यलम् ।
मृतिः सतां तिरस्कारो जीवितं सेवनं सताम् ।।
फलं स्वर्गापवर्गादिः सेवया महतामिह ।
पावनानामुदाराणां परबोधैकयायिनाम् ।।
वचसां भाजनं भूत्यै भव्यो भवति नाधमः ।।

895

VB 216 **रामायणम्**

Colophon:

इत्युत्तररामायणे स्वर्गारोहणं नाम दशशततमः सर्गः

Scribe adds:

इदमुत्तररामायणं क्रोधिनामसंवत्सरं वृश्चिकमासं शुक्लपक्षत्तु तृतीययिलारम्भिच्चु विश्वावसु नामसंवत्सरं १०२० श्री वृषभमासं ११ प्रथमैयन्निक्कु श्रीनिवासन् स्वहस्तलिखितं समाप्तम् ।।

896

VB 217 **रामायणम्**

Colophon:

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये वाल्मीकीये चतुर्विंशतिसहस्रिकायां . . . संहितायां उत्तरकाण्डे दशाधिकशततमः सर्गः

Scribe adds:

भारद्वाजे प्रजातेन गोत्रे नारायणस्य च ।
पुत्रेण वैद्यनाथेन लिखितं पुस्तकं त्विदम् ।।
धात्वब्दे श्रावणे मासे चन्द्रसूनोश्च वासरे ।
पूर्वाभाद्रपदे ऋक्षे लिखितं रामवैभवम् ।।

901

VB 236(a) **रामायणम्**

Scribe adds:

अक्षयनामसंवत्सरं वैशाखबहुलमन्दवारं चिबितहं गुरुहेर्त्त सुब्बरायलु कुमारुडु बालुकुडु कृष्णुडु सुन्दरकाण्डं व्राशिनदि संपूर्णम् ।

905

VB 218(a) **रामायणव्याख्या (अमृतकतकम्)**

Beginning:

अथ हनूमता निर्धूतसकलविघ्नतया समुद्रतरणम् । ततो रावणनीताया इत्यादि । पदम् अवस्थितिस्थलम् । चारणाः देवजातयः । तैः आचरितः क्रियमाणसंचारः । तादृशे पथि ।

आकाशमार्ग इत्यर्थः। गच्छन्निति शेषः। गच्छन् गवांपतिरिव बभाविति योजना। निष्प्रतिद्वन्द्वं सहायान्तररहितम्। कर्म लङ्घनपूर्वकसीतान्वेषणकर्म। समुदग्रम् उन्नतं शिरो ग्रीवा च यस्य स तथा। गवांपतिः वृषभः। अथेति तरणस्य प्रपञ्चनारम्भे। सलिलकल्पेष्विति शाड्वलदेशस्य च समुद्रजलवत् श्यामलमृदुत्वाभ्याम्। उरसा प्लवनकालीनोरःपेषणो प्रवृद्धकेसरीव विचचारेत्यन्वयः।

End of Sundarakāṇḍa (fol. 75):

तेभ्यो न्यूनत्वस्य सीतावाक्यारोहायाह—नहीत्यदि। उत्पातः उत्प्लवनम्, ततो मयेत्यादि। तत्र शोकेन तथाभिपीडचमानापि वाग्भिः उच्यमानविशेषणाभिः प्रसादिता। अत एव अदीनभाषिणी भूत्वा मम शान्ति स्वस्त्ययनमुवाच ।। २९ ।।

Colophon:

इति श्रीमद्रामायणामृतकतकटीकायां सुन्दरकाण्डेऽष्टषष्टितमः सर्गः। श्रीसुन्दरकाण्डकतकटीका समाप्ता।

Scribe adds:

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः।

918

VB 220(a) रामायणव्याख्या (दीपिका)

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

श्रीमहागणपतये नमः। श्रीदक्षिणामूर्तये नमः ।।

राममिन्दीवरश्यामं राजीवायतलोचनम्।
ज्याघोषनिर्जितारातिं जानकीरमणं भजे ।।
श्रीरामचरणाम्भोजभजनासक्तमानसः।
वैद्यनाथाध्वरी कुर्वे श्रीरामायणदीपिकाम् ।।

वाल्मीकिरभवद् ब्रह्मा वाणी वाक् तस्य रूपिणी—इति स्कान्दे पार्वतीं प्रति शिववचनम्। तथापि ब्रह्मणोंऽशेन संभूतो वाल्मीकिः ब्राह्मलौकिकं शतकोटिप्रविस्तरं रामचरितं भुवि ब्राह्मणादीनामधिकारिणां तापत्रयविमोचनाय संक्षिप्य रचयितुमुद्युक्तः चीर्णतपाः तत्तपःसंतुष्टब्रह्मनियोगेन समागतं भगवन्तं नारदमभ्यर्च्य भगवान् प्राचेतसमुनिः कोऽन्वस्मिन्नित्यादि पप्रच्छ। स च देवर्षिः परमेश्वरकथाप्रश्नमुदितमनाः श्रीरामचरितं संक्षिप्य वाक्यरूपेणोपदिश्य जगाम।

End of the Bālakāṇḍa (fol. 43):

इति श्रीवैद्यनाथदीक्षितविरचितायां रामायणदीपिकायां बालकाण्डे सप्तसप्ततितमः सर्गः। बालकाण्डव्याख्या समाप्ता।

बालकाण्डे तु सर्गाणां कथिता सप्तसप्ततिः।
श्लोकानां द्वे सहस्रे च साशीतिशतकद्वयम्॥

End:

धातुनिष्यन्दः धातुसमूहः। सलिलोत्पीडो निर्झरः। निरसनात् अप्राणिद्वारेति शेषः। पाने संसर्गे च कर्कशैः अतिसक्तचित्तैः शृङ्गशिलानामुद्धातो ध्वंसो यस्य स तथा। माया जगामेति संस्मरेदित्यर्थः।

Colophon:

इति श्रीमद्वैद्यनाथदीक्षितविरचितायां श्रीमद्रामायणदीपिकायां किष्किन्धाकाण्डे सप्तसप्ततितमः सर्गः। किष्किन्धाकाण्डव्याख्यानं समाप्तम्।

Scribe's note:

विश्वामित्रे प्रजातेन गोत्रे शेषाद्रिशर्मणः। पुत्रेणानन्तकृष्णेन लिखितं पुस्तकं त्विदम्॥

920

VB 230(a) रामायणव्याख्या (टीकासंग्रहः)

The work is called Rāmāyaṇa Dīpikā in the MSS. available in the Adyar Library, Madras Govt. Ori. MSS. Library, and the Tanjore Library. The name *ṭīkāsaṃgraha* is not found anywhere else. The readings show much variation from these in the Adyar Library and the Madras Govt. Library.

Beginning:

रामभिन्दीवरश्यामं राजीवायतलोचनम्।
ज्याघोषनिर्जितारातिं जानकीरमणं भजे॥

पितृवाक्यपरिपालनाय दण्डकान् प्रविष्टस्य रामस्य वृत्तं विस्तरेण वक्तुमुपक्रमते—प्रविश्येति।

Colophon:

आरण्यकाण्डे वैद्यनाथकृतटीकासंग्रहे प्रथमः सर्गः

End:

शुभं तत् स्मरणम् । तत्र पंपादर्शन इत्यर्थः । अभिभूः अभिभावकः, तीर इति यावत् । पानीयवाहिनीं पाना . . . . . .

921

VB 218(b) **रामायणव्याख्या (विवेकतिलकम्)**

Yuddhakāṇḍa beginning (fol. 75b):

इत्थं देवी महाषोढा मूलपादकरात्मजैः ।
पञ्चपादैः पञ्चकाण्डी वृत्ता षष्ठमतः परम् ।।

अथ श्रुतवृत्तान्तो रामः कथं समुद्रलङ्घनं भवेदिति निदध्यौ—श्रुत्वा हनूमत इत्यादि ।

Fol. 91:

उक्तार्थस्यैव विवरणम्—अर्चिष्यत इत्यादि । कालनिकाशरूपान् कालाग्नितुल्यरूपान् ।। १४ ।।

इति श्रीमद्युद्धकाण्डे चतुर्दशः सर्गः ।

रावणेनोक्तपारुष्यो विभीषणः तत्सभात उत्थाय रामान्तिकमुपैति—सुनिविष्टमित्यादि । सुनिविष्टार्थतत्वसंपन्नेनापि वसे . . . मित्रवादे . . . शत्रुसेविना शत्रुपक्षपातिना तु न वसेत् । सपत्ने तु चित्तस्य . . . न प्रतिष्ठास्ति मित्रप्रवादे तु द्वेष्यत्वेन स्निग्धत्वेन च प्रतिष्ठा . . . . .

अथ श्रीमद्युद्धकाण्डे व्याख्येयानि व्याख्यायन्ते । सीतावृत्तान्तश्रवणजनितहर्षावेशादुक्तं दूतलक्षणवैशिष्ट्यकथनेन सुग्रीवादीनां पुरतो हनूमतो वाक्यमित्यादिना भुवि दुर्लभं सुमहत्कार्यं हनूमता कृतं तद्धरणीतले अन्येन मनसापि न शक्यं कर्तुमित्यर्थः ।।

End:

आतिष्ठेत्यादिना लक्ष्मणस्य, यौवराज्याभिषेकेण तस्यानुनयः, सहवनवासदुःख. . . वा असहत्वात् सुखानुभवाय । नतु वयःप्राप्त्या । तस्यां सत्यामनुनयस्यावसरो नास्ति । अतः पूर्वैः हेतुभिः सहानेनापि हेतुना भरत एव ज्येष्ठ इति प्रतिष्ठितम् ।

Colophon:

इति श्रीमद्युद्धकाण्डे **विवेकतिलक**नाम्नि श्रीरामायणव्याख्याने श्रीमद्युद्धकाण्डव्याख्याने त्रिंशच्छततमः सर्गः

922

VB 225 **रामायणव्याख्या (सारसंग्रहः)**

Beginning:

. . . . . श्रीरामकालाम्बुदः ।
प्रणम्य सीतारमणं सलक्ष्मणं
गुणाकरं कुण्डिनवंशसंभवः ।।

इमं सभाम . . . . . क्तोपदेशकत्वादादौ नारदोपदेशं प्रति वर्तते—
तपःस्वाध्यायनिरतं . . . . . .

Colophon:

इति श्रीमद्रामायणव्याख्यानसारसंग्रहे बालकाण्डः समाप्तः
इति श्रीमद्रामायणव्याख्यानसारसंग्रहे अयोध्याकाण्डः समाप्तः
इति श्रीमद्रामायणव्याख्यानसारसंग्रहे आरण्यकाण्डः समाप्तः
इति **ईश्वरदीक्षितीये** रामायणसारसंग्रहव्याख्याने सुन्दरकाण्डः समाप्तः

End:

सोहं या. . . वतश्चाहं भगवांस्तद् ब्रवीतु मे ।
सोऽहमिति स्वरूपप्रश्नः यतश्चाहमिति प्रयोजनप्रश्नः । स्वरूपप्रश्नस्योत्तरमाह—
भगवन्नारायणो देवः श्रीमान् चक्रायुधो विभुः ।
एकशृङ्गो . . . . . ।।

924

VB 920 **रामायणव्याख्या**

Beginning:

श्रीरामं सच्चिदानन्दमवाङ्मनसगोचरम् ।
जानकीवदनाम्भोजचञ्चरीकं नतोऽस्म्यहम् ।।

श्रीमदयोध्याकाण्डे व्याख्येयानि पदानि व्याक्रियन्ते—गच्छतेति । . . . अघं लक्ष्मणस्येव प्रसक्तं श्रीरामशुश्रूषारूपं पापं यस्मिन् स तथा । यद्यपि परमभागवते भगवदंशावतारे च श्रीशत्रुघ्ने न पापप्रसक्तिरस्ति तथापि श्रीरामशुश्रूषारूपं पापं प्रसक्तम् . . . ननु परमपावनश्रीरामशुश्रूषायाः कथं पापत्वं चेत् अत्र ब्रूमः ।

Fol. 36 (b):

इति श्रीमदयोध्याकाण्डव्याख्यायां श्री**ब्रह्मानन्दतीर्थ**विरचितायां द्वादशः सर्गः ।।

End:

नमस्कारस्तुतिभ्यां संप्रीता सती अनुगृहाणेत्याह सा त्वमिति । शिवेन आरोग्येण अयोध्यां प्रति पुनरागते . . . . सति पट्टाभिषेकेण प्राप्तराज्ये च सति गवादिकं दास्यामि तव प्रियचिकीर्षया प्रियस्य तुष्टेः र . . . छया यक्षे व्रियताम् । अस्मासु प्रीतिः अनुग्रहः क्रियताम् । यानि दैवतानि त्वत्तीर्थवासि . .

A fly leaf at the end has the verse:

. . . स्यास्तरु . . तरङ्गितदिनकृतो वेषेण रागान्वितः
स्वैरं केतकर . . . मलिनीमालिङ्गितं योजयन् ।
शीतस्पर्शमवाप्य संप्रति . . . . . म्भोरुहे
हासेनेव कुमुद्वतीदयितया वैलक्ष्यपाण्डूकृतः ।।

925

VB 220 (b) **रामायणव्याख्या**

Beginning:

ओं तत इत्यादि । रावणेन हृतायाः सीतायाः पदम् अवस्थानस्थलम् अन्वेष्टुं चारणाचरिते चारणैः कृतसंचारे पथि आकाशमार्गे गन्तुमिति शेषः । इयेष ऐच्छत् ।

fol. 5 (b) Colophon:

इति श्रीमद्रामानुजाचार्यविरचिते सुन्दरकाण्डव्याख्याने प्रथमः सर्गः ।

End:

प्राणानामपि संदेहो मम स्यान्नात्र संशयः । इत्यतः परम्
तवादर्शनजः शोको भूयो मां परितापयेत् ।
दुःखाद् दुःखतराभूता दुर्गता दुःखभागिनी ।।
अयं तु वीर संदेहस्तिष्ठतीव ममाग्रतः ।
सुमहांस्त्वसहायेषु हर्यृक्षेषु न संशयः ।।

इति श्लोकद्वयं द्रष्टव्यम् । केषुचित् कोशेषु प्रमादात् पतितम् । नहीति दैन्यं मन्युं 'मन्युर्दैन्यकृतौ क्रुधि' इत्यमरः । तत इति । तव शोकेनापि नैव दशा . . त्यादि मदुक्त्या श्रुतेन त्वच्छोकेनापि मम पुरतः तथाभिपीडिता अदीनभाषिणा मया शिवाभिरुष्टाभिर्वाग्भिरभिप्रसादिता शान्तिं दुःखनिवृत्तिं जगामेति योजना ।

Colophon:

इति श्रीकन्दालरामानुजीये सुन्दरकाण्डव्याख्यानेऽष्टषष्टितमः सर्गः

Scribe adds:

विश्वामित्रे प्रजातेन गोत्रे शेषाद्रिशर्मणः ।
पुत्रेणानन्तकृष्णेन लिखितं पुस्तकं त्विदम् ।।

930

VB 607 **रामायणव्याख्या**

Beginning:

जीवात्मनोर्भेदमतोविभिन्ना
अष्टौ विकाराः प्रकृतेरितीव ।
निदर्शयन् दर्शितबोधमुद्रः
श्रीरामचन्द्रोऽवतु मां ससीतः ।।

अथ श्रीरामनामजपमहिमप्रकाशको भगवान् वाल्मीकिः श्रीरामकथां रामायणाख्यप्रबन्धनिबन्धनेन प्रकटयन् तत्कारणीभूतं तत्कथोपदेशदेशिकेन नारदेन साकमात्मनः संवादमादौ कथयति । वाल्मीकिः वल्मीकात् करचरणादिविशिष्टतयोत्पन्नत्वेन वल्मीकस्यापत्यमित्यर्थविवक्षायाम् 'अत इञ्' इति इञ्प्रत्ययः ।

End:

रत्नगर्भा यथा भूमिर्वह्निगर्भा यथा शमी ।
गायत्रीमन्त्रगर्भेयं प्राचेतसकृतिस्तथा ।।
तत्तादृक्**सवितुः** कुलं स्वजनुषा कृत्वा **वरेण्यं** गतो
भर्गोदग्रपराक्रमो वनभुवं **देवस्य** वाचा पितुः ।
धीशाली **महि**जाहृतं दशमुखं हत्वा**धि**लङ्कां ययौ
योऽयोध्यामथ साङ्ग**नः प्र**भुव**चो** दत्वा स रामो **भ्रि**यात् ।।

अस्मिन् श्लोके गायत्र्यक्षराणि क्रमेण निक्षिप्तानि ।।

931

VB 1114 **रामायणकथासंग्रहः**

Beginning:

विस्तीर्यते कथा यत्र किष्किन्धे रघुनन्दनः ।
भार्यायाः पदमन्विच्छन् वानरैः सख्यमन्वियात् ।।

Colophon:

इति लङ्काकाण्डकथासंग्रहः

Scribe adds:

. . . . . ज वैकुण्ठरामेण लिखिता शुभकथा
श्रीरामचरित्रस्य. . . . . ।
. . . . . .नत्वा
श्रीकृष्णपदारविन्दयुगलं मुक्तिप्रदं कामदम् ।।

932

VB 1123 **रामायणकथासारः**

Beginning:

अथ उत्तरकाण्डकथा । राक्षसानां वधं कृत्वा प्राप्तराज्यं रामं प्रतिनन्दितुमृषयः आजग्मुः । कौशिकयवक्रीतधवनकर्णमेधातिथिपुत्राः ।

Colophon:

इत्युत्तरकाण्डे श्रीरामायणकथा समाप्ता

Scribe adds:

श्रीवैकुण्ठरामेण लिखित उत्तरकाण्डकथाग्रन्थः ।

934

VB 1169(b) **रामायणसुधाकथाप्रसङ्गः**

Beginning:

सर्वस्मृतिनुतशर्वस्तुतबहुमुनिगुर्वाथितमखनिर्वर्तनचणशर्वर्यगशठगर्वप्रमथनभूषपर्वप्रकर चतुर्वर्गद(वि)ल दुर्वर्णितसुरतवंद्भुत हरिदर्पप्रभवदखर्वप्रभुकुलसार्वभौम द्विषदतिभीम स्वयमभिरामप्रभुरघुराम, त्वदमृतनाम स्मृतमपि नाम प्रदिशति दिव्यम् ।

Fol. 80:

अक्षरक्षीरपूरितरत्नाकरे निःशेषदोषशेषफणिफलकमञ्चः योगप्रपञ्चः शार्ङ्गशङ्ख-चक्रगदा-श्रीवत्सवनमालिकाभूषितः ब्रह्मर्षिसेवितः अखिलाण्डमण्डलनायकः भक्ताभीष्टफलदायकः त्रिलोकजिष्णुः विष्णुः, अकुण्ठितकण्ठीरवपराक्रमदशकण्ठखण्डनाय विधिविबुधपतिनिवेदितवृत्तान्तः कोसलदेशीयभासुरभूसुररचितरुचिरकोटीरशोभितसरयूतटनिकटे सकलनगरातिशयसौन्दर्यप्रकटे रथमदवारणोत्तुङ्गतुरङ्गवीरभटेऽयोध्यासंपुटे वेदवेदाङ्गपारगऋष्यश्रृङ्गप्रसादहुतदुग्धभुक्तवैभवमाङ्गल्यकौसल्यागर्भपरिपूर्णसोमः मधुमाससितपक्षनवमीपुनर्वसुतारकर्कटलग्नमध्याह्नकृतावतारनिलयः नवेन्दीवरश्यामः श्रीरामः ।

Fol. 82:

रघुनायकः पवित्रातिरात्रपौण्ड्रकवाजपेयमेध्याश्वमेधयागशीलः दयाशीलः लोकपरिपालनशीलः । नीरोगनिरुपद्रवमानवाभिरामसकलसस्यपुष्पफलप्रकाशितपृथिवीं पालयतु । भक्तजनानां निरन्तरकल्याणश्रियं ददातु ।।

End:

त्वद्दातृत्वगुणक्षमादिविविधश्लाघासमाकर्णना-
नन्दोद्यन्पुलकावलीकवलिताः सर्वेऽपि विद्वज्जनाः ।
दाता हे विदुषां त्वमेव हि यतो जायासमेते त्वया
रङ्गस्वामिबुधोत्तमेऽद्य कनकस्रोतोऽभिषेकः कृतः ।।

970

VB 290 हरिवंशः

Invocatory verses:

चक्रं यस्य भुजाग्रहस्तललितं विद्युत्प्रभं राजते
शङ्खो यस्य विराजते करतले संपूर्णचन्द्रप्रभम् ।
माला यस्य विराजते सतिलका साशोकनीलोत्पला
स त्वां पातु षडर्धविक्रमगतिस्त्रैलोक्यनाथो हरिः ।।
यो विद्याद्यैरशेषैर्मनसि विनिहितैः क्लेशसंज्ञैस्त्रिदोषै-
रस्पृष्टो निर्गुणत्वात् परमगुरुरजःकर्मभिस्तत्फलैर्वा ।
सर्वज्ञत्वादियुक्तो निरतिशयसुखावाप्तिहेतुर्यतीनां
सोऽनादिर्वासुदेवः शमयतु दुरितं सर्वजन्मार्जितं नः ।।

Beginning:

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ।।

शौनक उवाच—

श्रुतं सुमहदाख्यानं भवता परिकीर्तितम् ।
भारतानां च सर्वेषां पार्थिवानां तथैव च ।।

\+ + + +

End:

जनमेजयस्तु राजर्षिर्विष्णुभक्ति समुद्वहन् ।
शशास च नृपो राजा राज्यं निहतकण्टकम् ।।

Colophon:

इति श्रीमहाभारते हरिवंशे अष्टादशसहस्रिकायां संहितायां पारायणविधिर्नाम द्विपञ्चाशत्त्रिशततमोऽध्यायः । हरिवंशं समाप्तम् ।

Scribe adds:

इन्द ग्रन्थं कडशियिले शीतलं ८ एडुं तुवरमान् सुब्बरामय्यन् सुन्दरराजन् एळुतिमुकिच्चदु संपूर्णम् ।।

975

VB 189 **महाभारतव्याख्या**

Beginning:

कृष्णगीतानामपौलोमव्याख्यां संप्रदायक्रमेणार्थप्रदर्शनाय कर्तुमारभते—पूर्वमवान्तरतमो नाम विष्णुमूर्तिर्हिमवद्गिरिगुहायां स्वस्मिन्नाश्रमे तपस्तप्त्वा . . . . . द्वापरावसाने भविष्यद्वृत्तान्तवेत्ता भूत्वा कृष्णद्वैपायननामा भगवान् पराशराद्यमुनाद्वीपे सत्यवत्यामवान्तरतमस्यावतारोऽपि लोकानुग्रहणार्थाय । तथा खलु भगवतो हि प्रवृत्तिः । . . .

तर्हि सर्वेषां सर्पाणां विनाशः स्यादिति चेत्, तत्र सर्पसत्रे दुष्टानां सर्पाणां विनाशो भविता, अन्येषां रक्षा विहितेत्याह—परित्राणमित्यादिना । भीरूणां सर्पाणां ब्राह्मणात् परित्राणं विहितं चेत्यन्वयः । विहितं कल्पितम् । अतः कारणादिदं कर्म मा कृथाः ।।

इति पौलोमव्याख्यायां कृष्णगीतायामष्टमोऽध्यायः । पौलोमव्याख्या समाप्ता ।

Fol. 46:

जनमेजयस्य सर्पसत्रं श्रोतुं कुरुमहर्षिः पृष्टवानिति सूतेनोक्तं श्रुत्वा तद्विस्तरेण श्रोतुं शौनकः पृच्छतीति तस्य चोक्तप्रकारमाह—किमर्थमित्यादिना । . . .

इत्यास्तीके विषमदीपिकायां कृष्णगीतायां प्रथमोऽध्यायः ।।

Fol. 68:

इत्यास्तीकविषमदीपिकायाम् एकचत्वारिंशोऽध्यायः

Fol. 69:

श्रुत्वेत्यादि । सर्पसत्राय सर्पसत्रं कर्तुं निश्चितं नियमप्राप्तं जनमेजयं ऋषिर्विद्वान् द्वैपायनोऽभ्यगच्छदिति संबन्धः । परं परमात्मा अपरं जीवात्मा तदुभयं जानातीति परापरज्ञः । इति संभवपर्वटीकायां प्रथमोऽध्यायः

End:

विश्वकर्मा चित्रकर्ता । नानुकुर्यात् तत्सदृशं न कुर्यात् । अभिप्रायान् कौशलभेदान् वैद्यं विद्वांसः पूर्वदेवं हितं प्रीतिकरं युक्तमुपपन्नं स्वजनगामीनि बन्धुविषयाणि वचनानि श्रावितवानिति विभक्तिवचनव्यत्ययः ।

Colophon:

इति श्रीमहानन्दपूर्णविरचितायां व्याख्यानरत्नावल्यां संभवपर्वणि त्र्युत्तरद्विशततमोऽध्यायः ।।

(Malayalam):

संभवपर्वत्तिन्टे व्याख्यानम् । तम्पुरान् पेरुन्तृक्कोविलप्पन् तुणक्कणम् ।।

977

VB 263(c) **महाभारतसंग्रहः**

Beginning:

श्रीमान्+हृदि ।

आसीद् गङ्गानदीतीरे विश्रुता हस्तिनापुरी ।
चन्द्रवंशोद्भवो यस्यां राजर्षिः शन्तनुः स्थितः ।।
तस्य गङ्गा समभवद् भार्या स्त्रीरूपधारिणी ।
तस्यां जातो महाप्राज्ञो भीष्माचार्यो महारथः ।।
अन्या भार्या तु तस्यासीच्छंतनोस्तु यवीयसी ।
नानायोजनगन्धा तु रूपलावण्यशोभिता ।।
तस्यां विचित्रवीर्यश्च जातश्चित्राङ्गदस्तथा ।
तयोर्भ्रात्रोस्तु भीष्मस्तु विवाहं समकारयत् ।।
अम्बालीमम्बिकां चैव काशिराजसुते उभे ।
हृत्वा स्वयं पितुः प्रीत्या ब्रह्मचर्यव्रते स्थितः ।।

End:

स हत्वा चास्यैं वृत्तान्तमेतत्कीचकनाशनम् ।
पृच्छ्यमानः शनैः . . . कौरवा अपि ।।
. . . . . .

980

VB 1089 **महाभारतकथासारः**

Beginning:

कर्णपर्वकथा । वैशम्पायन उवाच—द्रोणे हते दुर्योधनप्रभृ . . . रात्रि दुःखेन निन्युः । ततः . . . रावक्ष्यकत्वा . . योगमाज्ञाप्य कर्णं सेनापतिं कृत्वा योद्धुं ययुः । पाण्डवा अपि कृताह्निकाः आययुः । युद्धं च प्रववृते । एवं दिनद्वययुद्धे पार्थेन पातिते कर्णे स . . . . तं जगाद । जनमेजय उवाच—

End:

इमं महायुद्धमखं महात्मनोः
धनंजयस्याधिरथेश्च यः पठेत् ।

सम्यगिष्टस्य मखस्य यत् फलं
तदाप्नुयात् संश्रवणाच्च भारत ।।
यथैव विष्णुर्भगवान् सनातनः
स वासुदेवः परिकीर्त्यते यतः ।
ततः स कामान् लभते सुखी नरो
महामुनेस्तस्य वचोर्जितं यथा ।।

Colophon:

इति **शिवानन्दविद्यानिधि**रचितः कर्णपर्वकथासारः समाप्तः

982

VB 505 **कुशलवोपाख्यानम्**

Beginning: (the story being based on *Jaiminīyabhārata*)

रामस्य पुत्रयोश्चैव युद्धमत्यद्भुतं श्रुतम् ।
तद्वक्तुमर्हसि त्वं हि श्रोतुं कौतूहलं हि मे ।।

जैमिनिः—

शृणु राजन् महाबाहो रामस्य चरितं महत् ।
विस्तरेण हि तत्सर्वं वदतस्तन्निशामय ।।
रामस्तं रावणं हत्वा कुम्भकर्णं महासुरम् ।
अतिकायादिकान् हत्वा मेघनादं तदा रणे ।।
सीतामग्निमुखे शुद्धामादाय स्वपुरं ययौ ।
विभीषणेन वीरेण लक्ष्मणेन महात्मना ।।

Colophon:

इति श्रीमन्महाभारते आश्वमेधिकपर्वणि कुशलवोपाख्याने **प्रथमोऽध्यायः**

End:

जैमिनिः—

युद्धं च पुत्रयोर्यद्वत् पुरा चक्रे रघूद्वहः ।
तद्वत् पार्थस्य कर्णस्य युद्धमत्यन्तमद्भुतम् ।।

सूतः—

परीक्षिताय सकलं कथयामास जैमिनिः ।
यत्तु युष्मभ्यमाख्यातं मया वै मुनिपुङ्गवाः ।।
नाख्यातवानिदं युद्धं वाल्मीकिः पितृपुत्रयोः ।

इदमाख्यानकं रम्यं ये शृण्वन्ति नरोत्तमाः ।।
ते पुत्रपौत्रैर्नन्दन्तो नरास्ते विष्णुवल्लभाः ।।

Colophon:

इति महाभारते आश्वमेधिकपर्वणि कुशलवोपाख्याने चतुर्दशोऽध्यायः । कुशलवोपाख्यानं समाप्तम्

Extra verses found at the end:

विष्णुप्रिये महारम्ये पुरसौभाग्यदायिनि ।
गृहाणार्घ्यं महालक्ष्मि वरदे हरिवल्लभे ।।
दिवाकर जगन्नाथ ब्रह्मविष्णुशिवात्मक ।
अर्घ्यं गृहाण देवेश सर्वसंपत्प्रदो भव ।।

1002

VB 252(a) **भागवतम् (सव्याख्यानम्)**

Beginning:

रमापतिपदाम्भोजपरिस्फुरितमानसम् ।
सेनापतिमहं वन्दे विष्वक्सेनं निरन्तरम् ।।
दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् ।
क्रीडद्यदुकुलाम्भोधौ परानन्दमुदीर्यते ।।
. . . . . .
दशमे कृष्णसत्कीर्तिवितानायानुवर्ण्यते ।
धर्मग्लानिनिमित्तस्तु विरोधो दुष्टभूभुजाम् ।।
प्राकृतादिश्चतुर्धा यो निरोधः सूपवर्णितः ।
तत्तत्प्रसङ्गतः सृष्टिसंहारादिनिरूपणैः ।।
कृता नवतिरध्याया दशमे कृष्णकीर्तये ।
आद्यैश्चतुर्भिरध्यायैर्ब्रह्मप्रार्थनयावनेः ।।

End:

दृष्ट्वा प्रलम्बं विहतं बलेन बलशालिना ।
गोपाः सुविस्मिता आसन्नसाधुं साधुरूपिणम् ।।
आशिषोऽभिगृणन्तस्तं प्रशशंसुस्तदर्हणम् ।

तदर्हणं प्रशंसार्हम्

प्रेत्यागतमिवालिङ्ग्य च प्रेमविह्वलचेतसः ।।
पापे प्रलम्बे निहते देवाः परमनिर्वृताः ।
अभ्यवर्षन् बलं माल्यैः शशंसुः साधु सध्विति ।।

Colophon:

इति श्रीमद्भागवते महापुराणे सव्याख्याने दशमस्कन्धे अष्टादशोऽध्यायः

1007

VB 303(k) **भागवतसंग्रहः**

Beginning:

भूपालच्छलदुष्टदैत्यनिवहैर्भारातुरां दुःखितां
भूमिं दृष्टवता सरोरुहभुवा संप्रार्थितः सादरम् ।
देवो भक्तदयानिधिर्यदुकुले शेषेण साकं मुदा
देवक्याः सुकृताङ्कुरं समभवत् कृष्णोऽनिशं पातु नः ।। १ ।।
जातः कंसभयाद् व्रजं च गमितः पित्र्यं शिशुः शौरिणा
साकं पूतनया तथैव शकटं वात्यासुरं चार्दयन् ।
मात्रे विश्वमिदं प्रदर्श्य वदने निर्मूलयन्नर्जुनौ
निघ्नन् वत्सबकाघनामदितिजान् कृष्णोऽनिशं पातु नः ।। २ ।।

End:

कृष्णाङ्घ्रिद्वयभक्तिमात्रविलसत्सारस्वतश्लाघितैः
श्लोकैर्द्वादशभिः समस्तचरितं संक्षिप्य संपादितम् ।
स्तोत्रं कृष्णकृतापदानविषयं नित्यं पठन् मानुषो
विन्दन् कीर्तिमरोगतां च विततां विष्णोः पदं यास्यति ।। १३ ।।

Colophon:

इति भागवतसंग्रहः समाप्तः

1008

VB 1125(a) **भागवतसंग्रहः**

Beginning:

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वाभिज्ञःस्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।

तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ।।
नैमिषे निमिषक्षेत्रे मुनयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रसममासत ।।
इति संप्रश्नसंपृष्टो विप्राभो रोमहर्षणिः ।
प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ।।

Fol. 13:

देवान् यदून् विधायादौ पुनर्देवान् विधाय तान् ।
श्रीकृष्णः स्वेच्छया धाम स्वतन्त्रैव समाविशत् ।।

एकादशस्कन्धश्च समाप्तः ।।

End:

योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ।
संसारसर्पदष्टं यो विष्णुरातममूमुचत् ।।

Two broken leaves at the end contain a commentary on the first verse of *Nārāyaṇīyam*.

1013

VB 571(a) **शिवपुराणम्**

Beginning:

. . . . . कुक्कुटेशं जगद्गुरुम् ।
अभीष्टसिद्धिमतुलां . . . . . ।।
. . . . . र्चनात् ।
सिद्धिं प्राप्तान् जनान् सर्वान् सहस्रवदनो विभुः ।।
मन्त्रादेर्मधुगङ्गायामत्र लिङ्गस्य वैभवम् ।
यत्किंचिद्दक्षिणाय . . . . . ।।
. . . . . ।
. . . . . प्रोक्तं किमन्यच्छ्रोतुमर्हसि ।।

Colophon:

ओमिति श्रीशैवे . . . . . तायामुपरिभागे मोक्षोपायकथने शिवक्षेत्रप्रशं . . . . . शिवप्रसादलाभो नाम त्रिंशोऽध्यायः

इति श्रीशैवे महापुराणे . . उपरिभागे क्षेत्रखण्डे श्रीसह्याद्रिमाहात्म्ये पञ्चमोऽध्यायः

इति श्रीशैवे महापुराणे सहस्रकोटिरुद्रसं . . . . परिभागे मोक्षोपायकथने क्षेत्रप्रशंसायां त्रिकूटाचलमाहात्म्ये एकोनत्रिंशोऽध्यायः

End:

त्रिकूटेशस्य कैंकर्यं बहुधा . . . . . ।
. . . . चित्रसभां हेमपट्टवस्तुभिरुज्ज्वलाम् ।।
कारयित्वा प्रतिष्ठाप्य ब्राह्मणैर्विधिपूर्वकम् ।
. . . . . विविधैरभिषेचनैः ।।
अभिषिच्य महालिङ्गं महानन्दसभापतिम् ।
सर्वोपचारैः . . . . . ।।
समुत्साह्य सुसंतुष्टो नाममालिकया विभुम् ।
तुष्टाव परमेशानमष्टमूर्तिं . . . . . ।।

1014

VB 242 **काशीखण्डः**

Beginning:

अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।
सूताग्रे कथयामास कथां कलुषहारिणीम् ।।

व्यास उवाच—

कदाचिन्नारदः श्रीमान् स्नात्वा श्रीनर्मदाम्भसि ।
श्रीमदोंकारमभ्यर्च्य सर्वदं सर्वदेहिनाम् ।।
व्रजन् विलोकयांचक्रे पुरो विन्ध्यं धराधरम् ।
संसारतापसंहारिरेवावारिपरिष्कृतम् ।।

Colophon:

इति स्कान्दे पुराणे काशीखण्डे विन्ध्यवर्णनं नाम प्रथमोऽध्यायः
इति स्कान्दे काशीखण्डे लोपामुद्राख्यानं नाम चतुर्थोऽध्यायः

End:

एतच्छ्रवणतः पुंसां सर्वत्र विजयो भवेत् ।
सौभाग्यं चापि सर्वत्र प्राप्नुयान्निर्मलाशयः ।।
यस्य विश्वेश्वरस्तुष्टस्तस्य तच्छ्रवणे रतिः ।
जायते पुण्ययुक्तस्य महामङ्गलचेतसः ।।
सर्वेषां मङ्गलानां च महामङ्गलमुत्तमम् ।
गृहेऽपि लिखितं पूज्यं सर्वमङ्गलसिद्धये ।।

Colophon:

इति स्कान्दे पुराणे काशीखण्डेऽनुक्रमणिकाध्यायो नाम शततमोऽध्यायः । काशीखण्डः समाप्तः

1016

VB 1115 **जैमिनिभागवतम्**

[This is the portion of the story dealing with the marriage of Sundarī, daughter of Śrīkṛṣṇa and Rukmiṇī.]

विष्णुरात उवाच—

भगवन् सर्वतत्त्वज्ञ सर्वविद्याकलानिधे ।
श्रीकृष्णस्य कथां पुण्यां ब्रूहि शुश्रूषवे प्रभो ।।
कामदेवस्य चोत्पत्तिं रतेः कल्याणमेव च ।
श्रुतमत्यद्भुतं तावच्छम्बरस्य निबर्हणम् ।।

End:

सुन्दर्याश्च विवाहमङ्गलमिदं सौन्दर्यरत्नाकरं
स्वानन्दाकृतिदेवदेवजगतीसाम्राज्यलक्ष्मीपतेः ।
उक्तं कोसलनन्दनात्मजजगद्वृन्दादरस्याखिल-
प्राणात्मापरमात्मनोर्विभुरसौ मां चापि संरक्षतु ।।

Colophon:

इति श्रीजैमिनिभागवते उत्तमत्रयोदशतरङ्गः । सुन्दरीकल्याणं समाप्तम्

Scribe adds:

रामलिङ्गकशास्त्रियल् स्वहस्तलिखितम् । १०६०माण्डु आटिमासं ६ ति.
इन्तपुस्तकं एळुतिमुकिञ्चतु

1022

VB 369 **यमकिंकरसंवादः**

Beginning:

आद्यं सर्वपुराणानां पुराणं ब्राह्ममुच्यते ।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते ।।
ब्राह्मं पाद्मं . . . . . .
सर्गश्च प्रतिसर्गश्च . . . . . .
यदि तत्तव मैत्रेय पुराणं कथ्यते मया ।।
. . तिस्मरेण कथितो रसस्य परमो मम ।
यमकिंकरयोरित्थं संवादस्तं ब्रवीमि ते ।।

End:

इति निजभटशासनाय देवो
रवितनयः स किमाह धर्मराजः ।
मम कथितमिदं च तेन तुभ्यं
कुरुचर सम्यगिदं मयापि चोक्तम् ।।

1028

VB 254(c) **विष्णुधर्मः**

Beginning:

वागीशाद्या + गजाननम् ।। विष्णवे नमः ।
कृत्वाभिषेकं तनयं राज्ञः पारीक्षितं तदा ।
द्रष्टुमभ्याययुः प्रीत्या शौनकाद्या महर्षयः ।।
तानागतान् स राजर्षिः पाद्यार्घ्यादिभिरर्चितान् ।
सुखोपविष्टान् विश्रान्तान् कृतसंप्रश्नसत्कथान् ।।
सत्कथाभिः कृताह्लादः प्रणिपत्य कृताञ्जलिः ।
शतानीकोऽथ पप्रच्छ नारायणकथां पराम् ।।

Colophon:

इति श्रीविष्णुधर्मे अम्बरीषोपाख्यानं नाम द्वितीयोऽध्यायः
इति श्रीविष्णुधर्मे दण्डनीतिर्नाम त्रिषष्टिरध्यायः
इति विष्णुधर्मे अखण्डद्वादशीकल्पं नाम सप्तदशोऽध्यायः
इति श्रीविष्णुधर्मे याज्ञवल्क्यगीतासु संप्राप्तद्वादशीकल्पं नाम पञ्चदशोऽध्यायः
इति विष्णुधर्मे पदद्वयव्रतकल्पं नाम एकोनविंशोऽध्यायः

End (fol. 27b):

तीर्थस्नानैः सोपवासैरजस्रं पात्रैर्दानैर्होमजप्यैश्च नित्यम् ।
शुद्धिं नेयो देवताभ्यर्चनैश्च शुद्धोऽप्यात्मा सङ्गदोषादशुद्धः ।।
शुद्धं वस्त्रं सङ्गदोषादशुद्धं भूयः शुद्धिं शोच्यमानं प्रयाति ।
एतज्ज्ञात्वा सङ्गदोषादशुद्धं ... दुष्टोऽप्यात्मविद्भिर्विधेयः ।।

Beginning (after fol. 28):

एवमेतन्महाभाग पित्रोः पुत्रसमुद्भवः ।
दुःखं प्रयात्युपशमं तन्न तेनेह केनचित् ।।

अत्रापि श्रूयतां वृत्तं यत्पूर्वमभवत् सुतः ।
उत्पत्तौ कार्तवीर्यस्य हैहेयस्य महात्मनः ।।

Colophon:

इति श्रीविष्णुधर्मे . . . कृतद्वादशीकल्पं नाम अष्टात्रिंशोऽध्यायः

दाल्भ्यः—

संसारासारतां ज्ञात्वा विषयांश्चातितर्षुलान् ।
कर्तव्यं यन्महाभाग पुरुषेण तदुच्यताम् ।।

पुलस्त्यः—

संसारासारतां ज्ञात्वा विषयांश्चातितर्षुलान् ।
गर्भेष्वेव सुसंत्याज्यास्तत्त्यागो गुणकृन्नृणाम् ।।

End:

अतीते दशमे जन्ये त्वच्युताराधनेच्छया ।
सुकर्मजपतां भद्रद्वादशीं त्वमुपोषितः ।।
तव तस्याः प्रभावेण पापमत्यन्तदुर्जयम् ।
अल्पैरहोभिः संक्षीणमामपात्रे यथा जलम् ।।
यदन्यत्क्षपयेद्वर्षैस्तद्दिनैर्भवतः क्षयम् ।
गतं वा वयमन्तःस्थाः प्रभवत्यन्तदुर्लभः ।।
शमं पापस्य कुरुते जयं सुकृतकर्मणः ।
सत्कर्मजयदा ह्येषा मतो वै द्वादशी स्मृता ।।

1034

VB 1013 शिवतत्त्वसुधानिधिः

Beginning:

यं प्रणम्य सुरेन्द्राद्या भवन्ति सुखशालिनः ।
सर्वविघ्नोपशान्त्यर्थं तं वन्दे शंकरात्मजम् ।।

श्रीसूतः—

शिवं हरिं विधातारं तत्पत्नीः तत्सुतान् गुरून् ।
नत्वा समस्तप्रत्यूहशान्तये मङ्गलाय च ।।
वक्ष्ये शृणुध्वं सर्वज्ञाः शिवतत्त्वसुधानिधिम् ।
नैमिशीयास्तु मुनयः शौनकाद्या महर्षयः ।।
सत्रावसाने संहृष्टाः सूतं पप्रच्छुरादरात् ।

ऋषयः—

व्यासशिष्य महाप्राज्ञ सर्वशास्त्रविशारद ।
सूत पौराणिकश्रेष्ठ सर्वज्ञोऽसि भवान् यतः ।।

त्वद्गुरुः सर्वलोकानां श्रेष्ठः सत्यवतीसुतः ।
वेदानां व्यासभूतत्वाद् वेदव्यास इति स्मृतः ।।
तस्य प्रसादात् त्वं वेत्सि पुराणान्यखिलानि च ।
शैवानि तत्त्वसाराणि वैष्णवानीतराणि च ।।

End:

तदुक्तं भवतां विप्राः शिवतत्त्वसुधानिधिम् ।
श्रुतमर्थं समाधाय मननं कुरुत द्विजाः ।।
सकलभुवनसारं सर्ववेदान्तसारं
समरसगुणसारं सर्ववेदार्थसारम् ।
सकलसुलभसारं सच्चिदानन्दसारं
समरसजयसारं सर्वदा मोक्षसारम् ।।
सकलजननमोक्षं सर्वदा तुर्यमोक्षं
सकलसुलभमोक्षं सर्वसाम्राज्यमोक्षम् ।
विषयरहितमोक्षं विश्वसंतोषमोक्षं
श्रवणमननमात्रादेतदत्यन्तमोक्षम् ।।
श्रुत्वा समग्रमृषयः सूतं पौराणिकोत्तमम् ।
महावाक्यार्थदातारं संपूज्य विधिवन्मुदा ।।
वस्त्रैराभरणैर्गन्धैः पुष्पैरर्घ्यादिभिः शुभैः ।
उक्तमर्थं विनिश्चित्य ब्रह्मनिष्ठा बभूविरे ।।
य एतत्पुण्यमाख्यानं श्रावयेद्वा शृणोति वा ।
अपुत्रो लभते पुत्रान् दरिद्रो लभते धनम् ।।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।
सर्वान् कामानवाप्नोति सत्यमेतन्न संशयः ।।

Colophon:

इति श्रीस्कान्दे महापुराणे सनत्कुमारसंहितायां **शिवतत्त्वसुधानिधौ** सकलाध्यायसारमहिमा नाम विंशोऽध्यायः

Scribe adds:

शिवभक्तप्रमोदाय शिवतत्त्वसुधानिधिः ।
स्वामिनः शिवपूर्वस्य करेणायं विलिख्यते ।।

Date: 10th Oct. 1815 (991):

युवनामसंवत्सरं तुलामासं २७ शुक्रवारं शुक्लपक्षत्तुनवमियुं श्रविष्ठानक्षत्रमुं कूटिन दिनत्तिल् इन्त ग्रन्थं एळुति मुटिन्ततु ।।

समाप्तोऽयं शिवतत्त्वसुधानिधिः ।।

1037

VB 997 **सालग्रामलक्षणादि**

Beginning:

प्रणम्य गोपिकानाथं श्रीकृष्णं जगतां प्रभुम् ।
ग्रन्थान् बहून् समालोक्य श्रुत्वैतिह्यं क्वचित् क्वचित् ।।
विष्णुना गरुडायोक्तं ब्रह्मणा नारदाय च ।
सालग्रामशिलाभेदं ग्राह्याग्राह्यफलं तथा ।।
द्वारमानं तथा क्षेत्रं मूर्त्तीनां लक्षणं तथा ।
प्रसङ्गादत्र तत्सर्वं वक्ष्यामः साधुतुष्टये ।।
प्रपद्येत स्वयं प्रोक्तं सालग्रामशिलोच्चयम् ।
श्रीमान्नारायणो यस्मिन् सांनिध्यं कुरुते सदा ।।

Colophon:

सालग्रामस्तोत्रं संपूर्णम्

End:

विषमा एव पूज्या स्युर्विषमेष्वेक एव हि ।
गृहेऽतिदग्धा भग्ना वा नैव पूज्या वसुंधरे ।।
अतस्तत्पूजनाद् गेहे उद्वेगं प्राप्नुयाद् गृही ।
सालग्रामशिला भग्ना पूजनीया सचक्रका ।।

1045

VB 1122 **हरिलीलाविवेकः**

Beginning:

. . . . विसर्गादिसाक्षिणेऽचिन्त्यशक्तये ।
जयन्ति **बोपदेवस्य** वाचो विबुधसंस्तुताः ।।
न सारो . . . . . ।
. . . . . मणी तद्विनिर्मिता ।
हरिलीलाभिधा सेयं यथामति विविच्यते ।।

इह कश्चिद् गुरुप्रसादादधिगतसमस्त . . . . . तार्थं विवरीषुः प्रतिजानीते । श्रीमद्भागवतस्कन्धाध्यायार्थादि निरूप्यते विदुषा बो. . . . . स्कन्धाश्चाध्यायाश्च तेषामित्यर्थः । स आदिः यस्य तत् तथा । आदिशब्दाद् महाप्रकरणावान्तरप्रकरण . . . . . सुन्दरत्वं च निरूप्यत इत्यर्थः ।

End:

अतत्त्वे तत्त्वधीर्येषां तत्त्वे चातत्त्वधीर्नृणाम् ।
न तानानन्दयन्त्येता **बोपदेवस्य** सूक्तयः ।।
यस्य व्याकरणे वरेण्यघटनास्फीताः प्रबन्धा दश
प्रख्याता नव वैद्यकेऽथ तिथिनिर्धारार्थमेकोऽद्भुतः ।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य सु-
ध्यन्तर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः ।।
लक्ष्म्या सुवर्णलतया वपुषि प्रकाण्डे
तस्याः स्तनस्तबकनम्रतया नितान्तम् ।
सच्छायकः शितिरुचः फलितस्तमाल-
स्तापं व्यपोहतु भवाध्वभवं हरिर्नः ।।
हरिलीलाविवेकोऽयं रामराजस्य वेश्मनि ।
निकटे रचयांचक्रे तुष्टचै **हेमाद्रिणा** सताम् ।।

1046

VB 277 हरिश्चन्द्रोपाख्यानम्

Beginning:

जनमेजयः—

वैशंपायन लोकेऽस्मिन् सत्यवादी दयापरः ।
शौर्यवान् वीर्यसंपन्नो यः श्रीमान् बुद्धिमान् कृती ।।
सदा दानपरो वाग्मी वदान्यः सत्यसंगरः ।
पुण्यश्लोकः पुण्यकीर्तिर्दाता यज्वा सुधार्मिकः ।।
शरणं शरणार्थिभ्यः सत्कार्यनिरतः सदा ।
एकदारव्रतपरः परदारसहोदरः ।।
सर्वस्वदाता सत्पात्रे यज्ञे सर्वस्वदक्षिणः ।

End:

सुदिनं सुप्रभातं च मङ्गलं तस्य जायते ।
गर्भिणी जनयेत् पुत्रं सर्वज्ञं वेदपारगम् ।।
एतत् ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
सत्यवादिहरिश्चन्द्रवृत्तान्तं प्रति कीर्तितम् ।।
हरिश्चन्द्रकथा पुण्या गङ्गेवाघविनाशिनी ।
स्नातानां शृण्वतां चापि सा मनाक् पुण्यवर्धिनी ।।

Colophon:

इति जैमिनिभारते हरिश्चन्द्रोपाख्याने दशमोऽध्यायः

1048

VB 291(k) **अनन्तव्रतमाहात्म्यम्**

Beginning:

सूत उवाच—

अरण्ये वर्तमानास्ते पाण्डवाः दुःखकर्शिताः ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्येदमब्रुवन् ।।
वयं दुःखाभिसंतप्ताः पृथिव्यां पुरुषोत्तम ।
कथं मुक्तिर्वदास्माकमनन्ताद् दुःखसागरात् ।।

श्रीकृष्ण उवाच—

अनन्तव्रतमाहात्म्यं सर्वपापहरं शुभम् ।
सर्वकामप्रदं नृणां स्त्रीणां चैव युधिष्ठिर ।।
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे शुभे ।
तस्यानुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ।।

End:

ददर्श शीला सा स्त्रीणां समूहं रक्तवाससाम् ।
चतुर्दश्यामर्चयन्तं भक्तचा देवं पृथक् पृथक् ।।
उपगम्य शनैः शीला पप्रच्छ स्त्रीकदम्बकम् ।
नार्यः किमेतन्मे ब्रूत किं नाम व्रतमीदृशम् ।।
तस्या ऊचुर्योषितः सर्वाः . . . . . .

1051

VB 279(e) **ऋषिपञ्चमीमाहात्म्यम्**

Beginning:

ऋषयः—

शौनकाद्या महात्मानो नैमिशारण्यवासिनः ।
दृष्ट्वा सूतं महाप्राज्ञं पप्रच्छुर्व्रतमुत्तमम् ।।

पौराणिक महाप्राज्ञ सर्वलोकेषु पूजित ।
त्वत्तः श्रुतानि सर्वाणि व्रतानि सुबहून्यपि ।।
सांप्रतं नो समाचक्ष्व गृहस्थाश्रमवासिनाम् ।

सूतः—

साधु साधु महाप्राज्ञाः सर्वे यूयं समाहिताः ।
वक्ष्ये लोकोपकाराय शृणुत श्रद्धया सह ।।
शृण्वन्तु मुनयः सर्वे व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमीति विख्यातं सर्वपापहरं परम् ।।

End:

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
कामाकामकृतं पापं तत्क्षणादेव नश्यति ।।
किं पुनर्व्रतचीर्णेन जन्मान्तरकृतं च यत् ।
महापापं चोपपापं भस्मसाद्भवति ध्रुवम् ।।
एषामृषीणां च तपोधनानां
व्रतेन साङ्गेन मनुष्यलोके ।
निस्तीर्य नार्यो निखिलं च पापं
मोक्षं च पश्यन्त्यपयान्ति कल्मषात् ।।

Colophon:

इति भविष्योत्तरपुराणे **ऋषिपञ्चमीव्रतमाहात्म्यं** संपूर्णम्

1052

VB 280(g) **ऋषिपञ्चमीव्रतमाहात्म्यम्**

Beginning:

पप्रच्छुर्मुनयः सर्वे सूतं पौराणिकोत्तमम् ।
सप्तर्षीणां व्रतं श्रेष्ठं वदस्वेति मुहुर्मुहुः ।।

सूतः—

अथातः संप्रवक्ष्यामि सप्तर्षीणां व्रतं परम् ।
शृणुध्वं ऋषयः सर्वे सर्वपापहरं नृणाम् ।।
श्वेताश्वोऽभूत् पुरा कश्चिद्राजा सर्वसमृद्धिमान् ।
श्रोतुकामश्च धर्माणां व्रतानामुत्तमं च यत् ।।
जगाम ब्रह्मलोकं स ब्रह्माणं परिपृष्टवान् ।

श्वेताश्वः—

मया कृताश्च धर्माश्च व्रतानि सुबहूनि च ।
सांप्रतं मे समाचक्ष्व ब्रह्मन् सप्तऋषिव्रतम् ।।

ब्रह्मा—

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमिविख्यातं सर्वपापप्रणाशनम् ।।
यः करोति व्रतं भक्त्या सर्वदोषापहारकम् ।
तस्य मृत्युभयं नास्ति नरकानुभवो नहि ।।
. . . . . .
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।

End:

इदं व्रतस्य माहात्म्यं कथितं तव शोभने ।
एवं कुर्याद् व्रतं चैतत्सा नारी सुखभागिनी ।।
भवेच्च रूपलावण्यपुत्रपौत्रधनान्विता ।
ऋषिव्रतप्रभावेन जातिं स्मरति पूर्विकाम् ।।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
काम्यकर्मकृतं पापं तत्क्षणादेव नश्यति ।।
किं पुनस्तद्व्रते चीर्णे जन्मान्तरसहस्रके ।
भवन्ति भस्मीभूतानि महापापानि सर्वशः ।।
एषामृषीणां च तपोधनानां
व्रतेन साङ्गेन मनुष्यलोके ।
निस्तीर्य पापानि कृतव्रतास्ते
परत्र लोके सुखमाप्नुवन्ति ।।

Colophon:

इति **श्रीब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतमाहात्म्यं** नाम चतुर्दशोऽध्यायः

1053

VB 1127(a) **कार्तिकमाहात्म्यम् (पाद्मे)**

Beginning:

सूत उवाच—

श्रियः पतिमथामन्त्र्य गते देवर्षिसत्तमे ।
हर्षोत्फुल्लमनाः सत्या वासुदेवमथाब्रवीत् ।।

सत्योवाच—

धन्यास्मि कृतकृत्यास्मि सफलं जीवितं मम ।
मम जन्मनिदानौ च धन्यौ तौ पितरौ मम ।।

Colophon:

इति श्रीपद्मपुराणोत्तरखण्डे **कार्तिकमाहात्म्ये** श्रीकृष्णसत्यभामासंवादे त्रिंशोऽध्यायः

1054

VB 281(b) **कार्तिकमाहात्म्यम् (भारद्वाजसंहितायाम्)**

Beginning:

ब्रह्मोवाच—

कार्तिकस्य तु मासस्य माहात्म्यं वद मे प्रभो ।
कथं च कार्तिके मासि स्नानदानादिकाः क्रियाः।।
कर्तव्याः किं फलं तस्य तत्सर्वं वद विस्तरात् ।।

हंस उवाच—

साधु पृष्टं त्वया ब्रह्मन् लोकानुग्रहकाम्यया ।
कार्तिकस्य तु मासस्य वक्ष्ये माहात्म्यमुत्तमम् ।।
कार्तिके मासि संप्राप्ते प्रातरुत्थाय चादृतः ।
अरुणोदयवेलायां शौचमाचमनं तथा ।।

End:

नारदं ग्राहयामास माहात्म्यमिदमुत्तमम् ।
स उवाच मुनीनां तु नैमिशारण्यवासिनाम् ।।
एवं परंपराव्याप्तं मासमाहात्म्यमञ्जसा ।
मनुविख्यातमापन्नं निखिलेष्टविधायकम् ।।

Colophon:

इति श्रीपाञ्चरात्रागमे **भारद्वाजसंहितायं कार्तिकमाहात्म्ये** त्रयोदशोऽध्यायः

1056

VB 1186 **क्षितिरत्नम्**

Beginning:

प्रणम्य देवं विघ्नेशं प्रणम्य च सरस्वतीम् ।
क्षितिरत्नस्रजं वक्ष्ये मनोज्ञां केरलोचिताम् ।। १ ।।

कृष्णाय वासुदेवाय भक्ताभीष्टप्रदायिने ।
नमः कमलनेत्राय शङ्खाब्जादिगदाभृते ।। २ ।।
कारुण्यपूर्णहृदया महासाम्राज्यदायिनी ।
बालेन्दुचूडारमणी करोतु मम मङ्गलम् ।। ३ ।।
पूर्णेन्दुबिम्बवदनं कोटिकन्दर्पसुन्दरम् ।
नमामि चण्डिकाकान्तं परमात्मानमीश्वरम् ।। ४ ।।
विनायकः कार्तिकेयो महादेवो हिमाद्रिजा ।
नन्दी भृङ्गी महाकालो वीरभद्रोऽष्ट भैरवाः ।। ५ ।।
अर्को वैश्रवणश्चन्द्रः शुक्रः सुरगुरुः कुजः ।
भगवानथ गोविन्दो लक्ष्मीः शेषः खगेश्वरः ।। ६ ।।
पुरंदरो यमो रक्षः पाशी पवन एव च ।
नृसिंहरेणुकापुत्रौ क्षितिसंपत्तिकारणाः ।। ७ ।।
मधुकैटभयोः पूर्वं मेदसा कल्पिता मही ।
विष्णुनेति समाख्यातं द्विजवर्य स्वमेधसा ।। ८ ।।
वर्णाश्रमपरित्राणं धरायां करजोचितम् ।।
तस्माद्धराधिपान् प्राहुः प्रायेण करसंभवान् ।। ९ ।।
मुग्धेन्दुचूडसदनं गोकर्णाख्यमनुत्तमम् ।
समुद्रादुद्धृतं यावद्रामेण भृगुसूनुना ।। १० ।।
उद्भूतं केरलं तावत् पारावारादपारतः ।
ब्राह्मणेभ्यो ददौ रामो विप्रास्तत्केरलाधिपाः ।। ११ ।।
पारुष्यवाक्यपरिहिंसनरोषकष्ट-
डम्भोद्भवैर्नियमलोपमुखैश्च पापैः ।
विप्राः प्रणष्टतपसोऽर्कमसः सुतस्य
धाम प्रयान्ति धरणीभरणादवश्यम् ।। १२ ।।
एतस्माद्राष्ट्रभरणे केरलद्विजपुंगवाः ।
शास्त्रिणः पुरुषान् श्रेष्ठान् ते कुर्वन्त्यधिकारिणः ।। १३ ।।
केरले भूभुजस्ते स्युर्विप्रैर्नियमिता नराः ।
न करग्राहिणस्ते वै प्रजानां परिपालकाः ।। १४ ।।

End:

अज्ञानामपि सुज्ञानां क्षेत्रोपासनमुत्तमम् ।
क्षेत्रोपासनया सद्यस्तुष्टाः सकलदेवताः ।।
क्षेत्राणि पालयेत् तस्मात् पूर्वसंस्थानसुन्दरम् ।
भुक्तिमुक्तिप्रदं क्षेत्रपालनं मुनयो विदुः ।।

क्षेत्रोपासनया हीनं निरर्थं जन्म देहिनाम् ।
ज्ञानादियोगैर्देवानां भजनं दुष्करं कलौ ।।
केरलक्षेत्रमर्यादां संप्रोक्तां पूर्वसूरिभिः ।
श्रीशंकरेण रचितमाचारमपि कृत्स्नशः ।।
आचार्यवदनाच्छ्रुत्वा नानाशास्त्रपुराणगाम् ।
क्षेत्रशिक्षां प्रवक्ष्यामि सर्ववर्णाश्रमोचिताम् ।।
षड्विंशतिनरास्तत्र क्षेत्राङ्गाः परिकीर्तिताः ।
एभिः समेतक्षेत्रे हि स्थितिर्देवस्य निश्चिता ।।
क्षेत्रनाथस्तथाचार्यः पुरःसोपानक्षालकः ।
पश्चान्नटो मार्दङ्गिको नटी मालाकृच्छोधकः ।।
. . . . . पञ्च मनुष्या वाद्यवादकाः ।
अन्तः शान्ता. . . . .बहिः शोधनकारकाः ।।

1060

VB 285 **जप्येश्वरमाहात्म्यम्**

Beginning:

. . . . . .ज्ञानाय शिवाय परमात्मने ।
अनाधाराय लोकानामाधारायात्मयोनये ।।
अनन्तानन्दबोधानां निधये सर्वसाक्षिणे ।
अविकाराय नित्याय. . . . . ।।
. . शिवप्रियः साक्षात् सर्वज्ञः करुणानिधिः ।
महायोगी महाप्राज्ञो महात्मा संशितव्रतः ।।

Colophon:

इति **श्रीशिवपुराणे** जप्येश्वरमाहात्म्ये प्रथमोऽध्यायः

End:

एवमुक्त्वा महादेवो गणानाहूय शंकरः ।
यज्ञस्तम्भेश्वरस्थानं गत्वा सर्वगणैः सह ।।
. . . षेकेन युक्तेन नन्दीश्वरमयो . . यत् ।
उद्वाह . . स च तं स्वयमेव पिनाकधृक् ।।
मरुतां च शुभां कन्यां सुरथेति च विश्रुताम् ।
एतज्जप्येश्वरस्थानं देवदेवस्य शूलिनः ।।
यत्र यत्र स्थितो मर्त्यो . . लोके महीयते ।।

Colophon:

इति श्रीकूर्मपुराणे उपरिभागे नन्दीश्वरोत्पत्तिर्नाम त्रिचत्वारिंशोऽध्यायः ।।
जप्येश्वरमाहात्म्यं संपूर्णम्

Scribe adds:

रुधिरोद्गार्यब्दे सिंहमासेऽस्मिन् शुक्लप्रथमायां च सितच्छदे श्रीजप्येश्वरमाहात्म्यं लिखितं गणपतिसुब्रह्मण्यसूरिणा ।।

1061

VB 286 जयन्तीपुरमाहात्म्यम्

Beginning:

मुखे वारणं तुन्दिलं कुक्षिदेशे महाविघ्ननिर्याणदक्षं त्रिनेत्रम् ।
कपोले गलद्दानलोलम्बमालं भजे पार्वतीपुत्रमीशं सुराणाम् ।।
नैमिशेऽनिमिशे क्षेत्रे तपोधर्मसमृद्धिदे ।
सुसमृद्धे समित्पुष्पकुशाभिरभिरञ्जिते ।।
सत्रमारब्धवांस्तत्र शौनको भगवान् ऋषिः ।
तत्राजग्मुर्महात्मानो मुनयः क्षीणकल्मषाः ।।

End:

मण्डलाश्च प्रणश्यन्ति गुहाग्रे श्रवणाद्ध्रुवम् ।
सिन्धौ च वदनारम्भे स्नात्वा गुहसरस्यपि ।।
जगन्नाथं शार्ङ्गपाणिं षण्मुखं वीरबाहुकम् ।
वल्लीं च देवसेनां च मयूरं कुक्कुटध्वजम् ।।
विमानरूपं ब्रह्माणं गन्धमादनपर्वतम् ।
अस्वतन्त्रैर्मुनिवरैः श्रीमत्पादाब्जसेवकैः ।।
सेवितं गणनाथैश्च महासेनं मुनीश्वराः ।
प्रातः सर्वं निषेव्यैनं कृतकृत्यो भविष्यति ।।

Colophon:

इति श्रीस्कान्दे पुराणे उपरिभागे क्षेत्रवैभवखण्डे व्यासशुकसंवादे जयन्तीपुरमाहात्म्ये अष्टादशोऽध्यायः

Scribe adds:

१०४० वर्षं पङ्कुनिमासं १७ एळुतिमुटिन्तत्

1063

VB 288 **ताम्रपर्णीमाहात्म्यम्**

Beginning:

पावने नैमिशारण्ये क्षेत्रे सर्वगुणान्विते ।
ब्रह्मणा निर्मिते नेमिर्यत्र साक्षाद्विशीर्यते ।।
नैमिशेऽनिमिशे क्षेत्रे ब्रह्मलोकस्य वर्त्मनि ।
स्मरणादेव जन्तूनां सर्वपापविनाशने ।।

\+ + +

ऋषय ऊचुः—

पुण्यक्षेत्राणि पुण्यानि तीर्थानि विविधानि च ।
त्वत्तः श्रुतान्यशेषेण संकोचाद्विस्तरादपि ।।
इदानीं श्रोतुमिच्छामः वैभवं पुण्यदं शुभम् ।
ताम्रायाः पुण्यनद्याश्च विस्तराद्वक्तुमर्हसि ।।

Colophon (fol. 4b):

इति श्रीमच्छैवे **पुराणे** उपरिभागे तीर्थवैभवखण्डे व्यासशुकसंवादे **ताम्रपर्णीमाहात्म्ये** प्रथमोऽध्यायः ।

End:

लब्ध्वा मनोरथान् सर्वान् देवदेवान्महेश्वरात् ।
स्तुत्वा स्मृत्वा सुरनदीं ताम्रपर्णीं मुनीश्वराः ।।
संप्राप्य नैमिशारण्यमशेषगुणसंयुतम् ।
पूर्ववत् स्वाश्रमे पुण्ये ऋषयः सत्रमासते ।।
तपोधना मुनिश्रेष्ठा नैमिशारण्यवासिनः ।
जितेन्द्रिया जिताहाराः शिवध्यानपरायणाः ।।
शान्ता दयासुहृदयाः सर्वलोकहितैषिणः ।।

Colophon:

इति **स्कान्दे पुराणे** उत्तरखण्डे व्यासशुकसंवादे क्षेत्रवैभवखण्डे **ताम्रपर्णीमाहात्म्येऽष्ट**-मोऽध्यायः

Scribe adds:

ताम्रपर्णीमाहात्म्यम् अष्टमोऽध्यायः पालामटै शुप्पय्यशिवन् स्वहस्तलिखितम् ।। मङ्गल-नायकीसहायम्

Beginning (fol. 30):

कात्यायनः—

राजा महानदीमेनां प्राप्य वाचा स्तुव . . ।
नारायण हरे शंभो मातः पाहि तरङ्गिणि ।।
इत्युच्चैर्व्याहरन्मर्त्यो स्नात्वा तदमलाम्भसि ।
सद्यो द्वादशकूर्चस्य फलं प्राप्नोत्यसंशयम् ।।

End:

यद्दैवतो हेलनमित्यरण्य . . . . . ।
. . . . . चाथं महापातकभञ्जनम् ।।
ऋषितीर्थे महापुण्ये पुष्पवनेशितुः . . . . . ।
निमज्यते . . . . . प्रमुच्यते ।।

Colophon:

इति ताम्रपर्णीमाहात्म्ये त्रिषष्टितमोऽध्यायः

1067

VB 1128 दिव्यदेशमाहात्म्यम्

Beginning:

श्रीमद्वैकुण्ठदेशे प्रथितविरजयालंकृते दिव्यलोके
नित्येऽनन्ताङ्गयुक्ते श्रुतिशिखरनुते व्योमयाने च लक्ष्म्या ।
आसीनं चादिशेषे हरिदिगभिमुखं लक्षकं मूलमाद्यं
गम्भीरोदारभावं सकलसुरवरं वासुदेवं प्रपद्ये ।।

End:

नित्यं साष्टशतस्थलस्थभगवल्लक्ष्मीसरोव्योमग-
प्रत्यक्षाकृतिनामरूपविवरैः श्लोकैः सुभावैरपि ।
तत्तद्दिव्यपदाभिमुख्यवपुषा कृत्वा शिरस्यञ्जलिं
यस्तुत्वा प्रणतीकरोति करणैर्भूयो जनिं नैति सः ।।
+ + + + +
एवं संख्येयमानस्य महर्षेर्भावितात्मनः ।
दयालो. . दयस्येति मतिर्जाता सुशोभना ।। १ ।।
दुरापं मानुषाणां तु पापकर्माणि कुर्वताम् ।
पापापनोदनं किंचिद्विष्णुसालोक्यदं नृणाम् ।। २ ।।
ऐश्वर्यारोग्यदीर्घायुर्धनधान्यादिवर्धनम् ।
अष्टोत्तरशतस्थानवैभवं परमात्मनः ।। ३ ।।

स प्रपञ्चयितुं लोके गतो बदरिकाश्रमम् ।
तत्रस्थैर्मुनिभिः सर्वैः पूजितः परमार्हणैः ।। ४ ।।
. . द दिव्यकल्याणगुणानुभवकाङ्क्षिभिः ।
पृष्टस्तत्र हरेर्गाथां गायन् वीणाकरो मुनिः ।। ५ ।।
. . . . किमिति ख्यातमितिहासं यथाश्रुतम् ।
सकाशाद् ब्रह्मणः पृष्ट्वा यथातत्त्वमवर्णयत् ।। ६ ।।
तच्छ्रुत्वा विस्मिताः सर्वे तद्दर्शनकुतूहलाः ।
तत्र तत्रावसन् सेव्यप्रहृष्टेनान्तरात्मना ।। ७ ।।
मानयन्तो मुनेर्भाग्यं तथा नि . . . . फलम् ।
इतः परं करस्थं नः कैवल्यमिति मेनिरे ।।
मुनिभिस्तैश्च सर्वत्र प्रपञ्चितमिदं ततः ।
वैभ . . सर्वदा ख्यातं सर्वमङ्गलकारकम् ।।

After the beginning and end there are lists of sacred places.

Colophon:

दिव्यदेशमाहात्म्यं संपूर्णम्

Scribe adds:

राघवय्यङ्कार् स्वहस्तलिखितम् । १०५६ माण्डु स्वभानुवर्ष अर्पिशि मासं ७ ति समाप्तम् । अप्पण्णय्यङ्कार् एडु पार्त्तु एळुतप्पट्टतु ।

चोले सद्वितयं चतुष्कदशकं पाण्डचे तथाष्टादश-
स्थानं केरलभूतले दशचतुःस्थानं हरेरुत्तमम् ।
द्वे काञ्च्यां दशयुग्ममेकमपि तत्सर्वोत्तरैकादश-
स्थानं यस्य हरेः स्मरेदनुदिनं तस्येष्टसिद्धिर्भवेत् ।।

1070

VB 349(a) देवीमाहात्म्यव्याख्या (गुप्तवती)

Beginning:

श्रीरामं प्रति पुष्कराभिधमहायक्षेण वेदत्रय-
व्याख्यानावसरे विशिष्य कथितं श्रीविष्णुधर्मोत्तरे ।
एतां धेनुमुपाह्वयेऽस्मि सुदुघामित्युद्गतं शंकरा-
चार्यं शिष्यचतुष्टयेन सहितं वन्दे गुरूणां गुरुम् ।।

विधिविष्णुमुखामरोदयस्थितिनाशेषु शिवोऽप्यनीश्वरः ।
जगदम्ब तव त्वयं क्रमः क्षणमुद्दालकपुष्पभञ्जिका ।।
कवचार्गले च कीलकमादौ मध्ये त्रयोदशाध्यायी ।
अन्ते प्राधानिकवैकृतिके मूर्तित्रयं रहस्यानाम् ।।
इति मार्कण्डेयपुराणाध्यायेषूनविंशतिषु गुप्तान् ।
अर्थान् प्रकटीकुरुते **भास्करराया**ग्निचित् कतिचित् ।।
सप्तशती लुप्तस्तुतिराप्तवती सत्यतीव तप्तवती ।
. . मती रचितवती गुप्तवतीं नाम बिभ्रतीं विवृतिम् ।।
काव्यव्याकृतितार्किकौपनिषदेष्वेकैकविद्भिः कृता-
ष्टीकाःसन्ति चतुर्विधा अपि चमत्कारावहास्तद्विदाम् ।
ताश्चण्डीजपहोमतर्पणमुखानुष्ठानमात्रोपयो-
ग्यर्थज्ञानमभीप्सतां न विदुषां चित्ते चमत्कुर्वते ।।
एतद्ग्रन्थरसास्वादसामर्थ्यं विदुषां यदि ।
किमिति प्रार्थनीयास्ते न चेत्प्रार्थनयापि किम् ।।
कैः पुष्पैरक्षतान् दत्वा भृङ्गा भुवि निमन्त्रिताः ।
केन वा चम्पकेनार्धचन्द्रं दत्वा निराकृताः ।।
यत्सप्तशत्यायुषि गुप्तवत्यामपेक्षणीयं तदवेक्षणीयम् ।
चण्डीसपर्याक्रमकल्पवल्यां यत्तत्र गुप्तं तदिहास्ति गुप्तम् ।।

End:

सैवेति चन्द्रहासं खड्गं सप्तमीमूर्तिमाह तेज इति । रहस्यत्रयस्यापि अध्ययनं सूक्तैर्व्याख्यातमिति । अवहितः अर्थावधानसहितः इति सर्वं शिवम् ।। इति मूर्तिरहस्य-व्याख्या ।।

चतुष्टये च टीकानां प्राचीनानां च तुष्टये ।
चमत्कृतिकरी भूयान्नवीनानां च मत्कृतिः ।।
साधु च्छायप्रमितप्रमोदवर्षे चिदम्बरे जनिता ।
साधु च्छायप्रमितप्रमोदवर्षं हृदम्बरे तनुतात् ।।
श्रीकाशीपुरवासिसोमपसुधीः गम्भीरराट् भारती-
पुत्रेणाग्निचिता मया विरचिता चण्डीस्तुतेष्टीकया ।
या नन्दादिषु सप्तमी भ्रमरिणी भीमातटे सन्निति-
क्षेत्रे नः कुलदेवता वसति सा श्रीचन्दला प्रीयताम् ।।
गुरुरेव शिवो **गुरु**मेव भजे **गुरु**णैव सहास्मि नमो **गुर**वे ।
न **गुरो**रधिकं शिशुरस्मि **गुरो**र्मतिरस्तु **गुरौ** जय नाथ **गुरो** ।।

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीण-सर्वतन्त्रस्वतन्त्रश्रीमद्गम्भीरराजभारती-दीक्षितात्मजभास्करराय**दीक्षित**महाग्निचिता रचिता **गुप्तवती** समाख्या सप्तशतीव्याख्या समाप्ता ।।

उवाच मन्त्रम् ५७ अर्ध ३८ श्लोक ५३७ त्रिपात् ६६ पुनरुक्तमन्त्रः २ आहृत्य सप्तशतीमन्त्राः ७०० श्लोकाः ५७८

1072

VB 1127(b) **पुरुषोत्तममाहात्म्यम्**

Beginning:

शौनक उवाच—

सूत सूत—

इतिहासपुराणानां वक्ता त्वदपरः कुतः ।
प्राप्ते कलियुगे घोरे घोरकर्मैकशालिनि ।।

Colophon:

इति श्री**पाद्मे** पुराणे पुरुषोत्तममाहात्म्ये ऋषिप्रश्नो नाम प्रथमोऽध्यायः

End:

यज्ञव्रततपोदानं सर्वं भवति चाक्षयम् ।
तत्र क्षेत्रे मुनिश्रेष्ठाः किं भूयः श्रोतुमिच्छथ ।।

1073

VB 292 **भूकैलासमाहात्म्यम्**

Beginning:

ओं नमोऽर्हंपदार्थाय सच्चिदानन्दरूपिणे ।
लीलाहितजगद्रूपशीलाय पुरशासिने ।।
नैमिशे ऋषयोऽरण्ये नानाशाखिसमन्विते ।
सदा सर्वर्तुसांनिध्यात् सर्वसंपत्सुशोभिते ।।
निवसन्ति महात्मानो नित्यं निर्मलवासिनः ।
संसारापारवाराशितरीभूतधियोज्ज्वलाः ।।

Colophon:

इति श्रीमद्**वि**ष्णुविष्णोत्तरपुराणे शिवक्षेत्रप्रशंसायां भूकैलासमाहात्म्ये प्रथमोऽध्यायः
इति श्रीमद्विष्णोत्तरपुराणे **भूकैलासमाहात्म्ये** एकोनविंशोऽध्यायः

End:

. . . . . .

इति विज्ञापयामास . पं किंचिदुदारधीः ।
कल्माषे. . . . . दृष्ट्या शुभाकृतिः ।।

कल्माषः—

शंभो लब्धमिदं रूपं . . . . मनुक्रमात् ।
विस्तृतं रूपमप्येतद् भवतोऽपि सुदुर्लभम् ।।
. . . . शिवालयौ भूकैलासात् परं .
. . . . . .

1075

VB 294 **यादवगिरिमाहात्म्यम्**

Beginning:

यस्यानुस्मरणेन सर्वजनता प्राप्नोति वाक्पाटवं
यत्पादाम्बुजदर्शनात् स्फुरति सच्छास्त्रार्थसिद्धान्तता ।
यच्चेतो निजमन्दिरं रघुपतेर्यच्छ्रोत्रवक्त्रं हरे-
र्गानानां च निकेतनं पदयुगं तस्याश्रये सद्गुरोः ।।

श्रीसूतः—

श्रीपुण्यारण्यशरणाः पुण्यशीला महाबुधाः ।
वैभवं क्षेत्रतीर्थानां वर्णितं पापनाशनम् ।।

End:

शृण्वन् पठन् लिखन् बिभ्रत् क्षेत्रमाहात्म्यमुत्तमम् ।
मुक्त्वा शुभाशुभे याति तद्विष्णोः परमं पदम् ।।

Colophon:

इति **मात्स्ये** पुराणे क्षेत्रखण्डे **यादवगिरिमाहात्म्ये** द्वादशोऽध्यायः

1076

VB 420(e) **विष्णुमाहात्म्यम्**

Beginning:

यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ।।

धर्मोऽभिवर्धति युधिष्ठिरकीर्तनेन
पापं प्रणश्यति वृकोदरकीर्तनेन ।
शत्रुर्विनश्यति धनंजयकीर्तनेन
माद्रीसुतौ कथयतां न भवन्ति रोगाः ।। १ ।।
हृदयकमलमध्ये दीपवद्वेदसारं
प्रणवमयमतर्क्यं योगिहृद्ध्यानगम्यम् ।
हरिगुरुशिवयोगं सर्वभूतस्थमेकं
सकृदपि मनसा मां ध्यायते यः स मुक्तः ।। २ ।।

धर्म उवाच —

ये मानवा विगतरागपरावरज्ञा
नारायणं सुरगुरुं सततं स्मरन्ति ।
ध्यानेन तेन हतकिल्बिषचेतनास्ते
मातुः पयोधररसं न पुनः पिबन्ति ।। ३ ।।

इन्द्रः—

नारायणो नाम नरो नराणां
प्रसह्य चोरः कथितः पृथिव्याम् ।
अनेकजन्मार्जितपापसंचयं
हरत्यशेषं स्मृतिमात्रमेव ।। ४ ।।

युधिष्ठिरः—

मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं कृष्णं वन्दे सर्वलोकैकनाथम् ।।

End:

मार्कण्डेयः—

सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया ।
यन्मुहूर्तं क्षणं वापि वासुदेवं न चिन्तयेत् ।। ९० ।।
मत्कर्म कुर्वतां पुंसां कर्मलोपो भवेद्यदि ।
तेषां कर्माणि कुर्वन्ति तिस्रः कोट्यो महर्षयः ।। ९१ ।।

बलभद्रः—

ये पापिनोऽपि शिशुपालसुयोधनाद्या
वैरानुबद्धमतयः परुषं वदन्तः ।
. . . . . .

1078

VB 296 शिवभक्तमाहात्म्यम्

Beginning:

आदिमध्यविहीनं हि शैवं तत्त्वं परात्परम् ।
सर्वाधारं निराधारं विक्रियारहितं सदा ।।
सदानन्दघनाम्भोधिं त्रिपुरारिं महेश्वरम् ।
पार्वतीरमणं वन्दे सततं सकलार्थदम् ।।
सूतं सर्वज्ञमतुलं सर्वसिद्धान्तपारगम् ।
व्यासशिष्यं महाप्राज्ञं पुराणार्थविशारदम् ।।
नत्वा हर्षेण संयुक्ताः पप्रच्छुरमितौजसः ।

End:

शाकसूपफलापूपमोदकान् चोष्यलेह्यकान् ।
मुद्गान्नं सर्षपान्नं च शाल्यन्नं च पृथक् पृथक् ।।
पात्रे तु वा समापूर्य परितो चारयन् द्विजः ।
तेषां हस्ते ददत् प्राह गृहमद्य नयन्त्विति ।।

Colophon:

इति श्रीभविष्योत्तरपुराणे **शिवभक्तमाहात्म्ये** त्रिसप्ततितमोऽध्यायः

1085

VB 300 हरतीर्थमाहात्म्यम्

Contents:

तीर्थमाहात्म्यम्, शिवलिङ्गप्रादुर्भावना, बृहन्नायिकाकल्याणम्, सुब्रह्मण्यपूजाविधानम्, ब्रह्मपूजाविधानम्, देवेन्द्रस्य मुनिशापविमोचनम्, लक्ष्म्याराधनम्, चन्द्रपूजाविधानम्, शेषपूजाविधानम् ।

Beginning:

ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानामनाधारमविक्रियम् ।।
अनन्तानन्दबोधाम्बुनिधिमद्भुतविग्रहम् ।
\+ + + +
तस्मिन् पुराणे संवादे ब्रह्मनारदयोः परम् ।
श्रीमतो **हरतीर्थस्य माहात्म्यं** पुण्यगौरवम् ।।

उक्तं त्वया पुनर्ब्रूहि श्रोतुकामा वयं हि तत् ।
वक्तुमर्हस्यशेषं नो हरतीर्थस्य वैभवम् ।।

Colophon:

इति **ब्रह्माण्डपुराणे** ब्रह्मनारदसंवादे **श्रीहरतीर्थेश्वरमाहात्म्ये** प्रथमोऽध्यायः

End:

इति शंभोर्वचः श्रुत्वा कारयामास सत्वरम् ।
प्राकारमण्डपादीनि गोपुराणि प्रयत्नतः ।।

1092

VB 192 **कावषेयगीता (सव्याख्या)**

Beginning:

यदानन्दसत्यार्थबोधात्मसारं यदज्ञानमेवाखिलानर्थमूलम् ।
यदेवाहमस्तीति साक्षात्कृतं तद्विमुक्त्यै तदस्माकमत्राविरस्तु ।।
यत्सर्ववेदान्तरहस्यसारं दुर्वाससे कावषेयैस्तु गीतम् ।
ग्रामे पुराणे तदनुप्रविश्य व्याख्यायते प्रीतये नन्दसूनोः ।।

End:

विमलमजरमाद्यमप्रमेयं गगनमयमाकाशकल्पं पुरुषं वृणीष्व आत्मत्वेन परिगृहाण । गच्छ । वक्तव्यार्थसमाप्तेः तव तद्बोधान्तरायो न भवेदिति ।।

Colophon:

इति ब्राह्मे महापुराणे सनत्कुमारव्याससंवादे कावषेयगीतासूपनिषत्सु तृतीयोऽध्यायः

Scribe adds:

माधवाचार्ययतिना व्याख्यातं प्रीतये इह . . भवेत् ।
कावषेयगीता माधवाचार्ययतिविरचितसव्याख्या . . . ।।

1094

VB 1014(b) **गुरुगीता**

कैलासशिखरे रम्ये भक्तानुग्रहतत्परा ।
प्रणम्य पार्वती भक्त्या शंकरं परिपृच्छति ।।

श्रीदेव्युवाच—

ओं नमो देवदेवेश परात्पर जगद्गुरो ।
सदाशिव महादेव गुरुदीक्षां प्रदेहि मे ।।

केन मार्गेण भो स्वामिन् देही ब्रह्ममयो भवेत् ।
तत्कृपां कुरु मे स्वामिन् नमामि चरणौ तव ।।

ईश्वर उवाच—

मम रूपासि देवि त्वं त्वद्भक्तचर्थं वदाम्यहम् ।
लोकोपकारकं प्रश्नं न केनापि कृतं पुरा ।।

End:

दुःस्वप्ननाशनं चैव सुस्वप्नमुपजायते ।
सर्वशान्तिकरं नित्यं सर्वोपद्रवनाशनम् ।। ६८ ।।
पठनात् सर्वसिद्धिः स्यात् सर्वज्ञत्वादिसिद्धिदम् ।
महायोगीश्वरो भूत्वा मुक्तिं पञ्चविधां लभेत् ।। ६९ ।।
सदाशिवो भवत्येवं सत्यं सत्यं न संशयः ।
न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम् ।
शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः ।।

Colophon:

इति गुरुगीता समाप्ता

1111

VB 199 **भगवद्गीतालघुव्याख्या**

Beginning:

पार्थाय प्रतिपादितां भगवता+भवद्वेषिणीम् ।।
महेशं दक्षिणामूर्तिं मन्दहाससमन्वितम् ।
अच्छेन्दुशेखरं पूर्णं वन्दे गौरीशमच्युतम् ।।
नारयणः परोऽव्यक्तादण्डमव्यक्तसंभवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ।।

प्रज्ञाचक्षुर्हि धृतराष्ट्रः चक्षुरिन्द्रियरहितत्वेन बाह्यार्थान् प्रत्यक्षेण ज्ञातुमशक्तः सन् स्वस्य हितोपदेष्टारं समीपवर्तिनं संजयं प्रत्युवाच—

धर्मक्षेत्रे कुरुक्षेत्रे + संजय ।।

Colophon: at the end of 1st chapter:

इति श्रीमत्परहंसपरिव्राजकाचार्य-श्रीगोविन्दभगवत्पूज्यपादशिष्य-शंकरभगवत्पादाख्यगुरु-चरणारविन्दभृङ्गायमाणशिष्यविरचित-भगवद्गीताव्याख्याने प्रथमोऽध्यायः ।।

End:

अर्जुनो यत्र यस्मिन्पक्षे वर्तते तत्र तस्मिन् पाण्डवानां पक्षे श्रीः राज्यलक्ष्मीः विजयश्च परेभ्यः उत्कृष्टत्वेन भूतिः सकलसंपद्विस्तारः नीतिः न्यायश्च ध्रुवा अव्यभिचारिणी इति मे मतिः निश्चयः ।।

Colophon:

परमहंसपरिव्राजकाचार्य-श्रीरामचन्द्रेन्द्रसरस्वतीपूज्यपादशिष्य-श्रीरामानन्दतीर्थविरचता **भगवद्गीतालघुव्याख्या** समाप्ता

1114

VB 198(a) **भगवद्गीताव्याख्या (पदयोजना)**

Beginning:

श्रीरामादिदशावतारसमये रक्षोवधं कुर्वता
कृष्णे जन्मनि राजगोपललनासक्तेन यल्लम्पटम् ।
तन्मोक्तुं हरिरेव जीवकलया सानन्दमाविर्बभौ
ब्रह्मनान्दसरस्वतीति यतिराट् श्रीलाद्रिसिंहासने ।।

\+ + + + +

तेष्वेकमाह विजयः सप्तविंशतिमच्युतः ।
श्लोका अष्टादशाध्याये द्विहीनाशीतिरत्र तु ।।
संजयः पञ्च पार्थो द्वावेकसप्ततिमच्युतः ।।

श्रीधृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे + + संजय ।।

Colophon: (at the end of first chapter):

इति श्रीमत्परमहंसपरिव्राजकाचार्य-ब्रह्मानन्दसरस्वतीशिष्य-श्रीरामचन्द्रसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायाम् अर्जुनविषादयोगो नाम प्रथमोऽध्यायः ।।

End:

यत्र योगेश्वरः कृष्णो+मतिर्मम ।।

यत्र यस्मिन् पक्षे । योगेश्वरः योगमायेश्वरः श्रीकृष्णः । यत्र यस्मिन् पक्षे । धनुर्धरो गाण्डीवधन्वा पार्थः । यत्र यस्मिन् पाण्डवानां पक्षे । श्रीः राज्यलक्ष्मीः ध्रुवा स्थिरा तत्रैव विजयो ध्रुवः तत्रैव भूतिः श्रियो विशेषविस्तारः ध्रुवा । तत्रैव नीतिः नयः ध्रुवा । इति मम मे मतिः निश्चयः ।।

Colophon:

इति श्रीमत्परमहंस + + + पदयोजनासमाख्यायां सकलशास्त्रपरमार्थतत्त्वनिर्णय-मोक्षयोगो नामाष्टदशोऽध्यायः

1126

VB 259(e) **सूतगीतासारः**

Beginning:

वीरासने समासीनं विद्युत्पिङ्गजटाधरम् ।
कराङ्कुरितचिन्मुद्रं कंचिद् देशिकमाश्रये ।।
विद्यामरन्दनिष्यन्दनन्दच्छिष्यमधुव्रतम् ।
श्रीमत्परशिवेन्द्रश्रीपादपद्ममुपास्महे ।।
नत्वा व्यासमुनिं सूतसंहितायां परात्मनोः ।
ऐक्यप्रकाशकः सारसंग्रहः क्रियते मया ।।

End:

ज्ञानलाभाय वेदोक्तप्रकारेण समाहितः ।
महाकारुणिकं साक्षाद् गुरुमेव समाश्रयेत् ।।
वक्तव्यं सकलं प्रोक्तं मयातिश्रद्धया सह ।
अतः परं तु वक्तव्यं न पश्यामि मुनीश्वराः ।।
चिन्मुद्रितकरकमलं चिन्तितभक्तप्रदं विमलम् ।
गुरुवरमाद्यं कंचन निरवधिकानन्दनिर्भरं वन्दे ।।

Colophon:

सूतगीतासारः समाप्तः

Scribe adds:

मुहुर्तमपि यस्तिष्ठेन्नासाग्रे न्यस्तलोचनः ।
सर्वं तरति पाप्मानं तदा कल्पशतोद्भवम् ।।

1132

VB 1029 **अमरुशतकव्याख्या (शृङ्गारदीपिका)**

Beginning:

ताम्बूलं मालतीमाला बालाहेलावलोकितम् ।
त्रिलोचनमनाराध्य त्रितयं नोपलभ्यते ।।
अन्योन्यमेलनवशात् प्रथमं प्रवृद्धं
मध्ये मनाग्व्यवहितं च कुतोऽपि हेतोः ।

प्राप्तं दशामथ मनोरथलाभयोग्यां
प्रायाच्चिरं रतिमनोभवयोः सुखं वः ।।
आसीच्चतुर्थान्वयचक्रवर्ती **वेमक्षितीशो** जगतोऽब्जखण्डः ।
एकादशेति प्रतिभाति शङ्का येनावतारः प्रथमस्य पुंसः ।।
अमरुककविना रचितां शृङ्गाररसात्मिकां शतश्लोकीम् ।
श्रुत्वा विकसितचेतास्तदभिप्रायं प्रकाशतां नेतुम् ।।
मूलश्लोकान् समाहृत्य प्रक्षिप्तान् परिहृत्य च ।
विवृणे विदुषामिष्टां टीकां **शृङ्गारदीपिकाम्** ।।

End:

सालक्तकेन नवपल्लवकोमलेन
पादेन नूपुरवता मदलालसेन ।
यस्ताड्यते दयितया प्रणयापराधात्
सोऽङ्गीकृतो भगवता मकरध्वजेन ।।

इति । स्पष्टोऽर्थः । दयितया पादेन ताडितोऽपि भगवता मकरध्वजेनाङ्गीकृत इत्यनेन विविधैरुपचारैरुपलालितः किमुतेत्ययमर्थः सूचितः । एतावता कामपुरुषार्थस्योपादेयत्वमुक्तम् ।।

Colophon:

इति श्रीवीरनारायणसकलविद्याविशारद-पेद्दकोमटिवेमभूपालविरचिता शृङ्गारदीपिका अमरुशतकस्य व्याख्या समाप्ता

Additional verses at the end:—

उज्जिघ्रन् हृदयाम्बुजस्य यमिनामुच्चैर्विषस्योत्पिबन्
उत्पश्यन्नितिलेन मोहजलधेरुज्जृम्भितस्योद्यमान् ।
उग्रं पश्य मुदे जयं शमयतः शित्पावकस्योद्यमान्
उद्बद्धोरुजटाभरानुपनिषत्प्राणानुपासीत माम् ।।
कमले वसति शशाङ्को मुक्ताहारं च वमति मीनयुगम् ।
कम्पितसुमेरुशृङ्गं चम्पकभवचण्डमारुतश्चित्रम् ।।
समावृत्य गुरोर्यें तु संप्राप्य च गृहाश्रमम् ।
मुनिव्रतान्याचरन्ति स्नातकास्ते प्रकीर्तिताः ।।

Scribe adds:

भ्रूमध्यकल्पितनवोल्लसदिन्दुरेखां
राकानिशाकरमुखीं रमणीयवेणीम् ।
संचारिणीमिव तडिल्लतिकामिवैका-
मालोक्य वैष्णववधूमहमाकुलोऽस्मि ।।

1135

VB 521 **कविराक्षसीयव्याख्या**

Contents:

सुजनपद्धतिः, कुजनपद्धतिः, सुब्राह्मणपद्धतिः, पतिव्रतापद्धतिः ।।

Beginning:

शिष्यचेतोऽम्बुजरवौ करुणामृतवारिधौ ।
मानसं रमतां नित्यं केशवे मम देशिके ।।
वन्दारुगीर्वाणकिरीटकोटिरत्नस्फुरत्पादसरोजयुग्मम् ।
रामार्धवामं भुजगेन्द्रभूषं तद्वस्तु वन्दे शशिखण्डचूडम् ।।
सरस्वतीमूर्तिविजृम्भणाय सरस्वतीं तां शरणं भजामः ।
यस्याः कटाक्षक्षणवीक्षणेन भवन्ति मूका अपि वावदूकाः ।।
वंशे भरद्वाजमुनेः प्रसूतः सदेवणाराध्यमनीषिवर्यः ।
यस्माद्विजज्ञे जलधेरिवेन्दुर्विशुद्धधीर्नागणनामधेयः ।।
न विद्यते यद् गणनाय तस्य देवद्विजात्यर्थबहुव्ययेषु ।
प्रजास्ततः सार्थकनामधेयं **तन्नागणा**ख्यं सुधियो वदन्ति ।।
अपूर्वमेतद्विदुषा न केन व्याख्यायि काव्यं **कविराक्षसीयम्** ।
तस्माच्छिशूनां सुखबुद्धये तद्व्याकर्तुमाकाङ्क्षति संविविच्य ।।

इह खलु कविः काव्यादावालंकारिकोक्तेषु प्रबन्धमुखलक्षणेष्वाशीर्नमस्क्रियावस्तुनिर्देशेष्वन्यतमस्य विधेयत्वात् प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रयोजनाय च सकलदेवतात्मकं भगवन्तं कृष्णं कीर्तयन् पद्याशिषं प्रयुङ्क्ते—त्रयीति ।

त्रयीयुवतिसीमन्तसीमासिन्दूरबन्धुराः ।
संसाराब्धिं तरेयुर्वः कंसारेः पादपांसवः ।।

End:

अत एव सर्वस्यां दैवक्रियायां देवताकर्मणि यज्ञादौ अनर्हा अयोग्या भवति । दक्षिणा दिगिव सापि पितृपतिना धर्मराजेन अभिगुप्ता रक्षिता तत्पतित्वात् तस्येति भावः । धर्मराजः पितृपतिरित्यमरः । लङ्कायाः रावणनगर्याः पन्थाः लङ्कापथः तेन संगिनी संबन्धवती लङ्का खलु दक्षिणस्यां दिशि तिष्ठति । यद्वा । कापथेन वैतरण्यादिकुत्सितमार्गेण सङ्गिनी । किंच सर्वस्यां दैवक्रियायां यज्ञादौ कर्मण्यनर्हा, पित्र्ये कर्मण्येव दक्षिणस्या दिशः प्राशस्त्यादिति भावः । साप्येवंविधा भवति ।

Colophon:

इति **कविराक्षसीयव्याख्याने** पतिव्रतापद्धतिः परिसमाप्ता

1138

VB 509(a) **किरातार्जुनीयव्याख्या**

Beginning:

श्रीवत्सवक्षसं श्रीशं प्रणम्यार्जुनसारथिम् ।
व्याख्या किरातकाव्यस्य यथावत् क्रियते मया ।।
शब्दार्थविषया दोषा भवेयुर्मतिविभ्रमात् ।
तं सन्तः क्षन्तुमर्हन्ति कस्य नास्ति हि विभ्रमः ।।
पूर्वमेव कृता चास्य व्याक्रिया डा(सा)पसूनुना ।
ततोऽप्यर्थं समादाय क्रियतेऽत्रार्थनिश्चयः ।।

श्रियः कुरूणामित्यादि । सर्वेषामेव कवीनां काव्यकरणे प्रवृत्तानाम् आशीर्नमस्क्रियावस्तुनिर्देशानामन्यतमपूर्विका शब्दप्रवृत्तिर्दृष्टा । तद्यथा अव्यात् स वो यस्येति **भट्टनारायणस्य** ।

End:

असितं कृष्णमधरवासो बिभ्रतः बलदेवस्य लक्ष्मीं सस्मार । लक्ष्मीमिति अधीगर्थे षष्ठी न कृता, यतोऽत्र कर्मविशेषः तथा न विवक्षितः । इदं मालिनीवृत्तम् । तल्लक्षणं तूक्तं **केदारेण**— ननमयययुतेयं मालिनी भोगिलोकैः इति । अस्य वृत्तस्य नगणद्वयं एको मगणः यगणः द्विः ।।

Colophon:

इति किरातव्याख्यायां चतुर्थः सर्गः

1140

VB 323(x) **कुरङ्गीपञ्चकम्**

Full Text of the poem

अयि कुरङ्गि तपोवनविभ्रमादुपगतासि किरातपुरीमिमाम् ।
नहि शृणोषि विदारय मारय ग्रस पिबेति शुकादपि जल्पितम् ।। १ ।।
अग्रे व्याधः करधृतधनुः पार्श्वयोर्जालमाला
पृष्ठे वह्निर्दहति च वनं संनिधौ सारमेयौ ।
एणी गर्भादलसगमना शाबकैर्लग्नपादा
चिन्ताविष्टा प्रलपति भृशं किं करोमि क्व यामि ।। २ ।।
आदाय मांसमखिलं स्तनवर्जितं मे
मां मुञ्च वागुरिक यामि कुरु प्रसादम् ।

अद्यापि घासकबलग्रहणानभिज्ञा
मन्मार्गवीक्षणपराः शिशवो मदीयाः ।। ३ ।।
मध्ये ज्या त्रुटिता शरासनमहो भग्नं दवाग्ने रयाद्
निर्याताः शशकाः शुनानुगमिताः पाशाश्च दण्डाश्च ते ।
शान्तो वह्निरकालमेघसलिलैरेणी कुटुम्बावृता
या च श्रीशकृपा हि यत्र जननी सान्यत्र मन्यात्कथम् ।। ४ ।।
कान्तं प्राह कपोलिकाकुलतया नाथान्तकालोऽधुना
व्याधो यो धृतचापसंयुतशरः श्येनोपरि भ्राम्यति ।
इत्थं सत्यहिना स दष्ट इषुणा श्येनोऽपि तेनाहतः
तूर्णं तौ तु यमालयं प्रति गतौ दैवी विचित्रा गतिः ।। ५ ।।

1150

VB 1033(b) कृष्णविलासव्याख्या (विलासिनी)

Beginning:

. . . . . .

कस्मिन्निति । जगतां त्राणं रक्षणं . . . विनोदः क्रीडा । स . . . . . प्यस्मिन् नारायणे समस्तजीवानामवलम्बभूते । गोकुलस्य गोप्तरि रक्षितरि सति तत्र गोकुले क्वचित्प्रदेशे मानुषो मनुष्यादुद्भूतः, इदं चोपलक्षणम् । मृगपक्षिसर्पादिभ्यश्चोद्भूतःकोऽप्युपसर्ग आपन्नाविर्भावः अनुबभूव दैविको देवात् संभूतश्चोपसर्गेणाविरासीत् । अनेनापि प्रदेशे नृपादधर्मानुष्ठायिनो राज्ञः सकाशाद् भयं नाविरासीत् . . . . .

छत्रं गोवर्धनशिखरिमयं पातु स श्रीधरो वः ।।

अथ गोवर्धनोद्धरणप्रकरणं प्रपञ्चयितुमुपक्रममाण आह—एकदेति ।

. . . . . .

Fol. 24:

एकं ब्रह्म द्विरदवरदस्त्रीणि बिभ्रज्जगन्ति
स्वैरक्रीडाविधिषु चतुरः पञ्चबाणाधिकश्रीः ।
षड्भिर्जुष्टः सततमृतुभिः सप्तसप्तिप्रतापः
साष्टाङ्गं नः प्रणमनमिदं संप्रगृह्णातु कृष्णः ।।

अचलेति ।

Fol. 35:

कुब्जामृज्वीं कुरु कुवलयापीडपीडाविधानं
क्रीडालोलं प्रणिजहि रणे मल्लसेनाभटानाम् ।

कंसध्वंसं वितनु पितरौ बन्धनान्मोचयेति
श्रेयः कुर्वन्नखिलजगतां पातु पीताम्बरो वः ।।

अथ मधुरावृत्तान्तं प्रस्तुवन्नाह—मधुरायामिति ।

. . . . . .

इति **रामपाणिवाद**विरचितायां कृष्णविलासव्याख्यायां विलासिन्याख्यायामेकादशः सर्गः ।।

अपारिजातं सुरराजमन्दिरं
विधाय भौमस्य वधेन यः पुनः ।
सपारिजातं विदधे स्वमन्दिरं
स सत्यभामापतिरस्तु वः श्रिये ।।

अथ समनुष्ठितसमस्तसुरकार्यस्य भगवतो मधुसूदनस्य स्वपुराभिगमनं प्रस्तुवन्नाह—निशीथिनीमिति ।

End:

कोङ्कणभूमिभागान् कोङ्कणाभिधानान् भूप्रदेशान् । . . . . . इत्येतावदेव महाकाव्यस्यास्य प्रवृत्तिरिति संपूर्णं मङ्गलम् ।।

श्रीमत्कृष्णविलासनाम सुकुमाराख्येन यन्निर्मितं
काव्यं भव्यवचोऽमृतेन कविना सर्वप्रियं भावुकम् ।
व्याख्या तस्य **विलासिनी**ति रचिता रामेण दिङ्मात्रकं
श्रीनारायणभट्टपादगुरुपादानां प्रसादोदयात् ।।

Colophon:

इति विलासिनीनामव्याख्या संपूर्णा

1151

VB 395(b) **केरदशकम्**

नादेयं दधदम्बु निस्तुलसुधारुच्यन्तरङ्गं सदा
रामालंकृतिभागसंनुतमहीप्रत्यग्रहारोज्ज्वलम् ।
भक्तेडचं भुवनाभिनन्दितहरिद्राजश्रिया मेदुरं
सर्वांशादृतसुप्रतीकमहितं केरं किमीशानति ।। १ ।।
उच्चस्थानगमप्यतीव जडहृत्कामात्स्वनेत्रोदितं
पातित्यं दधता धृतात्मविफलीभावं कुसंगादलम् ।
पाकारातिगुरुत्वतः सुमनसामीडचं पवित्रं सदा
गोत्रोच्छ्रायविवर्धनोद्धतमिदं केरं बिडौजायते ।। २ ।।

राराजेन्दुजनीसमञ्जिततमश्रीहारिजाग्रच्छिलं
किं चामा . . नियसप्रभुमुखाल्लब्धुं पुनर्जीवनम् ।
साकूतं सुमनःपुरस्त . तया मान्यं स्फयप्रापकं
केरं पावकतीरसद्विजमुखैः संसेव्यामानं मुदा ।। ३ ।।

4th pāda of śloka-s 4-8:

कीनाशोपमिति. . कलयते केरं गुणैरीदृशैः ।। ४ ।।
प्रायः केरमिदं सखे हि निर्ऋतेः सारूप्यमालम्बते ।। ५ ।।
केरं तन्निजपाशयन्त्रितजगद्धत्ते श्रियं वारुणीम् ।। ६ ।।
अन्तश्चारि तु पीडहारि किमिदं केरं समीरायते ।। ७ ।।
स्वर्णश्रीनिधितुन्दिलोदरमिदं केरं कुबेरायते ।। ८ ।।
दानोदञ्चितपुष्करं रुचिकरं बिभ्रत् सदामोदकं
सर्वाद्यं भुवनोदयस्थितिलयाधारं सुपीनोदरम् ।
स्निग्धोद्वृत्तमहागजं स्फुटतयापर्णाभिनन्द्योदयं
यत्सारूप्यमुपैति केरमपि वः स श्रीगणेशोऽवतु ।। ९ ।।
श्रीमद्राजसभाञ्चितं जनिमतां सद्यस्तनोल्लासितं
सोमश्रीकरवर्धितात्मकमिरासौभाग्यसंसूचकम् ।
तोतुष्यद्द्विजराजहंसममृतप्रायात्मभूनारदं
केरं किं सरसीरुहासनतुलारङ्गे नरीनर्त्यते ।। १० ।।

1154

VB 547(a) गीतगोविन्दव्याख्या (श्रुतिरञ्जनी)

Beginning:

पद्मापयोधरतटी + श्रियं वः ।।

पद्माया लक्ष्मीदेव्याः पयोधरतटी कुचतटी तत्परिसरप्रदेशः । स्तनमण्डलमिति यावत् । तस्य परिरम्भः आलिङ्गनं तेन लग्नमासक्तम्, यत् काश्मीरं कुङ्कुमं तेन मुद्रितं चिह्नितम् अलंकृतमिति यावत् । अत एव व्यक्तः बहिरवभासमानः अनुरागः हृदयान्तरितलक्ष्मीविषयानुरागो व्यक्तरागो यस्य तमिव स्थितमिति शेषः ।

Colophon:

इति श्रीमदखिलविद्यापारावारदक्षिणामूर्तिमहादेवप्रसादलब्धविद्यापूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकुरु-**कोण्डभट्टो**पाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्तामणिना **लक्ष्मणसूरिणा** विरचितायां गीतगोविन्दव्याख्यायां **श्रुतिरञ्जनी**समाख्यायां प्रथमः सर्गः

End:

प्रसरति शशिधरबिम्बे विहितविलम्बे च माधवे विधुरा ।
विरचितविविधविलापं सा परितापं चकारोच्चैः ।।
कथितसमयेऽपि हरिरहह न ययौ वनम् ।
मम विफलमिदममलरूपमपि नवयौवनम् ।।

1161

VB 745(4) **द्वात्रिंशत्पुत्तलिकासंग्रहः**

Beginning:

शिवेन भोजस्य सभान्तराले पाञ्चालिकोक्तक्रमतः शिवायै ।
कथा विचित्राः कथिता विचित्रैर्वृत्तैरहं संग्रहतो वदामि ।। १ ।।

इति कथावतारिकायां प्रथमालापिनिका ।

विस्तृत्येष्टमनाशमर्थितवतें रिक्तद्विजायार्थिनें
प्रीताम्भोज्जयिनीस्थितः फलमदादत्येव नित्यार्थदम् ।
आयुः क्षीणधने वृथेति सवधूकौ प्रीणयन्यत्पुरी-
नाथं भर्तृहरिं फलेन विमृशन् सोऽनङ्गसेनां प्रियाम् ।। २ ।।

End:

स्यान्मन्त्रसिद्धचा भुवि नित्यजीवी योगीति राज्ञे कथयन् ददौ सा ।
स्पृष्ट्वा मनुं तं वनगः स चाब्दं जुहाव दूर्वादिभिरस्य सिद्धचै ।। ७७ ।।
लब्धं दिव्यं फलमथ नृपः पौरुषाद्वह्निकुण्डात्
प्रादुर्भूतान्यसहि पथि महारोगिणे याचते च ।
भैषज्यं तत्फलमतिशयं चिन्तयन् ब्राह्मणाय
प्रीत्या दत्त्वा पुरमगमदित्याह पाञ्चालिकान्या ।।

Colophon:

इत्येकादशी ।।

1164

VB 1194(a) **नलोदयः (सव्याख्यः)**

Beginning:

स्थाने शक्त उपस्थितः सुचरितो देशान्तरे केसरी
राजास्थानतटे स्वयं फणिपतिः काव्ये च नव्यः कविः ।

श्रीहर्षः प्रतिवादिदर्पदलने कान्त्या स्वयं मन्मथो
यस्तं संप्रति चिन्तयामि हृदये श्रीकेशवं देशिकम् ।।
मूर्ध्नाभिवन्द्य पवनात्मजमात्मवाल-
क्षिप्तानलक्षपितराक्षसराजगेहम् ।
दुर्बोधभेदयमकस्य नलोदयस्य
व्याख्यां यथाबलमविस्तरतोऽभिधास्ये ।।

हृदयसदय—

हृदयेत्यादि । हे हृदय एवंभूताद्यादवतः सदा मा गाः नित्यं यादवमेव चिन्तयेत्यर्थः ।

End:

अयं नलः महामहां महान् प्रभूतः महः उत्सवः यस्यां ताम् । संपदम् अहास्त अगमत् । ओ हाङ गतौ । महोत्सवपूर्णां परां च संपदं प्राप्तवानिति यावत् ।।

Colophon:

इति श्रीनलोदयव्याख्याने चतुर्थाश्वासः

Scribe adds:

सदा पाटितपाथोजनखदारितदानवम् ।
नारसिंहाभिधं ज्योतिर्नमामि कुलदैवतम् ।।

1165

VB 528 **नलोदयव्याख्या**

Beginning:

. . . . . .

पुण्डरीके सुखासीनां वन्दे देवीं सरस्वतीम् ।।

कालिदासेनोक्तस्य महाकाव्यस्य यमक . . .

हृदय, सदा, यादवतः, पापाटव्याः, दुरासदायाः दवतः, हरिसमुदायात्, अवतः, त्रिजगत् मा गाः, स्मरेण, दयावतः, इति पदच्छेदः । संबन्धस्तु दुरासदायाः पापाटव्याः दवतः अरिसमुदायात् त्रिजगद् अवतः स्मरेण दयावतः देवात् हृदय सदा मा गाः । पदार्थस्तु—दुरासदायाः दुर्गतेरित्यर्थः ।

End:

आयतायता अत्यन्तमायता अतिविशालेति यावत् । पूः नगरी स्वपत्तनमित्यर्थः । नैषधेन नलेन चिरा . . . कालं परःसहस्रं आयता प्राप्ता । ... च सदा सर्वदा उन्महा उद्भूतराजतेजाः सोऽयं नलः महामहां महान् महः उत्सवो यस्या तां संपदं संपत्तिं अहास्त प्राप्त इति ।।

Colophon:

इति नलोदयव्याक्रियायां चतुर्थोच्छ्वासः । इति नलोदयव्याख्यानं समाप्तम्

Scribe adds:

करकृत+सन्तः ।। श्रीनृसिंहाय नमः ।
भो भो रामानुजार्य प्रकटितमहो साधु साधु प्रहर्षं
प्रख्याते यादवाद्रौ करतलकमलं दर्शयन् यो विमर्शम् ।
पायाच्च . . . निर्वापणमहास्थापनाद्वल्लभाभ्या-
मास्ते संपत्कुमारः करनख . . र्णद्योतना . . . पिताशः ।।

1166

VB 851(a) **नलोदयव्याख्या**

Beginning:

हे हृदय दुरासदायाः दुष्प्रधर्षायाः पापाटव्याः पापमेवाटवी तस्याः दवतः वनवह्नेः । अरिसमुदायतः शत्रुसमूहात् त्रिजगत् त्रिलोकीम् अवतः ।

End:

प्रवेकः प्रवरश्रेष्ठ इति हलायुधः । सुराणां प्रवेकः इन्द्रः तस्मिन्निति उक्तप्रकारं सरवे सशब्दे सति उक्तवति सति अविवेकेहास्तः । ईहा चेष्टा विवेकेन ईहा विवेकेहा तन्न भवति इत्यविवेकेहा तया अस्तः त्यक्तः । अविवेकचेष्टारहित इत्यर्थः । स नलः के शिरसि हस्तमुकुलं न्यस्य हस्तद्वयविरचितं मुकुलं शिरसि निधाय शिरस्यञ्जलिं कृत्वा अहास्त गतवान् । ओ हाङ् गतौ । किं च —तत्र तस्मिन् पार्थिवे नले तां दमयन्तीं श्रयति ।

1184

VB 1056(b) **बालरामायणम् (आन्ध्रटीकासहितम्)**

Beginning:

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ।।

कविताशाखां कविता कवित्वमनेडे शाखां कामनु आरुह्य य . . . .इट्टवंटि अक्षरं अक्षरालुकलगनट्टगानु रामरामेति रामा अनिकूजन्तं पलिगिन.

सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ।
बभौ रामः संप्रहृष्टः पूजितः सर्वदैवतैः ।।

ततः अयुतवांतनु अग्निवदनात् अग्निपक्षे श्वनियोक्कवचनात् वाक्यं वल्लनु विगतकल्मषाः विगतपोनइटुवंटि कल्मषं पापं कलिगिनइटुवंटि, सीता सीतादेविन ज्ञात्वा तेऽधि . . महात्मनः महानुभावुडैइटुवंटि, राघवस्य रामभद्रस्वामियोक्क तेन आर्षवाक्यं चातनु महता महतैनटुवंटि कर्मणा अग्निप्रवेशकर्म चातनु. . . .

1190

VB 1048 **भारतकथाप्रबन्धः**

The work extends up to the end of the Bhārata war and ends with a song in praise of Kṛṣṇa.

Beginning: (folio 3)

. . . . . .
. . . . . .
. . . . . सवासं विभो
लीलामानुषवेषमेष कलये त्वामेव लक्ष्मीपते ।।
वाणीं गौरीं गणेशं निखिलगुरुवरान् देवताः शास्त्रमुख्याः
कानीनादीन् मुनीन्द्रानखिलनिगमपारेचरानेव भक्तया ।
गोविन्दैर्गोपवृन्दैर्व्रजभुवि विलसन्तं च कान्तं मुकुन्दं
वन्दे वृन्दारकाणामपि बत निकुरुम्बैरलं स्तूयमानम् ।।
विद्यासारात्मनोऽलं मम परमगुरोः **कृष्णनाम्नः** कटाक्षाद्
इत्थं **श्रीदत्तनारायण**धरणिपतेराज्ञया प्राज्यकीर्तेः ।
मोदात्तस्यानुजन्मा प्रथयति च कथां भारताख्यां च किंचित्
तस्मादत्यन्तमत्र प्रमुदितहृदयाः सन्तु सन्तो महान्तः ।।
श्री . सोमान्ववाये विलयमुपगते मातृवाचा मुनीन्द्रो
वेदव्यासोऽम्बिकायां सुतमथ धृतराष्ट्राख्यमुत्पाद्य . . ।
. . . . . .
भूयोऽप्यम्बालिकायामजनयदखिलानन्ददं नन्दनं तम् ।।

(fol. 23):

इत्थं वैचित्रवीर्यस्य विदित्वा हृदयं हरिः ।
द्वारकां प्रययौ वेगाद् बलदेवेन संयुतः ।।

इति गुरुदक्षिणा समाप्ता ।

(fol. 24):

द्रौपदीस्वयंवरः—

विख्यातामेकचक्रां . . . . . मोदं
संश्रुत्य . . द्विजवरनिल . . . . . ।
भूदेवं शोकहेतुं . . . . . .
. . . . . वकचरितमसौ सर्वमस्यै शशंस ।।
तच्छ्रुत्वा साभ्यभाणीत् सदयममलधीरत्र तत्तापशान्त्यै
. . . . . .

(fol. 37):

तद्वार्ताश्रवणात् सुयोधनमुखादभ्यागतान् संयुगे
जित्वा ते महिताः क्षणेन विजयश्रीसंयुताः पाण्डवाः ।
पाञ्चालीवदनेन्दुबिम्बविलसत्सानन्दसंदोहनै-
र्मुग्धैर्हार्दयुतैरपाङ्गनिकरैस्तुष्टाश्च तत्रावसन् ।।

इति द्रौपदीस्वयंवरं समाप्तम्

(fol. 38):

सुभद्राहरणम्—

भास्वत्पिञ्छनिकाशकेशनिकरं कालाम्बुदश्यामलं
राजत्कुण्डलमण्डिताननसरोजोल्लासि मन्दस्मितम् ।
श्रीमत्कौस्तुभरत्नदीपितगलं कारुण्यपूर्णाशयं
चित्ते मे लसताद्धरेर्वपुरिदं त्रैलोक्यसंमोहनम् ।।

शंकराभरणरागम् । एकतालम् ।

हरिणा हलिना बलिना करुणा-निधिना नितरां जगतामवता ।
अवलोकयितुं बत पाण्डुसुतान् द्रुपदावसथं गतमाशु मुदा ।।

(fol. 58):

इत्थं वाचा मुरारेः प्रशमितरभसे कामपाले तदानीं
प्रीत्या पार्थः स कान्तो द्रुततरमितवान् भूपतेस्तस्य पार्श्वम् ।
भूयस्तौ कृष्णरामौ सह यदुभिरुपेत्यालयं पौरवाणां
मोदाविष्टान्तरङ्गौ ददतुरतिगुरुस्त्रीधनं पाण्डवाय ।।

सुभद्राहरणं समाप्तम्

(fol. 59)

राजसूयम्—

याते यादवनायके हलधरे साकं बलैर्द्वारिकां
कृष्णो वृष्णिकुलेश्वरो मुदितधीस्तत्रैव काश्चित्समाः ।
कौन्तेयैश्च सभाजितः पुरवरं विश्वैकरम्यं सुखे-
नाध्यास्ते स्म मुदं सदापि कलयंस्तेषां विनोदैरलम् ।।

(fol. 77):

कारुण्याद्विश्वमूर्तेर्भवति मखवरे विश्वरम्ये समाप्ते
वित्तासारे . . रेर्जयजयवचनोद्घोषिताशेषलोके ।
कृत्वासौ दक्षिणां च क्षितिभृदवभृथं चापि वृष्णीन्द्रमुख्यै-
रिन्द्रप्रस्थे सुहृद्भिः सह विपुलसुखं सानुजः स न्यवात्सीत् ।।

इति राजसूयं समाप्तम्

(fol. 78):

कल्याणसौगन्धिकम्—

निर्वृत्ते राजसूये मयरचितस . . . . . धार्तराष्ट्रो
. . . . . भ्रमविवशतयासावसूयाकुलात्मा ।
अद्वारेण प्रविष्टः स्फटिकघटित . . लस्खलन्नाप मोहं
दृष्ट्वैतद्वायुसूनुर्द्रुपदनृपसुता चाहसद्वीतशङ्कम् ।।

End:

उक्त्वैवं जीवितेशः सुतमथ परिरभ्यारणीं तां द्विजाते-
स्तस्मै मोदाद्वितीर्य प्रमुदितमनसे तत्र तूर्णं तिरोऽभूत् ।
सोदर्यैः प्राप्तजीवैः सममुटजमवाप्यारणे . . भाण्डं
धात्रीदेवाय दत्त्वा स खलु नरपतिस्तद्वनान्ते न्यवात्सीत् ।।

Colophon:

इति कल्याणसौगन्धिकं समाप्तम्

After the Colophon:—

कौन्तेया द्वादशाब्दानधिवनमुषिताः पञ्च पाञ्चालपुत्र्या
संचिन्त्याज्ञातचर्यां चरितुमथ जवाद् द्वारकां भूसुरौघान् ।
प्रस्थाप्यारण्यदेशान् निभृततरमुपप्लाव्यमेत्यायुधानां
विन्यासं तत्र चक्रुः पितृगहनशमीकोटरे ते निशीथे ।।

\+ + + +

जगदीश विभो मुरहर जय जय ।। ७ ।।
मुखजितपङ्कज . . . . . .
. . . . लोचन मुरहर जय जय । (भुव) ।। ८ ।।
. . . . वलिनुतं सत्यसूद . . .
हिंसितदितिसुत मुरहर जय जय ।
कुण्डलमण्डितगण्डतलामित . . .
सुन्दरकुन्तल मुरहर जय जय ।। (भुव) ।। ९ ।।

1200

VB 542(b) युधिष्ठिरविजयव्याख्या (बालव्युत्पत्तिकारिणी)

Beginning:

उपादेयत्वं रामायणादावनेकान्तिकत्वात् । तस्यापि पक्षे समत्वशङ्कायाम् एकैकाक्षरोच्चारणेऽपि फलविशेषवचनविरोधः । नापि दृष्टप्रयोजनाभावात् । **काव्यप्रकाशे** दृष्टप्रयोजनानां बहूनामुपदिष्टत्वात् ।

' काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ।। '

इति । नाप्यदृष्टप्रयोजनाभावात् । स्वर्गापवर्गलक्षणस्यादृष्टप्रयोजनस्य शिष्टैरनुशिष्टैरनुशिष्टत्वात् ।

End:

. . . . . श्लोकानष्टमाश्वासभाषितान् ।
यथामति व्याकृतवान् **शोक्कनाथः** सुधीमणिः ।।

संभवपर्वणि सप्तषष्टितमे—

पाण्डवानामथा. .स्त्वं शृणु कौरवनन्दन ।
जगाम हस्तिनपुरं षोडशाब्दो युधिष्ठिरः ।।
पञ्चदशाब्दो भीमस्तु चतुर्दशाब्दो धनंजयः ।
चतुर्दशाब्दौ च यमौ जग्मतुर्नागसाह्वयम् ।।
तत्र त्रयोदशाब्दानि धार्तराष्ट्रैः सहोषिताः ।
षट् च मासाञ् जतुगृहान्मुक्ता जातो घटोत्कचः ।।
षण्मासान् . . . . वर्षं पाञ्चालके गृहे ।
धार्तराष्ट्रैः सहोषित्वा पञ्चवर्षाणि भारत ।।
इन्द्रप्रस्थे च संतस्थे त्रीणि वर्षाणि विंशतिः ।
द्वादशाब्दानथैकं च बभ्रमुर्द्यूतनिर्जिताः ।।

भुक्त्वा षट्त्रिंशतं राज्यं सागरान्तां वसुंधराम् ।
मासैः षड्भिर्महात्मानः सर्वे कृष्णपरायणाः ।।
राज्ये परीक्षितं स्थाप्य इष्टां गतिमवाप्नुवन् ।
एवं युधिष्ठिरस्यापि-आयुरष्टोत्तरं शतम् ।।
अर्जुनात्केशवो ज्येष्ठस्त्रिभिर्मासैर्महाभुजः ।
कृष्णात्संकर्षणो ज्येष्ठस्त्रिभिर्मासैर्महाबलः ।।

Colophon:

इति **भा**रद्वाजकुलतिलक-श्री**सुदर्शनभट्ट**ात्मजेन **आच्चियम्बा**गर्भसंभवेन मन्वादिस्मृति-मर्मज्ञरामचन्द्रभट्टानुजेन हस्तिगिरिभट्टशिष्येण शात्तूरग्रामवासिना **शोक्कनाथेन** विरचिता **बालव्युत्पत्तिकाख्ययुधिष्ठिरविजय**व्याख्या समाप्ता ।।

अष्टाश्वासीनिर्गदितान् सप्तत्रिंश [समन्वितान्] ।
व्याख्याने नवशतश्लोकान् शोक्कनाथो यथामति ।।

After the Colophon:

विक्रमाब्दे नभोमासि रेवतीसोमवासरे ।
कृष्णपक्षतृतीयायां व्याख्यैषा पूर्तिमेयुषी ।।

Remark on the fly-leaf—

युधिष्ठिरविजयः । तद्व्याख्या । किरातार्जुनीयव्याख्या च । एतत्त्रयं शोलपुरीकृष्णदीक्षित-स्नुषया भवानीसंगमक्षेत्रवास्तव्याय रामनाम्ने मह्यं धातुवत्सरतुलामासे शिवप्रीत्यै दत्तम् । एतस्मिन्नर्थे साक्षिणः धर्मुदीक्षिताः ।।

1211

VB 543 **रुक्मिणीशविजयः**

Beginning:

श्रीवेदान्तमहाचलं हि परितः संयोज्य सूत्राहिपं
सद्वातागमपोषितात्महृदयं तत्पूर्वपक्षासुरैः ।
सिद्धान्तोक्तिसुरेश्वरैश्च मथितो यः कृष्णदुग्धाम्बुधिः
स्वीयानाममृतं प्रयच्छति स मां पायाद् गुणोद्यन्मणिः ।।
. . . . . .
हयास्यनासापुटजातवातविघातधूताघपलालजातः ।
मुनीशवागीशसुतः सुरम्यां हरेः कथां शंसति **वादिराजः** ।।
अपण्डितेनापि मयार्जितेयं मुकुन्दमूला कविकण्ठमाला ।
अकौशलेन ग्रथितेति जातिप्रसूनमालां किमु संत्यजन्ति ।।

End:

कृष्णः काव्यकृते स्वहस्तकमलच्छत्रं प्रदद्यात्प्रभुः
सच्छास्त्राभिधरम्यराज्यपदवीं सुज्ञानयानं मुदा ।
स्वाध्याराधनकङ्कणं करयुगे कैङ्कर्यहारं गतः
स्वात्मानं हृदि नित्यचिन्तनधनं सद्युक्तिरत्नान्यपि ।।
हंसानां हृदयङ्गमं कविलसद्भृङ्गादृतं मौक्तिक-
प्रख्याग्र्योक्तिनवं प्रबन्धजलजं पादेऽर्पितं स्याद्धरेः ।
लक्ष्मीरम्यकरे वरामरततेः सन्मानसे शारदा-
नन्दं तत्पवनः सुहृत्कृतगुणं विस्तारयत्वञ्जसा ।।
रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसंदायिनि ।
संजाते भुवि **रुक्मिणीशविजये** सद्वादिराजोदिते
संजातः सुरमण्डलीषु सुतरामेकोनविंशो मुदा ।।

Colophon:

इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचिते **रुक्मिणीश**विजये एकोनविंशः सर्गः

Scribe adds:

संसारदूरं निगमैकसारं गोपीषु मारं सुरवैरिमारम् ।
भूभारहारं स्फुरतारहारं वन्दे किशोरं नवनीतचोरम् ।।

1212

VB 1007(a) **व्याकरणोदाहरणकाव्यम्**

This is a Kāvya on Rāmā's story and instancing the grammatical rules. There is also a short commentary along with it.

Beginning:

दिशि दिशि हठाद्रश्मीनेष प्रसारयति स्फुटं
शशकमुरसा धत्ते दुःखं . . . मयोगिनाम् ।
व्यथयतितरां श्येनंपातमतः कुरुते शशी-
त्यमुमभिमुखो रोद्धुं वार्धिर्व्यवर्धत किं तदा ।।

End:

आत्मनेपदेष्विति न कित्त्वम् । झलादित्वस्य तत्र लिङसिज्विशेषणत्वात् । . . . . . होबाडव्यम् । तस्य कुठार इव कुठारः । नियतलिङ्गत्वात् पुंस्त्वम् । आशरस्य स्त्री . . . . . क्षिप्नोमि हन्मि ।।

क्षोदीयसामेकधुरीण . . . . . क्षणात् ।
क्षेपिष्टमद्य क्षिपता न इष्यते बाणं मया त्वं हि ममानुकूलिकः ।।

. . . . . क्षुद्रशब्दात् ईयसुनि स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रणां यणादिपरं . . . . . पूर्वस्य च गुणः । इष्टादिषु क्षिप्रक्षुद्रयो रेफाकारयोर्लोपे इकारे . . . . . एकां धुरं वहतीति एकधुरीणम् अधिपतिमित्यर्थः । एकधुराल्लुक् च इति . . . . . रुद्रैः । कुत्सितं रक्षो रक्षस्कम् । कुत्सितेति कन् । अनुकूलो वर्तसे आनुकू . . . . . इत्यतः वर्तत इत्यनुवृत्तौ तत्प्रत्यनुपूर्वमीपलोमकूलम् ठक् । . . . . . प्रेङ्खोलिकाखेलनमञ्चति स्म सः । यावत्करोक्तवदमुष्यसायकः चुच्योतरक्षो . . . . . बहुलमेतन्निदर्शनमिति । अत्र प्रेङ्खोलधातुरुक्तः । प्रेङ्खोलिका डोला चुच्योत . . . . . .

1215

VB 320(c) शब्दोदाहरणकाव्यम् (सव्याख्यानम्)

Beginning:

शिवं दिशति मर्त्यानामन्यदेव दयालवात् ।
दुर्वाक्यानां दयाम्बोधिं दीनस्तं शिवमाश्रये ।।
यन्नामग्रहमात्रेण प्रौढभूभृत्समेतरः ।
मूढोऽपि प्रौढिमभ्येति तान् गुरून् समुपास्महे ।।
श्रीरामस्वामिमखिनामादिरात्मभवः कृतिम् ।
कुरुते कौतुकादत्र चतुष्टय्यर्थबोधिकाम् ।।
शब्दोदाहृत्याख्यमात्मीयकाव्यं व्याचक्षाणेनैव तन्त्रान्तरस्थाः ।
सिद्धान्तिक्योऽप्युक्तयः प्रस्फुटार्थाः करिष्यन्ते कौतुकात् काश्चिदत्र ।।
ग्रन्थानपि स्फुटं कांश्चित् सिद्धान्तानुपपादयन् ।
शब्दोदाहरणं काव्यं व्याख्यास्ये स्वेन निर्मितम् ।।
प्रायो व्युत्पादयिष्यन्ते प्रसिद्धेषु पदेष्विह ।।
नारायणाब्जभवहैमवतीशरूपं
श्रेयस्करं प्रणमतां धृतचन्द्रमस्कम् ।
साधूपलब्धमनिदंप्रथमोक्तिलक्ष्यं
ब्रह्माविरस्तु मम हृद्यमितप्रभावम् ।। १ ।।

नारायणः विष्णुः । स च अब्जात् पद्मात् भवः उत्पत्तिःयस्य सः अब्जभवः ब्रह्मा । स च अवर्ज्यो जन्माद्युत्तरपदो व्यधिकरणबहूव्रीहिरिति वामनः । सच्छास्त्रजन्मा हि विवेकलाभः इत्यादौ तथा दर्शनात् । हिमवतोऽपत्यं स्त्री हैमवती, पार्वती, तस्या ईशः शिवः स च ते रूपाणि विग्रहाः यस्य तादृशम् ।

End:

यो ब्रह्मविष्णुरुद्राणां भेदमुक्तमभावतः ।
साधयेदुदरव्याधियुक्तो भवति मानवः ।। इति ।

1229

VB 512(b) **शिशुपालवधव्याख्या (सारसंग्रहः)**

Beginning:

यियक्षमाणेनेति । अथ मुनिवचनान्तरं मुरद्विषः मुरारिः । अभिचैद्यं प्रतिष्ठासुः, चैद्यं प्रति युद्धाय प्रस्थातुमिच्छुः । तदा तस्मिन् काले । यियक्षुणा यष्टुमिच्छता । पार्थेन युधिष्ठिरेण । आहूतः पार्थाह्वानात् तमपि प्रतिजिगमिषुरिति लभ्यते । तस्मात् कार्यद्वयाकुल आसीत् । किमिदं करोमीति संशेते स्म इत्यर्थः ।

End:

तथा उच्चकैर्महार्थामौद्धवीमुद्धवसंबन्धिनीमेनां वाचं शुश्रुवान् भगवानुदस्थात् इन्द्रप्रस्थ-गमनार्थमुदचलदिति नरकरिपुरिति । चारान्तरं शुश्रुवानिति ' भाषायां सदवसश्रुवः ' इति क्वसुः । वृत्तं मालिनी । वसुमुनिविरतिश्चेन्मालिनी नौमयौयः इति ।।

Colophon:

श्रीमत्कृष्णद्वैपायनभट्टसूनुना **देवराजार्येण** विरचिते **सारसंग्रहाख्ये माघव्याख्याने** द्वितीयः सर्गः

1232

VB 1070(e) **समस्यापूर्तिश्लोकाः**

Beginning:

भक्तिर्हरेरङ्घ्रियुगे नरस्य सुबुद्धियुक्तस्य हि दोषचिन्ता ।
निवृत्तिधर्मैकरतिः प्रवृत्तिरायाति नायाति न याति याति ।।
कारुण्यलक्ष्मीर्लसिताङ्गनानां संभोगलीनस्य नरस्य यूनः ।
आर्तिःसुखव्याधिरुपायचिन्ता ह्यायाति नायाति न याति याति ।।

\+ + + + +

बिम्बोष्ठपीयूषरसान्मृगाक्ष्याः पुंसो दृढालिङ्गनपूर्वकं हि ।
सुखव्यथाप्रीतिरहोऽन्यचिन्ता ह्यायाति नायाति न याति याति ।।

End:

माता रामो मत्पिता रामभद्रो भ्राता रामो मत्सखा राघवेशः ।
सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं देवं नैव जाने न जाने ।।

माता कृष्णो मत्पिता यादवेन्द्रो भ्राता शौरिर्मत्सखा वृष्णिवर्यः ।
सर्वस्वं मे गोपपालो दयालुर्नान्यं देवं नैव जाने न जाने ।।

1236

VB 502 **कादम्बरीव्याख्या**

Beginning:

पूर्वकादम्बरीव्याख्या ।

आसीदित्यादि । अस्य शूद्रको नामेत्यनेन संबन्धः । इदमादिकुलकम् । आदिदीपकं च । अशेषनरपतिशिरःसमभ्यर्चितशासन इति । अः उपेन्द्रमूर्तिः विष्णुः । शेषोऽनन्तः । नरः अर्जुनः । पतिः कार्तिकेयः । एतैः शिरःसमभ्यर्चितशासनः । अन्यत्राखिलमहीपतिभिः समभ्यर्चितशासनः ।

End:

हेमकूटनिवसनतत्परेण हृदयेन जन्मान्तरसहस्रपत्रं जन्मान्तरसहस्रं दासोऽहमिति लिखितं पत्रं दोर्भ्यां लिखितमिति दास्यपत्रं कृतमित्यर्थः । दत्तमित्यादि । अन्यहृदयस्यावधिः गुल्मकेनेव राज्यान्तरयोः सीमा अवधिर्मर्यादा तत्र स्थापितो गुल्मकः आटविकपतिरित्यर्थः । तेनैव देवीप्रसादेन गन्तुं तेन विना न शक्यते गन्तुमिति । मा चैवमवस्था । अवबुध्यसे अश्वसैन्येति . . . .

1263

VB 1180 **मुत्तुस्वाम्यार्यप्रशंसा**

Beginning:

श्रुतिशतवेद्यं हृद्यं श्रितजनकल्पं सिताब्जतलतल्पम् ।
शशधरबिम्बसुसदनं सरसिजवदनं भजामि गजवदनम् ।।
वन्दे मुकुन्दं वसुधातलेन्दुं गोपीवधूटीकुलनन्दकन्दम् ।
वृन्दावनान्ते पशुपङ्क्तमन्तं मन्दं चरन्तं मृदु चारयन्तम् ।।

End:

देवराट् सदसि पाठकैः स्तुतो नारदेन जयति प्रमोदितः ।
इतीदमस्तु कवेर्वाक्यम् ।।

मुत्तुस्वामिमहीसुरः प्रतिदिनं धर्मैर्जनान् रक्षतु
प्रीत्याढ्या पृथिवी भवत्वखिलभूदेवाश्च सत्कर्मिणः ।
राजन्त्वल्पपदार्थगोचरधिया श्रीवत्सरामेण वै
ग्रन्थे दोषकलङ्कितेऽत्र महिते क्षाम्यन्तु सन्तो बुधाः ।।

1270

VB 563 **शंकरविजयः**

Beginning:

विघ्नेशं माधवं ढुण्ढि दण्डपाणिं च भैरवम् ।
वन्दे कालीं गुहं गङ्गां भवानीं मणिकर्णिकाम् ।।
नमामि शंकराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूढोऽपि सर्वज्ञोऽहं सदास्म्यहम् ।।

ओम् अनन्ता**नन्दगिरि**रहमप्रतिहतशिष्यः । + + +

End:

जयति सकललोकैः सेव्यमानो गुरुर्मे
विदितसकलवेदः **शंकराचार्यनामा** ।
यदमितखिलकर्माण्यन्तरायाणि हत्वा
दिशतु परमतत्त्वं भोगमोक्षः स एव ।।
यश्चतुःसप्ततितमैः प्रकरणैः परिशोभितम् ।
गुरुदिग्विजयं नाम शास्त्रं जयतु भूतले ।।

Colophon:

इत्यानन्दगिरिकृतौ सच्चिदानन्दैक्यं नाम चतुःसप्ततिप्रकरणम्
श्रीशंकराचार्यगुरोरिमं स्तवं समस्तपापौघविदारहेतुकम् ।
पुमान् प्रयत्नेन पठत्यतन्द्रितः स याति शीघ्रं गुरुधाम मुक्तिदम् ।।

1271

VB 529 **सभारञ्जनप्रबन्धः (राजशेखरचरितम्)**

Beginning:

श्रेयांसि मम भूयांसि दत्तां किमपि दैवतम् ।
भूषणं भीषणं यस्य मदनः सदनं रुषाम् ।।
नवीनकालिदासस्य शिष्यो भूष्यतमः सताम् ।
काव्यामृतरसाभिज्ञो नाम्ना **रसिकशेखरः** ।।
सुबुद्धिनाम्ने मित्राय पात्राय विविधाः कथाः ।
कथयामास यास्तासां संग्रहोऽद्य विधीयते ।।
कविकुञ्जरनाम्नो मे प्रबन्धो रसबन्धुरः ।
सभारञ्जननामायं जयतु क्लेशभञ्जनः ।।

प्राक्तनान्येव सूक्तानि ग्रथितान्यत्र यद्यपि ।
रत्नसंग्राहकस्येव तथापि स्याद्यशो मम ।।

अस्ति खलु प्रशस्तमतिरभिनवकालिदासस्य सुकवेरन्तेवासी चिरतरतदीयसहवाससमुपचितरसिकोत्सेकः श्रीमान् रसिकशेखरः । तस्य खलु बालमित्रं सुबुद्धिर्नामान्वर्थनामा कदाचित् सुभाषितशुश्रूषया स्वमित्ररसिकशेखरमिदमवादीत्—

सुभाषितसुधास्वादसादरोऽस्मि चिरादहम् ।
परिपूरय कामं मे सखे रसिकशेखर ।।

तदेतद्वयस्यवचनमाकर्ण्य रसिकशेखरः प्रत्यवादीत्—सखे सुबुद्धे यदि ते सुभाषितशुश्रूषा तर्हि

राजशेखरभूपस्य सभायां मधुरा गिरः ।
नवीनकालिदासादिगदिताः श्रोतुमर्हसि ।।

इदमाकर्ण्य सुबुद्धिरिदमवादीत्—

राजशेखरनामा यः सार्वभौमः प्रभूत्तमः ।
निरूपय स्वरूपं मे तस्य विस्तरतः सखे ।।

रसिकशेखरः—

आस्ते **पिनाकिनी**तीरे **विद्यानगर**नामकम् ।
दशयोजनविस्तारं महानगरमुज्ज्वलम् ।।
तत्रास्ति परमोदारः प्रजा धर्मेण पालयन् ।
राजशेखरभूपालः समस्तजगतीपतिः ।।
आकरः सर्वविद्यानामाश्रयः स च धीमताम् ।
भूभृत्तनुभवा तस्य भवानी नाम भामिनी ।।
तस्य सेनापतिर्वीरो वीरभद्र इति श्रुतः ।
वैभवं तस्य नृपतेरवाङ्मनसगोचरम् ।।
युवापि जगदीशोऽपि कामं स जितवान् प्रभुः ।
पुराण्यरिक्षितीन्द्राणां जिगाय सकलान्यपि ।।
तस्य कारुण्यदाक्षिण्यशौर्यौदार्यादयो गुणाः ।
अद्भुतं तस्य माहात्म्यं कथं वर्ण्येत मादृशा ।।
नवीनकालिदासार्यः श्रीमान् शृङ्गारशेखरः ।
मन्दारो ललितालापः श्रीकामः कमलाकरः ।।
गुणाकरो राजहंसः श्रीधरः कविशेखरः ।
एते दश कवीशानाः सभायां तस्य विश्रुताः ।।
बहवोऽन्येऽपि तैः सार्धं राजा कालं नयत्यसौ ।

सुबुद्धिः—

नवीनकालिदासार्यः श्रूयते विद्यते च यः ।
सखे महानुभावस्य स्वरूपं तस्य वर्णय ।।

रसिकशेखरः—

वेल्लालकुलसंभूतः कवितासुकृतार्जितः ।
नवीनकालिदासार्यः सर्वविद्याविशारदः ।।
राजशेखरभूपालकृपाविश्रान्तिपादपः ।
अक्कय्यविदुषो लब्धविद्यो विद्योततेतराम् ।।

End:

श्रेयःसाधनता कथंचन यतः तर्कस्य कस्मादसौ
श्रेष्ठश्चेद्भवतोऽपि तर्कपठनात् . . . . . ।
कर्तव्याः कृतयः कुतोऽपि नयनात्तस्माद्विना मण्डनं
नैतत्कोऽपि तमन्तरेण घटते सर्वोत्तरस्तेन सः ।।

तदनु जैमिनीयस्तदेव समर्थयितुमिदमवादीत्—महाराज युक्तमेव ।

1272

VB 586 **स्यानन्दूरपुरवर्णनप्रबन्धः ।**

Beginning:

लक्ष्मीं दद्यादजस्रं जलनिधितनयादृक्चकोरप्रसन्न-
ज्योत्स्नाभूताखिलोन्मादनचणविलसन्मन्दहासो नितान्तम् ।
वाणीं चात्मीयलोकोत्तरचरितसुधाकीर्तने तत्परां मे
श्रीमानाशीविषाधीश्वरकृतशयनः सत्त्वरं पद्मनाभः ।।
अस्तध्वस्तसुपर्वनाथनगरश्रीगर्वभारं परं
दुग्धाम्भोनिधिकन्यकानवरतक्रीडार्थसौधायितम् ।
स्यानन्दूरमिति श्रुतं त्रिभुवने पुण्यस्थलं निस्तुलं
यत्रास्ते जगदीश्वरः स भगवान् श्रीपद्मनाभो हरिः ।।

End:

नाभीजाताब्जसंस्थद्रुहिणमुखगणोद्गीतवेदश्रुतो वै
नित्यं संसक्तचित्तोऽप्यमरवरमुनिश्रेष्ठसंकीर्तनोऽपि ।
लक्ष्म्या साकं विहारे रहसि कृतिमिमां यद्यसौ पद्मनाभः
स्वामी कर्णे दधाति क्षणमपि कृतकृत्योऽस्मि तेनेहलोके ।।

Colophon:

इति **स्यानन्दूरपुरवर्णन**प्रबन्धे लक्षदीपश्लाघा नाम दशमस्तबकः

स्वातीजातेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मी-
राज्ञीपुत्रेण वञ्चीश्वरकुलजनुषा **रामवर्माभिधेन** ।
भक्त्युद्रेकेण शश्वद्गुरुवरकृपया निर्मितं **चम्पुकाव्यं**
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शं सदालं निदध्यात् ।।

1273

VB 1137 **त्रितन्त्री**

Beginning:

. . . . . सत्यलोकं विहाय किमर्थं मया भूलोकनिवासः ? ब्रह्मा—अस्य रत्नाकरस्य कुमारी सुकुमारी मां वरं वरयामास । तदा . . . . . अतस्तदर्थमत्र निवासः । नारदः —(स्वगतम्) एतदर्थं मया दम्भवेष उपात्तः । (प्रकाशम्) भक्तपराधीनस्य तव सदृशोऽयं व्यापारः । गच्छामि ।

. . . ससंमानमङ्गीकृतवान् । नारदो निर्यायैकत्र स्थित्वा व्यचिन्तयदिदम् । न हि चिरादमरासुराणां समरकथा । मध्यमलोकनिवासिनामवनीभुजामन्योन्यस्नेहानुबन्धाद् न काषि समरकथा । अतोऽहं बुभुक्षितः । क्षुच्च न निवारिता । अधुना भूलोकब्रह्मसत्यलोकब्रह्मणोः कलहमुत्पाद्यात्मतर्पणं करिष्यामि ।

Colophon: (fol. 74b)

इति श्रीवेंकटेश्वरवरप्रसादलब्धोभयविधकवितारसामोदशुकबहुपादकुलकलशजल-धीशपादशरण्यपावननन्दन**वेंकटाचार्य**विरचितायां **त्रितन्त्र्यां** श्रद्धातन्त्रोऽयं प्रथमः

End:

पत्राण्येवं छिन्नानीति दर्शयन् बहिर्निचिक्षेप । प्रातस्तदद्भुतकर्म समीक्ष्य सर्वे विस्मयमवापुः । **पूर्वमविश्वासिनामपि ब्रह्मेति** विश्वास एव जातः । रत्नाकरः संतुष्टः शात्रवं गजाश्वं पुपोष । तत एतदपदानमासेतुहिमाचलवासिनः श्रुत्वाद्भुतमेत्य भूलोक एव ब्रह्मदर्शनं भवतीति द्रष्टुमुत्साह-भरिता आगत्य. . . . . .

1279

VB 517(d) **राजनीतिः (नीतिसारः)**

Beginning:

अथ नीतिसारे राजनीतिश्च ।

राजा सहायसंयुक्तः प्रभूतं मार्गयन् धनम् ।
रम्यमातन्यमापन्नो मध्यदेशं समाश्रयेत् ।।

तत्र दुर्गं नृपः कुर्यात् . . . . ।
वनदुर्गं महीदुर्गं नरदुर्गं तथैव च ।।
. .दुर्गं चाम्बुदुर्गं च गिरिदुर्गं च भार्गव ।
सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ।।

End:

राज्यभङ्गं चोरपीडां नरकं प्राप्नुयान्नृपः ।
. . . . . .
राजधर्म इति ख्यातः समासात्ते नृपोत्तम ।।
सर्वैराद्यं प्रियं कार्यं यस्माद्देवसमोऽनघ ।
सर्वसंपत्करः प्रीतः कुपितः सर्वनाशकृत् ।।

Colophon:

इति राजनीतिः

1280

VB 314(y) **जाग्रतपञ्चकम्**

The following is the full text of the work except the last verse.

वेदान्तार्थविभासकाय गुरवे धन्याय संन्यासिने
नानावत्स्विदशेन्द्रसंघपतये योगीन्द्रवन्द्याय च ।
मोहध्वान्तदिवाकराय भगवत्पादाभिधां बिभ्रते
तस्मै भाष्यकृते नमोऽस्तु सततं पूर्णावबोधात्मने ।।
गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थं नोपलभ्यते ।।
चतुर्वेदधरो विप्रः सूक्ष्मब्रह्म न विन्दति ।
वेदभारपराक्रान्तः स वै ब्राह्मणगर्दभः ।।
पूर्णे मनसि संपूर्णं जगत्सर्वं सुधाद्रवैः ।
उपानद्गूढपादस्य खलु चर्मास्तृतेव भूः ।।
जन्म दुःखं जरा दुःखं जाया दुःखं पुनः पुनः ।
संसारसागरं दुःखं तस्माज्जाग्रत जाग्रत ।। १ ।।
माता नास्ति पिता नास्ति नास्ति बन्धुसहोदरः ।
अर्थो नास्ति गृहं नास्ति तस्माज्जाग्रत जाग्रत ।। २ ।।

आशया वर्धते लोकः कर्मणा बहुचिन्तया ।
आयुः क्षीणं न जानाति तस्माज्जाग्रत जाग्रत ।। ३ ।।
कामः क्रोधश्च लोभश्च देहे तिष्ठति तस्करः ।
ज्ञानरत्नापहारेण तस्माज्जाग्रत जाग्रत ।। ४ ।।

1282

VB 314(a-8) **वेदान्तसारश्लोकाः**

प्रमादादप्रमादाद्वा यदज्ञानान्मयेरितम् ।
तत्क्षाम्यन्तु समालोक्य पण्डिताः समदर्शिनः ।।
वित्तात् पुत्रः प्रियः पुत्रात् पिण्डः पिण्डात् तथेन्द्रियम् ।
इन्द्रियाच्च प्रियः प्राणः प्राणादात्मा परः प्रियः ।।
दिग्वातार्कप्रचेतोऽश्ववह्नीन्द्रोपेन्द्रमृत्युकाः ।
तथा चन्द्रश्चतुर्वक्त्रो रुद्रो क्षेत्रज्ञ ईश्वरः ।।
ज्ञानेन्द्रियाणि खलु पञ्च तथापराणि
कर्मेन्द्रियाणि मनआदिचतुष्टयं च ।
प्राणादिपञ्चकमथो वियदादि पञ्च
कामश्च कर्म च ततः पुनरष्टमाप्तः ।।

End:

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् ।
आत्मन्येव भवेद्यस्य सन्नेच्छन्नपि मुच्यते ।।
पूर्णे मनसि संपूर्णं जगत्सर्वं सुधाद्रवैः ।
उपानद्गूढपादस्य खलु चर्मास्तृतेव भूः ।।
दोषग्राही गुणत्यागी झल्लोल इव दुर्जनः ।
शूर्पवत् त्यज्यते दोषो गुणग्राहीति सज्जनः ।।

1283

VB 554 **सुभाषितकौस्तुभः**

Contents:

१. अविवेकपद्धतिः २. सज्जनपद्धतिः ३. दुर्जनपद्धतिः ४. वदान्यपद्धतिः ५. संकीर्णपद्धतिः

Beginning:

वन्दे वाञ्छितदायिवेङ्कटगिरेर्वेदस्य चोत्तंसकं
पुंसः कंसजितस्तदङ्घ्रिकमलं पूरेण यज्जन्मना ।
शंभुः शाश्वतशेखरो जलनिधिर्जाग्रद्द्वितीयाश्रमः
संजातः सगरान्वयोऽप्यमृतवान्नाको नदीमातृकः ।।
श्रीवेङ्कटार्यमखिना रघुनाथसूरेः
संप्राप्तजन्मयुगलेन यथामनीषम् ।
आतन्यते सुमनसामनसूयकानां
हर्षाय संप्रति **सुभाषितकौस्तुभोऽयम्** ।।
तत्तादृशपुरुषोत्तमहृदयङ्गममिममभङ्गगुणबद्धम् ।
सुधियः साधुसुभाषितकौस्तुभमनघं परीक्ष्य नन्दन्तु ।।
विदग्धव्याहारैर्न जडमतिरानन्दति मना-
गनालापज्ञानां न च वचनतः खेदमयते ।
न विन्दत्यानन्दं जरठवृषभश्चन्दनरसै-
रसौ पङ्कालेपैरपि खलु विषादं न जुषते ।।

Colophon:

इत्यालेयवेङ्कटाचार्ययज्वनः कृतिषु सुभाषितकौस्तुभे अविवेकपद्धतिराद्या

End:

भूयोभिर्बहुमानपूर्वमवनीपालेन विश्राणितै-
राहारैः परिपूरितोदर इभस्तृप्यत्यनाथा स्थितिः ।
अत्यल्पोदर एष पश्य मशको हा हन्त नक्तंदिवं
हेयाहारलवेच्छयाटति विशन्नष्टासु काष्ठास्वपि ।। २० ।।

Colophon:

इति सुभाषितकौस्तुभे संकीर्णपद्धतिः पञ्चमी

Scribe adds:

कीलकाब्दे तुलामासे शुक्लपक्षे तृतीयके ।
पूर्वोक्तपुस्तकं लेख्यं वेङ्कटाचार्यपाणिना ।।

1286

VB 555 **सुभाषितत्रिशती (सव्याख्या)**

Beginning:

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभश्रेयोदशाग्रे स्फुरन् ।

अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयन्
चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ।।

चूडेति । शिखा ज्वाला । दीप्यमानः दीपोऽपि चञ्चच्छिखाभासुरो भवति ।

Fol. 4:

इति विषयपरित्यागविडम्बनपद्धतिः ।।

End:

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । तद्वचनादाम्नायस्य प्रामाण्यं येन कर्मापि मुक्तावुपयुज्यत इत्युक्तम् । केचित्तु ज्ञानादेव कैवल्यमिति वदन्ति । अन्ये तु कर्मसमुच्चितज्ञानादेवेति । पुनरन्ये तु कर्मण एव मुक्तिरिति । तस्मात् तत्तन्मतानुसारेण तत्र तात्पर्येण धर्मादिः कार्य एवेति बहूनां पूर्विकाणामीश्वरतुल्यानां सतामभिप्राय इति वेदितव्यम् ।।

Colophon:

इत्यवधूतपद्धतिः पूर्णा

Scribe adds:

वर्षे हीश्वरनामके घृणिनिधौ काष्ठामुदीचीमिते
वीणामासितपर्वगे सुरवरे पक्षे वलक्षे तिथौ ।
दर्शात्पूर्वतने कृपीटजभे वारे दिवोकोगुरोः
पूर्णा **वेङ्कुबुधेन** नीतिशतकव्याख्या रसेनाधिका ।।
वैराग्यशतकं सटीकमधुना पूर्णं द्विजेनामुना ।।

1288

VB 323(z) **सुभाषितानि**

Beginning:

क्षोणी नाम त्रिकोणा वनगिरिनगरग्रामरुद्धं तदर्धं
तत्राप्यर्धं तरुण्यः पुनरपि शिशवश्चाथ वृद्धाश्च केचित् ।
त्याज्यास्तत्रापि केचित् श्वशुरगुरुजनाः सन्ति शेषाः कियन्तो
मिथ्यावादो ममायं दिशि दिशि मुखरः पुंश्चली पुंश्चलीति ।।
रुद्रपिण्डसमुद्भूतं जगदेतच्चराचरम् ।
पितरं यो न जानाति हन्त वेश्यासुतो यथा ।।
दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः ।
दारितदशमुखकीर्तिः पुरतो मे भातु हनुमतो मूर्तिः ।।

End:

शिवे भस्मनि रुद्राक्षे विद्वेषो यस्य जायते ।
उत्पत्तौ तस्य सांकर्यमनुमेयं विपश्चिता ।।
देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लङ्घित एव वानरभटैः किं त्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ।।
किमस्ति यमुनानद्यां किमाहुर्वारयोषितः ।
आन्ध्रगीर्वाणभाषाभ्यामेवमेकोत्तरं वद ।।

1289

VB 420(d) **सुभाषितानि**

Beginning:

सुभाषितश्लोकाः

साष्टाङ्गं प्रणमेच्छिवं गुरुजनानामङ्घ्रियुग्मं स्पृशेत्
तत्कल्पानभिवादयेच्च विदिताचारं त्रिवर्षाधिकम् ।
मूर्खाञ्छीलनिराकृतानपि वयोवृद्धान् जयेत्युच्चरन्
प्रीतश्चेदितरत्र साधु कुशलं पृच्छेच्च नामोच्चरन् ।।
आयुः श्रियं यशो दद्यात् पुंसो महितवन्दनम् ।
आयुः श्रियं यशो हन्ति पुंसो महदतिक्रमः ।। १ ।।
दूरस्थं जलमध्यस्थं धावन्तं धनगर्वितम् ।
रोगाक्रान्तं मदाक्रान्तं षड्विप्रान् नाभिवादयेत् ।। २ ।।

End:

अत्यासन्नतया नूनं स्वजनोऽपि न पूज्यते ।
शिरसा धारयन् गङ्गां भस्मना स्नाति शंकरः ।। १०३ ।।
शिरसा धार्यमाणोऽपि सोमः सोमेन शंभुना ।
तथापि कृशतां धत्ते नष्टः खलु पराश्रितः ।। १०४ ।।
तपसा जायते लक्ष्मीर्लक्ष्म्या संजायते मदः ।
मदेन जायते . . . . . ।। १०५ ।।

1290

VB 557 **सुभाषितानि**

Beginning:

इन्द्रं द्वयक्ष ममन्थ पूर्वमुदधिं पञ्चाननं पद्मजं
शुद्धं . . . . . ।

. . . . . .

जाने सर्वमहं विभो रघुपते दत्तापहारं विना ।।
रे रे. . . . परिगलितमृदुः क्वापि कोणे जनित्वा
प्राप्याभिख्यां कनकमिति पुरः काञ्चनं चेति लोके ।
मन्दं मन्दं पुरारेर्मणिमकुटतटीमेत्य लब्धावकाशो
नो जानीषे कुलेशं स्मरसि नच पुनः पूर्ववृत्तान्तलेशम् ।।
काकोलूककपोतिकाबकशुकीकोकादयः पक्षिणो
वापीकूपनदीतटाकसलिलैर्जीवन्ति पुष्टोदराः ।
श्रीमन् वारिद चातकाः करुणया त्वदुत्तपाथोलवै-
र्जीव्यन्ते यदि ते क्षणं विमुखता तेषां कथं जीवनम् ।। ३ ।।

End:

त्यागिनः पात्रापात्रविचारो न कर्तव्य इत्यत आह—

त्यागिनः किं विचारेण गुणवन्निर्गुणेष्वपि ।
न हि संहरति ज्योत्स्नां चन्द्रश्चण्डालवेश्मनि ।। ३६७ ।।
निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
समं वर्षति पर्जन्यः सस्येष्वपि तृणेष्वपि ।। ३६८ ।।
अदेयं नास्ति तल्लोके त्यागिनां भूमिवल्लभ ।
स्वदेहमपि तत्याज नाकानन्दः शिबिर्नृपः ।। ३६८ ।।

योषा शतापराधिन्यपि शिक्षयितुं न योग्येत्यत आह—

अशास्त्रीयमिदं लोके सद्भिश्चापि विगर्हितम् ।
सर्वदोषकरं वापि स . . . . . ।।

1291

VB 595(c) **सुभाषितानि**

Beginning:

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ।। १ ।।
पुरा सरसि मानसे विकचसारसालिस्खल-
त्परागसुरभीकृते पयसि यस्य यातं वयः ।

स पल्वलकुले ऽधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्तताम् ।। २ ।।
तृष्णालोलविलोचने कलयति प्राचीं चकोरीगणे
मौनं मुञ्चति किं च कैरवकुले कामे धनुर्धुन्वति ।
माने मानवतीजनस्य सपदि प्रस्थातुकामेऽधुना
धातः किं नु विधौ विधातुमुचितो धाराधराडम्बरः ।। ३ ।।

End:

सन्ना नाविकधोरणी निपतिता मध्येजलं क्षेपणी
पन्थाः पर्वतदुर्गमो घनघनच्छन्नश्च तारापथः ।
हंहो मारुत दुस्तरो जलनिधिः शीर्णा च नौः सांप्रतं
मध्ये मज्जय वा तटं गमय वा हस्ते तवास्ते द्वयम् ।। ११७ ।।
याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ।। ११८ ।।
उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति चोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ।। ११९ ।।

1292

VB 628(c) **सुभाषितानि**

Beginning:

त्रयीयुवतिसीमन्तसीमासिन्दूरबिन्दवः ।
संसाराब्धिं पिबेयुर्वः कंसारेः पदपांसवः ।। १ ।।
गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ।। २ ।।
मूढभावास्पदत्वेन यदनादेयवद्भवेत् ।
सारस्वतामृतं सर्वे कवयस्तं न जानते ।। ३ ।।
पश्यन्मध्यस्थया दृष्टचा कामं दृप्यन्तमप्यरिम् ।
अनङ्गीकृत्य यः शाम्येत् सत्यमीश्वर एव सः ।। ४ ।।

Folio 6a:

स्थितानतिप्रमाणत्वाच्छाखाभिर्व्याततान् द्विजाः ।
अवलम्ब्यागमान् कुर्युः कुलायसुखमात्मनः ।। ९२ ।।
भोगो यस्य सदा नेयः प्रियो यस्य सदा स्थितः ।
स सर्वमङ्गलोपेतोऽप्यवश्यं स्यादकिंचनः ।। ९३ ।।

. . . . . .

अभ्यासात् साध्यते विद्या कुलं वृत्तेन धार्यते ।
गुणैर्मित्राणि धार्यन्ते क्रोधः सत्येन धार्यते ।।
यस्तु क्रोधं समुत्पन्नं सर्पो जीर्णामिव त्वचम् ।
अक्रोधादुद्धरेद् धीरः स एव पुरुषोत्तमः ।।

End:

असंमानात्तपोवृद्धिः संमानाच्च तपःक्षयः ।
अर्चितः पूजितो विप्रो दुग्धा गौरिव गच्छति ।। १० ।।
परमाप्यायते सा गौस्तृणैरमृतसंभवैः ।
एवं जपैश्च होमैश्च पुनराप्यायते द्विजः ।। ११ ।।

1309

VB 598(a) **कन्दर्पदर्पणभाणः**

Beginning:

भद्रं प्रयच्छन्तु जगज्जनन्याः पयोधरस्था मृगनाभिरेखाः ।
पुष्यन्ति चेतोनिहितस्य शौरेर्बहिर्गता यास्तनुकान्तिभङ्गीम् ।।

अपि च—

सुरतनटनलीलातालनादायमानं
रतिविरतिधियोद्यत्कामहुंकारभूतम् ।
अपहसितकपोतीकूजितं पातु युष्मान्
मणितमतिविदग्धं मुग्धमिन्दीवराक्ष्याः ।।

(नान्द्यन्ते सूत्रधारः नेपथ्याभिमुखमालोक्य)

. . . . . .

Fol 2:

सूत्रधारः (स्मृतिमभिनीय)—मारिष श्रूयताम् । अस्ति किल चोलमण्डलमण्डनायमानसिप्पाम्बपुरनामा महानग्रहारः । तत्र च पदवाक्यप्रमाणपारावारपारंगतो **नारायणो** नाम सुधीः ।

मकुटेषु महीपानां मौक्तिकन्ति यदुक्तयः ।
मानसाब्जेषु विदुषां मकरन्दभरन्ति च ।।

किं च—

अद्वैतं विशिनष्टि कश्चिदहमो जीवं विधत्तेऽपरः
प्रामाण्यं परतः परः प्रथयति व्याप्तिं प्रवक्तीतरः ।

पारार्थ्यं विवृणोति कश्चन विधेरन्योऽभिधत्तेऽभिधां
शब्दानप्यनुशास्ति यस्य च पुनः पुत्रेषु शिष्येषु च ।।

तस्य किल तनयो **लोकनाथः कन्दर्पदर्पणा**भिधानं प्रथमरसभाजनं भाणमभाणीत् । अयमिदानीमभिनेतव्यः ।।

End:

तथापीदमस्तु भरतवाक्यम्—

जयतु जलधिकन्यालंकृतो रङ्गधामा
जलदपटलनीलः शेषपर्यङ्ककशायी ।
जयतु च कविसूक्तिर्गौडपाञ्चालरीतिः
सहृदयजनहृद्या नाट्यविद्यानवद्या ।।

Colophon:

इति **लोकनाथाध्वरि**विरचित-**कन्दर्पदर्पणा**भिधानो भाणः समाप्तः

Scribe adds:

भव वर्षे (९९०) कार्तिकै मासं २ तिथति नारायणयज्वना विलिखितः कन्दर्पदर्पणो नाम भाणः समाप्तः

1342

VB 630(b) **विजयेन्दिरापरिणयम्**

Beginning:

वाञ्छापूर्त्यै भवतु भवतां चन्द्रमौलिः स देवः
पार्थप्रेम्णा विधृतकुहनाचारुकैरातवेषः ।
संविद्रूपा नटमिव नटी नाथभावानुरूपा
चक्रे देदीप्यमिह विजयाश्लेषजानन्दसान्द्रम् ।।

इयमष्टादशपदा नान्दी । एषा च नान्दी पूर्वरङ्गाङ्गत्वात् पूर्वरङ्गमित्युच्यते । रूपकादिष्विवात्र कर्तव्यं चैतत् । तदुक्तम्

प्रथमं पूर्वरङ्गं स्यात् ततः प्रस्तावनेति च ।
आरम्भे सर्वनाट्यानामेतत्सामान्यमिष्यते ।। इति

तत्र पूर्वरङ्गलक्षणम्—

\+ + + + +

Fol 2:

विजयेन्दिरापरिणयं नाम नाटकम् । यत् किल

लोकाभिरामगुणगुम्फितपुण्यकीर्ति-
मुक्तावितानरमणीयजगत्त्रयस्य ।
रामास्त्वचित्तचरितामृतधारया यत्
संसिञ्चतीव हृदयानि समाजभाजाम् ।।

. . . . . .

यस्य किल काव्यबन्धस्य कविः काश्यपवंशविमलमुक्ताफले कार्यकृष्णसूरिणा सवर्णायां पतिव्रताशिखामणिनामधेयायां पाणिगृहीत्यां संजनितः सकलकविकुलश्लाघनीयाधिकयशाः **सुब्रह्मण्य**नामधेयोऽनुपदं कर्णपथमारूढः ।। सूत्रधारः । किमुच्यते . . . .

End:

ससंभ्रमं । अहं विदिमि । (अहं वेद्मि) । (संस्कृतमाश्रित्य) सुखित्वादनया वीर्य-शुल्काहरणं आदिममिति । . . . .

1348

VB 755(a) **आख्यातवादव्याख्या**

Beginning:

आख्यातस्य यत्नो वाच्यः; पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यात-विवरणात् । व्यवहारादिव विवरणादपि बाधकं विना व्युत्पत्तिः; किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्च ।

End:

नन्वसाधारणजनकताश्रयव्यापारस्याख्यातार्थ . . . . नोक्तदोष . . . अत आह—विभागेति । फलति इष्टापत्तिः संभवतीत्यतो निश्चलादाविति; प्राभाकरमतमुपन्यस्य दूषणमाह —तत्र तत्रेत्यादिना । तत्र तत्रेत्यादौ तत्तत् . . . . . ति संयोगविभागादित्यर्थः । क्वचिच्चा-श्रयत्वादिकमपीति भावाख्यातस्थले आश्रयत्वाभावात् क्वचिच्च . . . प्रसङ्गादिति लक्षणादिना तादृशानुभवोपपादने तु लाघवस्यैव शरणीयत्वादिति भावः ।।

Colophon:

इति रघुदेवन्यायालंकारभट्टाचार्यविरचिता **आख्यातशिरोमणिव्याख्या** समाप्ता ।।

1354

VB 774 **काणादन्यायसिद्धान्तचन्द्रिकाव्याख्या (प्रसादः)**

Beginning:

इदानीं क्रमप्राप्तान् गुणान् निरूपयितुमुपक्रमते— अथेति । तेषां लक्षणमाह—गुणत्वेति । न च तत्र मानाभावः । रूपादौ गुणाकारानुगतप्रत्यक्षेण तस्याः सिद्धेः . . . . . । . . . . . तदसंभवः । तेषु तदनभ्युपगमे रूपत्वादिना जातिसंकरापत्तेः । न च धर्माधर्मयोरनुगतप्रत्यक्षासंभवेन तत्र कथं गुणत्वसिद्धिरिति वाच्यम् ।

End:

व्युत्पत्तिकांक्षिण इत्युपादानात् समाप्तपुनरात्तत्वं दोष इति वाच्यम् । प्रकृतवाक्यार्थनिर्वाहकविशेषणोपादाने ' अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ' इत्यादौ तद्दोषापत्तेः । प्रकृतेऽपि बालानामबोधानां शास्त्रव्युत्पत्त्यनाकांक्षिणां तन्मतव्युत्पत्तिरूपसंचाराशासनानुपपत्तेः । तन्मतव्युत्पत्तिरूपसंचारशासनवाक्यार्थेऽधिकारिविशेषण. . . . . त्पत्ति कांक्षिण इत्यस्य प्रकृतवाक्यार्थनिर्वाहत्वमेवेति शिवम् ।।

Colophon:

श्रीदेवसिंहसुमतेस्तनयः प्रतीतः श्रीविश्वरूपयतिराजकृपानुबन्धी ।
श्रीचन्द्रचूडचरणाम्बुजगर्भदासो **गङ्गाधराध्वरिवर**श्च. . . . . ।।
. . . काणादचरणाक्षमुनीन्द्रसूक्ति-
पद्यानुसारिविदुषां बहुशो निबन्धान् ।
दृष्ट्वा स्वनिर्मितनयोज्ज्वलचन्द्रिकाया
नाम्ना **प्रसाद** इति यां विवृतिं व्यतानीत् ।।
तद् येऽपि के कतिचिदाकलयन्तु दोषानावेद . . . . . न्द्राः ।
तेऽमी चिरन्तननवीननिबन्धभाजो यस्मात् तदुक्तिलवसंकलना ममैषा ।।
. . . . . .चन्द्रिकाप्रसादः समाप्तः ।।

1355

VB 955 **काणादन्यायसिद्धान्तचन्द्रिकाव्याख्या**

Beginning:

यो ध्वान्तमान्तरमुदस्यति बोधदीपालोकेन संयमवतां दयया प्रसन्नः ।
चिन्मुद्रया कलितपाणिरसौ स देवो गेहे वटद्रुमतलेन ममान्तरस्तु ।।

वक्त्रे दिव्या वाहिनी कन्धरायां वाचां देवी कल्पवृक्षाः कटाक्षे ।
शंभुं च व्याचक्षते चित्तवृत्तिर्येषां युक्तं विश्वरूपेन्द्रनाम ।।
तेषां पादाम्बुजं नत्वा **गङ्गाधर**सुधीमणिः ।
सिद्धान्तचन्द्रिकाव्याख्यां तनोति विदुषां मुदे ।।

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये कृतमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्य-शिक्षायै ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—नत्वेत्यादिना ।

End:

दीधितिकृतस्तु परमाणुभिरेव मनःप्रयोजनस्य सर्वस्योपपत्तेः नातिरिक्ते मनसि प्रमाण-मस्तीत्याहुः । विस्तरस्तु पदार्थखण्डनादौ अवसेय इति दिक् ।।

Colophon:

इति द्रव्यपदार्थनिरूपणम्

1357

VB 802 **कारकार्थनिर्णयः**

Beginning:

नत्वा श्रीकृष्णचरणौ कारकाद्यर्थनिर्णयः ।
श्री**भवानन्द**सिद्धान्तवागीशेन वितन्यते ।।

तत्र क्रियानिमित्तं कारकमिति तु न सामान्यलक्षणम् । संप्रदानादेरनुमितिप्रकाशनद्वारा तण्डुलादिसंप्रदानद्वारा संबन्धिनोऽपि पाकादिक्रियानिमित्तत्वेन संबन्धिनि चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादावतिव्याप्तेः । किं तु विभक्त्यर्थद्वारा क्रियान्वयित्वमुख्यभाक्तसाधारणं कारकत्वम् । क्रियानिमित्तत्वसहितं तु मुख्यमिति । स्तोकं पचतीत्यादौ क्रियाविशेषणेति व्याप्तिवारणाय विभक्त्यर्थेति ।।

End:

सप्तमीविधानान्नामार्थयोः सामानाधिकरण्ये . . . . न युक्ता तथापि गुणकर्मान्यत्वे सति सत्त्वादिति अभियुक्तप्रयोगदर्शनात् । सूत्रे भावपदं धर्मपरतया व्याख्येयं, यस्य धर्मेण धर्मान्तरं निरुक्तस्वसामानाधिकरण्येन प्रतिपाद्यते तत्र सप्तमीति सूत्रार्थः ।

Colophon:

इति श्री**भवानन्द**सिद्धान्तवागीशभट्टाचार्यविरचितः **कारकनिर्णयः** संपूर्णः

1380

VB 759(b) **तत्त्वचिन्तामणिव्याख्या**

Beginning:

. . . . . तन्मतेऽप्यपदेश इत्यर्थः । इदं तु स्वत एवोत्पद्यत इत्याह—तच्चेति । स्थित एव ज्ञायते चेत् . . . .प्रामाण्यमिति । तथापि स्पष्टार्थमेतदुक्तमित्याह . . . . . रूपप्रामाण्यस्य स्वतो ग्रहेऽनभ्यासदशायां प्रामाण्यसंशयमुपपादयति—अनभ्यासेति । एवमपि निष्कम्पप्रवृत्त्यङ्गस्य त्वदभिमतस्य प्रामाण्यस्य स्वतो ग्राह्यत्वमनुपपन्नमित्याशयेन परिहरति—तन्नेति । एतच्चोपलक्षणम् । यत्र शुक्त्यादौ विद्यमानेऽपि रजतादिभेदो. . . तेन न गृहीतः ।

End:

एतेन वर्तमानावगाहिप्रत्ययोऽप्युपपद्यत इति बोध्यम् । विशिष्टज्ञानोत्कीर्तनेन निर्विकल्पकत्वेनातीन्द्रियतया कथमस्य प्रत्यक्षविषयत्वमिति निरस्तम् । वैशिष्ट्यानवगाहिज्ञान एवायोग्यत्वात् । अस्य च तथात्वात्, ज्ञानमात्रस्यैव योग्यत्वम् । संबन्धितावच्छेदकरूपेण संबन्धिनिरूपणं विना न संबन्धिनिरूपणमिति तद्विरहादेवान्यस्याप्यन्यत्र तद्विषयत्वेनाज्ञानादित्याहुः । अनुमिनोमीत्यादावुपलक्षणम् । नरसिंहाकारज्ञाने घटत्वप्रकारत्वाभावात् तत्र ज्ञानत्ववैशिष्ट्यबोध . . . . . ज्ञानत्वमित्याकारेण ज्ञानत्वघटत्वप्रकारोभयाश्रयज्ञानवैशिष्ट्य . . . स्यादित्यपि बोध्यम् । . . .

1381

VB 760(c) **तत्त्वचिन्तामणिव्याख्या**

Beginning:

. . . . . भिन्नं वर्तमानत्वमात्रं तस्य हेत्वनियम्यत्वात् । हेतुनियम्यत्वं हि हेत्वधिकरणक्षणाव्यवहितक्षणमात्रवृत्तित्वम् । न चोत्पत्तिभिन्नं सत्त्वं, तथा क्षणान्तरेऽपि घटादिसत्त्वसंभवात् तथा चासत इति विशेषणेनासतः सत्त्वमुत्पत्तिर्लभ्यते । तेन यद्धर्माश्रयस्य सर्वा उत्पत्तिः यद्धेतुनियम्येत्यत्र तात्पर्यम् ।

End:

रजतवृत्तित्वमिति । विषयतास्वरूपधर्मावच्छिन्नसाध्यव्यापकमिदं बोध्यम् ।। अरजतविषयेति । यद्यपि प्रकारत्वादित्येवास्तु । न बाधः । न चैतद्रजतत्वादौ व्यभिचारः । आहार्यादिभ्रममादाय तद्विषयतया पक्षसमत्वात् । कथं . . . . .

1382

VB762 तत्त्वचिन्तामणिव्याख्या

Beginning:

. . . . . इति कृत्वा मूलव्याख्यानसमय उक्तः । ननु यदि प्रत्यक्षोपजीव्यकत्वादनुमानस्य तदानन्तर्यम्, तस्यानुमानोप . . . . . क्षिपति—यद्यपीति । धूमपरामर्शानन्तरं जायमानवह्न्यनुमित्यनन्तरं वह्निमनुमिनोमीत्यनुव्यवसायप्रत्यक्षस्थल इत्यर्थः । अत्रानुमित्यानुमानफलभूताय . . . . . स्वरूपोपजीव्यत्वं प्रतीयते । संभवति च —कथमिति जन्यत्वात् तदनुव्यवसायस्य । तथापि, तदत्र विवक्षितम् ।

End:

तथा चानुमितिपूर्वसमन्वयानुस्यूतासिद्धिदशाव्यावृत्ता सानिर्वचनीया । उक्तसंदेहश्च न तथा विशेषणोपलक्षक . . . . . विशेषणद्वयान्तरवैकल्यादिति घट्टार्थः । साधकबाधकमानाभाव इति । स चोक्तविशेषणद्वयविशिष्ट इति । नोक्तदोष इति भावः । . . . . . प्रतियोगिक एवाभावस्तथा उत प्रत्येकाभावद्वय . . . . उक्तमुभयेति । तत्रापि सिद्धान्तमाशङ्कचाह—व्यासज्येति । तथा च सिद्ध. . . . . .द्वितीय आह—तत्रापीति । श्रोतव्य इत्यादेरयमर्थः . . नामानुमानम् । तथा च तदनुसारेण बाधमानदशायामपि . . . . . .

1384

VB 783 तत्त्वचिन्तामणिव्याख्या (प्रकाशः)

Beginning:

प्रणयकलहकाले भीषणं भीतिहेतोः
प्रकटयति समन्तान्मायया कायमस्मिन् ।
सभयमथ भवान्या गाढमालिङ्ग्यमानो
घटयतु घनविघ्नध्वंसमस्माकमीशः ।।
निशम्य सकलं शास्त्रं नानागुरुमुखाम्बुजात् ।
अनुमानप्रकाशोऽयं **रुचिदत्तेन** तन्यते ।

संगतिं दर्शयन्नेव शिष्यावधानार्थमिदानीं निरूप्यत इति प्रतिजानीते—प्रत्यक्षेति । अत्र प्रत्यक्षस्यानुमानं प्रति साक्षात्परंपरया वा हेतुत्वम् ।

End:

प्रकृतेऽपीति । अत्र गृहे देवदत्तो नास्तीति नियमग्राहकपदेनोक्तं न तु जीविगृ. . . एवेति नियमग्राहकम् । तथा सति बहिःसत्त्वप्रमा कुत्रापि न स्यात् । गृह एवेति नियमग्राहकस्य तत्राप्याभासत्वादिति भावः । यद्वेति । पूर्वदोष . . .

1408

VB 861(b) **तत्त्वचिन्तामणिदीधितिव्याख्या**

Beginning:

मूले व्यभिचारज्ञाने सतीति योजनायाः कल्पनागौरवान्न व्याप्तिनिश्चय इत्यस्यासंगतत्वाच्चोपोद्घातस्यासंभवादाह—प्रसङ्गादिति । स्मृतस्यानुपेक्षणीयत्वं प्रसङ्गः । ततः पूर्वग्रन्थे येन क्रमेण स्मृतत्वं तत्र दर्शनायोपाधिज्ञानादित्यादि मूलम् । व्याप्तिग्रहोपाये च क्वचिदुपाधिसंदेहादित्यत्र व्याप्तिनिश्चयाभावप्रयोजकीभूतव्यभिचारशङ्काकारणज्ञानविषयत्वेन उपाधेः स्मारितत्वादिति भावः ।

End:

एतावता समव्यापकत्वं लब्धं नतु साधानताव्यापकत्वम् । अत. . . . . ति । उक्तसंबन्धेनेति । उक्तसंबन्धेन व्यभिचारेण वा व्याप्यत्वेन वा संबन्धेन उक्तसंबन्धस्य वृत्तिनियामकत्वे मानाभावात. . . . . .

1409

VB 848(b) **गादाधरीटीका**

Beginning:

सति व्याप्तिनिश्चय इत्यस्यासतो व्याप्तिनिश्चयस्याभावात् सतीति विशेषणं व्यर्थमित्यत आह व्याप्तिनिश्चये सतीत्यन्वय इति । तथापीत्यादि । एतत्सूचनाय तदभिहितमिति । व्याप्तिग्रहोपायश्च वक्ष्यत इत्येतत् ग्रन्थावतरणादेव व्याप्तिग्रहोपायप्रतिपादने आवश्यकत्वे लब्धेऽपि पुनस्तत्रानुमानप्रामाण्यव्यवस्थापकत्वकथनेनावश्यकत्वकथनं, व्याप्तिस्वरूपनिरूपणे आवश्यकत्वविशिष्टोपायप्रतिपादननिदानत्वकथनेन तत्राप्यावश्यकत्वप्रदर्शनाय ।

End:

अत्र च व्युत्पत्तिसंकोचप्रकारः प्रोगेव दर्शितः व्युत्पत्ति . . वैचित्र्येणेति । घटो न पटः पशुरपशुरित्यादिप्रयोगवारणाय कल्पितस्य पदार्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति पदनिरूपितवृत्तिज्ञानजन्योपस्थितेः कारणत्वस्य ससंबन्धिकपदजन्यशाब्दबुद्धित्वावच्छिन्नं प्रत्येव निरुक्तोपस्थितेः कारणत्वमित्यादिक्रमेण संकोचकल्पनादिति भावः ।।

Colophon:

पञ्चलक्षणीटीका समाप्ता

1416

VB 756 तत्त्वचिन्तामणिप्रकाशविवरणम्

Beginning: (folio 5)

. . . . .स्वरूपसंबन्धत्वात् लक्ष्यत्वमेवाभावादिघटितस्वरूपद्वयस्य तथात्वेऽपि घटादि-प्रमेयमात्रस्यातथात्वात् । एवमपि यदि लोहितस्फटिक इत्यादौ परंपरासंबन्धघटितया द्रव्यस्यापि स्वरूपेण संबन्धत्वं तदा तत्रातिव्याप्तिवारणाय साधारणेति ।।

Colophon: (fol. 79)

इति श्रीजातवेदोऽध्वरिविरचिते प्रत्यक्षप्रकाशविवरणेऽभाववादः संपूर्णः

End:

ननु प्रतियोगिनि विशिष्टज्ञानविषयत्वादि वर्तत एवेति तदभावादि . . . . . इत्या . . प्रतियोगिनोऽपि विशेषणत्वप्रसङ्गादिति भावः । ननु उत्तरत्र लक्षणे रूपवति रस इत्यत्र रूपस्य रसान्वय . . . . . .

1417

VB 784 तत्त्वचिन्तामणिप्रकाशव्याख्या (तर्कचूडामणिः)

Beginning:

कावेरीवारिपानप्रतिहततमसां मण्डिते पण्डितानां
वृन्दैः श्रीरामचन्द्रस्मृतिबलविशदाशेषतन्त्रार्थसारः ।
देशे विख्यातवासो विविधगुरुकृपालेशतो लब्धबोधो
न्यायाब्धिं **तर्कचूडामणि**मिह कुरुते बह्वृचो **धर्मराजः** ।।
त्रेताग्निधूमाकुलवीथिकाङ्कणे
गृहे गृहे यत्र वसन्ति सूरयः ।
अधीतसर्वश्रुतयः कथान्तरे
विनिर्जितप्रत्यनुमानवादिनः ।।
तत्र कण्डरमाणिक्कग्रामरत्ननिवासिना ।
मणिप्रकाशविवृतिर्**धर्मराजेन** तन्यते ।।
दशानामपि टीकानां भङ्गं कुर्वन् क्वचित् क्वचित् ।
अनुमानप्रकाशस्य विवृतिं करवाण्यहम् ।।

आरब्धपरिसमाप्तये मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—प्रणम्येति विघ्नध्वंसमिति ।

End:

नन्वनुपसंहारित्वदशायां तत्संशयत्वेन तदज्ञानदशैव तत्रासिद्धेरित्यत आह—साध्येति । ननु तत्संशयेऽपि साधारणता स्यादित्यत आह— तन्निश्चय इति । नन्वनुपसंहारित्वज्ञानेऽपि व्याप्त्यभावज्ञानाद्व्यतिरेकिसाध्यकानुपसंहारिण्यपि न तस्योपजीव्यत्वमित्यत आह—यद्वेति । अनुपदमिति । एतेनेत्यत्रेत्यर्थः । ननु नेदं लक्षणमिति वक्ष्यत इत्यरुचेः . . .

1418

VB 804 तत्त्वचिन्तामणिप्रकाशव्याख्या (तर्कचूडामणिः)

Beginning: Same as in ser. no. 1417

End:

न्यायशास्त्रजन्यपदार्थबोधस्योपयोग इत्याह—इतरेति । सिद्धान्तिग्रन्थत्वशङ्कां वारयति—ज्ञानेति । समुच्चयमाह—ज्ञानेति । उत्तरग्रन्थः स्पष्टार्थः ।।

Colophon:

इति **धर्मराजविरचिते तर्कचूडामणौ** अनुमानपरिच्छेदः संपूर्णः

Scribe adds:

नलवर्षं आडिमासं १६ तियति श्रीपुरं भास्करभट्टर् पुत्तन् वैद्यनाथन् एळुतिनतु ।।

1442

VB 807 तर्कभाषाभावार्थदीपिकाव्याख्या

Beginning:

नीलकण्ठदीक्षितीयम् ।
श्रीमन्मायूरनाथ निरवधिकरुणासमुद्र पाहि माम् ।
मायूरनाथ करुणामृत मुत्कटाक्ष-
वीक्षासमेधितसमस्तमनोरथानाम् ।
अस्माक . . . . . .
तं दोषाय भवत्यतः प्रकटयन् भावं विचार्यानया
कुर्वे केशवभावनानुगतया बालप्रमोदं परम् ।।

चिकीर्षितग्रन्थविघ्नशान्त्यै कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—ओमिति ।

End:

स्पर्शेति । आकाशादेः स्वसमवायिसंयोगप्रत्यासत्त्योद्भूतरूपसंबन्धिनःस्पार्शनवारणाय समवायेनेत्युक्तमिति ध्येयम् । स्पर्शादिति । द्रव्यसमवेतविषयकलौकिकस्पार्शत्वं कार्यतावच्छेदकम् उद्भूतस्पर्शत्वं कारणतावच्छेदकं स्वसमवायिसमवायः कारणप्रत्यासत्तिः ।।

Two fly leaves at the beginning have *Rāmāyaṇam* Ayodhyākāṇḍam and some other work on Nyāya.

1458

VB 765 **तर्कसंग्रहव्याख्या**

Beginning:

नमो नगेन्द्राधिपकन्यकावस्फुरत्पदाम्भोजपरागभाजे ।
विघ्नाद्रिसंभेदनटङ्करायत्करम्बुजायादिसुपूजिताय ।।

. . . . . .

प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्तिकामनया शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति—निधायेति ।

End:

न च रूपादिप्रत्यक्षे स्वाश्रयमहत्वस्य च कारणत्वात् परमाणुरूपादेः स्वाश्रये परमाणौ महत्वाभावान्न तत् प्रत्यक्षमिति वाच्यम् । एवमपि तदीयरूपत्वादेः परमाणुनिष्ठपृथिवीत्वादेश्च प्रत्यक्षत्वं स्यात् ।।

1473

VB 813 **न्यायसिद्धान्तमञ्जरीव्याख्या (भावदीपिका)**

Beginning:

शैवालवन्या रुचिरे तटिन्यास्तीरे भवान्यादरलेशशून्या ।
इन्द्रादिमान्या भुवनेष्वनन्या मां पातु धन्या गिरिराजकन्या ।।
प्रणम्य शिवयोः पादौ श्रीमता **कृष्णशर्मणा** ।
सिद्धान्तमञ्जरीव्याख्या क्रियते **भावदीपिका** ।।

प्रारिप्सितप्रतिबन्धकाघशमाय कृतं परमात्मनमस्काररूपं मङ्गलं शिष्यशिक्षायै प्रसङ्गतोऽध्यापकाध्येतॄणां मङ्गलाचरणाय चादौ निबध्नाति—प्रणम्येति ।

End:

अत्रापि शुक्तिविशेष्यकरजतत्वप्रकारकप्रवृत्त्यव्यवहितप्राक्क्षणेऽपि तयोः शुक्तिरजतत्वयोस्तत्प्रकारकसंनिहितं संनिकृष्टं यत्र यस्य भ्रमस्याव्यवहितपूर्वक्षणेऽन्यत्र चासंनिकृष्टरजतस्थले, ज्ञानस्य ज्ञानलक्षणस्य रजतत्वप्रकारकं प्रत्यक्षम् । रजतविशेष्यकरजतत्वप्रकारकं प्रत्यक्षम् । तत्रैव च रजतविशेष्यकरजतत्वप्रकारकप्रत्यक्ष एव तत्प्रकारिका प्रवृत्तिरिति, अरजतविशेष्यकरजतत्वप्रकारिका प्रवृत्तिरित्यर्थः ।।

Colophon:

इति श्रीगोविन्दन्यायालंकारसुजातकृष्णभट्टाचार्यविरचितायां **न्यायसिद्धान्तमञ्जरीदीपिकायां** शब्दपरिच्छेदः

Scribe's note:

वर्षे श्रीविभवाख्यके घटगते भानौ च पक्षे सिते
षष्ठ्यां भूमिजवासरे शुभकरे तारे विशाखाख्यके ।
ईदृक्षे शुभयोगलग्नकरणे श्रीवेङ्कटेशाभिधो
विद्वान् पुस्तकमादरादलिखदेतच्चाद्रिकन्यामनाः ।।
सिद्धान्तमञ्जरीव्याख्या कृष्णमिश्रविनिर्मिता ।
लिखिता वेङ्कटेशाख्यविदुषाम्बाप्रसादतः ।।

Four fly leaves contain Kālīsahasranāmāvalī.

1502

VB 840(a) **निर्विकल्पकवादः**

Beginning:

ननु निर्विकल्पकस्य कुतोऽतीन्द्रियत्वाभ्युपगमः । विनिगमनाविरहाद् निष्प्रकारकज्ञानत्व-निर्विशेष्यकज्ञानत्व-निःसंसर्गकज्ञानत्वैस्त्रिभिर्धर्मैर्मानसत्वावच्छिन्नं प्रति प्रतिबन्धकत्रयकल्पनामपेक्षते, तथेन्द्रियत्वाभ्युपगमस्यैव युक्तत्वात् ।

End:

प्रकारत्वस्य तृतीयस्य तृतीयार्थत्वात् । विषयतासामान्यस्य तृतीयार्थत्वे अनेकघटत्वं साक्षात्करोमि समवायेनेदं साक्षात्करोमीत्यनुव्यवसायापत्तेः । तत एव मानसत्वावच्छिन्नं प्रति विनिगमनाविरहाद् निष्प्रकारकज्ञानत्वादिना प्रतिबन्द्धचप्रतिबन्धकभावकल्पनापि न दोषाय, प्रामाणिकत्वात् ।

अन्यथा गुरुत्वादेरती . . . पपत्तिरिति संक्षेपः ।।

1506

VB 840(b) **मङ्गलवादः**

Beginning:

मङ्गलस्य समाप्ति प्रति विघ्नध्वंसद्वरा हेतुत्वमिति सिद्धान्तस्थितिः । अत्रेदं विचार्यते । मङ्गलस्य समाप्तिघटकत्वे किं प्रमाणम् । न तावत् प्रत्यक्षम् । प्रत्यक्षप्रमाणेन कारणत्वग्रहे जननीये नियतान्वयव्यतिरेकयोः सहकारित्वात्; तयोश्च मङ्गलेऽसत्वात् नियतान्वयव्यतिरेकौ च स्वस्वव्याप्येतरसकलकारणसमवधानकालीनस्वसत्ताप्रयुक्ता प्रतियोगिकार्यकत्वस्वस्वव्यापारेतरयावत्कारणसमवधानकालीनस्वभावप्रयुक्ताभावप्रतियोगिकार्यत्वत्वरूपौ ।

End:

यजेत स्वर्गकाम इति वाक्येन यागस्य स्वर्गसाधनत्वावगते कालान्तरभाविस्वर्गं प्रति आशुतरविनाशिनो यागस्य कारणत्वानुपपत्त्यापूर्वस्य व्यापारत्वकल्पनेन यागस्य स्वर्गकारणत्वनिर्वाहवद् विघ्नध्वंसद्वारा समाप्ति प्रति मङ्गलस्य हेतुत्वे न काप्यनुपपत्तिरिति निष्कर्षः ।।

1508

VB 841(c) **लौकिकविषयतावादार्थः**

Beginning:

.....करोमीत्यनुव्यवसायविषयतया लौकिकविषयताया अतिरिक्तायाः सिद्धिरिति नवीनाः । अत्र वदन्ति बहवः । अतिरिक्तलौकिकविषयतायां नास्ति मानम् । तथा हि । घटं साक्षात्करोमीत्याद्यनुव्यवसायस्यातिरिक्तलौकिकविषयताकत्वं .... विषयकप्रत्यक्षमेव तावतैव घटाद्यनुमित्याद्यनन्तरं तथाविधानुव्यवसायवारणसंभवात् । तथा च किम् अप्रामाणिकातिरिक्तलौकिकविषयताङ्गीकारेणेति ।।

End:

यत्तु प्रत्यक्षत्वावच्छिन्ननिरूपितातिरिक्तलौकिकविषयतातोऽतिरिक्तचाक्षुषविषयता स्वीक्रियते । अन्यथा पश्यामि न पश्यामीत्यादिप्रत्यक्षानुपपत्तेरिति चेत्, न, पश्यामीत्यादिप्रत्ययानां प्रत्यक्षसामान्यनिरूपितत्वादिति ।।

Colophon:

इति लौकिकविषयतावादार्थः संपूर्णः

1509

VB 805(e) **विभागखण्डनम्**

Beginning:

श्रीमद्रामानुजाचार्यान् श्रीवत्साब्धिकलानिधीन् ।
नत्वा तत्सूनुना किंचिद् **वेङ्कटार्येण** चिन्त्यते ।।

गौरीकान्तीये विभागग्रन्थे अत्र संयोगाभावो विभागो न प्रमाणान्तरमित्येके । तन्न । रूपरसयोः रसे संयोगाभावेन रूपं रसादविभक्तमिति प्रतीत्यापत्तेः । संयोगनाश एव विभागः ।

End:

सूक्ष्मदृष्ट्या विद्वद्भिर्विवेक्तव्यमिति मदेकपरिशीलितः पन्थाः । तस्माद् गौरीकान्त-वचनमकान्तमेवेति पश्यन्तु पण्डिताः ।।

स्वपक्षस्थापनहीना वितण्डा न प्रशस्यते ।
स्वपक्षस्थापनपूर्वं मत्कृतिर्दूष्यतां ततः ।।
विबुधा याचिष्य इह कृत्वा बद्धाञ्जलीन् भवद्भ्योऽहम् ।
सिद्धान्तमप्रयुक्तया दूष्यत कामं कृतिं विविच्य मम ।।

Colophon:

इति श्रीमद्वत्सकुलकलशाब्धिकलानिधिश्रीशरण्यार्यगुरुवर्यागण्यपुण्यश्रीरामानुजाचार्यगुरु-धुर्यसुकृतिसूनोस्तच्चरणपरिचरणनैपुण्यलब्धसर्वविद्यावैशद्यस्य **वेङ्कटार्या**परनामधेयस्य **श्रीनिवासदासस्य** कृतिषु विभागखण्डनं संपूर्णम् ।

वन्दे रामानुजाचार्यान् श्रीवत्साब्धिकलानिधीन् ।
यत्सूक्तिर्विमतध्वान्ततिरस्करणचन्द्रिका ।।

1511

VB 826 **सामान्यनिरुक्तिविचारः**

Beginning:

चिन्तामणावथेति । अथशब्दार्थः सद्धेतुनिरूपणानन्तर्यम्; तच्च निरूपणेऽन्वेति । हेत्वाभासा इत्यत्र हेतुवदाभासन्त इति व्युत्पत्तिः । अत्र हेतुपदं व्याप्तिपक्षधर्मताविशिष्टपरम्; वत्यर्थः सादृश्यम् ; तच्च भेदविशिष्टवृत्तिधर्मवत्त्वम् ; हेतुपदार्थस्य वत्यर्थैकदेशे भेदे वृत्तित्वे चान्वयः ।

End:

इदं च व्यापकविषयताशून्यत्वाननुसंधानेन । तदनुसंधाने च वह्निमत्पर्वतविषयकनिश्चया-व्यवहितोत्तरघटादिनिश्चयानन्तरोत्पन्नानुमितिनिष्ठतादृशोभयाभाववत्त्वस्य तादृशवह्निमत्पर्वत-विषयताप्रयुक्तत्वं बोध्यम् । प्रयोज्यप्रयोजकभावा चेति . . .

Colophon:

इति **जगन्नाथकृत-सामान्यनिरुक्तिविचारः**

1512

VB 805(d) **सुखवादः**

Beginning:

ईश्वरः सुखवान् न वेति विप्रतिपत्तिः । अत्र प्राञ्चः । ईश्वरो न सुखवान् सुखसामग्र्यभावात् । तथा हि । धर्मात् सुखमधर्माद् दुःखमिति दर्शनात् । न च धर्मत्वेन सुखत्वेन कार्यकारणभावे मानाभावादिति वाच्यम् । यद्विशेषयोः कार्यकारणभावः बाधकं विना तत्सामान्ययोरपीति व्याप्तिबलात् सिद्धिः । स्वव्यापारद्वारा वाजपेयादिना विजातीय-सुखादिजनकत्वेनातिप्रसङ्गभङ्गे वाजपेयजन्यविजातीयधर्मत्वेन न तादृशविजातीयस्वर्गत्वेन हेतुत्वे मानाभावाच्च ।

End:

एवं चानन्दं ब्रह्मणो रूपमित्यत्रानन्दशब्दस्य धर्मवाचकत्वे आनन्दपदे लिङ्गव्यत्यय एव । स्वरूपवाचकत्वे तु आनन्दपदे लक्षणयानुभवताबोधने लिङ्गव्यत्ययेन शक्त्या बोधने तु युक्तार्थ-वाचकात् प्रत्ययस्वीकरणेनोपपत्तिरित्याहुः ।।

Colophon:

सुखवादः समाप्तः

1535

VB 753(e) **योगपादः (सव्याख्यः)**

Beginning:

कन्दो नाभ्यध उत्थितस्तु निलयो नाडचाऽऽगुराणां च त-
न्मध्येऽध्वा द्विसहस्रसप्ततिरथ . . . . . स्तता ।
पिङ्गा कन्दविनिर्गता पृथगिडा दक्षे च वामे बला
नासारन्ध्रयुगाश्रिते बहिरथस्ते द्वा . . . . . ।।

अथेदानीं योगपादं वक्तुकामस्तदर्थं सुषुम्नादिसर्वनाडीनामुत्पत्तिकारणभूतत्व . . . . नाभ्यधः । अत्र नाभ्यध इति नाभिसमीपस्थाधःप्रदेशो न विवक्षितः । किं तु नाभेरूर्ध्वस्थिताधःप्रदेश . . . . नाभीकमलं तु कन्दादुत्पन्नमिति ज्ञापनार्थं कन्दो नाभ्यध उत्थित इत्युक्तम् ।

End:

नृसिंहस्वरूपत्वप्राप्तिः । तथाचिन्त्यागमे सकलस्य लक्षणमुक्तम् ।

मुखे ज . . . . . न्तु हृदयान्तकम् ।
हृदयादिसमारभ्य नाभ्यन्तं तु सुषुप्तिकम् ।।

तस्याधस्तुर्यं स्यात् । तुर्यातीतं तु लिङ्गके . . . . . हि प्रवर्तकमिहोच्यते ।

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चैव तु पञ्चकम् ।
शब्दस्पर्शौ च रूपं च रसो गन्धश्च पञ्चधा ।।

1540

VB 753(a) **राजयोगामृतम्**

Beginning:

राजयोगामृतं नाम ग्रन्थः

वैकुण्ठवास सर्वेश दीनरक्ष नृकेसरिन् ।
योगिनामपि सर्वेषां कथं श्रेष्ठं कथं परम् ।।
कथं मुक्तिप्रदं देव कथं ज्ञानप्रकाशकम् ।
कथं ज्योतिः कथं नादः कथमानन्ददायकः ।।
कस्मिन् स्थाने वसेन्नित्यं सूर्यसोमाग्निमण्डलम् ।
कस्मिन् स्थाने सुषुम्नाख्यनाडी सम्यक् प्रकाशते ।।
तत्सर्वं ब्रूहि मे विष्णो श्रोतुमिच्छाम्यहं सदा ।
मुनीनां मोक्षसिद्धचर्थं पुरा प्रोक्तं हरं हरिः ।।
राजयोगामृतं नित्यं सद्योमुक्तिप्रदायकम् ।

End:

आदौ सूक्ष्मेण पश्यन्ति लक्ष्यं कृत्वा पुनः पुनः ।
पूर्णलक्ष्येण दर्शित्वा पूर्णज्योतिः प्रकाशते ।।
शृङ्गाटके यस्तु मनो नियम्य त्रिकोणमार्गाच्छशिभास्कराभ्याम् ।
बाह्यान्तरङ्गप्रणवैकगोभिरष्टावधानी हठराजयोगी ।।

Colophon:

इति श्रीराजयोगसिद्धान्तरहस्ये सकलयोगसारे **राजयोगामृते** द्वितीयोऽध्यायः

After Colophon:

वक्त्रे चापूर्य वायुं हुतवहनिलये चालमाकृष्य धृत्वा
स्वाङ्गुष्ठाद्यङ्गुलीभिर्वरकरतले यो छिद्र . . . . स्य ।
ऊर्ध्वे नेत्रे च नासापुटयुगलमधो तेन मार्गेण धीराः
पश्यन्ति प्रत्ययस्थात् प्रणवबहुविधध्याननादेन चित्तम् ।।

. . . . . संमोहनगोपालयन्त्रलक्षणक्रमः । प्रथमं त्रिकोणबिन्दु एळुदि बिन्दुविनिल् मायाबीजं ह्रीं एळुदि पिन् वेळियिले . . . अदनुळळेले . . .

इन्द्रियं बन्धनं चैव तेजो नष्ट . . . . . दथ ।
देहनष्टकुलज्ञातिबुद्धिनष्टो कुल . . . . . ।।
निश्चयाद्धैर्यवत्प्राज्ञो संतोषात्तत्त्वदर्शनात् ।
जिह्वया वायुमाकृष्य पूर्ववत्कुम्भकादनु ।।
शनैस्तु घ्राणरन्ध्रेण रेचयेच्च . . . . .

1542

VB 350(c) **हठप्रदीपिका**

Beginning:

श्रीआदिनाथाय नमोऽस्तु तस्मै येनोपदिष्टा हठयोगविद्या ।
विभ्राजते प्रोन्नतराजयोगमारोढुमिच्छोरधिरोहिणीव ।।
प्रणम्य श्रीगुरुं नाथं **स्वात्मारामेण** योगिना ।
केवलं राजयोगाय हठयोगोपदिश्यते ।।
भ्रान्त्या बहुमतध्वान्ते राजयोगमजानताम् ।
हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ।।

End:

अभेद्यः सर्वशास्त्राणामवध्यः सर्वदेहिनाम् ।
अग्राह्यो मन्त्रयन्त्राणामबद्धो दैवतैर्नृभिः ।।
चित्तं न सुप्तं नो जाग्रत् स्मृतिविस्मृतिवर्जितम् ।
न चास्तमेति नोदेति यस्यासौ मुक्त एव सः ।।
स्वस्थो जाग्रदवस्थायां सुप्तवद्योऽवतिष्ठते ।
यद्वा समरसत्वं यत् समाधिः सोऽभिधीयते ।।
दृष्टिः स्थिरा यस्य विनैव दृश्यं वायुः स्थिरो यस्य विना प्रबुद्धम् ।
चित्तं स्थिरं यस्य विनावलम्बं स एव योगी स गुरुः स सेव्यः ।।
इति सकलसुयोगशास्त्रसिन्धोः परिमथितादपकृष्टसारभूतम् ।
अनुभवत हठामृतं यमीन्दोर्यदि भवतामृतत्वसिद्धिवाञ्छा ।।

Colophon:

इति सहजानन्दचिन्तामणिसद्गुरुस्वात्मारामयोगीन्द्रेण विरचितायां **हठप्रदीपिकायां** योगशास्त्रे वायुवेगसंधानराजयोगो नाम चतुर्थोपदेशः

1544

VB 753(c) **हठयोगसारः**

Beginning:

मन्त्रो लयो हठो राजा एको योगश्चतुर्विधः ।
तमाहुः पूर्वमुनयः सिद्धि विष्णुप्रबोधिते ।।
मकारेण मनः प्रे . . . त्रिकारः प्राण उच्यते ।
मनःप्राणसमायोगाद् योगो वै मन्त्रसंज्ञिकः ।।

End:

पूर्णेन्दुविम्बैव सन्मणिदीपिकैव
मध्याह्नसूर्यैव न च दि . . . . . ।
विद्युत्प्रभैव शिवलिङ्गमहाविचित्रा
लक्षान्तरे ज्वलति पश्यति चक्षुरग्रे ।।
शृङ्गाटके यस्य मनो नियम्य त्रिकोणमार्गात् . . . . . राभ्याम् ।
बाह्यान्तरङ्गप्रवणैकगोभिरष्टावधानी हठराजयोगी ।।

Colophon:

इति हठयोगसारग्रन्थः संपूर्णः

Scribe adds:

पुंखानुपुंखविषमेक्षणतत्परोऽपि
ब्रह्मावलोकननिरूढमहा . योगी ।
संगीततालालयनृत्त . . .
. . . स्य कुम्भपरिरक्षणधीर्नटीव ।।

नृसिंहयोगिस्वहस्तलिखितम् । विकारि आनि वेळिळक्किळमै एलुदिनत् ।

1556

VB 857 **तन्त्रसिद्धान्तसंग्रहः**

Beginning:

. . . . . .

Fol. 4:

दर्शपूर्णमासयोः ज्योतिष्टोमस्य च प्रकरणे समाम्नाताः प्रयाजादयो दीक्षणीयादयश्च यागार्थत्वेनोपदिश्यन्त इति यथाप्रकरणे व्यवतिष्ट इति । ननु प्रयाजादीनां दर्शपूर्णमासाधीतत्वाद.

दीक्षणीयादीनां च सोमप्रकरणाधीतत्वात् कथं सर्वयागार्थत्वेनोपदेश इति पक्षो . . . . . इतिकर्तव्यतालक्षणप्रकरणस्य सर्वफलवद्यागानामविशेषात् प्रकरणकल्पितवाक्येन . . शक-शब्दयुक्तेन फलवत् सर्वयागार्थत्वेन प्रयाजाकाङ्क्षादीनां प्रयोजनापेक्षाणामुपदेशः समभवदिति वाच्यम् ।

Colophon:

इति श्रीमदद्वैतविद्याचार्यश्रीनिवासविपश्चित्सूनुना अलमेलुमङ्गागर्भसंभवेन वाधूलकुल-तिलकेन **गरुडध्वजेन** कृते **तन्त्रसिद्धान्तसंग्रहे** नवमस्याध्यायस्य प्रथमः पादः

End:

सोमेन यजेतेति । अनेन यागो विधीयते. . . . . तमालभेतेत्यत्रापि आलभेन पात्नवतं कुर्यादिति आलम्भसंस्कार एव . . . . . विधीयते ।

1557

VB 858 **भाट्टदिनकरः**

Beginning:

ख्यातानतपरित्राणोऽधीतोऽपारकृपानिधिः ।
सीतया दीव्यमानो मे दाता भवतु संपदाम् ।।

श्रीगणेशाय नमः

यज्जगद्वितनुते विषमं यद्बोधने नयवशा श्रुतिरास्ते ।
देववृन्दमपि यद्वशमास्ते कर्म तज्जयति मुक्तिनिदानम् ।।
भाट्टे दिनकरं ग्रन्थमसत्तर्कतमोपहम् ।
तनोत्युमारामकृष्णौ नत्वा दिनकरः सुधीः ।।

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्, तस्मादनित्यमुच्यते । अथातो धर्मजिज्ञासेति सूत्रे को धर्मः कथं लक्षणकं कान्यस्य साधनानि । कानि साधनाभासानि । किं परश्चेति भाष्ये चाकारप्रश्लेषेण चतुर्विधं धर्माधर्मनिरूपणं प्रतिज्ञातम् ।

End:

अतः शक्तेनापि श्रुतौ स्मार्ते वा काम्येऽपि कर्मणि स्वसूत्रोक्तान्येवाङ्गानि कर्तव्यानि । बहु अल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितं तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेदिति वचनस्य संकोचे प्रमाणाभावे काम्येऽपि प्रवृत्तेः । गृह्यसूत्राणां साधारण्यसाधनं तु कपालं भगालमिति ब्रूयादित्यादि गृह्योक्तधर्मस्य साधारण्यार्थं, न तु स्वगृह्योक्तं कर्मणि गृह्यान्तरोक्ताङ्गप्राप्त्यर्थम् । **सोमेश्वरो**ऽप्येवमाह । अधिकरणप्रयोजनं तु पूर्वपक्षे पुरोडाशं चतुर्धा करोतीत्यस्याग्नेयं

चतुर्धा करोतीति शाखान्तरवाक्येनोपसंहारः कर्मान्तराङ्गत्वात् सिद्धान्ते उपसंहार इति वदामः ।।

Colophon:

रामेश्वरशर्मणः प्रपौत्रो नारायणशर्मणः पौत्रः ।
श्रीरामकृष्णसूनुर्दिनकरशर्माकरोदमुं ग्रन्थम् ।।

इत्युमारामकृष्णसुतदिनकरकृते **भाट्टदिनकरे** द्वितीयस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः

1565

VB 871 **शास्त्रदीपिकाव्याख्या (न्यायकिरणावली)**

Beginning:

. . . . . प्रत्याम्नानेन . . . . . उपदिष्टैः शरैरतिदिष्टानां कुशानामेककार्यतया प्रतिषेधेन . . . . . लक्षणार्थलोभाद् बाधः । अथ . . . . . यथास्ति यज्ञपक्षे जपस्यास्य . . . . .

End:

अग्नीषोमीयं पशुमालभेतेति चोदना । एकत्वादेकमेव पशुयागपरम. . . . . पूर्वप्रयुक्तं चतुरवत्त. . . . . तीत्येतत्. . . . . पञ्चावत्तविधानादिदमपि परमापूर्वप्रयुक्तमेवेति तत्साधनेषु हृदयाद्यङ्गेषु सर्वत्र. . . . . अवदानं कर्तव्यमिति ।।

Colophon:

इति श्रीमदद्वैतविद्याचार्यदिवाकरसूनोरलमेलमङ्गागर्भसंभवस्य वाधूलकुलतिलकस्य **सूर्यनारायणस्य** कृतौ **शास्त्रदीपिकाव्याख्यायां न्यायकिरणावल्यां** दशमस्याध्यायस्य सप्तमः पादः

1576

VB 873(a) **अपूर्ववादार्थः**

Beginning:

'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादौ तत्तद्विजातीयफलपूर्ववर्तिध्वंसप्रतियोगिनो ज्योतिष्टोमादेः स्वजन्यव्यापारं विना तत्फलसाधनत्वरूपविधिबोधितेष्टसाधनत्वस्यानु . . . विजातीयतत्फलपर्यन्तस्थायी विजातीयतत्तज्ज्योतिष्टोमादिजन्यो व्यापारः कल्पनीयः । कार्यपूर्वकालवृत्तिध्वंसप्रतियोगितासमानाधिकरणतायाः व्यापारजनकताव्याप्यत्वात् ।

End:

चरमपुंजातिकल्पनं कल्पनमेव न तु प्रामाणिकम् । घटादिपदस्थले तु प्रमाणान्तरसिद्धानां घटादीनां घटादिपदनिरूपितशक्यतावच्छेदकत्वं कल्पितम्, न तु शक्यतावच्छेदकतयैव घटादिजाति-

सिद्धिरिति । तस्मात् दृष्टरूपाप्रामाणिकपदार्थानभ्युपगमे न काचित् क्षतिरिति नव्यपरिशीलितः पन्था इति ।

Colophon:

अपूर्ववादः समाप्तः

1578

VB 422 दुरूहशिक्षा

Beginning: (fol. 12)

यत्त्वत्र यदाहवनीये जुहोतीत्यस्यानारभ्याधीततया तत्तत्प्रकरणपर्यालोचनया अपूर्वसाधनतया होमावगतिसमये भेदनहोमादीनामपि अपूर्वसाधनतयावगतिसंभवेन जुहोति । तात्पर्यविषयत्वसंभवाद् भवत्याहवनीयसंबन्ध इति । तन्न । अनारभ्याधीतमपि ह्येतत्प्रकरणान्तरस्थितमपि यदेव द्राग् अपूर्वीयतयावगतं तदेव लक्षयेत् न तु नैमित्तिकतया विलम्बितावगतापूर्वीयताकं भेदनादिहोममपि ।।

Colophon: (fol. 77a)

इति श्रीमन्नल्लबोम्मकुलार्णवपूर्णचन्द्रचिन्नमाम्बागर्भशुक्तिमुक्ताफलब्रह्मण्यबिरुदाङ्कचोक्कनाथभूपालप्रियसचिवचिन्नबोम्मभूपालहृदयकुहरविहरमाणसाम्बशिवप्रेरितेनाप्ययदीक्षितेन विरचितायां दुरूहशिक्षायाम् अपूर्वविधिलक्षणाक्षेपसमुद्धारभङ्गो नाम पञ्चमस्तरङ्गः

(fol. 77 b):

अथ विधिरसायने दूषितं नियमविधिलक्षणं तन्नव्याः समर्थयन्ते । अप्राप्तांशपरिपूरणफलकविधित्वं नियमविधित्वम् ।

End:

कथं बत निरुध्यतां कमलनालसूत्रैस्त्वया
मदत्रुटितशृङ्खलावलयबन्धनः सिन्धुरः ।
कृतं विधिरसायने तदिह दूषणान्वेषणै-
र्वरं पुरहरे चिरं मन इदं सखे स्थाप्यताम् ।।

Colophon:

इति श्रीमन्नल्लबोम्मकुल + दुरूहशिक्षायां परिसंख्यासमर्थनभङ्गः ।

कर्पूरगौरदेहाय कल्याणगुणशालिने ।
करस्फुरत्पुस्तकाय दक्षिणामूर्तये नमः ।।

दुरूहशिक्षा समाप्ता

1604

VB 912 ब्रह्मसूत्रभाष्यव्याख्या (भाष्यरत्नप्रभा)

Beginning:

. . . . . .

श्रीशंकरं भाष्यकृतं प्रणम्य व्यासं हरिं सूत्रकृतं च कुर्वे ।
श्रीभाष्यतीर्थे परहंसतुष्टचै वाग्जालबन्धच्छिदमभ्युपायम् ।।
विस्तृतग्रन्थवीक्षायामलसं यस्य मानसम् ।
व्याख्या तदर्थमारब्धा भाष्यरत्नप्रभाभिधा ।।
श्रीमच्छारीरकं भाष्यं प्राप्य वाक्शुद्धिमाप्नुयात् ।
इति श्रमो मे सफलो गङ्गां रथ्योदकं यथा ।।

इह स्वाध्यायोऽध्येतव्य इति नित्याध्ययनविधिनाधीतसाङ्गस्वाध्याये तद्विजिज्ञासस्व, सोऽन्वेष्टव्यः स विजिज्ञासितिव्यः, आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति श्रवणविधिरुपलभ्यते ।

End:

तस्माद् विवेकादिसाधनसंपन्नस्य श्रवणाद्यावृत्तिनिरस्तप्रतिबन्धस्याखण्डात्मबोधात् समूलबन्धध्वंसे सति आविर्भूतनिष्कलङ्कानन्तस्वप्रकाशचिदानन्दात्मनावस्थानमिति सिद्धम् ।

नानाविधग्रन्थजातं वीक्ष्य सम्यग्यथाविधि ।
शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे ।।

Colophon:

परमहंसपरिव्राजकाचार्य-श्रीगोविन्दानन्दभगवतः कृतौ भाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य चतुर्थः पादः

Verses found after the colophon:

रामानन्दगुरुं प्रसन्नवदनं कारुण्यपूर्णेक्षणं
श्रद्धार्हं परहंसधर्मनिकराच्छुद्धं समाधेः परात् ।
. . . . . विषयैर्विद्वत्कुलैः सेवितं
वन्देऽहं . . निजखेदनिवहध्वंसं यतीनां वरम् ।।
संसाराग्निशिखावलीढकरिभिर्मुक्ताघसंघैर्नुतो
यस्यानुस्मरणात् कृपाजलनिधेः सर्वार्थसिद्धिं जनाः ।
प्राप्ता दिष्टवशात् . . . . . संस्मृता ह्येकदा
दत्ते सोऽर्थमभीप्सितं विजयते रामाख्यतीर्थो गुरुः ।।

नत्वा राममुनिं पचेलिमहृदा श्रद्धायुताः प्राकृतै-
दुर्लभ्यं यदलं कवीन्द्रनिवहाः शान्ता भवध्वंसकम् ।
विज्ञानं प्र . . . . . र्जनाः
प्रा . . स्य . जाश्रुतेर्निवहजं तद्वाच्यमित्यत्र किम् ।।
विद्यां तनोतु मुनिवृन्दनिषेव्यमाणां
संसारवारिनिधिलङ्घनपोतरूपाम् ।
रामो गुरुर्मम मुनिर्निगमान्तवेद्यो
दीक्षां वहन् निजजनाघनिबर्हणाय ।।

Scribe adds:

कृष्णेन शंकराय लिखितम्

1616

VB 883 **अद्वैतप्रकरणम्**

Beginning:

सदेव सोम्येदमग्र आसीत् । तन्नित्यमुक्तमविक्रियं सत्यज्ञानानन्दं परिपूर्णं सनातनमेकमेवाद्वितीयं ब्रह्म इत्यादि पैङ्गलोपनिषद्वाक्ये ब्रह्मणः अद्वितीयत्वं प्रतिज्ञायते न वेति विप्रतिपत्तिः । अत्र विधिकोटिरद्वैतवादिनाम् । निषेधकोटिर्विशिष्टाद्वैतवादिनाम् । अत्र विशिष्टाद्वैतवादिनामेव . . . . सदेव सोम्येदमग्र आसीदित्यत्र परिदृश्यमान . . यदादिप्रपञ्चस्य उपादानभूतब्रह्मतादात्म्यमेव प्रतिज्ञातं नाद्वितीयत्वं तन्नित्यमुक्त्यादौ संसारसंबन्धसामान्याभावः । अन्यथा भावराहित्यं भूतिद्वयनिबोधकत्वं सातिशयज्ञानवैशिष्ट्यमानन्दप्राचुर्यं देशकालपरिच्छेदराहित्यम् एकत्वं स्वसमानवस्त्वन्तरराहित्यमित्यादयो विशेषा अविवक्षिता उपक्षिप्ताः । न द्वितीयत्वम् ; अन्यथा ब्रह्मेत्यनेनैव स्वरूपलाभे विशेषणानां वैयर्थ्यमवर्जनीयं स्यात् । अत एभिर्विशेषणैस्तद्विरुद्धं सद्वितीयत्वमेव सुप्रतिज्ञातं भवति ।

End:

यच्चेत्यादिनानर्थ एव स्यादित्यन्तेन यत्पदं ब्राह्मोपनिषद्वाक्यतात्पर्यवर्णनं तत्तथैव । तथापि ब्रह्मणः उपादेयभूताचिदभेदस्य न्यायसहस्रविरुद्धत्वात् तद्विशिष्टसिद्धेरसंभवेन तादृशतात्पर्यवर्णनं तन्मतानुकूलमेवेति । अलं बहुना । तस्मादन्यथासिद्धैः प्रमाणैः बलवतः तर्क . . . . . .

. . . . विरुद्धार्थभञ्जकैर्मुनिरञ्जकैः
निर्णोतोपनिषद्वाक्यतात्पर्या हि मुमुक्षवः ।।
. . . . कृपापात्रः निर्विशेषचिदात्मना ।।

1617

VB 935(f) **अद्वैतमकरन्दः**

यत्पादपद्ममकरन्दजुषां नराणां
संसारघोरभुजगान्न भवेत् स्म भीतिः ।।
सच्चिद्घनं सकलसौख्यलवाम्बुराशिं
श्रीदक्षिणाभिमुखमूर्तिमहं नमामि ।।
एतावदेव खलु पुंभिरवाप्तुमर्हं
यच्चेतसो निलयनं निजतत्त्वबोधे ।
आक्रोशनं श्रुतिशिरांसि यदर्थमेव
कुर्वन्ति येन हि भवेत् पुरुषः सुखाब्धिः ।।

End:

अज्ञानमेव न कुतो जगतः प्रसङ्गः
जीवेशदेशिकविकल्पकथापि दूरे ।
एकान्तनिर्मलचिदेकरसस्वभावे
ब्रह्मैव केवलमहं परिपूर्णमस्मि ।।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकराचार्यविराचिताद्वैतमकरन्दः संपूर्णः

1624

VB 935(e) **अद्वैतानुभूतिः**

Beginning:

अहमानन्दसत्यादिलक्षणः केवलः परः ।
सदानन्दादिरूपत्वात् तेनाहमचलोऽद्वयः ।। १ ।।
मेघयोगाद्यथा नीरं करकाकारतामियात् ।
मायायोगात् तथैवात्मा प्रपञ्चाकारतामियात् ।। २ ।।
वर्षोपलमिवाभाति नीरमेवाभ्रयोगतः ।
वर्षोपलविनाशेन नीरनाशो न हि क्वचित् ।। ३ ।।

End:

विश्वादिकत्रयं यस्मिन् परमात्मनि सत्यवत् ।
स एव परमात्माहं विश्वादिकविलक्षणः ।। ५६ ।।

विराडादित्रयं भाति यस्मिन् साक्षिणि सत्यवत् ।
स एव सच्चिदानन्दलक्षणोऽहं स्वयं प्रभुः ।। ५७ ।।
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।
पलालमिव धान्यार्थी त्यजेद् ग्रन्थमशेषतः ।। ५८ ।।
उल्काहस्तो यथा कश्चिद् द्रव्यमालोक्य तां त्यजेत् ।
ज्ञानेन ज्ञेयमालोक्य ज्ञानं चापि परित्यजेत् ।। ५९ ।।
तस्माज्ज्ञानी नित्ययुक्त एकभाक्तिर्विशिष्यते ।
तस्माज्ज्ञानाङ्गभक्त्यैव सिद्धिं विन्दति निश्चितम् ।। ६० ।।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्य-श्री**मच्छंकरभगवत्पाद**कृतौ सात्त्विकब्रह्मविद्याविलासे **अद्वैतानुभूतिः** समाप्ता

1625

VB 463(g) **अद्वैताष्टकम्**

Beginning:

यदस्य जन्मस्थितिभङ्गकारणमकारणं केवल . . . . . ।
निरन्तरं नीलघनं निरञ्जनं तदस्मि साक्षादिति मौनमाश्रये ।। १ ।।
शरीरबुद्धीन्द्रियचेष्टनं यतो यतश्च सत्तास्फुरणं तदात्मना ।
स्वयं प्रभातीदमविक्रियं च यत् तदस्मि साक्षादिति मौनमाश्रये ।। २ ।।

End:

यदप्यधस्तादपि चोपरिष्टात् पश्चात् पुरस्तादपि दक्षिणस्याम् ।
अप्युत्तरस्यां परिपूर्णमव्ययं तदस्मि साक्षादिति मौनमाश्रये ।। ८ ।।
वाच्याभावे वाक्प्रवृत्तिः कुतो मे मेयाभावे धीप्रवृत्तिः कुतो मे ।
तस्मात् तूष्णीमेव सर्वेषु कालेष्वासेऽद्वैतब्रह्मभावेन नित्यम् ।। ९ ।।

1628

VB 1203(j) **असङ्गात्मप्रकाशिका**

Beginning:

अहं सत्यचिदानन्दलक्षणं ब्रह्म केवलम् ।
अनन्तमद्वयं पूर्णं निर्विशेषं भवामि यत् ।।
असत्याधारतः सत्यचिदाहं साक्षिमोहितः ।
प्रियः प्रियतमत्वेन सत्यज्ञानसुखात्मकः ।।

मत्सत्तया जगत्सर्वं सदिवास्ति मृषात्मकम् ।
मत्स्फूर्त्या स्फूर्तिवद्भाति प्रियवन्मत्प्रियेण तु ।।
अतोऽहं सच्चिदानन्दलक्षणं ब्रह्म केवलम् ।
असज्जडादिकं विश्वं मायया मयकल्पितम् ।।

End:

स्फटिकमणिमण्डपगतः
शुनकः प्रतिबिम्बशुनकजातेन ।
कलहायते यदेकः
स्वाविद्याबिम्बितस्त्वेवम् ।। १०८ ।।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमन्नारायणेन्द्रयोगिशिष्य-श्रीमद्गोविन्देन्द्रमुनिवर्य-विरचितमसङ्गात्मप्रकाशिकाप्रकरणं समाप्तम्

Scribe adds:

सौम्य कार्तिक शुद्धपञ्चमी स्थिरवारं रोजु व्राशिन असङ्गात्मप्रकाशिकालु ।।

1638

VB 903(a) **आत्मानुसंधानम्**

Beginning:

सत्योऽहं निर्द्वैतोऽहं निराकारोऽहमद्वयः ।
निराधारोऽहमत्यन्तं निर्लिप्तः पुरुषोऽस्म्यहम् ।।

End:

क्षेत्रज्ञः परमात्माहं श्रीमदाचार्यवाक्यतः ।
इत्थमात्मानुसंधानं यः करोति सदा भुवि ।।
स जीवन्मुक्तिमाप्नोति सायुज्यं चापि गच्छति ।
यत्कृपालवतस्तीर्णो मया संसारवारिधिः ।
तन्नमामि सदात्मानुसंधा . . . नम् ।।

1651

VB 1206 **गुरुस्वरूपविचारः**

Beginning:

ध्यायं ध्यायं परां विद्यां स्मारं स्मारं गुरोः पदम् ।
गुरुस्वरूपं वक्ष्यामि विवेकाय मनीषिणाम् ।।

इह खलु मुमुक्षूणां, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुत्या ज्ञानार्थं गुरूपसर्पणमुक्तम् । स गुरुः कीदृशः इत्याकाङ्क्षायां तत्रैव ब्रह्मनिष्ठमिति विशेषणमुक्तम् । तद् ब्रह्मनिष्ठत्वं नाम ब्रह्मवित्त्वम् ब्रह्मविदाप्नोति परमिति श्रुतेः । अथेदानीं विशेषणज्ञानं विना विशेष्यज्ञानस्यासंभवात् किं नाम ब्रह्मवित्त्वमित्यत्र विचार्यते । तथाहि ब्रह्म वेदः तद्वेत्तीति ब्रह्मवित् वेदविदित्यर्थः । वेदशब्दवाच्याश्च ऋग्वेदादयः । तद्विदो नित्यानन्दस्वस्वरूपफलप्राप्तिरिति केचिदभिजानन्ति । तदिदमश्रुतवेदान्तवाक्यवैदिकजनदुर्बुद्धिविजृम्भणमेव ।

End:

एवं भूतं ज्योतिर्मयाक्षरं यो वेद स एव ब्रह्मविदिति सिद्धम् । अयमेव वश्येन्द्रियत्वात् जितेन्द्रिय इति व्यवह्रियते । यदाहुः—

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ।।
तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ।

इति श्रुत्या इन्द्रियधारणास्थैर्योक्तेः । एतेनैवेन्द्रियनिग्रहाप्रयासोऽपि निरस्तः । किं च ज्योतिर्मयाक्षरलाभेनैव स्वभावादेव इडापिङ्गलयोरेकीभावादयमेव योग इति गीयते । एतेनैव प्रयासश्वासनिरोधप्रयासकारी हठयोगोऽपि प्रत्युक्तः । अपि चायमेव निस्पृह इति ज्ञायते । तत्कथमिति चेत् उच्यते—निर्गता स्पृहा इच्छा यस्य स निःस्पृहः . . . दिभ्यो धातुजस्येत्युत्तरपदलोपः । तथा चेच्छारहितेत्यर्थः । आनन्दमयाक्षरलाभात् परं पुनरिच्छानुदयात् ।

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ।।

नातः परं वेदितव्यं हि किंचित् । आनन्दं ब्रह्मणो विद्वान्न बिभेति कदाचनेति श्रुतिवचनाच्च । यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् । इति स्मरणाच्च ।।

1665

VB 904(b) **पञ्चीकरणभावप्रकाशिका**

Beginning:

ओं
प्राज्ञतैजसविश्वाख्यो य आत्मा मायया भवत् ।
यत्रैतत्त्रितयं नास्ति सोऽहं सच्चित्सुखाद्वयः ।।

अस्ति श्रुतिशतगम्यं विदुषां यच्चरण एव कैवल्यम् ।
कैवल्ययोगिचरणं तत एव प्रथितमाश्रये ।।
तमिमं तिमिरनिकरदूरं मायामयं शमयन्मनः ।
कुमुदममलीकुर्वंस्तापं च संस्मृतिजे हरन् ।।
सपदि हृदयाकाशे यः काशते मम संततम् ।
भवतु गुरवे तस्मै ज्ञानेन्द्रचन्द्रमसे नमः ।।
ओंकारैक्यावबोधे कतिचिदुपनिषद्भाष्यभङ्गीभिरीक्षा-
भावप्राप्तावकाशा स्थितिमिव दधते केषुचिद्ये दुरूहाः ।
तानेतानद्य पञ्चीकरणकृतिजुषो नव्यनारायणेन्द्र-
प्राया ज्ञानेन्द्रभिक्षोः प्रशमयति बहिश्चारिणी कापि जिह्वा ।।

श्रीमच्छंकरभगवत्पादाचार्याः इह जन्मनि जन्मान्तरे वा कृतसुकृतपरिपाकासादित-तत्त्वशुद्धिवशादुत्पन्ननित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपत्त्या ब्रह्मजिज्ञासूनां श्रवणमनन-निदिध्यासननिष्ठानां परमहंसपरिव्राजकानामारुण्युपनिषदा त्रिसंध्यादौ स्नानमाचरेत्, संधि समाधावात्मन्याचरेदिति समाधिरुपदिष्टः, तत्प्रकारं दर्शयितुं पञ्चीकरणं नाम अनुष्ठानपद्धतिरूपं प्रकरणमुपादिशन् ।

End:

ओंकार इति पाठः प्रामादिकः । यदि च शिष्टानां केषांचित् पाठदर्शनात् तत्रादरः तदा उक्तार्थं एव स पाठो नेयः, तन्नयनप्रकाशश्चैवम् । मकार ओंकारस्ते विश्वादिसमस्तभेदस्य प्रत्य-गात्मनो ब्रह्मत्वप्रतिपत्तिप्रकार एव पञ्चीकरणे प्रकाश्यत इति मुमुक्षुभिः परमहंसपरिव्राजकैः ओंकारेण उक्तप्रकारेण आत्मा ब्रह्मतया प्रतिपत्तव्य इति सिद्धम् ।।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीकैवल्येन्द्रसरस्वतीपूज्यपादशिष्य-श्रीज्ञानेन्द्रसर-स्वतीपूज्यपादशिष्य-श्रीमद**भिनवनारायणेन्द्रसरस्वती**विरचितायां **पञ्चीकरणभावप्रकाशिकायां** द्वितीयः परिच्छेदः

Additional verses at the end:

कुरुविन्दकुसुम्भकुङ्कुमाभामरविन्दारिकिशोरकावतंसाम् ।
पुरहन्तरि पुंखितानुरागां परतन्त्रां कृपया परामुपासे ।।
गरलाशनगेहिनीमुपासे तरलालंकृततारहारभूषाम् ।
सरलावयवां सरोरुहाक्षीं कुरलारोपितकोकवैरिरेखाम् ।।
मकरन्दकणार्द्रमानसं वा मरुतामञ्जलिलालितं पदं वा ।
शयनं पवमानपारणं वा वितरत्यम्ब कटाक्षवीक्षणं ते ।।

1669

VB 903(b) **पञ्चीकरणव्याख्या**

Beginning:

सच्छब्दवाच्यमित्यादिना ब्रह्मणि अविद्यादिसर्वप्रपञ्चाध्यारोपः संग्रहेण प्रतिपाद्यते ।

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
तस्मात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ।।

इत्युक्तक्रमेण तत्र प्रथमपादस्य तात्पर्यमाह । सच्छब्दवाच्यमविद्याशबलं ब्रह्मेति । सदेव सोम्य इत्यादि श्रुतौ सच्छब्देन शक्त्या प्रतिपाद्यं बहुलं . . . . . .

End:

अव्याख्यातांशस्यापि तत्र संप्रदायभेदेनान्ध्रपाठादिवत् प्रामाणिकत्वसंभवात् । न च सांख्य-मतानुसारित्वादनुपादेयत्वम् । अविद्याशबलपदोपादानात् । तपसा चीयते ब्रह्म तत इत्यादि श्रुत्यनुसारित्वाच्च दर्शितत्वादिति ध्येयम् ।

पञ्चीकृतेत्यादिग्रन्थस्तु **आनन्दगिर्या**चार्योक्तप्रकारेण स्पष्टार्थः ।

Additional verses at the end:

यत्सूक्तिश्रुतियुक्तिदिव्यतटिनीस्रोतस्खलद्विप्रुषः
स्वादो यस्य जडस्य चेदपि मनाक् सद्यः स धन्यो भवेत् ।
यच्चित्तं नवनीतलभ्यभ्रदिमक्षेमोदये भाग्यतो
रामानन्दमुनीन्द्रतीर्थचरणश्रीदेशिकेन्द्रं भजे ।।
दैवाद्यस्य पदाम्बुजं यदि भजेद्यः कोऽपि मुग्धो जन-
स्तीव्रद्वन्द्वनिदाघतप्तहृदयस्तच्छान्तये विभ्रमन् ।
सद्यो विश्राममुत्तमं स लभते पुण्यैः स्वकैः पूर्वकैः
रामानन्दमुनीन्द्रतीर्थचरणश्रीदेशिकेन्द्रं भजे ।।
आचार्यवाण्यर्णवमध्यदीप्यं तत्त्वार्थरत्नं सुधियो लभन्ते ।
आनन्दशब्दोत्तररामनामश्रीतीर्थमाश्रित्य भजे गुरुं तम् ।।

1671

VB 905 **पुरुषार्थरत्नाकरः**

Beginning:

पुरुषार्थरत्नाकरे योगशास्त्रमारभ्यते । एवं तत्त्वंपदार्थविवेकादेव यस्य निसर्गशान्त-दर्पध्वान्तस्य सूक्ष्मबुद्धेरैकात्म्यापरोक्षमुपजायते, तस्य तदानुषङ्गिको मोक्ष इति न कार्य

किंचिदवशिष्यते। अनेनैवंविधस्य तु विवेकिन एव तदपरोक्षाय सहकारिकायां योगोऽप्यपेक्षणीयः। यथा **श्रीपराशरः**—स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः।

End:

एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीत्यादिदर्शनात् प्रव्रजितेन प्रत्यगेकरसपरमात्मतत्त्वसाक्षात्कारयोगे परमात्माराधने सम्यक् प्रणिधातव्यमित्यशेषमतिमङ्गलम्। + + +

विद्या हृद्यानवद्या विपुलमपि यशो वग्विलासा विचित्राः
श्लाघा विद्वत्समाजे शुभमपि चरितं शाश्वती सा च लक्ष्मीः।
भक्तिस्तस्यैव देवद्विजगुरुषु दृढा यत्र कुत्रापि धन्ये
तत्तादृक्षं कटाक्षं कमपि कलयते बालकृष्णो गुरुर्नः॥

Additional verse at the end:

विद्याहृद्यानावद्या+बालकृष्णो गुरुर्नः॥
मधुरमधुरं साचिस्मेरं सदैव मुखाम्बुजे
शिशिरशिरिरं स्निग्धेऽपाङ्गे दयामसृणं हृदि।
दिनकरशताभिख्या विख्या . . . . . रोम
स्फुरतु सततं कृष्णानन्दाभिधानमिदं महः॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीकृष्णानन्दभगवत्पूज्यपादशिष्य-श्रीमदात्रेयगोत्रकुरविशेरिकुलमणिदीपरङ्गनाथसूरिविरचिते **पुरुषार्थरत्नाकरे** मुक्तगतिविवेको नाम पञ्चदशस्तरङ्गः॥

तरलमनसां सर्वज्ञानां सभासु वदावदैः
सुरगुरुरयं सा वा संज्ञान्तरेण सरस्वती।
वटतरुतटीवासी विद्यागुरुः किमिति स्थितो
जयति नितरां **कृष्णानन्दो** गुरुर्जगतीकृती॥
पूर्णानन्दाय गुरवे पुरुषोत्तमयोगिने।
शिवरामसरस्वत्यै श्रीमद्गोपालयोगिने॥
स्वयंप्रकाशमुनये रामभद्रव्रतीन्दवे।
कृष्णानन्दसरस्वत्यै करोम्यनुकलं नमः॥
त्रय्यन्तप्रतिपादितं प्रतिमुहुस्तात्पर्यलिङ्गैः स्फुटै-
स्तत्त्वं किंचन तापसैः परिचितं तापत्रयोन्मूलनम्।
कृष्णानन्दसरस्वतीति कलिताभिख्यं कृपालुं गुरुं
विद्यानामधिदेवतामहरहर्वन्दे परां देवताम्॥

भजन्तु कतिचिद्भवं भवनिवृत्तिबद्धादरा
व्रजन्तु च परे मुहुर्विबुधसिन्धुमुख्यां नदीम् ।
मखैर्मघवदादिभिः परिचरन्तु चान्ये त्वहं
गुरुप्रवरपादुके शरणये शरण्ये नृणाम् ।।
सारं सूक्तिसुधाझरीपरिगतं षड्दर्शनीविस्तरं
माधुर्यं मकरन्दफाणितमधुद्राक्षानिभानां गिराम् ।
शीलं साधुजनादृतं शिशिरितापाङ्गश्रि मद्दैवतं
सेवे सुन्दरमन्दहासवदनं श्रीबालकृष्णं गुरुम् ।।
श्रीबालकृष्णानन्दसरस्वती-दक्षिणामूर्तिगुरुचरणारविन्दाभ्यां नमः ।।

1672

VB 314(a-7) **प्रणवार्थप्रकाशिका**

Beginning:

प्रणवार्थदीपिका

पञ्चेळादि दशेन्द्रियाणि विषयाः प्राणाः षडप्याश्रयाः
रागास्ते करणादि चाष्टविषयाः सप्ताप्यमी धातवः ।
नाड्युन्मांसलदूषणेषणगुणावस्थे च तापास्त्रिकाः
कोशाः पञ्च तनूश्च षण्णवतितत्त्वं हि जीवात्मनाम् ।।
प्रज्ञानांशुप्रतानैः स्थितचरनिकरैर्व्यापिभिर्व्याप्तलोकान्
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ।
पीत्वा सर्वानशेषान् स्वपिति मधुरभुङ् मायया मोहयन्नो
मायासंख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ।।
यो विश्वात्मा विधिजविषयान् प्राश्य भोगान् स्थविष्ठान्
पश्चाच्चान्यान् स्वमतिविभवज्योतिषा स्वेन सूक्ष्मान् ।
सर्वानेतान् पुनरपि शनैः स्वात्मनि स्थापयित्वा
हित्वा सर्वान् विशेषान् विगतगुणगणः पात्वसौ नस्तुरीयः ।।

End:

अहंकारादिस्वाहान्तो वेद्यो नात्मा घटादिवत् ।
तत्साक्षी सर्वगो ज्योतिरात्मा त्वंपदलक्षितः ।।
स देवेत्यादिवाक्योक्तः सर्वकारणमद्वयम् ।
एकमेवाद्वितीयं यत्तच्छब्देनोपलक्षितम् ।।
तत्त्वमोः संगतौ सत्यां द्वैतपारोक्ष्यवर्जितम् ।
विरुद्धपदसंत्यागात् पूर्णबोधोऽवशिष्यते ।।

Colophon:

प्रणवार्थप्रकाशिका समाप्ता

1673

VB 905 ब्रह्मतत्त्वसुबोधिनी

Beginning:

. . . . . .

श्रीनारायणरूपांस्तानखण्डानन्ददेशिकान् ।
नत्वा विमुक्तये ब्रूमो ब्रह्मतत्त्वसुबोधिनीम् ।।
निर्मलाय प्रशान्ताय भक्तानां मुक्तिदायिने ।
सच्चिदानन्दरूपाय श्रीरामाय नमो नमः ।।

लोके तावन्निष्कामनया अनेकजन्मकृतसुकृतपरिपाकवशात् परिशुद्धान्तःकरणानां केवल-मोक्षमात्रलिप्सूनां बहुग्रन्थावलोकनेष्वलसानां प्रत्यगभिन्नब्रह्मतत्त्वनिरूपणार्थं तावदध्यारोपापवाद-प्रकारं निरूपयामः । अस्ति हि प्राक् सृष्टेः निरस्तसमस्तप्रपञ्चं स्वप्रकाशचिदेकरसं ब्रह्म ।

End:

एवं शून्यवादिमतं निराकृत्य इदानीं बादरायणाचार्यसिद्धान्तः आनन्दमय आत्मेत्युच्यते । विज्ञानमयादान्तर आनन्द . . . तस्माद्विज्ञानमयात् अन्योऽन्तर आत्मानन्दमय इति । अस्तीत्येवोपलब्धस्य तत्त्वभावेन चेति श्रुतिसद्भावाद् आनन्दमयः आत्मेत्यभ्युपगम्यते . . . सिद्धान्तः । बादरायणाचार्यसिद्धान्तः । आनन्दमय आत्मा न भवति । कुत इति चेत् आनन्दमय इत्यत्र विकल्पः विकारार्थे मयट् । . . .

1678

VB 926 भेदधिक्कारव्याख्या (उज्ज्वला)

Contents:

नरसिंहशब्दार्थनिर्णयः, जीवैक्यानुमानम् , असत्यात्त . . पमर्दकसत्यसिद्धिसमर्थनम्, सत्यस्य ज्ञानादनिवृत्तिसमर्थनम् , जीवस्य नित्यं पापाभावसमर्थनम् , मिथ्यात्वलक्षणान्तम् , ईश्वरस्य जीवाद्भेदे प्रत्यक्ष. . . . , भेदसंयोगभङ्गः, मनःप्रामाण्ये प्रमाणान्तरोच्छेदापादनम् , इन्द्रियलक्षणम्, आन्तरनित्यानुभवसमर्थनम् , इच्छादिस्वप्रकाशत्वभङ्गः, साक्षिनिरूपणम् , अन्यध्वंसक्षणि-कत्ववादः , मनसो मध्यमपरिमाणसाधनम् , ब्रह्मसाक्षात्कारे शब्दकरण. . . . . .

Beginning:

यत्रोत्पन्नं जगद्भाति मायया रज्जुसर्पवत् ।
स एवाहं विभुर्नित्यः सच्चिदानन्दलक्षणः ।।
ब्रह्माण्डकाण्डा यत् . . . . . ।
क्ष. . . . . .मां रक्षत्वभीक्ष्णशः ।।
सिद्धानन्तगतिर्दिगन्तसृमरस्फाराखिलाम्नायस-
त्सिद्धान्तस्फुरणादिसंभवयशःस्वच्छाय. . कृतः ।
अद्वानन्दविशुद्धचिद्धनबुधः संसेवितः सद्बुधैः
शुद्धानन्दगुरुर्विधुर्विजयते विध्वस्तमायातमाः ।।
श्रीशुद्धानन्दतीर्थानां गुरूणां चरणद्वयम् ।
नत्वा श्रीभेदधिक्कारसत्क्रियैषा प्रकाश्यते ।।

मृषेति मायाया जगज्जालस्य वा विशेषणम् । अनावृतस्य ब्रह्मणो जगदध्यासाधिष्ठानत्वं न संभवति ।

End:

साक्षात्कार इत्यस्याव्यभिचार इति शङ्कचम् अदृष्टद्वारा अभावज्ञानस्येश्वरवृत्तिज्ञान-करणकत्वात् प्रत्यक्षत्वाप्रसक्तेः ज्ञानाकरणकानुभवत्वं प्रत्यक्षत्वव्याप्यमिति चेत्, न लाघवेन दृष्टाद्वारकज्ञानाजन्यानुभवत्वस्यैव तत्र व्याप्यतया प्रयो. . . . . .

Scribe adds:

पञ्चहस्तं द्वादशाक्षं त्रिपञ्चाक्षसुलालितम् ।
विंशत्यक्षनिहन्तारं चाश्रयेऽष्टाक्षसुन्दरम् ।।

1688

VB 350(d) **महावाक्यार्थदीपिका**

Beginning:

नत्वा स्वयंप्रकाशार्यगुरोश्चरणपङ्कजम् ।
यथामति स्फुटं वक्ष्ये महावाक्यार्थदीपिकाम् ।।

महावाक्यानां चतुर्णामपि वेदानामुपनिषद्भागेषु साक्षाद् ब्रह्मप्रतिपादकतया स्थितानि चत्वारि वाक्यानि । तत्र ऋग्वेदगतं प्रज्ञानं ब्रह्मेति वाक्यम् । यजुर्वेदगतं अहं ब्रह्मास्मीति वाक्यम् । सामवेदगतं तत्त्वमसीति वाक्यम् । अथर्ववेदगतं अयमात्मा ब्रह्मेति वाक्यम् ।।

End:

आत्मा घटादिवद् देशकालवस्तुभिरपरिच्छिन्नत्वाद् अनन्तमद्वयवस्तुवत्, तत्तु व्यतिरेकाभावाद् अद्वयम् । एवं प्रतिपन्नात्मतत्त्वस्य जगत्प्रतीत्यभावात् ब्रह्मावशेषेणैव समाधिरित्याहुः श्रुतयः । अहं ब्रह्मेत्यवस्थानं समाधिरिति ।।

Colophon:

इति **श्रीविद्यारण्य**कृतौ पञ्चदशप्रकरणे महावाक्यविवेकव्याख्या संपूर्णा

1698

VB 933(a) **विवेकचूडामणिः**

Beginning:

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् ।
गोविन्दं परमानन्दं सद्गुरुं प्रणतोऽस्म्यहम् ।।
\+ + + +
इतः को न्वस्मि मूढात्मा यस्तु स्वार्थे प्रमाद्यति ।
दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषम् ।।
पठन्तु शास्त्राणि यजन्तु देवान् कुर्वन्तु कर्माणि भजन्तु देवताः ।
आत्मैक्यबोधेन विना न मुक्तिः प्रसिध्यति ब्रह्मशतान्तरेष्वपि ।।

End:

हितमिममुपदेशमाद्रियन्तां विहतनिरस्तसमस्तचित्तदोषाः ।
भवसुखविरताः प्रशान्तचित्ताः श्रुतिरसिका यतयो मुमुक्षवो ये ।।
संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथा-
खिन्नानां जलकाङ्क्षया मरुभुवि श्रान्त्या परिभ्राम्यताम् ।
अत्यासन्नसुखाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शय-
न्त्येषा शंकरभारती विजयते निर्वाणसंदायिनी ।।

Colophon:

इति श्रीमच्छंकरभगवत्पादकृतो विवेकचूडामणिः समाप्तः

Scribe adds:

सद्गुरुनाथस्वामिने नमः

मूले भुजङ्गं शिखरे विहङ्गं
शाखाप्लवङ्गं कुसुमेषु भृङ्गम् ।

यथा यथा चन्दनचारुवृत्तं
परोपकारार्थमिदं शरीरम् ।।
राजराजेश्वर्यै नमः ।।

1701

VB 935(a) **विवेकसारः**

Beginning:

बोधानन्दघनं निरस्तसकलं कारुण्यपूर्णेक्षणं
मूढानामुपदेशकं च सततं पापात्मनां पापहम् ।
वैराग्यस्य हि रागिणां सुखकरं संपादकं सर्वदा
श्रीमद्देशिक**वासुदेव**यतिनं मूढात्मकोऽहं भजे ।।
यस्यात्मभूतस्य गुरोः प्रसादादहं विमुक्तोऽस्मि शरीरबन्धात् ।
सर्वोपदेष्टुः **पुरुषोत्तमस्य** तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ।।
मूढान् विवेकिनः कृत्वा लोके सर्वोपदेशकः ।
यस्तिष्ठति च तं श्रीमद्वासुदेवगुरुं भजे ।।
अनुग्रहार्थं मर्त्यानां बालानां मोक्षसाधकः ।
विवेकसारः श्रोतॄणां रच्यते वै यथमति ।।

अध्यारोपापवादाभ्यां ब्रह्मस्वरूपं ज्ञातव्यम् । अध्यारोपः क इत्युक्ते वस्तुन्यवस्तुन आरोपोऽध्यारोपः । तत्किमित्युक्ते दृष्टान्तपूर्वकं निरूपयिष्यामः । सदृष्टान्तं वक्ष्यामः । शुक्तौ रजताध्यारोपः । रज्जौ सर्पाध्यारोपः । स्थाणौ पुरुषाध्यारोपः ।

End:

अखण्डात्माहमेवायमित्येवं यो विजिज्ञिवान् ।
स सर्वसंसृतेर्मुक्तो ब्रह्मानन्दं समश्नुते ।।
किमनेन बहूक्तेन प्रणीतौ द्वौ महात्मभिः ।
अविचाराद्धि संसारो विचारान्मोक्ष इत्युभौ ।।
प्रमादाद्वा यदज्ञानादिदं शास्त्रं मयेरितम् ।
तत्क्षम्यं च समालोक्य पण्डिताः समदर्शिनः ।।

Colophon:

इति विवेकसारे द्वादशवर्णकं समाप्तम्

1702

VB 459(d) **वेदान्ततत्त्वसारः**

Beginning:

. . . . . .

अवलम्ब्य दयासारं तत्त्वसारं करोत्ययम् ।।

ननु कोऽयं स्वप्रकाशशब्दा . . . स्वश्चासौ प्रकाशश्चेति . . . . . .
. . . . .प्रकाशादावतिव्याप्तेः । तस्यापि स्वत्वसमानाधिकरणप्रकाशत्वाधिकरणत्वात् । ननु प्रकाशशब्देन चैतन्यं विवक्षितम् । अतस्तत्र नातिव्याप्तिरिति. .वेद्यम् । ज्ञानमादायार्थान्तरता तस्यापि स्वत्वसमानाधिकरणचैतन्याधिकरणत्वात् । ननु ज्ञानशब्देन ज्ञानपदवाच्यत्वपर्याप्त्यधिकरणं चिदचिदात्मकं विशिष्टज्ञानं विवक्षितम् ।

End:

स च संनिकर्षः संयुक्तसमवायः । स च ज्ञानगोचराद्यज्ञानोत्पत्तावेव तदनन्तरजन्यज्ञान . . . . . विशेष्यकानन्तज्ञानोत्पत्तिरूपेति चेत् एकस्याः सामग्र्याः एकपदोत्पत्तिनियमात् । अन्यथा . . . . . .

1710

VB 23(f) **वेदान्तसारसंग्रहः**

Beginning:

श्रीगौरीरमणं नत्वा पीयूषांशुकलाधरम् ।
आत्मतत्त्वावबोधाय क्रियते **सारसंग्रहः** ।।

सत्त्वं रजस्तम इति गुणाः गुणत्रयसाम्या प्रकृतिः अनादिसदसदनिर्वचनीया ज्ञाननिर्वर्त्या भावे मायामलिनसत्त्वप्रधाना सैवाविद्या । अखण्डचैतन्यं ब्रह्ममायावच्छिन्नचैतन्यमीश्वरः । अविद्यावच्छिन्नमन्तःकरणावच्छिन्नं जीवः । प्रकृतिजन्याभिमानो महान् । महत्तत्वजन्योऽभिमानोऽहंकारः । मनोबुद्धिचित्ताहंकाराः अन्तःकरणम् ।

End:

अधिष्ठानं स्वरूपावगमोऽपवादः । अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमात्वम् ।

अध्यात्मविद्यासंकेतं सारसंग्रहतः सुधीः ।
विज्ञायाज्ञानमुन्मुच्य स्वात्मानमवधारयेत् ।।

1723

VB 935(b) **स्वानुभवविवेकसारमननम्**

Beginning:

नत्वा श्रीरामकृष्णाख्यस्वप्रकाशमुनीश्वरौ ।
नारायणानन्दवाणीपूर्णानन्दयतीश्वरौ ।।
अज्ञोऽप्यहं तत्प्रसादाच्छिवरामयतीश्वरः ।
स्वमनीषानुरोधेन मननाख्यं यथामति ।।
कुर्वेऽनुभवदाढर्याय मादृशां बोधसिद्धये ।
अल्पीयोऽपि वचो मेऽद्य सर्वेषां मुदमावहेत् ।।

लोके प्राणिनां दुःखं केनायातीति चेत् शरीरपरिग्रहेण । शरीरपरिग्रहः केनायाति, कर्मणा । कर्म केनायाति । रागद्वेषादिभिः ।

End:

स एव धन्य इति सकलश्रुतिमूलशास्त्राभियुक्तवचनानि प्रतिपादयन्ति ।

Colophon:

इति **स्वानुभवविवेकसारमननं** समाप्तम्

After the colophon:

दिने दिने च वेदान्तश्रवणाद् भक्तिसंयुतात् ।
गुरुशुश्रूषया लब्धात् कृच्छ्राशीतिफलं लभेत् ।।

ओंनमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यः । नमो नमः गुरुभ्यः सर्वेभ्यः । उपप्लवरहितप्रज्ञानघनप्रत्यगर्थो ब्रह्मैवाहमस्मि । ओं तत्सत् ।।

1724

VB 329(a) **हस्तामलकश्लोकाः (सव्याख्याः)**

This is the same work described in the Madras Catalogue D. 4780 but not the commentary attributed to Śaṃkarācārya. It is anonymous.

Beginning:

कस्त्वं शिशो कस्य कुतोऽसि गन्ता
किंनाम ते त्वं कुत आगतोऽसि ।
एतन्मयोक्तं वद चार्भक त्वं
मत्प्रीतये प्रीतिविवर्धनोऽसि ।।

श्रीपल्लचाख्यग्रामे कस्यचिद् द्विजस्य पुत्रत्वेनाविर्भूतदेहो जन्मान्तरानुष्ठितश्रवणादिना निवृत्तमिथ्याज्ञानो दिव्ययोगीन्द्रो मूढजनैः पिशाचत्वेनाभिमतः श्रीशंकराचार्यैः कस्त्वमिति पृष्टः सन् स्वानुभवं वदति । तेषां मुमुक्षूणामनुभवो भूयादिति प्राणिनामनुकम्पया द्वादशश्लोकैः आत्मतत्त्वमुपनिषदेकरसमधिगत्य प्रत्युत्तरच्छलेनाह—निमित्तमिति ।

End:

दृष्टान्तमाह । हे विष्णो चन्द्रकाणां जले यथा चञ्चलत्वं तथाहंबुद्धौ तवास्ति चञ्चलत्वम् । न परमार्थतः । तस्मादेकमेवाद्वितीयं ब्रह्मेति सिद्धम् ।। १२ ।।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दाचार्यशिष्यभूत-श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीशंकरभगवत्पूज्यपादकृत-व्याख्यासहित-हस्तामलकाचार्यकृतद्वादशश्लोकाः संपूर्णाः

1729

VB 950 **ब्रह्मसूत्रवृत्तिः (वेदान्तदीपः)**

Scribe adds:

अयं वेदान्तदीपिकाग्रन्थः नृसिंहयतिवरदेशिकस्य संनिधेः रघुनाथाचार्यस्य दासस्य सुन्दरराजस्य स्वहस्तेन लिखित्वा समर्पितमिति चेद्वदन्ति सन्तः ।।

परधनपरदारप्रस्मृताशेषकृत्या
निजगुणकलिकाभिर्लोकमामोदयन्तः ।
अविदितपरदोषा ज्ञानपीयूषपुण्याः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।।

1739

VB 161(a) **प्रमेयमाला**

Colophon:

इति वत्सकुलतिलक**वरदराज**सूरिविरचितायां **प्रमेयमालायां** यतिलिङ्गसमर्थने तृतीयः स्कन्धः

The following verse is found at the end:

सच्चेतोमधुकरबृन्दसेवनीयां
सौरभ्यं श्रुतिशिरसः समादधानाम् ।

वत्सानां कुलपतिरद्भुतामकार्षी-
दम्लानां **वरदगुरुः प्रमेयमालाम्** ।।

1743

VB 346(a) **दिव्यप्रबन्धश्लोकाः**

Beginning:

भद्रं भद्रं कोटिशस्ते सुभद्रं
मालाङ्गेन्द्राटोपदम्भोलिबाहो ।
कृष्णाङ्घ्र्योस्ते नीलमाणिक्यवर्ण
स्याच्छोणाब्जश्रीमुषोर्भद्ररक्षा ।।
तिरुप्पल्लाण्टुविवरम् ।

Contents:

Fol. no. 3 तिरुप्पल्लाण्टुविवरश्लोकम् १२
Fol. no. 4 ओरुनायकमाय्
Fol. no. 7 करप्पारि रामपिरानुक्कु
Fol. no. 10 कुरवैयाच्चियरुक्कु विवरम्
13a आरादवरुलमुदम्
13b कण्णनटियिनै

1744

VB 564 **प्रपन्नामृतम्**

Beginning:

राजच्छिद्रयुतोर्ध्वपुण्ड्रमनिशं **रामानुजाख्यं** मुनिं
काषायाम्बरमब्जसंनिभगलं कान्तोपवीतत्रयम् ।
भाषासंस्कृतवाग्विलासममृतं बद्धाञ्जलिं भास्वरं
श्रीवत्साङ्कमुखाखिलार्यशरणं श्रीभाष्यकारं भजे ।।
श्रीरङ्गराजपदपङ्कजराजहंसं
रामानुजार्यपदपङ्कजभृङ्गराजम् ।
श्रीशैलवंशकलशाम्बुधिपूर्णचन्द्रं
श्रीरङ्गराजगुरुमन्वहमाश्रयामः ।।

End:

यः प्रपन्नामृतं श्रुत्वा शास्त्रसारतमं शुभम् ।
सर्वान् कामानवाप्याथ स गच्छेद्वैष्णवं पदम् ।।

Colophon:

इति **श्रीप्रपन्नामृते** रामानुजचरित्रे षड्विंशतिशततमोऽध्यायः, इति प्रपन्नामृतं संपूर्णम्

1746

VB 947(d) **तत्त्वप्रकाशिकाव्याख्या (वाक्यार्थमुक्तावलिः)**

This is a commentary on Jayatīrtha's *Tattvaprakāśikā* by Tāmraparṇi Śrīnivāsācārya, the son of Viṭṭhalācārya and pupil of Tīrthācārya. The commentary is called Vākyārthamuktāvali. This Śrīnivāsācārya was different from another Śrīnivāsācārya who belonged to Sankarā family and was the author of another commentary called *Vākyārthatattvamañjarī* on the *Tattvaprakāśikā*.

Beginning:

वन्देऽहमानन्दचिदादिविग्रहं
चिन्तादिदोषातिविदूरदेहम् ।
सद्भिर्विरक्त्यादिभिरञ्जसैव
ज्ञेयं मुकुन्दं सृतिमुक्तिदं सताम् ।।
पान्तु नः श्रीमदाचार्यश्रीपदाम्बुजरेणवः ।
नमत्सुरकिरीटस्थान् ये मणीनतिशेरते ।।
जयतीर्थार्यतरणिर्गोगणैस्तु हृदो मम ।
नुदन्नज्ञानतमसं भाष्यमार्गं प्रदर्शयन् ।।
चन्द्रिकाभाववोधादिपूर्वग्रन्थसमाश्रयात् ।
गुरूंश्च तद्गुरून् नत्वा टीकार्थो वर्ण्यते मया ।।
विट्ठलाचार्यपुत्रेण श्रीमत्तीर्थार्यसेविना ।
श्रीनिवासेन कृत्वापि रहस्यं चन्द्रिकां पुनः ।।
ग्रन्थोऽयमपि वह्वर्थो भाष्यं चात्यर्थविस्तरम् ।

इत्याचार्योक्तौ विश्वासमुपजनयंस्तत्कृतसूत्रभाष्यव्याख्यानं चिकीर्षुः श्रीमज्जयतीर्थश्रीचरणो भाष्याद्यपद्यस्थविशेषणपदार्थप्रपञ्चनपूर्वकं मङ्गलमाचरति—शुद्धेति ।

End:

तदेतदुक्तम्—

वहुना तु किमुक्तेन यावत्सेतुमगात्कृती ।
योगी तावन्न मुक्तस्याशेषशास्त्रस्य निर्णयः ।।

इति ।

1758

VB 953 न्यायामृताव्याख्या (तरङ्गिणी)

श्रीर्भूरिति व्यूह्य निदर्शयन्ती स्वात्मान्तरात्मानमपीन्दिरा यम् ।
आगूढगूढाङ्गचराः सुरास्तं मया मुरारिं नमयन्तु नम्याः ।।
विहंगमानां च भुजंगमानामिमौ श्रुतीशौ जहितो विरोधम् ।
यमेत्य कैमुत्यनयाविरुद्धश्रुतिश्रितं स्वार्थतयात्र सोऽर्थः ।।
विश्वनाथाख्यपितरं नारायणपदाग्रजम् ।
पित्राप्तविद्यं च गुरुं नौम्याचार्यकशालिनम् ।।

वेदान्तानामखण्डार्थपरत्वान्न ते संसर्गबोधकाः, नतरां गुणानां, नतमामनन्तानामित्याशङ्कते —नन्विति । एतदिति । प्रथमपरिच्छेदान्ते तस्मादित्यादिना यदुक्तं तदित्यर्थः ।

End:

सद्योजातजटाजपावनसरिद्गोदावरीतीरतो
गव्यूतिर्वसतिः सतां कुलवतामम्बापुरी तत्र ये ।
व्यासाख्या उपमन्युगोत्रजबुधास्तेष्वास्त यो मुद्गल-
स्तत्राजज्ञत ये **मुरारि**चरणा **व्यासा**भिधाना बुधाः ।।
तेभ्योऽजायत **विश्वनाथ** इति यस्तज्ज्ञानरत्नाकर-
स्तस्मादाविरभूत्सुरद्रुमयशा आचार्यनारायणः ।
रामाचार्य इतीरितस्तदनुजो यस्तत्त्ववादाम्बुधे-
रातानीत्स तरङ्गिणीमिह परिच्छेदश्चतुर्थोऽपि यः ।।

Colophon:

इति **श्रीमद्रामाचार्य**विरचितायां **न्यायामृततरङ्गिण्यां** चतुर्थः परिछेदः समाप्तः

1760

VB 947(c) प्रणवदर्पणखण्डनम्

This is a criticism of the *Praṇavadarpaṇa* of Surapuram Śrīnivāsācārya, which considered that Praṇava is not a part of the *Vedāntasūtra* of Bādarāyaṇa. The author Vijayīndratīritha tries in this work, to refute the view of Surapuram Śrīnivāsācārya, and to maintain the view held by Mādhva-s that Praṇava is an essential part of the *Brahmasūtra-s*. The author's name is not mentioned in this MS. but it is understood to be Vijayīndratīrtha from D. No. 4798 of GOML.

Beginning:

द्योतयन्तं दश दिशो भासा सूर्यसमानया ।
बुद्धिमन्तं दयावन्तं हनूमन्तमुपास्महे ।।
तात्पर्यचन्द्रिकायुक्तं न्यायामृतकलानिधिम् ।
तर्कोस्ताण्डवकृतं व्यासतीर्थगुरुं भजे ।।

अथातो ब्रह्मजिज्ञासेति न्यायग्रथनात्मक-ब्रह्ममीमांसाशास्त्रस्यादिमसूत्रस्योंकार एतत्सूत्रावयवो न वेति विप्रतिपत्तिः । नेत्यन्ये । भवत्येवेति व्यासमतानुयायिनः ।

End:

एवं च विमत ओंकार आद्यसूत्रावयवः माङ्गलिकत्वे सति अदृष्टार्थत्वे सति सूत्रान्वितत्वात् सौत्राद्याक्षरवद् आद्यसूत्रानुसंहितत्वाद्वेत्यनुमानादोंकारस्य तदवयत्वसिद्धिः । न चाप्रयोजको हेतुः ।

1765

VB 1099 **महाभारततात्पर्यनिर्णयः (व्याख्यासहितः)**

Beginning:

नारायणाय परिपूर्णगुणार्णवाय
विश्वोदयस्थितिलयोन्नियतिप्रदाय ।
ज्ञानप्रदाय विबुधासुरसौख्यदुःख-
सत्कारणाय विततय नमो नमस्ते ।।
आनन्दतीर्थहृत्पद्मकणिकावासमच्युतम् ।
नत्वा **भारततात्पर्यनिर्णयं** विवृणोम्यहम् ।।

अथ भारततात्पर्यनिर्णयव्याजेन सकलशास्त्रतात्पर्यं निर्णेतुकामो भगवानाचार्यः स्वयमन्तरायविधुरोऽपि निरन्तराय प्रारिप्सितपरिसमाप्त्यादिहेतुभूतमिष्टदेवतानतिरूपं मङ्गलं शिष्यान् ग्राहयितुमनुष्ठितं ग्रन्थादौ निबध्नाति— नारायणायेति । नारायणाय नमो नम इति संबन्धः । ग्रन्थारम्भसमयेऽपि अपरोक्षीकृतभगवद्रूपत्वात् त इत्यपरोक्षेण निर्देशः । भक्त्यतिशयद्योतनाय नमो नम इति द्विरुक्तिः । न ह्यनिर्धारितस्वरूपस्य वन्दनं युक्तम् , न च लक्षणेन विना स्वरूपनिर्धारणमित्यतो नारायणस्य लक्षणान्याह—परिपूर्णेत्यादिना ।

End:

यः सर्वगुणसंपूर्णः सर्वदोषविवर्जितः ।
प्रीयतां प्रीत एवालं विष्णुर्मे परमः सुहृत् ।।

Colophon:

इति श्रीमदानन्दतीर्थ-भगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्यनिर्णये द्वात्रिंशोऽध्यायः । श्रीमन्महाभारततात्पर्यनिर्णयः समाप्तः ।

अलं विशेषतः प्रीयतां प्रीतोऽस्तु । इत्यशेषमतिमङ्गलम् । इति श्रीमदानन्दतीर्थ-भगवत्पादाचार्यविरचित-श्रीमन्महाभारततात्पर्यनिर्णयस्य टीकायां **मन्दसुबोधिन्यां वरदराजाचार्य**कृतायां द्वात्रिंशोऽध्यायः ।

भारतार्थप्रकाशस्य टीका **मन्दसुबोधिनी** ।
कृता **वरदराजेन** विदुषा प्रीतये हरेः ।।
हे सन्तः करुणाकराः करयुगं मौलौ निधायार्थये
. . . . . .

The Scribe adds:

महाभारततात्पर्यनिर्णयस्य सुपञ्चिका ।
श्रीवेङ्कटनृसिंहेन लिखिता प्रीतये हरेः ।।

1769

VB 265(a) **णत्वसाधनम्**

In this work the author, whose name is not known, attempts to prove that the syllable *ṇa* in the word Nārāyaṇa is grammatically correct even when it is used in the sense of Śiva. He states that though the famous Appayadīkṣita is of opinion that *ṇatva* cannot be justified if the word is used in the sense of Śiva *ṇatvaṃ bādhate*, he is trying to prove it correct in the same sense. The work is written in verse and prosc. The work is the same as described in R. No. 3942(c) of MGOL. It quotes the *Kāśikāvṛtti*, *Padamañjarī* and *Tattvabodhinī* (18th Century A.D). The work is not *Ṇatvabādhānivṛtti* of the famous Appayadīkṣita as stated in the New Catalogus Catalogorum of the Madras University (p. 198 Vol. I) on the evidence of this MS.

Beginning:

महेशमुपतिष्ठानः शास्त्रार्थे चंक्रमाणधीः ।
शिवोत्कर्षाविरोधित्वाण् णत्वसाधनमारभे ।। १ ।।
नारायणपदे णत्वं तेऽपि चेदप्पदीक्षिताः ।
दुःसाधं मेनिरे योगे केऽर्वाञ्चस्तस्य साधने ।। २ ।।
शिवे नारायणाख्याया भाव्यवस्थावलम्बनात् ।
वृत्तिं वदन्तस्ते सूचांचक्रिरे णत्वसाधनम् ।। ३ ।।
शिवादिशब्दा गोविन्दे यौगिका यदि किं ततः ।
शुकवद्वादिनान्योक्तीरनुकर्तुं न सांप्रतम् ।। ४ ।।

न हि माध्वेन हिंसेति दूषिते यज्ञकर्मणि ।
न वेदबाह्यतोद्भाव्येत्याज्ञा राज्ञां विजृम्भते ।। ५ ।।
णत्वं चेद्यौगिकेऽपि स्यात् संज्ञायां तर्हि तत्कुतः ।
न सिध्येत्तस्य सिद्धौ वा संज्ञासूत्रस्य किं फलम् ।। ६ ।।
शिवे नारायणाख्याया एकस्या एव सिद्धये ।
न पाठो भूयसां युक्तो लाघवाय हि लक्षणम् ।। ७ ।।

Fol. 7(b):

ननु न वयं णत्वसाधनाभावे दीक्षितैः साधितस्य कस्यचिदर्थस्यानुपपत्तिं ब्रूमः । किंतु णत्वं बाधते इत्यप्पयदीक्षितैरुक्तमिति लोकप्रथामन्यथयितुं स्वसामर्थ्यप्रकटीचिकीर्षया च णत्वं साधयामः । न च अप्पयदीक्षिताः सर्वज्ञशिखामणयो न यदि णत्वं साधयितुमशक्नुवन्, तर्हि कथं णत्वसाधनेऽन्यस्य पटिमेति शङ्कनीयम् ।

' पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परिक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ।। '

इत्यभियुक्तोक्तन्यायेन कर्तृगौरवमनादृत्य बुद्धिमन्तो मदीये ग्रन्थे उपपत्त्यनुपपत्ती विमृशन्तिवति चेत्—विमृशामः । नारायणपदे योगवृत्तौ णत्वं दुःसाधमेव । तथाहि-

भवेदट्कुप्वाङ्नुंव्यवधिमति नारायणपदे
निषेधादन्त्यांशो न पदमिति चेद्योगवति णः ।
कुतोऽसौ संज्ञायां न भवतु भवेच्चेत्किमयतां
फलं संज्ञासूत्रं कथमिव च नातिप्रसजनम् ।। २३ ।।

End:

पूर्वपदेनोत्तरपदस्याक्षेपादुत्तरपदस्यैव णत्वं नियम्यत इत्युचितम् । इतरथा हि रामनामादौ णत्वं दुर्वारम् । द्रुणसाद्युदाहरणासामञ्जस्यं च, सूत्रोदाहरणं च गगनकुसुमायते । तस्मात् समानपदस्य समाससाधारण्ये संज्ञासूत्रस्य नियामकत्वात् योगे नारायणपदे णत्वासिद्धिः । अतत्साधारण्ये च प्रमाणाभावादेव तदसिद्धिः ।

1770

VB 699(b) **तत्त्वमालिका (णत्वबाधाविधूननव्याख्यासहिता)**

Madras Govt. Oriental MSS. Library Catalogue R. 3942(b) gives a portion of this work (which is found here on fol. No. 11 as quoted on p. 249) under the tite *Natvabādhāvidhūnanam*. It is obvious from the opening verses, that the work consists of the text and a commentary on it. But the verses,

quoted with number as occurring on fol. 11, really confuse as to the real ending of the work.

Beginning:

रामस्वामिमखीन्द्रपादयुगलीपाथोजभृङ्गायित-
स्वान्तःशेषसुधीमणिर्विरचये विद्वन्मुदे शंकरे ।
सिद्धे सर्वपुराणशास्त्रनिकरैर्नारायणाख्ये पदे
बाधां णत्वकृतां व्यपोह्य नितरां श्रीतत्त्वमालामहम् ।। १ ।।
रामस्वामिमखीन्द्रदेशिकमुखाम्भोजस्रवद्वाङ्मयीं
शेषाद्रिर्विबुधाङ्घ्रिसंनतशिरा आस्वाद्य माध्वीझरीम् ।
दुर्वादिप्रकरेभकुम्भदलने कक्ष्यानखैः केसरी
श्रीनारायणनाम्नि शंभुवचने णत्वं चरीकर्ति च ।। २ ।।
श्रीवेङ्कटेशविदुषः सूनुना शेषशास्त्रिणा ।
क्रियते वचसां शुद्धचै स्वीयानां विदुषां मुदे ।। ३ ।।
श्रीमन्तं चन्द्रचूडं गिरिपतितनयाप्राणनाथं दयाब्धिं
नत्वा वागीश्वरीं च प्रणतजनलसद्वाग्विलासप्रदात्रीम् ।
स्वीयां बुद्धिं कुजन्तुस्तुतिमलिनतमां क्षालये तत्त्वमाला-
व्याख्यानाम्भोभिरेतां सपदि विरचयन् णत्वबाधाविधूतिम् ।। ४ ।।
रचयामि णत्वबाधाविधूननाख्यां कृतशिवौन्मुख्याम् ।
नारायणपदभूषणभावलसत्तत्त्वमालिकाव्याख्याम् ।। ५ ।।
मात्सर्यमुत्सार्य कृतौ ममास्यां मम प्रयासं विमृशन्तु सन्तः ।
गवेषणीयो यदि दोष एव सर्वत्र भाष्यादिषु सूपपादः ।। ६ ।।
प्रौढार्थवादो यदि भाष्यमुख्यग्रन्थे महद्भी रचितेऽर्हणीयः ।
ग्रन्थे ममासावपि बालवाद इत्येव सम्यग् दयनीय एव ।। ७ ।।

इह खलु प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं विरचितं

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।।

आचार्यवान् पुरुषो वेद इत्यादिश्रुतिनिकुरुम्बेन गुरुभक्तेः सकलश्रेयः परंपरामूर्धाभिषिक्त-परमपुरुषार्थनिःश्रेयसनिदानभूतात्मतत्त्वज्ञाननिर्वहणधुरंधरप्रकृतग्रन्थनिर्माणपुष्कलकारणपरम - शिवस्वरूपज्ञानप्रदत्वप्रतिपादनात्

देवीं वाचमजायन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेष्टमूर्जं दधाना धेनुर्वागस्मानुपसुष्ठुतैतु ।।

इत्यादिभिः श्रुतिभिरूर्जवलप्राणनयोरिति धातुव्युत्पन्नात् पदाद्युपादानमहिम्ना वाग्देव्याः सकलपुरुषार्थावाप्तिहेतुभूतवाग्वलप्रदातृत्वप्रतिपादनाच्च गुरुवाग्देवताप्रणामात्मकं मङ्गलं शिष्टाचारपरिपालनाय ग्रन्थतो निवध्नन् चिकीर्षितं प्रतिजानीते

नत्वा गुरुचरणाब्जं वाग्देवीमपि सदाशिवप्रीत्यै ।
नारायणपदभूषणभावलसत्तत्त्वमालिकां कुर्वे ।। १ ।।

Fol. 11a

अयमप्पयदीक्षितोक्तमार्गे तमसां सुदृशां गतिप्रदः स्यात् ।
कुदृशामशिवान्तरङ्गभाजां चलितुं शक्यमिहायनप्रदे ।। १ ।।
अद्वैतविद्यागुरुणाप्पयज्वविद्वद्वरेण्येन कृतेन्दुमौलौ ।
नारायणीभाविनि लक्षणातो रूढ्याथवा सद्विदुषां मुदे या ।। २ ।।
शेषाद्रिविद्वत्प्रमुखेन सैव योगेन शंभौ स्थगिता निरस्य ।
णत्वं शिवे बाधत इत्यभाणि तेनेति ये तान् प्रतिवादिनोऽपि ।। ३ ।।
नारायणाख्ये परमेश्वरे न योगार्थयुक्ता त्रिमुनेर्मता स्यात् ।
संज्ञास्थले णत्वविधानदक्षं मुनित्रयं ये प्रवदन्ति तांश्च ।। ४ ।।
दुष्टान् प्रहर्तुं कृतगण्डताडमित्थं कृता णत्वविरोधबाधा ।
मुदे शिवे भक्तिमतां जनानां श्रीरामशिष्येण मुदे सतां च ।। ५ ।।

Fol. 11b

वयं तु नारायणपदस्य परमशिवे उदाहृतपुराणवचनैः केवलयौगिकत्वेऽपि णत्वं साधयाम इत्याह—

श्रीमच्छ्रुतिस्मृतिसमस्तपुराणसिद्ध-
नारायणाह्वयमहत्तरयोगरूढौ ।
त्वय्यद्य योगमपि केवलमिन्दुमौले
संसाधयामि परिधूतसमस्तदोषम् ।।

संसाधयामीति णत्वनिर्वहणद्वारा प्रकाशयामीत्यर्थः ।

End:

मुमोह मायया सद्यो मायिनः परमेष्ठिनः इत्यादिना कौमारसर्गपर्यन्तां जगत्सृष्टिं कृतवतः तस्यैव मोहप्राप्तिमुक्त्वा

तं बोधयामास सुतं जगन्मायो महामुनिः ।
नारायणो महायोगी योगिचित्तानुरञ्जनः ।।

इति तज्जनकस्य भगवतो नारायणस्योपदेशेन तस्य मोहनि . . .

1772

VB 1158(b) **परात्रिंशिका**

The work consists of about 30 verses in the form of a dialogue between Bhairava and Śakti, puporting the identity of Śiva and Śakti as found in the *Rudrayāmalatantra.*

Beginning:

देवी—

अनुत्तरं कथं देव सद्यः कौलिकसिद्धिदम् ।
येन विज्ञातमात्रेण खेचरी समतां व्रजेत् ।।
हृदयस्था तु या शक्तिः कौलिकी कुलनायिका ।
तां मे कथय देवेश येन तृप्तिं व्रजाम्यहम् ।।

श्रीभैरवः—

शृणु देवि महाभागे उत्तरस्याप्यनुत्तरम् ।
कौलिकोऽयं विधिर्देवि मम हृद्व्योम्न्यवस्थितः ।।

End:

यान् यान् कामयते कामांस्तांस्ताञ् शीघ्रमवाप्नुयात् ।
एवमत्र फलावाप्तिरित्येतद्रुद्रयामलम् ।।

Colophon:

इति परात्रिंशिका

1773

VB 960(c) **ब्रह्मतत्त्वबोधः (सव्याख्यः)**

Beginning:

वन्दे श्रीद्विरदेन्द्रास्यं षण्मुखं शंकरं सदा ।
ब्रह्मविद्याप्रदामम्बां ध्यातृणां कल्मषापहाम् ।।
शिवानन्दामृताम्भोधेः पूर्णशीतांशुमण्डलम् ।
आश्रितानां दयामूर्तिमप्पयाख्यं गुरुं भजे ।।
दक्षिणाशामुखं देवं सुन्दराकारविग्रहम् ।
चिन्मुद्राधारिणं वन्दे शिवज्ञानप्रदं हरम् ।।

नित्यं चिन्मात्रमेकं निरवधिकसुखं सत्परिच्छेदशून्यं
सत्यं निर्भेदमाद्यं गुणरहितमसत्साक्षिसाक्षित्वहीनम् ।
ज्योतिस्तुर्यस्वरूपं विमलमचलमाद्यन्तशून्यं प्रसिद्धं
शुद्धं बुद्धं विमुक्तं परमजममृतं ब्रह्म वन्देऽप्यकर्म ।।

End:

अथ तेनैव विकल्पनिरासेन द्वितीयस्यापि निरासो जातः ।

अत्रेयं श्रुतिः—

न भाति सूर्यो न च चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
प्रकाशमाने परमात्मवस्तुनि प्रभाति सर्वं परमात्मना मुदा ।।

इति । अतः सूर्यादीनां भानस्य औपाधिकपरिभवापत्तेरसत्यत्वं सिद्धमिति द्वितीयस्य स्वाप्नस्य भानस्य तूच्यते । तस्यान्तःकरणविषयत्वाद् अन्तःकरणस्य सुषुप्तौ लयवशादप्रतीतेः स्वाप्नभानस्याभाव इति ।।

1779

VB 963 **शिवज्ञानदीपिका**

Beginning:

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ।।
ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वलोकानामनाधारमविक्रियम् ।।
अनन्तानन्दबोधाम्बुनिधिमद्भुतविग्रहम् ।
अम्बिकावरमीशानमनिशं प्रणमाम्यहम् ।।
एकदा योगिनः केचिच्छिवज्ञानपरायणाः ।
कैलासं प्राप्य शैलेन्द्रं ददृशुश्चन्द्रशेखरम् ।।
प्रदक्षिणनमस्कारैस्तुत्वा स्तोत्रशतैरपि ।
शंकरं तोषयामासुः पार्वतीसहितं मुदा ।।

The following Colophon is found at the end of the first Khaṇḍa:

इति श्रीपरमरहस्यतन्त्रे शिवज्ञानदीपिकायामुमामहेश्वरसंवादे परमहंसपरब्रह्मविद्यायां महाविश्वरूपनिदर्शनमहाविभूतिमहानन्दानुवर्णनं नाम पञ्चविंशः पटलः ।

इति परमहंसपरिव्राजकाचार्येणाष्टाङ्गयोगविलासकवचितेन **आदिनाथमहायोगिना** विस्तारितः प्रथमखण्डः समाप्तः ।

End:

सर्वविज्ञानसंपन्नं शिवज्ञानरसामृतम् ।
आदिनाथमुखादेव श्रुत्वाख्यानं महाद्भुतम् ।।
पूजयामासुरत्यर्थमादिनाथं जगद्गुरुम् ।
यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।।
तयोः संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ।।

Colophon:

इति **श्रीशिवज्ञानदीपिकायां** द्वितीयखण्डे योगसाधने कर्मज्ञानविभागाद्यष्टाङ्गयोगानुवर्णनं नाम पञ्चविंशः पटलः । द्वितीयखण्डः समाप्तः

Scribe adds:

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
अक्षरं यत्परिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ।।

1780

VB 960 (b) शिवध्यानदीपिका

This work is written in three Sets.

Beginning: (first Set)

पञ्चाङ्गकेष्वपि च पञ्चमुखेषु पञ्च
भूतेषु पञ्च करणेषु तथेतरेषु ।
कर्मेन्द्रियेष्वपि समष्टयभिमानिदेवे-
षूच्चस्थितस्य चरणौ शरणं प्रपद्ये ।।

End:

यद्भक्त एष मुनिरेव समस्तलोक-
संरक्षकस्य रघुवंशपतेर्विभोश्च ।
रामस्य यत्परमतत्त्वमुपादिशत्त-
मारादनन्यशरणाः शरणं व्रजामः ।।

Beginning: (Second Set)

एको रुद्रस्त्रिनेत्रः स्वयमखिलभयध्वंसको घुष्यते य-
स्तस्माल्लभ्यं तृतीयं खलु जगति जनैर्ज्ञाननेत्रेच्छुभिश्च ।
तं त्यक्त्वा ज्ञाननेत्रं त्रिपुरहरमहो कामविध्वंसकं च
ब्रूमः किं जाड्यमत्र द्विनयनमधिकं सेवतां कामहेतुम् ।।

End:

भूमौ जाताः किमर्थं श्रुतिविदितशिवाद्वैतविद्वेषिणोऽमी
वेश्यापुत्रा न विद्मः शिवशिवशिव तान् रासभान् किं स्मरामः ।
सर्वेषामात्मभूतं परमशिवमुमाकान्तमद्वैतसारं
ध्यात्वा पाषण्डिलोकस्मरणभवमहापातकं संत्यजामः ।।

Beginning (Third Set):

त्वमेको ध्येयोऽसि त्रिगुणसहितोमासहचर
त्रिनेत्र त्रय्यन्ते प्रभुरसितकण्ठश्च पुरुषः ।
अतस्त्वां सर्वेशद्रुहिणहरिरुद्राधिकममुं
तुरीयं ध्यायेऽहं परमपदसंप्राप्तय इह ।।

End:

परं ज्योतीरूपं परशिवमुमाश्लिष्टवपुषं
हृदि ध्यायन्नित्यं नयनविगलन्मोदसलिलम् ।
अहं लीये शंभो त्वयि विगतपाशः शिशुरयं
पृथक्कर्तुं वाञ्छा न च भवतु मामेनमिह ते ।।

1781

VB 993(a) **शिवपारम्यविषयः**

This is a work on Śaiva Vedānta trying to prove the supremacy of Śiva. The author, whose name is not known, mentions Śrī Śaṃkara, Rāmānuja and Bhaṭṭa Bhāskara.

Beginning:

. . . . एक एवाग्र आसीत् । सदेव सोम्येदमग्र आसीत् । ब्रह्म वा . . . येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्ब्रह्म । तद्विजिज्ञासस्व । ब्रह्मविदाप्नोति परम् । यो वेद नि . . . भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । एकः पुरस्ताद्य इदं बभूव । यतो बभूव भुवनस्य गोपाः । यमप्येति भुवनं सांपराये । एकमेवाद्वितीयमित्युक्तसृष्टिवाक्येषु एकस्यैव सृष्टिस्थितिसंहारकर्तृत्वं श्रूयते ।

End:

ईश्वर एव सृष्टयर्थं हिरण्यगर्भरूपेण द्विधा भूतः । तथाच श्रुतिः—प्रजापतिर्वै हिरण्यगर्भ इति । . . . महेशानाः प्रधानब्रह्मशक्तय इति । किंच विष्णोर्वामदेवरूपत्वं हिरण्य . . .

1782

VB 324(a) शिवोत्कर्षः

The leaves from the beginning up to 19 are in order. After that the numbers are not visible and the leaves are in disarray. The beginings of most of the leaves are also not deciferable. Hence it is very difficult to find out the order. Any how some pages have been put correctly after some effort.

The name *Śivotkarṣaprākāśa* given formerly does not seem to be appropriate as there is a *Śivotkarṣaprakāśa* by Bālakṛṣṇa which is a Stotra.

Beginning:

श्रीगणाधिपतये नमः । गणानां त्वा + सीद सादनम् इति । अत्रेदमुपबृंहणं शैवे । गौरीं प्रति शिववचनम्

अयं मत्प्रणवो नाम त्रिमूर्तिजनकः शिवे ।
अन्यस्त्वत्प्रणवो मान्ये त्रिशक्तिजनकः स्मृतः ।।
त्रिवेदस्य त्रिकालस्य क्रिया भूतस्य सर्वदा ।
जननीजनकावेतावावयोर्वाचकौ परौ ।।
एतयोराकृती भूत्वा क्रीडावावां प्रियेऽधुना ।।

End:

सर्गस्थितिविनाशानां कर्त्रे तत्प्रेरकाय च ।
नमोऽन्तर्यामिने सर्वहृदिस्थाय नमोनमः ।। इति ।

तस्मात् सोपबृंह्मणैः सतात्पर्यकैः शिवादिपदघटितैरुक्तोपनिषद्वाक्यजातैः श्रुतिस्मृतीतिहासपुराणवचनजातैश्च शिव एव तुरीय इति सिद्धम् ।

1784

VB 326 शिवोत्कर्षरत्नाकरः

Contents:

शिवभक्तिप्रशंसा, शिवभक्तप्रशंसा, शिवनामप्रशंसा, विभूतिप्रशंसा, कालाग्निरुद्रोपनिषत्, रुद्राक्षमाहात्म्यम्, पञ्चाक्षरीप्रशंसा, शिवपूजाप्रशंसा ।

The beginning is the same as in Ser. no. 1782.

End:

महामृत्युरायातु मायातु किं ते न तेनापि भीतिर्महामृत्युमृत्युः ।
यतो जन्मनः पद्मसरः प्रविष्टाः स दुष्टानि कष्टानि हर्तुं समर्थः ।।

Two extra leaves in the beginning contain some miscellaneous passages on the greatness of Śiva, Śivabhakta-s, Vibhūti, etc.

1786

VB 964 **सिद्धान्तसारावलिः (सव्याख्या)**

Beginning:

वन्दे वितण्डतुण्डं तं चण्डिकासङ्गमण्डनम् ।
शुण्डादण्डेन भक्तानां प्रखण्ड. . . . . ।।
श्रीमद्वैद्येशलिङ्गं परममुनिगणैः सेवितं सत्पदार्थै
स्वस्य प्रागादिकाष्ठागतयुगमनुभिः संयुतं लिङ्गरूपैः ।
नत्वानन्दाख्यशंभुं परगुरुकरुणाम्भोधिसंसक्तचेताः
श्रीमत्सिद्धान्तसारावलिविवृतिमहं वच्मि गूढार्थसिध्यै ।।

तत्र तावदामर्दकमठनिवासी सकलागमपारदृश्वा **त्रिलोचनशिवाचार्यः** स्वसंतानागम-संभूतकामिकसिद्धान्तं तद्भेदं मृगेन्द्राद्यागममालोच्य तत्र शब्दार्थयोः सामर्थ्येन लब्धप्रमाणैः श्लोकैरनेकैर्निर्णीतार्थं पदार्थत्रययुक्तं सपादचतुष्टयं सिद्धान्तसारावलीं नाम चेमं ग्रन्थं चिकीर्षुः चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं मूलमन्त्रस्योच्चारभेदेन तुर्यावस्थास्वरूपं निष्कलं परमशिवमाद्येन श्लोकेन प्रणमति—ओतं येनेति ।

End:

देशिकः आचार्यः शक्तिरेव धीः बुद्धिः समनान्तराल्यकरणः अन्तराले भवमन्तराल्य-मन्तःकरणं समनाशक्त्यन्तःकरण इत्यर्थः. . . . . त्वोन्मना । विद्योर्ध्वसदाशिवाख्यतत्त्व-निचितं शुद्धस्वरूपात्मतत्त्वोन्मानस्वरूपविद्यातत्त्वोर्ध्वस्थितशिवनामधेयतत्त्वत्रयेण . . . . . शिवसंबन्धं शिवं विभाव्य विचिन्त्य । तथोक्तं कामिके—

सकलीकरणशुद्धिं च कृत्वा संयोजयेच्छिवे ।
विद्यातत्त्वात् सदाचार्यो बिन्दु. . . . . ।।

1788

VB 960(a) **हरिहरशोधनम्**

Beginning:

शैवाद्वैतं जगति सुतरां स्थापितं दीक्षितेन्द्रैः
श्रीमद्भिस्तैः परशिवमयैरप्पयाख्यैस्तथापि ।
तद्वंश्यस्य स्वयमनितरव्यापृतेः किं नु कार्यं
मुक्तस्यास्तदिह च मया स्थापितं सम्यगास्ताम् ।।

नाहं जाने हरिविधिसुरान् पूर्णबोधात्मकेऽस्मिन्
शैवाद्वैते सकलजगतां कारणे स्वात्मभूते ।
नान्यद्यत्रेत्यपि च वदति स्पष्टमेव श्रुतिस्तं
भूमात्मानं परशिवमतः संत्यज द्वैतबुद्धिम् ।।

End:

शैवाद्वैतविनिर्णयैकहृदयस्यानेन किं वैष्णवा-
क्षेपेणेति विवेक्ति चेत् परमतध्वंसे द्वयस्थापनम् ।
न्यायान्मल्लनिबर्हणस्य भगवत्पादैः प्रधानाश्रयाः
सांख्यास्तैरिव वादिनोऽस्य निहताश्चेद्वैष्णवास्याच्छुचिः ।।

1789

VB 27(h) **चिद्विलासः**

Beginning:

ओं स्वप्रकाशशिवमूर्तिरेकिका
तद्विमर्शतनुरेकिका तयोः ।
सामरस्यवपुरिष्यते परा
पादुका परशिवात्मनो गुरोः ।। १ ।।
चित्रभानुशशिभानुपूर्वक-
त्रित्रिभेदनियतेषु वस्तुषु ।
तत्तदात्मकतया विमर्शनं
तत्समष्टिगुरुपादुकाजपः ।। २ ।।

End:

या क्रिया समभिरागहारतः
दीक्षितात्र गुरुभावनादिका ।
सा विभेदलयभावनादिका-
भ्यस्यतां परशिवैक्यसिद्धये ।। ३८ ।।

Colophon:

इति श्री-**अमृतानन्दनाथ**विरचित**चिद्विलासः** संपूर्णः

1792

VB 1158(g) **वासनापद्धतिः**

Beginning:

इह विश्वोत्तीर्ण-विश्वमय-स्वप्रकाशविमर्शात्मस्वात्मपरमात्मप्रत्यभिज्ञापनरूप . . . . . परमशिवस्य गुरोः शांभवदृक्पादाद् इच्छाज्ञानक्रियाशक्तिसंकोचावरणमायाकर्ममलत्रय-क्रियात्मावगलनादुन्मिषत्यात्ममार्तण्डे. . .

End:

स्वासने समुपविश्य योग्यैः सह श्रीचक्रं प्रीणयित्वार्चनापात्रं स्वयं स्वीकृत्य पुष्पादिकमाधाय शुचौ देशे न्यक्षिप्य शिवोऽहमिति भावयेत् ।।

Colophon:

इति वासनापद्धतिः

1816

VB 663(b) **महाभाष्यव्याख्या**

Beginning:

इको गुणवृद्धी । भाष्ये इग्ग्रहणमिति । न धातुलोप इत्यादौ निषेध्यसमर्पणाय गुणवृद्धिग्रहणं स्यादिति । इग्ग्रहणं किमर्थमित्यर्थे इति केचित् । तदसत् । निषेध्यसमर्पणाय गुणवृद्धिग्रहणवदिग्ग्रहणस्याप्युत्तरत्र स्थानिनिर्देशार्थत्वात् । अन्यथा भाजिराग इत्यत्रापि वृद्धिप्रतिषेधः स्यात् । अत्राहुः ।

Colophon (fol. 66):

इति श्रीमद्गणेशाङ्घ्रिस्मरणावाप्तसन्मतिः ।
ग्रन्थं प्राकाशयच्चिन्तामणिश्चातुर्थ आह्निके ।।

(fol. 83):

इति श्रीमद्गणेशाङ्घ्रिस्मरणावाप्तसन्मतिः ।
ग्रन्थं प्राकाशयच्चिन्तामणिः पञ्चम आह्निके ।।

End:

. . . उभये इति । ननु उभये देवमनुष्या इत्यादावुभयशब्दस्य समुदायपरत्वात् उभयशब्दस्य द्वित्वसंख्या, संख्येयपरत्वात् कथमुभयशब्दप्रसङ्गो भ. . . . . यावयवद्वित्वोपसर्जनभूतसमुदायवाचित्वेऽपि उभयपुत्र इत्यादौ वृत्तिमहिम्ना समुदायस्य भावः अवयवद्वित्वस्योद्भेद . . . . . .

1817

VB 387(d) **महाभाष्यप्रदीपप्रकाशः**

Beginning:

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवताप्रणामपुरःसरं विशिष्टकर्तृकं कर्तव्यं प्रतिजानीते—सर्वकारकमित्यादिना । परमात्मादीन् प्रणम्य कैयटनामाहं विवृतिप्लवं विधास्य इति संबन्धः । परमश्चासावात्मा चेति परमात्मा । आत्मशब्देन पराग्व्यावृत्तं प्रत्यक्चैतन्यमुच्यते ।

End:

श्रोतृणां तदर्थिनां तत्र प्रवृत्तिसिद्धये स्वग्रन्थादौ वक्तव्यमिति चेत्, एवमपि गौरवेणाभिधानमनर्थकम् । कानि पुनरित्यादिना प्रश्नपूर्वकं . . . .

Scribe adds:

संवत्सरे परीतापौ माघमासि च पञ्चकम् ।
एकादश्यां सिते पक्षे . . . .

1823

VB 686(d) **शब्दकौस्तुभगूढार्थविवृतिः**

Beginning:

नत्वा महेश्वरं देवं कौस्तुभस्य क्वचित् क्वचित् ।
गूढार्थविवृतिं कुर्वे स्वधियः परिशुद्धये ।।

इको गुणवृद्धी । संनिपातपरिभाषा अनित्येतीग्ग्रहणेन ज्ञापयिष्यत इति ।

End:

सामगायेत्यादौ आलोपाभावस्य कित्वफलत्वसंभवे अनन्यार्थत्वोक्तिरयुक्तेति अनन्यार्थतां वदतो भाष्यकृतः समगायेत्यादावालोपः संनिपातपरिभाषया न भविष्यतीत्याशयः प्रतीयते ।।

In the beginning verse, above *svadhiyaḥ pariśuddhaye*, *rāmaswāmi makhīndrajaḥ* is written in a new hand. Hence it is possible that the author might be a son of Rāmāswami makhin. A fly leaf at the beginning of the work has the remark *kaustubhamatadūṣaṇāni*.

1824

VB 683 **शब्दकौस्तुभटीका**

It is only a guess that this may be the *Viṣamapadī* mentioned by *CC*. It is however certain that the work is a commentary on *Śabdakaustubha*.

Beginning:

. . . . . अतिरिक्तकल्पनाया असंगतेरिति वाच्यम् । संनिवेशविशेषविशिष्टत्वं तत्त्वादीनामेव पटत्वाद्युत्पत्तौ अतिरिक्तकल्पनापत्तेः । यत्तु वाक्यशब्दग्रहे पदशक्तिग्रहः कारणं

प्रत्येकपदशक्तिग्रहाभावे वाक्यार्थबोधस्याजायमानत्वात् प्रत्येकशक्तिग्रहसत्त्वे चापूर्ववाक्यश्रवणे चापि तस्य जायमानत्वादिति, तन्न । वाक्यशक्तिग्रहे तदभावादेवाद्ये तदभावोपपत्तेः । प्रत्येकपदशक्तिग्रहेऽपि विशिष्टशक्तिग्रहेऽपि जायमानस्य बोधस्य त्वन्मते भावापत्तेश्चेति यत्किंचिदेतत् । पक्षान्तरमाह—अस्मिंश्चेति । व्यञ्जकध्वनिरिति ।

End:

वृद्धिर्यस्याचामादिस्तद्वृद्धम् । गोत्रान्ताद्वेति । वाशब्दं गोत्रोत्तरपदस्येत्येतद्वार्तिकापेक्षया तद्वा कर्तव्यमिदं वेत्यर्थः । एङः प्राचां देशे । . . . . एतदेव व्यवस्थितविभाषयैव सिद्धम् ।

वाहीकग्रामे देवदत्त इति—देशबहिर्भूतेषु वाहीकेषु देवदत्तो नाम (?) ग्रामस्तत्र भवो देवदत्त इत्यर्थः ।—इति संपूर्णो ग्रन्थः

1825

VB 686(c) **शब्दकौस्तुभदूषणम्**

Beginning:

तत्तत्स्थलीयवाक्यावल्यनुवादपुरःसरम् ।
संगृह्य विलिखाम्यत्र कियत्कौस्तुभदूषणम् ।।

पाणी नाम ऋषिः तस्य गोत्रापत्यं पाणिनः । एको गोत्रे इति नियमादण् । " गाथिविदथि केशिगणिपणिनश्च " इति प्रकृतिभावात् न टिलोपः । ततो यून्यपत्ये अत इञ् पाणिनिः । ततः तस्येदम् इत्यर्थे वृद्धाच्छः पाणिनीयाः छात्राः ।।

End:

इको गुणवृद्धीत्यत्र अयपय गतौ । आभ्यां क्विपि अत् पत् इति रूपं माधवादिभिरुक्तम् । तत्रैव शुभंयाशब्द इत्युक्तम् । तत्रैव उपसरजः मन्दुरजः । स्त्रीगवीषु पुङ्गवानां गर्भाधानाय प्रथममुपसरणमुपसरः । प्रजने सर्तेरित्यच् । प्रजनः स्यादुपसर इति संकीर्णवर्गे अमरः ।

प्रजायतेऽस्मिन् प्रजनः । पशूनां गर्भग्रहणकाल इति **क्षीरस्वामी** । उपसरे जातमुपसरजमजरायां जातोऽजरजः । ङ्यापोः संज्ञाछन्दसोरिति ह्रस्वः ।।

1848

VB 717(a) **प्रौढमनोरमाव्याख्या (शब्दरत्नम्)**

This work is not *Laghuśabdaratna* which has been printed and published in CSS. This must therefore be the *Bṛhacchabdaratna* to which Haridīkṣita alludes in his *Laghuśabdaratna*.

Beginning:

. . . च्च । भिक्षासेनेति । कर्मण्यण्यधनार्थमावश्यकम् । लब्धुमिति सैशोषण इत्यस्य नग्रहणं लाक्षणिकत्वात् कर्मकत्वाच्च । प्रविशतीति आदाय चर इत्यत्र गृहीत्वा गच्छतीत्यर्थः ।

End:

स्वरविधायकसूत्रे तिङ उपमानं शब्दार्थप्रकृतावेवेत्यादि सूत्रस्थभाष्यादिबलात् संज्ञाग्रहणानुवृत्तेर्वैकल्पिक उपलभ्यते इत्यन्यत्र विस्तरः ।।

Colophon:

इति **भट्टोजिदीक्षित**पौत्रेण वीरेश्वरदीक्षितसूनुना **हरिदीक्षितेन** विरचिते **शब्दरत्न** उत्तरार्धं समाप्तम्

1862

VB 676(b) **सिद्धान्तकौमुदीव्याख्या (विलासः)**

Beginning:

श्रीलक्ष्मीनरसिंहाख्यं शब्दब्रह्ममयं हरिम् ।
नमामि परमात्मानं सच्चिदानन्दविग्रहम् ।।
यत्पादपांसुप्लवमाश्रयन्तः पातञ्जलाब्धिं तरसा तरन्ति ।
पतञ्जलिं यं प्रवदन्ति सन्तस्तं **रामभद्रं** गुरुमानतोऽस्मि ।।
अस्ति लक्ष्मीनृसिंहाख्यो रामाम्बागर्भसंभवः ।
तेन सिद्धान्तकौमुद्या **विलासो**ऽयं विभाव्यते ।।

End:

प्रियाष्टम इति सौरुत्वविसर्गयोरुपमितिभावौ उक्तमर्थं संगृह्णाति प्रियाष्टम इति । अपरमिति । आत्वपक्ष इति भावः पृथगवगमन इत्यस्मात् क्विपि सुबुत्पत्ति सिद्धवत्कृत्याह दं . . प इति, वकारस्य ष्टाप . . . धकारस्य जस्त्वपक्षे इत्यर्थः । युङिङत्यादीन् जकारान्तान् दर्शयितुमाह . . .

1863

VB 676(j) **सिद्धान्तकौमुदीव्याख्या**

Beginning:

उपनह्यत इति विग्रहे उपपूर्वात् णह बन्धन इत्यस्माद्धातोः संपदादित्वात् क्विपि नहिवृतीत्यादिना पूर्वपदस्य दीर्घे तत उत्पन्नस्य सोर्लोपे उपानह् इति स्थिते आह नहो ध इति ।

End:

एषिकेति । एतच्छब्दादकचित्यदाद्यत्वात्ततदोः सः सावेति सत्वे आदेशप्रत्ययोरिति षत्वे इत्वमिति भावः । कृत-भस्त्वैषेति सूत्रे एषेति निर्देशादिति भावः । एतिका इति एतदो . . .

विकल्प इति बोध्यम् । . . . द्व्याषितपुंस्कं न भवति तस्मादित्यर्थः । विहित-विशेषणाश्रयणस्य प्रयोजनमाह बहुव्रीहेरिति ।।

Three fly leaves in the end contain:

1. A discussion on Arthavadadhātu Sūtra
2. Beginning of a work *Vārttikacandrikā*
3. Beginning of the comm. by Lakṣmīdhara on *Saundaryalaharī*.

1869

VB 671(b) परिभाषावृत्तिव्याख्या

This work has not been noted in any of the catalogues in South India.

Beginning:

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ।।

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् । व्याख्यानतो विशेषार्थज्ञानं संदेहे सति कर्तव्यम् , नतु संदेहार्थप्रतिपादकं शास्त्रं स्यात् । तच्च व्याख्यानं षड्विधम् ।

End:

यत्तु मधुरानाथभट्टाचार्या वदन्ति पाणिनिवचनमिदमिति तदतिरभसादिति ज्ञेयम् । अत एव वार्त्तिककारवचनमिदमिति वदन्तो मीमांसका अपि प्रत्युक्ताः । केचित्तु व्याख्यानतो विशेष-प्रतिपत्तिरित्यादि सर्वा परिभाषा व्यालिमुनिना रचिता इत्याहुः । वस्तुतस्तु नाचार्याणामिमानि वचनानि पूर्वोदाहृतलण्सूत्रादिगतणकाराद्युपादानज्ञापकेभ्य इष्टसिद्धये केवलं पाणिन्यादिमुनि-त्रयेणोररीक्रियन्ते । अत एवानिष्टप्रसक्तौ नैवमभ्युपगम इति ज्ञापकसिद्धं न सर्वत्रेति परिभाषाया न्यायसिद्धार्थानुवादकत्वमिति न परिभाषावशादनिष्टापादनं सांप्रतमिति सर्वेष्टसिद्धिः ।।

Colophon:

इति परिभाषावृत्तिव्याख्यानं संपूर्णम्

1873

VB 412(a) परिभाषेन्दुशेखरव्याख्या

Beginning:

आहुरिति । यद्यपि परिभाषादेशे विधिशास्त्राणामुपस्थितौ गुणभेदकल्पनेन पदैकवाक्यता । नान्यथा । इको यणचीत्यादौ तत्तद्विधीनां व्यवहिताव्यवहितसाधारणे प्रवृत्तौ पश्चात्परिभाषैक-

वाक्यतायामपि जातिनिवृत्त्ययोगात् । भुक्तवन्तमिति न्यायबाधापत्तेश्च । प्राचीनोक्तवाक्यैक-वाक्यता वक्तुमशक्या । संज्ञाशास्त्राणां तु मृजेर्वृद्धिरित्यादौ वृद्धिपदश्रुत्योपस्थितवृद्धिरादैजित्यस्य तदर्थज्ञानाय, वृद्धिपदाभिन्ना आदेशबोधे मृजेरुपस्थाने वृद्धिपदाभिन्ना आदैचो भवन्तीत्येतावतैव वाक्यैकवाक्यताव्यवहार इति नोक्तदोषस्तत्र ।

End:

तत्र **कैयटोक्त**प्रकारस्तु न युक्त इति स्वयं भाष्यार्थमाह । असहाये इत्यस्य अतिदिश्यमान-दर्शपदसमभिव्याहार इत्यर्थः । ननु भाष्य एव घटादिशब्देऽपि जराशब्दत्वाद्यतिदेशः स्यात् । व्यपदेशहेतुत्वाभावेन अविद्यमानव्यपदेशेन . . . इत्यादाविव न्यायप्रवृत्तिरिति चेत् न । स्वजातीयावधिव्यवहारस्य भेदनिबन्धनस्य चानेनातिदेशात् । अत एव दृष्टान्तद्वयोल्लोखः । अस्ति च . . . त्यादावेकाचै. . . . . .प्रथमत्वे सजातीयनिष्ठधर्मस्य चातिदेशः ।

1874

VB 674 **पाणिनीयपरिभाषा**

Beginning:

पाणिनीयपरिभाषा । अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् । सवर्णग्रहणेषु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं नतु लाक्षणिकस्य । गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः ।

End:

हिता विधयो नित्याः । ज्ञापकसिद्धं न सर्वत्र ।

Colophon:

इति व्याडिरचिता पाणिनीयपरिभाषा समाप्ता

1883

VB 705 **शब्दकौमुदी**

Beginning:

सोमास्कन्दं परानन्दं कर्पूरधवलं शिवम् ।
रत्नसिंहासनासीनं त्यागराजमहं भजे ।।

श्रीस्वयंप्रकाशगुरुचरणारविन्दाभ्यां नमः ।

चतुर्थपञ्चमाध्यायविहिताः प्रत्ययाः पुरा ।
दर्शिता अथ दृश्यन्ते तृतीयाध्यायगोचराः ।।

तेष्वादौ दश लकाराः प्रदर्श्यन्ते । लट् लिङ् लोट् लङ् लुङ् लिट् लुट् लृट् लृङ् लेट् । छन्दस्येव लेट् । वर्तमाने लट् । आरब्धापरिसमाप्तक्रियोपलक्षिते काले धातोः लट् स्यात् । आदावितौ लस्य

तु नेत्संज्ञा आदेशविधानसामर्थ्यात् . . . . . वे चाकर्मकेभ्यः । लकाराः सकर्मकेभ्यो धातुभ्यः. . . . . कर्तरि च स्युः । अकर्मकेभ्यो भावे कर्तरि च । तिप्तस्झि +

End:

. . . .चिवृद्धिः । टिट्ढाण . . . .व्याकरोति क्रियां क्तिप्रत्ययकरणे स्या . . . . . वृत्तेः समासविधिना क्तिन्नपि । व्या . . . ष्टुः बाहुलकत्वात् णुच्व्यतिष्ठा व्यति . . गुरोश्चेत्युकार एव । व्यात्युक्षिति णिजेव । अभिविधौ भावे ऽभिव्याप्ताावित्यर्थः । अणि . . .णः इणुण. . .णपत्ये स्व . . .मात् वावं . . . सारविष्करणं ससमन्तौ . . . दित्यर्थः पु . . . . . घञ् पुंसि सकेभावेकः . . . . . गोचर . . . . . इति व्युत्पत्तिमात्रम् . . . . . संचरत्यनेनस . . . . . प्रजप्य . . . . . आपण . . . . पण्यस्थानम् । निगमः छन्दः । चात् निकषादि । अवेतृस्त्रोर्घञ् करणाधिकरणयोः । अवता . . कृपा . . .

1884

VB 695(e) **आडजादीनामितिसूत्रार्थविचारः**

Beginning:

आडजादीनाम् । अजादीनामाडागमः स्यात् लुङादिष्विति सूत्रार्थः । ऐक्षिष्ट ऐहिष्टेत्यादिकमुदाहरणम् । ' ईक्ष दर्शनाङ्कनयोः ' । ' ईह् चेष्टायाम् ' । आभ्यां धातुभ्यां लुङि ' सेऽसिचि . . . ' इति इडागमे च सति अजादित्वादाडागमे च सति ' आटश्च ' इति वृद्धिर्भवति ।

End:

भविता भविष्यतीत्यादौ तासि प्रत्ययादेर्धातोरिति पदमुच्चार्य विधानादिडागमो भविष्यतीति व्यर्थम् आर्धधातुकग्रहणम् । एवं बहुप्रतिविधेयत्वान्मन्दबुद्धयनुग्रहाय प्रतिपत्तिगौरवपरिहारार्थमार्धधातुकग्रहणं कर्तव्यम् ।।

1888

VB 695(b) **गजसूत्रवादार्थः**

Beginning:

णेरणावितिसूत्रार्थे भट्टोजिगजपीडितम् ।
भाष्यस्वरससिंहेन कैयटं मोचयाम्यहम् ।।

णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने । णेरित्येकं वाक्यम् । ण्यन्तादात्मनेपदं स्यादिति तस्यार्थः । अणौ यत्कर्म णौ चेदिति द्वितीयं वाक्यम् ।

End:

'स संततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधुबन्धुताम्' (किरा. १. १०)।

'करेणुरारोहयते निषादिनम्' (शिशु. १२. ५) इत्यादिमहाकविप्रयोगानुकूल्यमनुसरतः कैयटस्योपरि प्रमादोद्भावनमेव प्रमाद इति सर्वमनवद्यमिति कैयटोद्धारः ।।

1891

VB 695(f) **यू स्त्याख्यौ नदीतिसूत्रविचारः**

Beginning:

यू स्त्याख्यौ नदी। त्रिपदं सूत्रम्। ईश्च ऊश्च यू वर्णग्रहणं च सर्वत्रेति तदन्तविधिः। स्त्रियमाचक्षाते इति स्त्याख्यौ। आख्याग्रहणं स्त्रीविषयत्वसिद्धचर्थम्। नित्यस्त्रीलिङ्गावीकारान्तोकारान्तौ नदीसंज्ञौ भवत इति सूत्रार्थः।

End:

अथ स्त्याख्याविति कोऽयं शब्दः। किं स्त्रियमाचक्षाते इति स्त्याख्यौ। आहोस्वित् स्त्रियौ आख्यायेते उत स्त्याख्यानयोःस्त्याख्याविति। नाद्यः सोपसर्गात् आतोऽनुपसर्गे क इति कप्रत्ययासंभवात् कर्मण्यणीति स्त्याख्याविति भवितव्यम् ।।

1894

VB 821(c) **कारकार्थसंग्रहः**

Beginning:

क्रियां कुर्वत् कारकं तत् षोढा कर्मादिभेदतः।
कर्म कर्ता च करणं संप्रदानं तथैव च ।।
अपादानं पञ्चमं स्यात् तथाधिकरणं च षट्।
फलव्यापरयोर्धातुराश्रये तु तिङः स्मृताः ।।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ।।

End:

कर्तर्यभिहिते तद्वत् कर्मण्यपि तिङादिभिः।
प्रथमैव तु तत्र स्यात् तृतीयादिस्तु नेष्यते ।।
प्रातिप्रदिकार्थमात्रे स्यात् प्रथमौत्सर्गिको विधिः।
स्वादु(?साधु-)त्वाय च सर्वत्र तथा संबोधनेऽपि च ।।

किंचिद्विधातुमन्यस्य स्वाभिमुख्यप्रवर्तना ।
तस्य संबोधनं तस्य हे हो भो इति सूचिकाः ।।

1896

VB 129(c) **बालबोधः**

Beginning:

आदौ प्रणम्य विघ्नेशं देवैरपि सुवन्दितम् ।
शब्दास्तु श्लोकरूपेण वक्ष्यामि च यथाक्रमम् ।।
पुंस्त्रीनपुंसकान्यद्य लिङ्गान्यादावजन्तके ।
ततो हलन्तलिङ्गानि वदिष्याम्यानुपूर्वशः ।।
रामकृष्णमुकुन्दाश्च सर्वान्यौ तत्र भेदकौ ।
द्वितयश्चिह्नपादाश्च मासो भेदा मिथोऽत्र हि ।

End:

रघ्विक्ष्वाकुयदूनां च शब्दा एते समा अपि ।
वदेदेकद्विवचने राघवादि विचक्षणः ।।
शब्दास्तु श्लोकरूपेण रचिताः **शेषसूनुना** ।
बालबोधं कृतमिदं द्रष्टव्यं सद्भिरेव हि ।।

Colophon:

बालबोधं संपूर्णम्

1898

VB 1135 **संस्कृतभाषामञ्जरी**

Beginning:

श्रीरङ्गे सकलशास्त्रप्रवीणः कश्चिद् विद्वानस्ति । तं प्रति कश्चन विद्यार्थी आगत्य प्रणम्य ब्रवीति भो गुरवः अहं विद्याभ्यासार्थमागमम् । मां कृपया पश्यत । मया कृताः नमस्क्रियाः स्वीकुरुत । मह्यं विद्याभ्यासं कुरुत । मत्तः तदा तदा परीक्षां गृह्णीत । मम पितरौ प्रीणयत । मयि प्रेम निक्षिपत । गुरुः वदति । त्वं कः त्वां वयं न विद्मः । तथापि त्वयोच्यमानानि वचांसि अस्मन्मनो हरन्ति ।

End:

अनन्तरं सायंसंध्यावन्दनादिकं कृत्वा बन्धुसङ्घेन साकं यथेष्टं गोक्षीरेण समन्वितं भुक्त्वा बन्धुभ्यः ताम्बूलादिकं दापयित्वा स्वयमपि ताम्बूलं स्वीकृत्य भार्यया सह शय्यायां शेते । प्रत्यहमेवमेव कुर्वन् परमानन्दमनुभवतीति ब्राह्मणः अकथयत् । शुभम् ।।

Colophon:

इति संस्कृतभाषामञ्जरी संपूर्णा

Scribe adds:

1059 मीन 3 शैलाधमकल्याणस्येश्वरनामविप्रस्य शिष्येण उदयनाम्ना एतद्ग्रन्थो लिखितः ।

On the first page is inscribed

संस्कृतभाषामञ्जरीग्रन्थं आयञ्चेरि कोविलकत्ते उदयवर्मराजाविन्टे स्वन्तमाकुन्नु ।।

1899

VB 553 **प्रश्नोत्तरसुरद्रुमः**

Beginning:

यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् ।
विघ्नं निघ्नन्तु सततं विष्वक्सेनमुपास्महे ।।
ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ।।
उदारगुणशीलस्य संचितोऽर्थः कदापि न ।
नास्ति किं तालवृन्तस्य मन्दमारुतसंग्रहः ।।
अब्धिर्हीरमपदे बन्धत्ते शिरसा तृणम् ।(?)
क्रयविक्रयवेलायां हीरं हीरं तृणं तृणम् ।।
युष्मास्वधिगतः कामं कल्याणगुणसिन्धुषु ।
मदुक्तिवादोऽयस्कारवाटिकासूचिविक्रयः ।।
रावणस्य कियद्वक्त्रं नूपुरं कुत्र धार्यते ।
आन्ध्रगीर्वाणभाषायामेकमेवोत्तरं वद ।।

Fol. 2b

अङ्गं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलि-
दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं तु लालायुतम् ।
वाक्यं नाद्रियते च बान्धवजनैर्भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते ।।
श्रीमन्तङ् . . णपं भक्तवात्सल्यमीश्वरम् ।
प्रणम्य सदयं कुर्वे प्रश्नोत्तरसुरद्रुमम् ।।

श्रीमद्गीर्वाणभाषासु सभायोग्यासु पण्डिताः ।
पठित्वा सर्वशास्त्राणि पाण्डित्यं ये न लेभिरे ।।
असाधारणपाण्डित्यं तासु तेषां यथा भवेत् ।
तथा कुर्यामहं शब्दैः प्रश्नोत्तरमनोहरैः ।।
सच्छास्त्रज्ञानरहिताः सच्छास्त्रज्ञानिनोऽपि वा ।
काव्यालंकारनिष्णाताः किंचित् तज्ज्ञानसंयुताः ।।
अथ शंकरविष्ण्वादिपूजाकाले च . त्रके ।
श्रौते कर्मणि च स्मार्ते भाषा योग्या न पामरी ।।
वयं गीर्वाणभाषासु व्यवहर्तुं न पण्डिताः ।
मौनं तु मूकतातुल्यं कर्तव्यं न प्रबोधयेत् ।।
इति चिन्तासमायुक्ताः कर्मठाः पापभीरवः ।
तेषामपि च सामर्थ्यं देवगीर्षु भवेदिति ।।
एष मेऽस्तु समारम्भः विदुषां तुष्टये सदा ।

गङ्गाधर महागणपते स्वामिन् हरे नारायण कृष्ण । सुदिनं सुप्रभातम् । यज्ञेश परदेवते पाहि ।

End:

तस्मात् श्रुतिप्रमाणं तु विभूतेरस्ति विस्तरात् । तथा हि काठरायणश्श्रुतऋषयस्तमुपेत्य पप्रच्छुरित्यारभ्य किंचिद् ग्रन्थोत्तरमधीहि भगवो विभूतिधारण वि . . . . . ङ्गवं तन्महत्त्वं च इति स होवाच काठरायणः शृणुध्वम् । . . . . . .

1909

VB 651(b) **एकाक्षररत्नमाला**

Beginning:

बाक्यबोधं महायत्नादालोच्य च पुनः पुनः ।
नत्वाहं . . कौ कुर्वे एकाक्षरनिघण्टुकम् ।।
गुप्तं त्वमरकोशादौ प्रोक्तं नासीज्जयादिभिः ।
कवितारसनिष्पत्यै बालानां च हिताय वै ।।
ककारादिकमारभ्य नानार्थो कथ्यते मया ।
कं ब्रध्नः पण्डितो भूमौ हर्ष ए . . . विरिञ्चकम् ।

End:

आगामिनि दिने श्वः स्यादव्ययं तु प्रकीर्तितम् ।
बिल्ववृक्षे वृषे लक्ष्म्यां नृशब्दः कथ्यते स्त्रियाम् ।।

स्नुशब्दशैलकटकाः पुंलिङ्गाः प्रकीर्तिताः ।
स्नः स्त्रियां करके व्रीहौ स्कोऽव्ययं दिवसागरे ।।
क्ष्माशब्दः कथ्यते धीरैः स्त्रीलिङ्गे भूमिवाचकः ।
. . . . . .साधने धीरैः मूलीयपञ्जरे ।।
मिथ्यानिज. . . . . .
यस्त्यागेन सुरद्रुमं. . . . सव्येन धर्मात्मजं
धर्मेणानुकरोत्यसौ **हरिहरो** नाम क्षमावल्लभः ।
तत्साम्राज्यधुरंधरो गुणनिधिः श्रीनारायणस्यात्मजो
मन्त्री माधवको निघण्टुमकरोन्नामार्थमेकाक्षरम् ।।

Colophon:

इति श्रीहरिहरा . . . त्मजमाधवकृतौ एकाक्षरनामरत्नमालायां युक्त्यैकाक्षरकाण्डः ।।

Date:

बहुधान्यसंवत्सरमार्गशिरः १२ गुरुवारः

1917

VB 692 **नामलिङ्गानुशासनम् (सटिप्पणम्)**

Beginning:

सलिङ्गशास्त्रैः सन्नन्तकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहे लिङ्गं संकीर्णवदिहोन्नयेत् ।।
लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।
स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च ।।
नाम विद्युन्निशावल्लीवीणादिग्भूनदीह्रियाम् ।
अदन्तैर्द्विगुरेकार्थो न स पात्रयुगादिभिः ।।

End:

स्थालं भोजनपात्रम् । वाह्लीकं कुङ्कुमम् । तण्डकः परिष्कारे । अर्बुदमक्षिरोगे । पातको गोहत्यादौ । चर. . . . . मुण्डं शिरसि । शीधु मद्ये । बुस्तं मांसशष्कुल्याम् । संगमो नद्यादिमेलने । शतमानं पलार्द्धे । अर्मं नेत्ररोगे । शंबलं पाथेये कवियमश्वमुखबन्धने । पारमुत्तरतीरे । पूयं क्लिन्नासृजि । प्रग्रीवं वातायने । पात्रीयं यज्ञोपकरणे । यूषो मुद्गादिनिर्यासे । चिक्कसः यवचूर्णे ।

Clophon:

इति लिङ्गसंग्रहवर्गस्थप्रसिद्धपदविवरणग्रन्थः संपूर्णः

1922

VB 661(a) नामलिङ्गानुशासनव्याख्या (अमरपदविवृतिः)

Beginning:

शिवं हरिं विधातारं तत्पत्नीस्तत्सुतान् गुरून् ।
नत्वा समस्तप्रत्यूहशान्तये मङ्गलाय च ।।
पदवाक्यप्रमाणज्ञैः क्षीरस्वाम्यादिसूरिभिः ।
कृतग्रन्थान् समालोच्य बालानां सुखबुद्धये ।।
यत्कृतं सुरसिंहेन नामलिङ्गानुशासनम् ।

हे धीराः विद्वांसः यस्य गुणाः अनघाः निर्मलाः स देवः श्रिये चामृताय च लक्ष्म्यै च मोक्षाय च सेव्यताम् आराध्यताम्; भुक्तिमुक्तिफलावाप्त्यै इत्यर्थः । किं विशिष्टस्य । ज्ञानदयासिन्धोः ज्ञानं च दया च तयोः सिन्धुः तस्य अगाधस्य विषयलिप्सारहितस्य । किं-विधः? अक्षयः क्षयरहितः । श्लोकोऽयं समुद्रपक्षेऽप्यूहनीयः । अस्य विष्णोः क्षयो निवासः अक्षयः ।।

Colophon:

इति वङ्गललिङ्गयसूरिविरचितायां अमरकोशपदविवृतौ शैलवर्गनामलिङ्गविवेचनम्

End:

मर्कटवत् पाट्यतीति मर्कटी । कोन्तिवन्नेकानुगु । अङ्गारवर्णा वल्लर्यो अस्याः सन्तीति अङ्गारवल्लरी । निप्पुवन्नेगलपूगुत्तुलगलकानुग । एते करञ्जभेदाः ।। छिन्नप्ररूढा . . .
रोहीति । रुह(बीज)जन्मनि प्रादुर्भावे(च) । नकारान्तः । ईकारान्तोऽपि केचित् । रोहितकश्च । अयमेव धातुः । प्लीहाख्यरोगशत्रुः प्लीहशत्रुः । दाडिमस्येव पुष्पाणि (अस्य) दाडिमपुष्पकः । मुल्लुमोदूग । गायन्तं वैद्यं त्रायत इति गायत्री । त्रा रक्षणे । . . . . अयमाकारान्तः ।

1927

VB 628(f) निघण्टुसमयः (धनंजयनिघण्टुः)

Beginning:

प्रणताशेषगीर्वाणग्रामणीमणिमौलिभिः ।
संघट्टितक्वणत्पादपीठायास्मै नमोऽर्हते ।।
द्वयं द्वितयमुभयं यमलं युगलं युगम् ।
युग्मं द्वैतं यमं द्वन्द्वं पादयोः पातु नो हरेः ।।

Fol. 4

शकलं विकलं गण्डं शल्कं लेशं लवं विदुः ।
क्षेमं कल्याणमभयं श्रेयो भद्रं च मङ्गलम् ।।
देवसूर्यौ विवस्वन्तौ विष्णुरुद्रौ वृषाकपी ।
वैकुण्ठाविन्द्रगोविन्दावनन्तौ शेषशार्ङ्गिणौ ।।

End:

मेहनाग्रे मणी रत्ने स्तभकण्ठस्तनेऽपि च ।
सिद्धः सिद्धौ निषद्यायां महत्सिद्धः श्रियामपि ।।
प्रज्ञा. . . . . .क्रम्य चिरं नामार्थधारिणः ।
शब्दाः सुखं वसन्त्वत्र यशःशेषे धनंजये ।।

Colophon:

इति धनंजयस्य कृतौ निघण्टुसमये नानार्थनिरूपणं नाम द्वितीयः परिच्छेदः । इति धनंजयनिघण्टुः समाप्तः

Scribe adds:

सर्वजिद्धायनाषाढकृष्णश्रेयोदिने तिथौ ।
नवम्यां वेङ्कटार्येण निघण्टुर्लिखितः स्वयम् ।।
. . .भौमे निखिलजिति भानौ शुचिगते
पार्श्वे नीलिमनि प्रशस्तदिवसे याम्ये नवम्यां तिथौ ।
श्रीमत्काश्यपवंशवारिधिविधोः श्रीवाससूनोस्तनू-
जातेनायमलेखि शब्दरचना नूनं निघण्टुः स्वयम् ।।

1932

VB 701 **शब्दरत्नाकरः**

The work contains the following Adhyāya-s:

१ काण्डः

आदिदेवाध्यायः दिक्पालाध्यायः ग्रहाध्यायः ऋष्यध्यायः मेघाध्यायः शब्दाध्यायः कालाध्यायः चित्ताध्यायः पातालाध्यायः

२ काण्डः

वसुंधराध्यायः पर्वताध्यायः वनाध्यायः चतुष्पादध्यायः शकुन्ताध्यायः पुराध्यायः उक्तिभेदाध्यायः नाटचाध्यायः

३ काण्डः

मनुष्याध्यायः ब्रह्माध्यायः क्षत्रियाध्यायः वैश्याध्यायः शूद्राध्यायः विशेष्यनिघ्नाध्यायः संकीर्णाध्यायः उक्तशेषाध्यायः

अनेकार्थाधिकारे व्यक्षराध्यायः नानाधिकारे चतुरक्षराधिकारः अनेकार्थाक्षराधिकारे पञ्चाक्षराध्यायः अनेकार्थाधिकारे एकाक्षराध्यायः अनेकार्थाव्ययैकाक्षराध्यायः अनेकार्थाव्ययद्व्यक्षराध्यायः अव्ययाध्यायः

Beginning:

सोमाङ्गमुत्तंसयते वामाङ्गमवरुन्धते ।
नमः परस्मै देवाय तेजोभिः पश्यते त्रिभिः ।।
वरदाग्निचितः पौत्रः पुत्रः कोवटियज्वनः ।
जागर्ति **वामनो बाणो** वत्सवंशशिखामणिः ।।
तेन जिज्ञासमानानामुपकर्त्रा विधीयते ।
शब्दरत्नाकरो नाम निघण्टुर्मान्द्यखण्डनः ।।
नामलिङ्गप्रकाशैकदर्पणे प्राज्ञतर्पणे ।
पूर्वशास्त्रकृतं लक्ष्म यत्तदत्र निबध्यते ।।
पञ्चधा वर्धते शब्दः लिङ्गस्त्रीपुंनपुंसके ।
अव्यये लिङ्गसांकर्येऽप्येषामन्त्यं चतुर्विधम् ।।

End:

अप्यर्थे यदि वार्थे स्यात् प्रसह्य प्रसहार्थके ।
प्रकारे चान्यथेतरथा कथमित्थं यथा तथा ।।
उपरिष्टादुपर्यूर्ध्वे स्यादधस्तादवागधः ।
इतिह स्यात् संप्रदाय ऊमुक्ते रोषसंभवे ।।

Colophon:

इति वत्सकुल**वामनभट्टबाणवि**रचिते **शब्दरत्नाकरे** अव्ययाध्यायः समाप्तः

1941

VB 478(a) **वृत्तरत्नाकरव्याख्या**

Beginning:

लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं च न लघु वा प्रथमेऽर्धे नियतमार्यायाः ।।
षष्ठे द्वितीयलात् परकेन्ले मुखलाच्च स यतिपदनियमः ।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ।।

सूतं व . . . . .रु वदान्य शा . . . . . ।
वाणी यत्पदपद्मस्मरणाद् वदनाम्बुजे नटति ।।
वारिजभव वदनाम्बुजरङ्गस्थले वाणि नि. . .भजे ।
वाणी. . . .चत्वार्यत् पद. . . . . योगीन्द्रवृन्दस्य ।।
विघ्नौघतिमिरभाजं विनायकं विश्ववन्दितं वन्दे ।

End:

स्यादिन्द्रवज्रा यदि तौ जगौ गः ।
राधासहायं विषयौघहेयं रायं व्रजस्त्रीनिचयस्य गेयम् ।
व्रय्यन्तसीमाभिरजय्यमन्यैर्जय्यं च भक्तैः. . . . . ।।
वारांनिधौ वायु. . .जाता भङ्गा समायान्ति परस्परं च ।
भङ्गं तथा भार्गवशिष्य . . . . . .
. . . . . .
लोलम्बडिम्भस्य च रोहितं तद् राजेत चेद्राज . . . . . सक्तेः ।
. . . . . .

1942

VB 649(b) **वृत्तलक्षणसंग्रहः**

Beginning:

प्रणम्य तातचरणान् श्रीरामस्वामिदीक्षितान् ।
भास्करो रचये वृत्तलक्ष्यलक्षणसंग्रहम् ।।
उक्तायां गो-स्थः । श्रीकृत् ।। २ ।।
अत्युक्तायां गोगु । पायात् । देहार्धस्त्रिः ।। ३ ।।
गङ्गामौलिः । सस्त्रीकोऽव्यात् ।। ४ ।।

End:

न भगवन्तमुमासहचरं विना
मम गतिर्वि. . पाकः मधु . . . स्यात् ।। ५१ ।।

1952

VB 624 **कुवलयानन्दः**

Originally, it seems, this MS. contained only up to the 100th Alaṃkāra. Then the rest, beginning with Rasavadalaṃkāra is added by a new scribe. The folios of this MS. are also separate. The leaf is newer and the scribe is also different. At the end of the 100th Alaṃkāra this verse is added:

विहाय कमलालयाविलसितानि विद्युन्नटी-
विडम्बनपटूनि मे विहरणं विधत्तां मनः ।
कपर्दिनि कुमुद्वतीरमणखण्डचूडामणौ
कटीतटपटीभवत्करटिचर्मणि ब्रह्मणि ।।

In the beginning 4 fly-leaves have some scribblings of some portion of *Kuvalayānanda* and *Candrāloka*. 4 fly leaves at the end give the *Candrāloka* verses up to the end of Dīpakālaṃkāra.

1972

VB 625 **चन्द्रालोकव्याख्या (बुधरञ्जनी)**

Beginning:

परस्परतपःसंपत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ।।

अथ अर्थालंकाराणां मध्ये प्रधानत्वात् प्रथममुपमा निरूप्यते । सा च संक्षेपतो द्विविधा । पूर्णा लुप्ता चेति । उपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णां प्रयोगे पूर्णतेह्यते । अत्र प्रथमार्धं लक्षणम् । द्वितीयार्धमुदाहरणम् । एवमुत्तरत्रापि प्रायशः पूर्वार्धवल्लक्षणमुत्तरार्धवल्लक्ष्यमित्यवगन्तव्यम् । लक्षणवाक्यं व्याख्यायते . . . .

End:

अत्र तु मन्मथास्त्राणि अनिशितमृदुत्वाद् विकलानि तथापि जगज्जयरूपकार्यवर्णनाद्विभावना । यथा वा

उद्यानमारुतोद्धूताश्चूतचम्पकरेणवः ।
उदश्रयन्ति पान्थानामस्पृशन्तोऽपि लोचने ।।

उद्यानेति । उद्यानमार्गोद्धूतानां चूतानां चम्पकानां च रेणवः पान्थानां लोचनेऽस्पृशन्तोऽपि उदश्रयन्ति उद्गतबाष्पं कुर्वन्ति । अतः रेणूनां . . . . . .

1990

VB 642 **साहित्यरत्नाकरव्याख्या (नौका)**

Beginning:

काञ्चीपुरवरनिलये मणिगणविलसत्सुवर्णसद्वलये ।
वलयीकृतभूवलये कलये कामाक्षि सर्वदा हृदये ।।

शरदिन्दुविलासमन्दहासां स्फुरदिन्दीवरलोचनाभिरामाम् ।
अरविन्दसमानसुन्दरास्यामरविन्दासनसुन्दरीमुपासे ।।
चूडालमिन्दुकलया कलयामि यामि यामिन्यधीशनयनं जयिनं पुरां च ।
मन्दाकिनीचटुलतुङ्गतरङ्गसङ्गत्वङ्गत्कपर्दमनिशं शरणं गिरीशम् ।।
सेवाप्रह्वत्सुरेन्द्रस्फुटमकुटतरस्फारहारादिरत्न-
प्रापत्तारावधूटीकरपरिचरणामन्दनन्दन्नखेन्दुः ।
मुद्रां भद्रां दधानो वटविटपितटं प्राप्य तन्तन्यमानां
मेधां मेधोपशब्दः प्रकटयतु स नो दक्षिणामूर्तिरीशः ।।
संध्यायां तामराञ्चन्मकुटतटवसन्मञ्जुमन्दारमाला-
सीदन्निर्यत्ननिर्यन्मदजलनिजसद्गण्डतुण्डान्तचारान् ।
भृङ्गानारात्प्रकुर्वन् मधुपततिधियैवोत्तमाङ्गं प्रधुन्व-
न्स्वर्णाकर्षद्गणेशो ध्रुवमवतु गुरोस्ताण्डवामोदमानः ।।
अचञ्चलतटिल्लतां कपिलकालकादम्बिनी-
कदम्ब इव कामिनीं निकटगां प्रपश्यन्स्त्रियम् ।
कराञ्चितसरोरुहां निबिडभव्यवीरासनः
शुभानि सततं क्रियान्मम च रामचन्द्रः प्रभुः ।।
कनत्कल्याणाद्रिद्वयमपि दिवौकःप्रतिकला-
दरप्रेक्षाशिक्षागुरुकनकताटङ्ककयुगला ।
कलक्वाणश्रोणीपटुकलितकाञ्ची विधिसती
शरच्चन्द्रातन्त्रप्रतिभटसुगात्रा स्फुरतु मे ।।
परिणतशरत्तारा राजस्फुरद्वदनज्वल-
त्त्रिनयनसरोजाता माता कुशेशयविष्टरा ।
सततमसतो लोकानाराद्गता निदधत्यलं
स्फुरतु पुरतो ध्येयास्माकं परा बगलामुखी ।।
चक्रस्यन्दनदीर्घिकाहलमहानागेभभद्राकृती-
नानाबन्धविचित्रकाव्यविलसत्संसारबीजो भवेत् ।
छात्रो यद्वदनाब्जदर्शनपरो विद्यानटीरङ्गभूः
स्यात्तं काश्यपगोत्रसागरशरच्चन्द्रं गुरुं संस्तुमः ।।
करोतु विवृतिं भवानिति यतोन्द्र ऊचे मुदा
नमत्प्रभुशिरस्फुरन्मकुटहीरकान्तिछटाः ।
यदीयमहनीयसुन्दरकटाक्षरिङ्गत्कृपाः
सुधारसनिरन्तरापतदमन्दधाराश्रियः ।।
शक्याशक्यविवेचनादिरहितैर्लोलादिभिर्वा क्रियां
गोपालाश्रमनामकैर्यतिवरैराज्ञापितो बालिशः ।

धर्माख्यार्यकवेः सुधारसझरीकल्लोलवेल्लत्कृतेः
सद्वचाख्यां वितनोति वेंकटकविश्चेल्लान्ववायोद्भवः ।।
मामकीं वज्रनौकां तामादाय बिबुधा मुदा ।
साहित्यरत्नाकरेऽस्मिन् विहरन्तु निरर्गलाः ।।

अथ तत्रभवान् धर्मभट्टाख्यो महाकविः,

मोक्षोपयोगिनो रामवासुदेवादयो मताः ।
राम मोक्षाय चिन्तयेत्

इत्यादिविधेः श्रीराममीमांसायाः मोक्षसाधनतां श्रवणविधेरेव शारीरकमीमांसायाः प्रतीत्य श्रीरामचन्द्रकथानिर्वर्तकं काव्यं लिलक्षयिषुः, प्रारिप्सितस्याविघ्नपरिसमाप्तये प्रचयगमनाय च मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथयन्त इत्यादि भगवद्भाष्यकृद्भाषितात् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वप्रतिपादकाचार्यदण्डिवचनाच्च शिष्टाचारपरंपरापरिप्राप्तमङ्गलकर्तव्यतामावश्यकीं कुर्वाणः, सर्वे विघ्नाःशमं यान्ति गणेशस्तवपाठतः इत्यादिवचनप्रामाण्यात् प्रारिप्सितपरिपन्थिप्रत्यूहप्रशमनपटुतरं गणेशं प्रति प्रार्थनारूपं मङ्गलमादौ अन्तेवास्यनुग्रहार्थं श्लोकतो निबन्धाति— आलिङ्गचेति ।

Fol. 20 Colophon:

इति श्रीमच्चेल्लवंशसुधाम्बुधिराकासुधाकरसकलसर्वंसहामरमण्डलानन्दसंदोहसंदायिसकलकलापरिपूर्ण**वेंकटसूरि**विरचिते **साहित्यरत्नाकरना**मालंकारशास्त्रस्य विद्वज्जनमनोरञ्जने वज्रनौकाख्ये व्याख्याने ग्रन्थारम्भसमर्थनं नाम प्रथमस्तरङ्गः ।

End:

अस्मिन् स्वप्रबन्धे मत्सरिणां संतोषाभावेऽपि यत्करोषि यदश्नासि इत्यादिगीतावचनानुरोधेन अस्य भगवदर्पणबुद्धया कृतत्वात् स एव संतुष्टो भवेदित्याह—प्राचीनेति । कवितां प्रार्थयते —भो मातरिति । विस्रवसामगन्धवन्मेदः अस्रं रुधिरं पूयपिशितं दुर्गन्धमांसं एतेषां तापे अभिलाषो अस्यास्तीति तादृशः । अथ कविः स्वकर्त्रनुव्यक्तये स्वग्रन्थस्य प्रचयगमनाय च स्वमहत्तावर्णनपूर्वकं स्वग्रन्थमाशास्ते—संजात इति । दर्शनकारिणां शास्त्रकृतां षण्णां षट्संख्याकानां सुमनसां पाणिन्यादिमहर्षीणां ऐकात्म्यलीलायितः ऐकात्म्यलीलैवाचरितः ऐकात्म्यं गत इत्यर्थः । तत्सदृश इति भावः ।

पाणिनेर्जैमिनेश्चैव व्यासस्य कपिलस्य च ।
काणादस्याक्षपादस्य दर्शनानि षडेव हि ।।

इति पाणिन्यादयः षड्दर्शनकृत इति वेद्यम् । अन्यत्सुगममिति सर्वं रमणीयम् ।

Colophon:

इति श्रीमत्त्रिभुवनपवित्रविचित्रचरित्र चेलान्ववायसुधा . . . कायमानश्रीमद्वह्म्यान्तर्वाणि-वर्यपौत्रस्य श्रीसूरमाम्बासहचर श्रीलक्ष्मणसूरिसूनोः **श्रीवेंकटसूरिणः** कृतौ साहित्यरत्नकरव्याख्याने **नौकाख्याने** रसनिरूपणं नाम दशमस्तरङ्गः ।।

श्रीमल्लोहितगोत्रलक्ष्मणसतीश्रीसूरमाम्बासुतः
श्रीमद्वेंकटसूरिणो विजयतां नौका त्वि . . . ।
. . . . लम्ब्य वीचिभरिते साहित्यरत्नाकरे
गृह्णन्त्वद्य रसं यथामति बुधाः सर्वे गुणग्राहिणः ।।
केचित्कर्कशतर्कवक्रफणितिक्षुण्ण . . . . . .
दाक्षिण्य. . भवतिदुर्गमगवीकान्तारहेलाचराः ।
अन्ये शांकरवाक्सुधातनुहितास्तन्त्रस्वतन्त्राः कति
ध्वन्यध्वप्रविशृङ्खलभ्रमणसंनिष्ठा गरिष्ठाः परे ।।
अ . . . . . सपाकोऽप्यहं तदपि मामकीनोऽयमि-
त्यतीव करुणावतां मयि निवेश्य सन्तो बुधाः ।
ममाल्पवचनामिमां विवृतिमद्य गृह्णन्त्वमी
सतो प्रकृतिरी . . . वृणुयादगुणं व . . कुर्वते ।।

1993

VB 1202 **हस्तलक्षणदीपिका**

Beginning:

नमितानामिका यस्य पताकः स करः स्मृतः ।
सूर्यो राजा गजः सिंह ऋषभो ग्राहतो रणे ।।
लता पताका वीचिश्च रथ्यापातालभूमयः ।
जघनं भाजनं हर्म्यं सायमाध्यंदिनं धनम् ।।
वल्मीकमूरुर्दासश्च चरणं चक्रमासनम् ।
अशनिर्गोपुरं शैत्यं शकटं सौम्यकुब्जकौ ।।

End:

पापापराधदोषाश्च तार्क्ष्यहंसजटायुषः ।
विलम्बक्रममन्त्राश्च तुल्यहस्ताः समीहिताः ।।
विषादव्याधिदुःखानि समहस्तानि केवलम् ।
अनेकार्थकराः प्रायो दर्शिताः शास्त्रवर्त्मना ।।

Colophon:

इति हस्तलक्षणदीपिकायां द्वितीयः परिच्छेदः समाप्तः

1996

VB 676(e) **संगीतविषयः**

Contains the *svaraprayoga* of the following Rāga-s.

सामन्तम् । रीतिगौलम् । नारायणगौलम् । मलहरि । भूपालम् । शुद्धवसन्तरागम् । गौलमेलम् । ललितरागम् । देशाक्षि । कुक्कुटगौलम् । सारङ्गम् । मोहनम् । काम्बोजि । केदारपन्तम् । तोटि । गुर्जरि । मध्यमावति भैरवि । सावेरि । बिलहरि । घण्टा । आहटि । मुखारि । भैरवि ॥

Beginning:

ध ध प ग । ध ध नि ध ध प ग . . . . . ध प ग ध ध । सा स रि रि ग प ग ग रि सा नि ध प ध । रि रि स स नि सा । रि स सा ध धा प ग ग गा रि ध ध ग । रि रि ग ग रि रि रि स नि । ध नि सा ध ध गा सा नि ध ध प ग प ।

End:

स स प धा प प प प सा पा स । पा सा । नि ध नि प ध प म पा धा नि स ग ग म म गा गा रि सा । . . . . . स नि नि स स । प क । सा . . . . ग ग ग रि स स नि ध नि प ध नि स ॥ १ ॥

ग ग म गा ग रि स नि धा नि प ध नि सा . . . . . .

2001

VB 727 **रथलक्षणम्**

Beginning and End same as in Ser. no. 2002.

Colophon:

इति विश्वकर्मीये रथलक्षणविधानो नाम षण्णवतो . . . . . .

The fly leaf gives the name *Rathalakṣaṇam* and mentions the names of some works:

लम्पाकव्याख्या, यजुर्विनियोगसंग्रहः, दर्शपूर्णमासादिमन्त्रभाष्यम्

Some mantra-s are added at the end:

. . . हृदयाय स्वाहा । ओं ह्रीं शिरसे स्वाहा । ओं क्रों शिखायै वौषट् स्वाहा । ओं ऐं कवचाय हुं . . . . . नेत्रत्रयाय वौषट् स्वाहा । ओं ह्रः अस्त्राय फट् स्वाहा । दशांशत इति मन्त्रेण देवतीर्थेन . . . . . स्वाहा । ओं ह्रां रुद्राय स्वाहा ओं ह्रां विश्वेभ्यो देवेभ्यः स्वाहा . . . . . ।।

2002

VB 737(k) **रथलक्षणम्**

Beginning:

अथ वक्ष्ये विशेषेण रथलक्षणमुच्यते ।
श्रीकरं विजयं कान्तं श्रीकेशं च विशालकम् ।।
श्रीभद्रं श्रीविशालं च भद्रं भद्रविशालकम् ।
एवं नवविधं प्रोक्तं तन्त्रविद्भिः पुरातनैः ।।
द्वित्रिचक्रचतुष्पञ्चषट्सप्ताष्टकमेव वा ।
नवानां च . . संयुक्तं श्रीकरादि यथाक्रमम् ।।

End:

भवनकाधिपदेवान् पद्मजत्वापतेतत्
विविधचरुबलीतत् विश्वकर्मा तदेतत् ।
रथ . . . . . न्मीलनैर्नामदेवान्
सुरपतिपददेवान् पद्मजत्वापतेतत् ।।
विविधचरुबलीतत् विश्वकर्मा तदेतत्
. . . . .नयनोन्मीलनैर्नामदेवान् ।
सुरपतिपददेवान् शुद्धपुण्याहवाच्यैः
नरपतिविमलविप्रैर्नन्ददे . . . . . द्रे ।।
सकलविभवदत्त्वा सर्वदेवैश्च रक्षैः ।

Colophon:

इति **विश्वकर्मीये रथलक्षणविधानो** नाम षण्णवतोऽध्यायः

2004

VB 754(c) **आयुर्वेदपरिभाषा**

Beginning:

जयति गगनैकदीपः प्राचीवदनैकदर्पणस्तपनः ।
उदयाचलैकतिलकस्त्रिभुवनमुकुटैकमाणिक्यम् ।।

अव्यक्ता . . क्तसंदिग्धार्थप्रकाशिकाः ।
परिभाषाः प्रवक्ष्यन्ते . . . . . सुनिश्चिताः ।।

End:

कराङ्गुलीपर्वयुग्मं द्रवमध्ये निमज्जयेत् ।
तल्लग्नं यावदुत्तिष्ठेद् द्रवतद्विन्दुसंधिकम् ।।

Colophon:

इत्यायुर्वेदपरिभाषा समाप्ता

2009

VB 369 (i) **वैद्यसारसंग्रहः**

Beginning:

अमृतकलशहस्तं कान्तिसंपूर्णदेहं
सकलविबुधवन्द्यं वेदशास्त्रैरचिन्त्यम् ।
कनकरुचिरपक्षैः पूर्यमाणाण्डगोलं
सकलविषविनाशं चिन्तयेत् पक्षिराजम् ।।
श्रीनाथं पार्वतीनाथं वाणीनाथं सरस्वतीम् ।
दुर्गाविटुकहेरम्बं नमस्तेऽस्तु सदान्वहम् ।।
मघवानिव देवानां ज्योतिषामिव भास्करः ।
चन्द्रमा इव ताराणां व्याधीनामीश्वरेश्वरः ।।
जलपाने मनुष्याणामामवृद्धिः प्रजायते ।
आमाधिक्येन मन्दाग्नौ न मन्दो जीर्णमाप्नुयात् ।।
अजीर्णे ज्वरमाप्नोति वाहटेन प्रकीर्तिताः ।

वातज्वरस्य जीरकादिकल्कम् ।

End:

अयदुर्मलजे यामं सम्यक् शुद्धं भविष्यति ।

इति चिन्तामण्यां द्वितीयो . . . . . अयरजशुद्धिः । जम्बीररसे ताम्ररजशुद्धिः । विषमुष्टिः फलसारे नागशुद्धिः प्रश्नीकर्पणिरसे . . .

2015

VB 733(a) **ग्रहतन्त्रम्**

In Madras Govt. Oriental MSS. Library there is one *grahatantravivaraṇam* by Veṅkaṭeśa Yajvan. According to him the text is by Ahobila. This work though similar in contents seems to be different.

Contents:

१. मध्यग्रहाधिकारः २. शुद्धाधिकारः ३. सूर्यग्रहणाधिकारः ४. छायालग्नाधिकारः ५. पाताधिकारः ६. लिप्ताधिकारः ७. भेद्याधिकारः ८. शृङ्गोन्नत्यधिकारः

Beginning:

श्रीमद्यल्लयार्यगुरुभ्यो नमः ।

श्रीलक्ष्मीनृसिंहचरणाब्जिघ्रपदयुग्म . . . . . ।
. . . ह्यनुभवयोगीन्द्रपूज्यो . . नित्यं नमाम्यहम् ।। १ ।।
हरिपादाञ्चिता . . श्रीप्रधाविततमो . . . . . ।
यल्ला . . . ख्यभास्व . . . . . भजे ।। २ ।।
दैवज्ञेशार्चितश्रीमान् द्विजराजशिखामणिः ।
भारद्वाजोत्तमस्यास्य सर्वज्ञो जनिसं . . ।। ३ ।।
लक्ष्मी . सत्कुलोदारः सर्वसिद्धान्तपारगः ।
सौम्यसेव्यः समुदभूद् . . . प्पय्यविद्विधुः ।। ४ ।।
तत्पुत्रः पापतिम्मार्यः सर्वसिद्धान्तसारवित् ।
श्रीमल्लक्ष्मीनृसिंहीयग्रहतन्त्रं करोम्यहम् ।। ५ ।।
षष्टिर्दश (१०) घ्नप्रभवप्रमुखापगताब्दयुक् ।
निर्वा . . दिभिः . . युक्ता समास्युःशक . . धोः ।। ६ ।।
शंक . ष्ट . शरै (१५) . . . . स (१२) मो पातमासयुक् ।
. . धग्निघ्नो (१०) गताब्दार्थहीनोऽब्धिशरम् ।।

Colophon (fol. 3a):

इति लक्ष्मीनृसिंहीये **पापतिम्मय**धीमता ।
मध्यग्रहाधिकारोऽत्र प्रथमः परिकीर्तितः ।।

End:

मध्यचिह्नाद् विभा देया सूत्रे तद्वलनाग्रगे ।
विधा . . भि . . दौ कृतिर्विधोरत्र विज्ञेया ।।
गणकोत्तमैर्वलनान्यदिक् शृङ्गमुन्नतं त्या . . मितम् ।
श्रीमल्लक्ष्मीनृसिंहीयं जीयाद्भव्येन्दुतारके ।

Colophon:

इति लक्ष्मीनृसिंहीये **पापतिम्मय**धीमता ।
शृङ्गोन्नत्याधिकारोऽयमष्टमः समुदाहृतः ।।

Scribe adds:

तद्वंशजा यज्ञमाम्बा तत्सुतो वेङ्कटेश्वरः ।
तेन पञ्चाङ्गसर्वस्वं लिखितं सर्वसंमतम् ।।

भवाब्दे पुष्यमासे च पक्षे ह्यसितसंज्ञिके ।
तृतीयायां सौम्यवारे ग्रन्थमेनं व्यलीलिखत् ।।

2020

VB 742 लघुमार्गः

This work seems to be a condensed form of *Praśnamārga*. At the end of second chapter the colophon reads: *iti praśnamārge dvitīyo 'dhyāyaḥ*. Some verses are common to both. The author also seems to be the same.

The benedictory verses in the beginning of both refer to Cellūranātha, a deity enshrined in the temple of Cellur. The last chapter contains verses not only in Sanskrit but in Maṇipravāla style also up to 75 leaves, the numbers being in Malayalam figures. 6 fly leaves contain an account of some work on astronomy and/or astralogy in grantha script.

Beginning:

सूर्येन्द्वग्निविलोचनं गिरिसुतारक्तं बुधान्तःस्मृतं
देवेड्यं रजताचलेन्द्रभृगुभूकोणाधिवासोत्सुकम् ।
सर्पालंकृतचारुविग्रहमयं वृद्धोक्षकेतुं भजे
कण्ठान्तर्गतकालकूटगुलिकं चेल्लूरनाथं शिवम् ।।
वस्तारं वाङ्मयीतीरे वक्तारं शास्त्रविस्तृतः ।
भर्तारं जगतां गौरीभर्तारं विभुमाश्रये ।।

End:

चन्द्रन्नत्र वेलुत्तपत्रमपि वा स्वर्णं मणिं निर्दिशेत्
मृत्स्नामारनपूणनूलबुधनां व्यारत्तिनां वेल्लियुम् ।
शुक्रन्नत्र वेलुत्तपुष्पमसितं नामत्रमाषादिकं
एवं नष्टमुष्टिविषयम् ।।

Colophon:

लघुमार्गे पञ्चविंशोऽध्यायः

2022

VB 737(j) लम्पाकम् (सव्याख्यानम्)

Beginning:

ब्रह्मविष्णुमहेशानां कारणं जगतोऽस्य च ।
बन्दे परतरं ब्रह्म प्रमाणातीतगोचरम् ।।

बोधाद्वैतमयं नित्यं शक्तितोऽभिन्नमीश्वरम् ।
प्रणम्य क्रियते श्रीमल्लम्पाकविवृतिः परा ।

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनार्थं स्वाभिमतां देवतां प्रणमति **पद्मनाभाख्यो** ग्रन्थकारः ।

अध्यासीनं महादेवं महापद्मद्विषड्दलम् ।
विघ्नराजं च संपूज्य वक्ष्ये लम्पाकमादरात् ।।

End:

पद्मनाभकृतं शास्त्रं शास्त्रिणां हितकाम्यया ।
द्विषष्टिश्लोकसंक्षिप्तं **लम्पाकं** लोकभूषणम् ।।

Colophon:

इति लम्पाकशास्त्रे नष्टमुष्टचध्यायः पञ्चमः

Scribe adds:

ज्योतिःशास्त्रमिदं दयाजलनिधेः श्रीरामनामाध्वरि-
श्रेष्ठस्यातुलसच्चरित्रमहितप्रख्यातकीर्तेरपि ।
दीनव्रातदरिद्रधारणपटोरन्यादृशः श्रीमतः
शीघ्रादेव हि तुष्टयेऽस्य सपदि श्रीरामभद्रोऽलिखत् ।।

2028

VB 841(g) **षट्श्लोकी (सव्याख्या)**

The Commentaries are complete. First, commentry on the first three verses is written and then the text and again eommentary in the form of short notes. There is one manuscript of this work in the Adyar Library, No. 66204.

Beginning:

नमदमरेन्द्रमणिगणसान्द्रकिरीटमरीचिपरीततया
विलसितकेसरमानतदिव्यवधूकचभारविभासितया ।
परिमललोभपरिभ्रमितालिसमूहपरीतमिति भ्रमदं
तव गिरिजाम्ब पदाम्बुजमेव निरन्तरमन्तरुदेतु मम ।।
चलमणिकङ्कणरवध्वनिपरिरिङ्खणमुग्धदिगङ्गणगुम्भिमगणं
हरिविधियोषिदुदारकराम्बुजचालितचामरधूतकचे ।
निगमपुराधिपभूधरशेखरशेखरपादसरोजयुगप्रणत-
सुरासुरमौलिविराजिकिरीटपरिणीता . . . ।।

श्रीमद्वेदपुराधिनाथ भवतो नाथामहे संनिधौ
द्वाराधीश्वरताधिकारममरा यत्रेन्द्रविष्ण्वादयः ।
मत्कार्यं प्रथमं निवेदय महादेवस्य कर्णान्तिके
नान्यस्येति. . . . पङ्क्तियुगलं संप्रार्थयन्तेऽखिलाः ।।

Folio 3:

अब्देषट्कोपिभारः कविरसभपुनर्नार्यराट् सांशुकाब्यो
यन्नक्राक्यम्बिकाथो ह्युपरि तुलहरी सा च गीसंचरोच्चम् ।
भात्तुच्छं सौ विवासः प्रतिबिसपुलिनार्थो ह्यथो स्वं क्षयाब्दा-
दर्कान्मध्यं च लोच्चं ह्यथ लवखजने ह्यर्कतुङ्गप्रदीपः ।।

End:

मध्याह्नो नाथ पर्वाननुगुणनखमुखांशोनयुक्पर्वमध्य-
स्तन्मध्याह्नान्तरघ्नक्षलवरहितयुक् साधनांशार्कदोर्भिः ।
यः संगघ्नैश्च याम्यैः वियुगसदियुगिषुर्मध्यमेदोस्तदूनं
. . . . . ।। ६ ।।

Colophon:

इयं षट्श्लोकी । अत्र त्रयाणामाद्यानां व्याख्यानं कृतम् ।

2032

VB 748(b) **सूर्यसिद्धान्तविवरणम् (गुरुकटाक्षः)**

Beginning:

भगवति कुरुत दृढतरां भक्तिं प्रह्वप्रसादकृतदीक्षे ।
करिगिरिशिखरिनिवासे देवे श्रीवल्लभे तस्मिन् ।।
गर्गान्वयशिरोरत्नं **देवराजो** महामतिः ।
भूतिविष्णुसुतः श्रीमानभूद् भूलोकभूषणम् ।।
भूतिविष्णुरभूत् पुत्रो ज्येष्ठस्तस्य सतां मतः ।
प्रतिभानवतां श्रेष्ठो धीमच्छब्देन सत्कृतः ।।
\+ + + +
इति योगीन्द्रशिष्येण. . . वपुत्रेण धीमता ।
व्याकृतः सूर्यसिद्धान्ते द्वितीयश्च स्फुटाभिधः ।।

इति **भूतिविष्णु**कृते सूर्यसिद्धान्तविवरणे **गुरुकटाक्षे** तृतीयोऽध्यायः ।।

End:

इति गुरुचरणाब्जात् प्राप्तवेदाङ्गविद्यो
विवृतिमकृत शुद्धां **भूतिविष्णु**: सुबोधाम् ।

भवति तरति भेदस्त्वत्र चेन्मय्यतो मे
कुरुत मदनुकम्पापूर्वमेतद्विशुद्धिम् ।।
गुरुकटाक्षनिरीक्षणसाधितं
विवरणं. . . . .'. . .

Colophon:

इति **सूर्यसिद्धान्तविवरणे गुरुकटाक्षे** चतुर्दशोऽध्यायः

2035

VB 141(a) **आचारसंग्रहः**

This work does not mention the name *Keralācārasaṃgraha* but only *Ācārasaṃgraha.* It deals with the traditionaly accepted *muhūrta-s,* auspicious days and inauspicious days for every domestic ceremony.

Beginning:

यत्पदपद्मद्वन्द्वं स्मरतां सिध्यत्यभीष्टमरुणं तम् ।
दहनप्लावनदक्षैः करैः प्रकाशीकृताखिलं वन्दे ।।
आचारस्य प्रधानत्वात् सर्वेषु शुभकर्मसु ।
आचारसंग्रहं शिष्टहितायाथ करोम्यहम् ।।
प्रथमं तत्र गण्यन्ते दोषाः संक्षेपजाद्भ्यात् ।
गुणानामपि दोषाणामियत्ता नैव विद्यते ।।
सूर्येन्द्वोर्ग्रहणं लाटवैधृतौ केतुदर्शनम् ।
संध्याचतुष्टयं भूमिकम्पो मेघस्य गर्जितम् ।।
निर्घातोल्कानिपातेन्दुनष्टतानिष्टदर्शनम् ।
शिवादिक्रोशनं विश्वप्रदोषो गुलिकोदयः ।।

End:

अर्धदानि विनान्योन्यं गणं यज्जन्म तारकम् ।
त्रयोदशमितं स्याच्चेद् वेधोऽयं समसर्वतः ।।
दंपत्योः पादपाण्यादिलक्षणं जन्मलग्नतः ।
फलं प्रश्नवशाद्वापि बलिनो वायसस्य वा ।।
निमित्तं चापि संचिन्त्यं विवाहं कारयेद्बुधः ।
अतीव चिन्तनीया हि नृणामुद्वाहकक्रिया ।।
पितुःपितुर्मे गुरुरग्रजन्मा **गोविन्दनामा** भुवि विश्रुतो यः ।
तेनोदितो यो गुरुपङ्क्तितो मां प्राप्तः स आचार इह प्रदिष्टः ।।

Colophon:

शिष्याणां मन्दबुद्धीनां प्रबोधाय यथा श्रुतम् ।
परमेश्वरनाम्नैतत् कृतमाचारसंग्रहम् ।।
परेषां गुणसंतप्ता न विशन्त्वत्र दुर्जनाः ।
परेषां गुणसंतुष्टाः प्रविशन्त्वत्र सज्जनाः ।।

2036

VB 1057(b) **उपदेशसूत्रम्**

Beginning:

ओं उपदेशं व्याख्यास्यामः—

अभिपश्यन्ति ऋक्षाणि पार्श्वभे च तन्निष्ठाश्च ।
तद्वद् दारभाग्यशूलस्थार्गलानि ध्यातुः ।।
कामस्थाद्भ्रयश्रीपापानां रिपुनीचकामस्थाविरोधिनः ।
न न्यूनापि सप्तानामष्टानां वा स इष्टबन्धमोक्षयोः ।।

End:

मित्रदुर्गताः परे, स्ववैषम्ये यथा संक्रमव्युत्क्रमौ

साम्ये विपरितम् शनौ चेत्येके, अन्तर्भुक्तचंशयोरेतत् ।
शुभदशाशुभयुते स्वाम्यमुच्च अन्यदन्यथा सिद्धमन्यत् ।।

Colophon:

इत्युपदेशसूत्रे आयुर्दायाध्यायस्य द्वितीयाध्याये चतुर्थः पादः

2040

VB 731 **कालविधानपद्धतिव्याख्या**

All the colophons in this MS. read śrīdharākhye . . . vyākhyāne. MSS. in the Madras Oriental MSS. Library also read the same. The Trivaudrum and Tanjavur MSS. do not have colophons. Yet the Trivandrum catalogue says the name of the author of this commentary is Śrīdhara. Other MSS. in the AL also have similar colophons.

Beginning:

करोम्यहं कालविधानपद्धतेर्व्याख्यां शिशूनामवबोधकारिणीम् ।
वसिष्ठवाचस्पतिनारदादिभिः प्रणीतशास्त्रैः प्रविशुद्धसंशयाम् ।।

अत्र व्याख्येति पदप्रयोजनलक्षणा । तथोक्तम्—

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ।।

प्रथमं प्रबन्धारम्भलक्षणां नमस्तुतिमाह—

प्रणम्य कालात्मकमेकमक्षयं भवं भवानीसखमिन्दुभूषणम् ।

Colophon:

इति **श्रीधराख्ये कालविधानपद्धतिव्याख्याने** पुंसवनविधिः समाप्तः

End:

अमावास्याद्वा सिद्धचते चेत् तदाधिकश्चान्द्रमससंज्ञो भवति । तदनन्तरं फाल्गुनश्च नेत्रे तत्संज्ञको. . . . . .

2043

VB 1057(c) **केरलीयपराशरम्**

Beginning:

स्थिरराशिगताः खेटाश्चारश्चरगतास्थितान् ।
पश्यन्ति राशीनुभयानुभयक्षेत्रसंस्थिताः ।।
चरस्थिरान् स्थिरचरान् उभये उभयस्थितान् ।
समीपसंस्थितं त्यक्त्वा पश्यन्ति त्रीन् ग्रहानपि ।।
यदा लग्नाधिपो लग्ने सप्तमे पश्यतो यदि ।
आरूढलग्नमेवात्र निर्दिशेत् कालवित्तमः ।।

End:

पार्ष्णिराशिगतौ स्फीतां यदि कालो भवेन्नरः ।
गुरुदृष्टियुते वापि सर्वदोषापवादिता ।
पार्ष्णिराशौ शुभे राहुः शनियोगे शिवः केतुः ।।

Colophon:

इति श्रीकेरलीयपराशरे **कोच्चीपुर आरामदीक्षित**विरचिते सकलसंप्रदायसारसंग्र तृतीयः संग्रहः

2047

VB 737(i) **जातकदशाफलम् (सव्याख्यानम्)**

Beginning:

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरं महः किंचिद्वीणाधरमुपास्महे ।।

फलानि नक्षत्रदशाप्रकारेण विवृण्महे ।
वयं पाराशरीं होरामनुसृत्य यथामति ।।
बुधैर्भावादयः सर्वे ज्ञेयाः सामान्यशास्त्रतः ।
एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषतः ।।

बुधैः भावादयः । लग्नादिद्वादशादिभावाः । आदिशब्देन दशाविभागकेन्द्रत्रिकोणा उच्यन्ते ।

End:

रव्यादयः पापिनो भवन्ति चेत् तेषामुच्चत्वे सति नराणां किं वा फलं भविष्यति । धातुकानां बलवत्त्वे सति यत्फलमस्ति तत्तत्फलं तैरेव लभ्यते ।

शुभाशुभानामेवं ग्रहाणामुच्चता स्वक्षेत्रादिगुणनीचराशौ शत्रुक्षेत्रादिदोषत्वबलवत्व-दौर्बल्ययोरिव हेतुरिति भावः ।

2050

VB 331(b) **जातकराजः**

Beginning:

श्रीकाश्यपपुलीनेन शिङ्गरार्येण धीमता ।
नाम्ना जातकराजोऽयं बालबोधाय तन्यते ।।
गुरुः पूर्णशुभः शुक्रस्त्रिपादशुभ ईरितः ।
बुधस्त्वर्धशुभः क्षीणश्चन्द्रः पादशुभः स्मृतः ।।

पूर्णचन्द्रो गुरुशुक्रतुल्यः स्त्रीवाचकः अर्धचन्द्रोऽप्यर्धशुभः पूर्णपापौ शनिद्विजौ ।

End:

वैयाकरणवेदान्तवेत्ता वा बालको भवेत् ।
आरूढपञ्चमयोः शनियोगे जडो भवेत् ।। २९२ ।।
मीमांसको . . . . . .

2051

VB 440(b) **ज्योतिषविषयः**

Beginning:

. . . . . क्रमेणार्ध. . . ताम् ।। १ ।।
ग्राम्यं राधिप्रभृति च फलं यौविके भू . . मेतद्वि . . .
माकाशाद्विरदककुभिर्भाजयेथायनं स्यात् ।

विकृद्भानोरयनजबलं . . . चिक्यतधिर्वा . .
द्धिमुद्यद्विवर . . . कृतं खेटचिक्यन्तरं हि ।।

याम्यो दक्षद्युदय. . . हर्निवृद्धि . . . . खेटयोः प्रागविधेयम् । मध्यस्पष्ट . . चरदि-वराच्चोनमुक्ता सुलो . . . . . न्मध्ये स्पष्टादधिकबपुषि सूनके वर्जिताच्च ।। १० ।।

End:

भावप्रवृत्तौ हि . . . प्रवृत्तिः पूर्णं फलं भावसमांशकेषु ।
. संक्रमाद्भवति कामकौले कालस्य नाशः कथितो मुनीन्द्रैः ।। १० ।।
जन्मप्रयाणव्रतबन्धः . . लनृपाभिषेकादिकरग्रहेषु ।
. . . . . स्त्रैरैव भावोक्तफलं हि यस्मात् ।। ११ ।।
उक्ते . . . . नियमाच्च मुखाकुलानि व्योमौकसारदृष्टिसमुद्भवानि ।
तस्मात् प्रवक्ष्याम्ययनं हि दृष्टिर्होरादिकां दृष्टलनिर्णयाय ।।
+ + + +
निर्याणं तव संप्रवच्मि तनय श्रुत्वापि . . . . .
प्रात . . . दिति . . . . . ।

2054

VB 728 **ज्योतिषविषयः**

This MS. contains mainly a work on astrology in Malayalam verse. It is *Praśnabhaṣā*. But it is not complete here. The leaves have no numbers and the writing is illegible. There is a portion of *Jātakādeśa* also. Every thing is misarranged. In the middle there is one leaf having the beginning of Vālmīki's *Rāmāyaṇa*. A few leaves have nos. duplicate. Apparently leaves from various MSS. are put together. There are 8 leaves at the end having some Mantra-s.

Beginning:

केन्द्रत्रिकोणनिधने धनभे शुभन्मार्
लग्नाधिपोऽप्यतिशुभश्चिरजीवितं च ।
पापग्रहङ्गळथ मून्निलुमारिलुं नन्ने-
ल्लाग्रहस्थितिकळुं पतिनोन्निल् नन्नँ ।।
लग्नाधिभावे पतिभिः सहिते च दृष्टे
सौम्यग्रहेण यदि वा बलसंयुतेन ।
भावाधिपे बलयुते शुभदृष्टियुक्ते
भावा निजोक्तबलवृद्धिकरा भवन्ति ।।

भावेशन् बलवानायि भावत्तिल् तन्ने निल्किलुं तत्र नोक्किलुं चोल्लां तद्भवानुभवं नृणाम् ।।

End:

मेटत्तु चन्द्रनुं शुभन्मार् जीवराशियिल् निल्किल् अवन् व्याळत्तिन्नैं पटि ।। ४ ।।
मेटं कोण्टु . . . गुणं शनिगुलिकन्मार् नालामेटत्तु निल्किल् दुस्वादु . . . प्रागुक्तवैभवम्
. . . . . ।।

2055

VB 745 (j) **ज्योतिषविषयः**

Contents:

Kālavidhānam, gulikan, sugrīvapraśna, puṣkaram, maraṇa praśna, etc. There is no arrangement of leaves, no folio number; they are in Malayalam verse mostly but there are some Sanskrit verses too.

Beginning:

इनि कालविधानमरियिक्कुमारैं स्वदिवसमहो मासगैः कालवीर्यं . . . वृद्धिकेता वीर्यवन्तः . . . दिवसवुं संवत्सरवुं मासवुं चोल्लुमारैं आदित्यकालं वक्ष्यामि । उत्तरायणमासगे सिंहे सिंहांशके लग्नेऽथवा रविः ।

आदित्यकालमावतैं चिङ्ङं व्याळं चिङ्ङव्याळं चिङ्ङमासं चिङ्ङकूरु चिङ्ङलग्नवुं कार्तिक उत्रं उत्राटं आदित्यनतिल् आदित्यफलं कोटुक्कुम् ।।

End:

नन्दने शोकहरिच्चफलत्तिल् यत्रपोवुमहाज्यावत् अत्र परयु शुभाङ्गाशिषम् । शरीरेण हत्वा हरिच्चज्याखण्डं तान् अत्रकूट्टि नटत्ति . . . .

2056

VB 1059 **ज्योतिषविषयः**

Contents:

Folios

७. ग्रहाणां. . . . . पितृभावः
११. विवाहनिषेधः
१३a. ग्रहप्रवेशनक्षत्रालु
१३b. दशामासं
१४. गुलिक . . . . .
१५. गृहारम्भनिषेधः

१६b. बीजावापः
१७a. लग्नशुद्धिः
b. ग्रहदशासंख्या राशिनिघण्टुः
२४. प्रश्नः
२५. नवग्रहप्रश्नालु
२७. स्त्रीपुंनिर्णयः

Beginning:

चरस्थिरोभयराशिलु . . . . चरराशयः चरराशिफलम् यतलयुटि . . . सर्वसहायं च . . . . भं चरशुभस्थिरराशयः वृश्चिकऋषभसिंहघटाश्च स्थिरराशयः । फलम्

End:

चतुष्पदामेष तु. . . . . शरापरार्धं मृगपूर्वभागम् ।
कुजस्य राशुलु तुलाकन्या . . . . . स्त्रीराशयः । तेषु शुभं भवति ।

2063

VB 1057(d) **नक्षत्रदशाफलानि**

Beginning:

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनम् ।
शोणाधरमहः किंचित् वीणाधरमुपास्महे ।।
फलानि नक्षत्रदशाप्रकारेण विवृण्महे ।
वयं पाराशरीं होरामनुस्मृत्य यथाक्रमम् ।।
बुधैर्भावादयः सर्वे ज्ञेयाः सामान्यशास्त्रतः ।

End:

लग्नं स्थिरे वा यदि वा च ऋक्षलाभान्त्यलग्नाधनहीतरेषु ।
भौमः शशीपक्षसितेतरेषु स्थिताय सो . . . नन्दयोगः ।।

तत्फलम् ।

कलास्वभिज्ञानरतास्वभोगी कामातुरः कामगुणः प्रधानः ।
यज्वा महातीर्थकृताभिषेको लोकत्रयानन्दकरो नरेशः ।।

Colophon:

इति होराशास्त्रे एकादशयोगः समाप्तः

2065

VB 1058 **पञ्चाङ्गम्**

Beginning:

वाक्यपञ्चाङ्गम् । बहुधान्यसंवत्सरस्यानयनम् । वागीशाद्याः + गजाननम् ।।

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ।।
सत्याख्यपुरिवास्तव्यमीनाक्षीसुन्दरेश्वरम् ।
प्रणम्य विदुषां प्रीत्यै कुर्वे पञ्चाङ्गमादरात् ।।
यत्र स्थिताखिलमहीसुरसूरिसङ्घा-
स्तत्पादपङ्कजमधुभ्रमरायमाणः ।
सोऽयं शराङ्गमपि यद्रविसंप्रदाया-
ज्जेजीयतां लिखति सज्जनरञ्जनाय ।।
श्रीसुब्बय्यार्यनेतारमाश्रयेऽहमतन्द्रितः ।
यदपाङ्गवशाद्दीनोऽप्येव सौभाग्यतां व्रजेत् ।।
श्रीमज्जनकजाजानेर्वसिष्ठेन महात्मना ।
प्रत्यहं प्रोच्यते यत्तत्पञ्चाङ्गफलमादरात् ।।
श्रीकल्याणगुणावहं रिपुहरं दुःस्वप्नदोषापहं
गङ्गास्नानविशेषपुण्यफलदं गोदानतुल्यं नृणाम् ।
आयुर्वृद्धिदमुत्तमं शुचिकरं संतानसंपत्प्रदं
नानाकर्मसु साधनं समुचितं पञ्चाङ्गमाकर्ण्यताम् ।।
नत्वाचार्यपरंपरार्यचरणाँल्लोकेश्वरं भास्करं
रामस्वामिमखीन्द्रदेशिकमपि स्वं सोमयाख्यं गुरुम् ।
साकं वेङ्कटशब्दपूर्वपतिभूदेवेन वाक्यं च यत्
पञ्चाङ्गं प्रतिवत्सरं लिखति यः सिद्धान्तमर्थाभिधम् ।।
वाक्यं सिद्धान्तमाद्यं रविरचितविधेर्मार्गतः सत्यपुर्या-
मर्धाङ्गं रामशेषप्रवरमतिमणेः सूनुरात्रेयगोत्रः ।
सुब्बाम्बागर्भजातः सकलगणितविद् वन्दवासीकुलाढ्यः
साङ्गं लोकोपकारं रचयति शुभदं सुब्बरामाख्यविद्वान् ।।

विन्ध्यस्योत्तरदेशे बार्हस्पत्यमानाब्दो ग्राह्यः । दक्षिणदेशे चान्द्रसौरमानाब्दौ ग्राह्यौ । बार्हस्पत्यमानेन विकृतिनामसंवत्सरः । चान्द्रसौरमानाभ्यां बहुधान्यनामसंवत्सरः ।

End:

29 गु. च. 34. 22 अनु. 34. 56 व्य. 40. 42 ब. 8. 10 रा. 21. 40 धनि. 1 कु. 40. 2 भु. 4. 7

30 शु. प. 29. 25 ज्ये. 31. 50 परि. 33. 56 तै. 29. 25 रा. 29. 30 अह. 30. 30 मीनकृष्णप...।

31 श. ष. 25. 13 मू. 29. 18 परि. 26. 39 व. 25. 13 दि. 25. 9 रा. 22. 20 मेषे. . . . . .

Extra 1 folio in the beginning:

वाक्यपञ्चाङ्गम् बहुधान्यसंवत्सरस्यानयनम्

श्रीदेशिक ते चरणसरोजे न्यस्तं बहुधान्यवत्सराङ्गम् ।
रचितं **श्रीवेङ्कटपति**नेदं वाक्यं सिद्धान्तमभिनुतं सुजनैः ॥
उररीक्रियतामेतद्वचत्ययमत्रापि विद्यते यदि च ।
क्षन्तव्यमार्यचरणैः सर्वं तन्नौमि चरणयोः सततम् ॥

2066

VB 448(c) **पञ्चाङ्गपद्धतिः**

Beginning:

श्रियमिह स ददातु श्रीनृसिंहोऽखिलां नः
प्रणतसकलदेवः प्राणिरक्षासुदीक्षः ।
स्मितयुतनिजवामोत्सङ्गसंविष्टलक्ष्मी-
कुचकलशविमर्शालोलहस्तो महौजाः ॥
लक्ष्मीं दद्याच्छ्रीविरूपाक्षदेवः
पम्पातीरे हेमकूटे निविष्टः ।
यस्मिन् सार्धत्र्यङ्गुलाक्षप्रभा स्याद्
यं च क्षोणीमध्यलेखाधिरूढः ॥
श्रीमत्कौशिकगोत्रवारिधिविधुः श्रीमन्नृसिंहात्मजः
प्राज्ञोऽहोबलभट्टसूरिरतुलो ज्योतिर्विदामग्रणीः ।
श्रीसूर्यार्यभटादिशास्त्रनिवहव्याख्यानसाम्राज्यराट्
पञ्चाङ्गस्य सुपद्धतिं बुधजनप्रीत्यै चकार स्फुटम् ॥

Fol. 44:

परखण्डं न शुद्धं चेद्वैशाखे क्षेपजा तिथिः ।
त्रिंशद्युतात् क्षेपतिथेः परखण्डं तदा त्यजेत् ॥

Fol. 58:

सौराब्दगणस्थानानां संक्रान्तिवाराद्यं उच्चेन्दु साम्यदिनाद्यं उच्चसमचन्द्रश्च क्षेपाख्यं राश्यादिः

1. ए. सं 1. 15. 31. 31. 24 साम्य. 7. 2. 56. 14. 53. चन्द्रक्षेपः 1. 9. 53. 54. 25. 11.

End (fol. 65):

म.	640.	53.	55	मे	730.	31.	3
कुं	670.	...	43	वृ	761.	27.	4
मी	700.	9.	54				

2082

VB 736(b) **वाञ्छानाथीयम्**

Beginning:

अथ वाञ्छानाथीयमारूढप्रकारमुच्यते ।
लग्नाल्लग्नपतिर्यावद्राशिसंस्थितितो ग्रहात् ।।
यावद्राशिभिरारूढः सर्वारूढः पतिर्भवेत् ।।

अस्यार्थः । लग्नादारभ्य लग्नस्वामिपर्यन्तं गणने कृते सति यावन्तो राशयः संभवन्ति तावत्संख्याकराशिषु लग्नस्वामिनमारभ्य गणितेषु यो राशिर्भवति स रूढराशिः ।

End:

अत्र भवन्तु कृतज्ञास्तत्रभवन्तो यथाप्रतिज्ञातम् ।
अथवा . . ते नास्माकं प्रार्थनां प्रतीक्षन्ते ।।

Colophon:

इति वाञ्छानाथीये . . . . चतुर्थः पादः

2083

VB 468 **वृद्धपाराशर्यम्** (**वृद्धपाराशरसूत्रम्**)

Beginning:

मार्ताण्डं प्रणमामि सर्वजगतामीशं प्रभुं शंकरं
सर्वेषां हृदि संस्थितं पशुपतिं भर्गं भवानीपतिम् ।
लोकानां प्रलयोदयस्थितिविभुं त्रैलोक्यदीपं रविं
वक्ष्याम्यद्य महेश्वरस्य कृपया दायप्रकाशं शुभम् ।।
मार्ताण्डेन्दुकुजादिजीवशनिवित्केतूशनाश्च क्रमात्
षट्पञ्क्तिर्मुनयः स्मृतिर्धरणिपा एकोनतार्विंशतिः ।

अत्यष्टिर्मुनयो नखा इति विदुर्नाथा इमे खेचराः
सप्तार्चिर्भगविश्वभादिनवकर्क्षाणां दिनेशादयः ।।
इष्टर्क्षाधिपवत्सरादभिमताक्वेंष्यद् घटी ताडितात्
षड्व्याप्ताच्छरदादिपूर्वकफलं संप्राप्यते तारके ।
मूलाब्दाद्वियदङ्गराम 360 निहता . . फलं प्राप्यते
तत्तत्स्वस्य समाहतं च यदिदं स्वस्वायुरन्तर्दिनम् ।।

अथ रविदशाफलम्—

मूलत्रिकोणे स्वर्क्षे वा स्वेच्चे वा परमोच्चगे ।
केन्द्रत्रिकोणलाभस्ते भाग्ये कर्मेशसंयुते ।।

End:

द्वितीये मीनसंस्थे वा देहबाधा भविष्यति ।
तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ।
छागदानं प्रकुर्वीत सर्वसंपत्प्रदायकम् ।।

Colophon:

इति श्रीवृद्धपाराशरसूत्रे षड्विंशोऽध्यायः

Folio 37a—

Beginning:

अष्टमाधिपफलम् । लग्नाधिपभाग्याधिपसंबन्धेन तनुभावस्थितश्चेत् मध्यायुः । अष्टमाधिपव्ययाधिपसंबन्धत्वेन लग्नस्थान अष्टमभावस्थितश्चैवमायुः । लग्नाधिपः भाग्यस्थानस्थितश्चेत् किंचिद्भङ्गः । गुरुवीक्षितत्वेन महद्योगकारकः पञ्चमाधिपसंबन्धत्वे . . .

End (fol. 53):

वृषभादित्रयं कुर्यान्मेषाद्यादष्टमार्गतः ।
लग्नेशानत्रिभागोऽयं ग्रहदौर्बलमादिशेत् ।।
. . . भास्करे भास्करक्षयाते जीवेशतन्वे गतः . . .
. . . . . .

Folio 54:

Beginning:

केन्द्रस्य । देहो . . . . पः पापः षष्ठाष्टमव्ययेषु स्थितत्वेन देहसौख्यं भवति । नवमेषु सर्वत्र भाववशात् भावेषु योजनीयम् । विलग्ने चन्द्रे लग्ने वा पापः . . . . . धिपः बलवान् उच्चैस्तथा व्याधिमान् भवति ।।

End:

अन्तर्दशा ।

दशान्तर्दशा . . . ह कृत्वा अन्त्याङ्कं त्रिगुणीकृतम् ।
जीवेयुराद्यामानास्तु शेषास्तु देवसंस्मृताः ।।

अन्तरन्तर्दशा । अन्तर्दशायामेव सा . . . . .

Beginning of last two folios:

प्रातः कालयग . . . . मन्त्रस्नानजपात्परम् ।
लावण्यं निम्बपत्राणि प्राशनाद् गुलिकात्रयम् ।।
प्राशनं यः क . . . तस्मिन्नब्दे शुभावहम् ।
तैलकुम्भार्चनं कुर्याद्युगादौ शोभनाक्षतैः ।।
. . मयि कुरु स्नेहं सोदरेभ्यो शुभावहः ।
मित्रबन्धुसमायुक्तं मङ्गलस्नानमाचरेत् ।।

End:

ग्रहनक्षत्रचरितं ज्ञात्वा गोलं च यत्नतः ।
ग्रहयोगमवाप्नोति पर्यायेणाप्तवान् द्विजः ।
विदिते तदशेषं च परं ब्रह्माधिगच्छति ।।

2086

VB 730(b) **संतानदीपिका**

Beginning:

गुरुनाथं नमस्कृत्य गणनाथं प्रणम्य च ।
वाग्देवीवन्दनं कृत्वा स्मृत्वा तं कमलोद्भवम् ।।
शंकरं विष्णुमभ्यर्च्य संपूज्य च नवग्रहान् ।
वासुदेवं गुरुं ध्यात्वा वक्ष्ये संतानदीपिकाम् ।।
वराहहोरामालोक्य तथा जातकपद्धतिम् ।
सारावलिं ततो दृष्ट्वा पाराशरमतं तथा ।।
. . . प्रश्नशास्त्राणि समालोक्य मुहुर्मुहुः ।
ततः सारं यदुद्धृत्य वक्ष्ये संतानदीपिकाम् ।।
अज्ञानामल्पबुद्धीनां हितार्थं वक्ष्यते मया ।
संतानदीपिकाशास्त्र उपदेशार्थदर्शनम् ।।

End:

दारुणा चन्दनेनापि श्वेतार्केणान्यथा तथा ।
. . भराजस्य प्रजार्थं यथारुचि यथाविधि ।
इत्येवं धर्मगुप्ता . . . . .

2088

VB 939(a) **सुग्रीवप्रश्नमार्गः**

Beginning:

द्विपास्यं देशिकं वाणीं कृपास्यन्दिदृशं मया ।
उपास्य भक्तया सुग्रीवप्रश्नमार्गो विलिख्यते ।।
इष्टानिष्टाप्तिनिर्णीतावष्टौ सूर्यादयो ग्रहाः ।
इष्टास्तत्राहिपर्यन्ताः सुग्रीवेण महात्मना ।।

End:

राहू द्वौ रौहिणेयश्च सूचयन्तीह देहिनाम् ।
प्रस्थाने धनलाभादिसुखं सुशकुना इव ।

Colophon:

इति सुग्रीवप्रश्नमार्गः समाप्तः

2092

VB 1012 **कौतुकचिन्तामणिः**

This seems to be a work on magic.

Beginning:

नाथ राजतमहीधरवासिन्
नागहार करुणाकर शंभो ।
नौमि ते चरणवारिजयुग्मं
तुष्यतामयि वृषध्वज नित्यम् ।।

अथेदानीं कौतुकानि निरूप्यन्ते । तत्र च कौतुकप्रयोक्तापरकृतप्रतिकूलप्रयोगासंभवाय स्वशरीररक्षणपूर्वकमेव कौतुकानि प्रयुञ्जीत ।

Colophon:

इति **सिद्धनागार्जुन**विरचिते **कौतुकचिन्तामणौ** प्रथमः पटलः

End:

भाण्डभागस्थलं भस्म कुम्भकारस्थलोद्धरेत् ।
तद्भस्म धुटिकायुक्ता मुष्टिं बध्वा भुवि क्षिपेत् ।।
समुद्रो दृश्यते तत्र महाद्भुतमिदं परम् ।।

Colophon:

कौतुकचिन्तामणावष्टादशः पटलः समाप्तः

2094

VB 992 अचिन्त्यशास्त्रम्

Contents:

१.	५. आचार्यलक्षणानाचार्यलक्षणम्
२. मन्त्रपटलो द्वितीयः	६. शिष्यलक्षणविधिपटलः
३. त्रिमूर्तिचक्रसाधनम्	७-१० . . , ...
४.	११. समाधिलक्षणपटलः

Beginning:

. . . . चैव पुष्पादिकरणं तथा ।
पुष्प . . . . . तच्छुश्रूषणमेव च ।।
कूपानां खननं तत्र प्रयत्नेन प्रप . . . ।
उद्यान . . . . . चैव पुष्पग्रहणबन्धनम् ।।
स्नपनार्थं जलं देयं दीपदानानि मार्जनम् ।
प्रोक्षणं लेपनं चैव इत्येतद्दासमार्गिणाम् ।।

श्रीनन्दिकेश्वर उवाच—

श्रुतिमार्गं च श्रुत्यन्तसन्मार्गं मे वद प्रभो ।
सन्मार्गस्तत्त्वरत्नं हि सर्वतत्वैकनाशनम् ।।

Colophon:

इत्यचिन्त्यशास्त्रे सहस्रग्रन्थे . . . . पंटलः प्रथमः

End:

अरूपं रूपनाशं तु रूपयोगं समारभेत् ।

इत्यचिन्त्यशास्त्रे सहस्रग्रन्थे समाधिलक्षणः पटलः एकादशः

आधाराधेयसंयुक्तः कल्पनाभावकं विभुम् ।
कल्पनारहितं तत्र सन्मार्गज्ञानमुत्तमम् ।।
आधारमाधेयं भगवानवा . . . . . .
आधारं गुदमित्याहुः स्वाधिष्ठानं तु गुह्यकम् ।।
मणिपूरकं. . . . . .

2095

VB 994 **आगमसारसमुच्चयः**

A collection from various Śaiva Āgama works on several topics. The works and topics are as follows. The first few leaves contain the topics dealt with.

I प्रायश्चित्तम्

अंशुमान्
कामिकम्
कारणम्
- लिङ्गप्रतिमायां मूर्ध्नि पुष्पम्
- निर्माल्यस्थितिः
- मन्त्रविधिक्रमप्रायश्चित्तम्

चिन्त्यम्
उत्तरस्वायंभुवम्
- पात्रशुद्धिः

सुप्रभेदम्
- विघ्नेश्वरपूजालोपः
- वास्तुनाथयजनलोपादिपञ्चशुद्धिदशसंस्कारम्
- स्वायंभुवादिलिङ्गेषु बेराणां मूर्ध्नि हीने च ।
- नित्यपवित्रलोपे लिङ्गे मार्जारमलदूषणम् ।।
- नैवेद्यविषयप्रायश्चित्तम्
- नित्योत्सवप्रायश्चित्तम्

II प्रतिष्ठापद्धतिः

III संप्रोक्षणविधिः

IV गौरीस्थापनम्

वातुलतन्त्रम्	अभिषेकवचनम्
	वास्तुबलिः
	पुण्याहविधिः
	अङ्कुरार्पणविधिः
	कौतुकबन्धनम्
	वरुणपद्धतिः
भीमसंहिता	नृत्तमूर्तिस्थापनादिविधिः

Colophon:

इत्यंशुमत्तन्त्रे संप्रोक्षणविधिपटलः

Scribe adds:

श्रीकैलास . . . पट्टर् पुत्तिरन् स्थाणुनाथन् स्वहस्तलिखितम् ।।

2096

VB 999(a) **आगमसारसमुच्चयः**

Contents:

१. भोगाङ्गपूजा	८. चुलकोदकविधिः
२. क्षेत्रपालार्चनम्	९. उत्सवविधिः
३. यज्ञोपवीतम्	१०. नैवेद्यनिर्माल्यविधिः
४. होमकालः	११. प्रतिष्ठाकालः
५. पुष्पलक्षणम्	१२. महाभिषेकः
६. पुष्पाञ्जलिः	१३. अन्नाभिषेकः
७. नित्यपवित्रम्	

The above are taken from the following Āgama-s:

स्वायंभुवम्, कामिकम्, दीप्तम्, विजयतन्त्रः, कारणम्.

2097

VB 977 **आगमसारसमुच्चयः**

This is a collection from various Śaiva Āgama works on several topics. The quotations are from:

Name of work	Contents
स्वायंभुवसूत्रम्	वसन्तोत्सवः
सूक्ष्मशास्त्रम्	सायाह्नपूजाविधिः
उत्तरस्वायंभुवम्	नैमित्तिकविधिः
सुप्रभेदप्रतिष्ठातन्त्रः	नित्यनैमित्तिकप्रायश्चित्तम्
प्रोद्भीततन्त्रः	सकळस्थापनम्
कारणम्	अर्चनाङ्गविधिः
वातुलम्	प्रदोषपूजाविधिः,
कामिकम्	अमावास्याविधिः, संक्रमः, ग्रहणम्, भजनविधिः, सहस्रधारा, शिवरात्रिविधिः, आर्द्रान्नतम्, कुण्डलक्षणम्, आशौचविधिः, जीर्णोद्धारः, संकोचनाविधिः, अष्टबन्धः, बालस्थापनम्, मूलसंकोचविधिः, प्राणायामविधिः, अभिषेकविधिः, अष्टबन्धनविधिः, नित्यपूजाविधिः, पञ्चामृतविधिः, द्वारपूजाविधिः, मध्याह्नपूजा, सायरक्षा, अर्धयामपूजा, मन्त्रोद्धारः, स्नानविधिः, नित्यार्चनविधिः, स्नानशुद्धिः, भूशुद्धिः, लिङ्गशुद्धिः, शिवार्चनविधिः, अर्चनाङ्गम्, सायरक्षा, उपचारः, नित्याग्निविधिः, नित्योत्सवविधिः ।।

2098

VB 978 आगमसारसमुच्चयः

This is a collection of several topics from many Pāñcārātra works. The works and topics are as under. This seems to be pertaining mainly to Utsava.

Works	Topics
पाद्मसंहिता	गरुडलक्षणम्
सनत्कुमारसंहिता	फणिमाला
जयोत्तरसंहिता	पुरुषसूक्ताराधनम्
प्रयोगमणिमाला	कारागारप्रवेशप्रायश्चित्तम्
अगस्त्यसंहिता	रथचक्रघातप्रायश्चित्तम्
शाण्डिल्यसंहिता	उत्सवमरणप्रायश्चित्तम्
ब्रह्मसंहिता	संप्रोक्षणे मरणप्रायश्चित्तम्
	रथचक्रघातप्रायश्चित्तम्

Works	Topics
	उत्सवे मरणप्रायश्चित्तम्, मरणप्रोक्षणम्, रथभङ्गप्रायश्चित्तम्, रथस्थापनप्रायश्चित्तम्, अङ्कुरार्पणम्, पञ्चगव्यविधिः, समाराधनविधिः, अलंकारासनविधिः, अग्निमुखम्, वैखानसादिप्रवेशप्रायश्चित्तम्, शिवशवादिप्रवेशप्रायश्चित्तम्, उत्सववाहनगोपुरारोहणादिपतने प्रायश्चित्तम्, महानसादौ मरणप्रायश्चित्तम्, अनुलोमवैखानसस्पृष्टप्रायश्चित्तम्, पञ्चविधसंस्कार्यम् ।।

2099

VB 983 **आगमसारसमुच्चयः**

A collection of sayings from various Saṃhita-s on several topics.

Works	Topics
विष्वक्सेनसंहिता	प्रायश्चित्तविधिः
सनत्कुमारसंहिता	स्वतन्त्रालयलक्षणम्
परमपुरुषसंहिता	उद्धरण्यादिलक्षणम्
श्रीधरसंहिता	जीर्णोद्धारः
पाद्मसंहिता	मूर्तीनामायुधादिविन्यासः
मायावैभवसंहिता	पवित्रलक्षणम्
अगस्त्यसंहिता	षडासनम्
हिरण्यगर्भसंहिता	एकादशीनिर्णयः
श्रीप्रश्नसंहिता	पाञ्चरात्रोत्पत्तिः, अनिरूढाग्निः, आवाहनम्, गुरुपरंपराक्रमः, ऊर्ध्वपुण्ड्रविधिः, दशविधवैष्णवम्, बलिपीठलक्षणम्, आशौचम् ।।

2100

VB 1019 **आकाशभैरवकल्पः**

At the beginning extra 1 fol. contains *Rāmastuti*. The MS. Contains many other topics as well, as given below:

Folio	Topic
1a	संध्यावन्दनप्रायश्चित्तार्घ्यम्
b	दृष्टिदोषमन्त्राः
2–4	प्रत्यङ्गिरोपनिषत्
5a	मन्त्रः?
8	Stotra in Telugu
9–12	पिप्पलादिशाखीयं सूक्तम्
13–30	कृत्यानिर्वाणसूक्तगणव्याख्या—बालबोधिनी
31–7	प्रत्यङ्गिरःकल्पः
38–9	इन्द्राक्षीमन्त्रः
40	विषौषधम् in Telugu
41–2	आयुष्यहोम (सूक्त 1–9)
43	नमःशिवायस्तोत्रम् । (नमः शिवाभ्यां नवयौवनाभ्यां) (1–12)
44–57	नारायणहृदयम् महालक्ष्मी-हृदयम्
58	प्रतिक्रियामन्त्रः
59–62	Col. इति महाशैवतन्त्रे दुर्गाप्रतिक्रियास्तोत्रमन्त्रं नाम सप्तदशोऽध्यायः
62–3	सौभाग्यमन्त्रः
63b–128	आकाशभैरवकल्पः
63b–65a	शरभहृदयम्
65a–6a	भैरवरहस्यम्
66a–7b	रुद्राभिषेकः
67b–9a	मन्त्रयन्त्रप्रयोगः
69a–71a	चित्रमालामन्त्रः
71b	क्रियाभेदः
71b–72a	स्तम्भविद्वेषणम्
72a–b	निग्रहोच्चाटनम्
72–3a	मोक्षसारस्वतम्
73b–4a	आशुतार्क्ष्यविषयः
74b–6a	आशुगरुडप्रयोगः
76a–8a	आशुतार्क्ष्यकवचम्
78b	आशुतार्क्ष्यकवचम्, प्रयोगः
79a–80a	शरभचक्रम्
80a	काश्यपस्तोत्रम्
84a	शरभेशाष्टकम्
84a, b	निगर्ह्यधर्मम्
87b–9a	अभिषेकविधिः
89a–90b	बलिकर्मविधिः
90b–3b	आचारविधिः
93b–4b	आराधनविधिः
94b–5a	पुरश्चर्याक्रमः
95a–6a	भद्रकालीमन्त्रः
96a–8a	तैलविधिः
98a–	शूलिनीमन्त्रः
100b–	क्रियाभेदः
102b–	शूलिनीदुर्गाविधिः
102b–3b	अश्वारूढः
103b–5b	शरभमन्त्रः
105b–7a	भैरवमन्त्रः
107a–8b	सिद्धभैरवमन्त्रः
109a–10a	बडवामन्त्रः
110b–11a	लोकपालः
111a–b	व्याधिकारणम्
111b–12a	मृत्युप्रयोगः
112a–17b	सात्वकवचम् / शरभकवचम्
117b–18a	कामराजमन्त्रः
118b–19a	रक्तचामुण्डीमन्त्रः
120a	द्राविणीप्रयोगः
120b–	शब्दाकार्षणी
121a–	भाषा (सरस्वती)
121b–	लक्ष्मीः
121b–2a	माया
122a, b	पुलिन्दिनी
122b–4a	महाशास्तृमन्त्रः

Folio	Topic
124a, b	संक्षोभिणी
124b–5a	धूमावतीप्रयोगः
125a, b	धूमावतीमन्त्रः
125b–6a	तारणप्रयोगः
126a–7b	चित्रविद्या
127b–8a	देशिकस्तोत्रम्
129–31	खड्गरावणम्
132–5	श्वेतार्कगणपतिकल्पम्
137–46	आथर्वणरहस्ये उत्तरभागे नारायणहृदयस्तोत्रं; महालक्ष्मीहृदयस्तोत्रम्
147–9	रसप्रकरणम् (प्रतापरुद्रीय-रसप्रकरणकारिका up to व्यभिचारिभावः)

Beginning:

पार्वत्युवाच—

भगवन् देवदेवेश सर्वशास्त्रार्थवादक ।
ब्रूहि मे सर्वपापघ्नं तन्मन्त्रमिष्टकामदम् ।।
केन पुण्यप्रभावेन शत्रूणां प्राणनाशनम् ।
सर्वपापस्य शमनं धन्यमायुष्यवर्धनम् ।।
इदं मे कृपया शंभो त्वत्पादकमलं नुमः ।

ईश्वरः—

शृणु वक्ष्यामि देवेशि सर्वपापहरं परम् ।
सर्वशत्रुहरं दिव्यं हृदयं शरभस्य च ।।
साल्वं सकललोकघ्नं हृदयं परमाद्भुतम् ।
गुह्याद् गुह्यतमं गुह्यं गोपनीयं प्रयत्नतः ।।
पुरा नारायणः श्रीमान् क्षीराब्धिमथनं कृतम् ।
तस्य प्रारम्भसमये हृदयं शरभस्य च ।।
प्रातः काले जपेन्नित्यं विंशदावृत्तिकं मुदा ।
यावन्मासत्रयं कृत्वा प्रादुर्भवति सालुवः ।।

End:

वादार्थसिद्धिं बहुलोकवश्यं वयःस्थिरत्वं ललनासुभोगम् ।
पुत्रादिलाभं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्मजन्मनि ।।
सुवर्णवृद्धिं कुरु मे गृहे श्रीः सुधान्यवृद्धिं कुरु मे गृहे श्रीः ।
कल्याणवृद्धिं कुरु मे गृहे श्रीः सुरत्नवृद्धिं कुरु मे गृहे श्रीः ।।

Colophon:

इति . . . . महालक्ष्मीहृदयस्तोत्रं संपूर्णम्

2107

VB 1001(a) **कालिकागमः**

Beginning:

श्रीशंकरं परानन्दं भक्तेष्टफलदायकम् ।
न्यग्रोधमूलनिलयं दक्षिणामूर्तिमाश्रये ।।
चिन्मयीं परमानन्दां कोणत्रयनिवासिनीम् ।
जगत्स्तम्भकरीं देवीं वन्देऽहं बगलाम्बिकाम् ।।
लक्ष्मीगणपतिं वन्दे सुरासुरनमस्कृतम् ।
विघ्नविध्वंसकं देवं निर्विघ्नायाद्यमद्वयम् ।।
ब्रह्मपत्नीं विशालाक्षीं शारदेन्दुनिभप्रभाम् ।
शारदां वर्णरूपां तां वन्दे ब्रह्माण्डनायिकाम् ।।
चिद्घनं परमानन्दमद्वैतघनरूपिणम् ।
बोधानन्दघनेन्द्रं तं वन्दे ब्रह्माह्वयं परम् ।।
श्रीमद्वेङ्कटरामं तं श्रीगुरुं छात्रकामदम् ।
राज्यलक्ष्मीयुतं वन्दे दक्षिणामूर्तिमव्ययम् ।।

Colophon (fol. 16b):

इति श्रीकालिकागमे कालरुद्रतन्त्रेऽथर्वण्यस्त्रविद्या नाम षष्ठः पटलः

Beginning:

स्कन्द उवाच—

नमस्ते योगपारीण पवनार्चितविग्रह ।
नमस्ते योगविद्भास ज्ञानालय नमो नमः ।।
अधुना मन्त्रयोगं च धूमावत्याश्च श्रीकर ।
वदस्व सर्वगोप्यं च प्रयोगविधिमेव च ।।

ईश्वरः—

दशाक्षरमहामन्त्रं धूमावत्याश्च पुत्रक ।
वक्ष्येऽहं सर्वमन्त्रणामुत्तमोत्तममेव च ।।

End:

एवं ध्यात्वा जपं कुर्यान्नित्यं भक्तिसमन्वितः ।
होमं कुर्याच्छ्मशानाग्नौ रजकाग्नौ तथापि वा ।।
सर्षपेणैव तैलेन सौवीरेणाथवा पुनः ।

2113

VB 996(c) जीर्णोद्धारः

A portion of 1st Pariccheda and a portion of 2nd Pariccheda of the work are in the form of verse and elaborate commentary.

Beginning:

. . . . . .

अर्धाङ्गुलारत्निवितस्तिभिर्वा विमानपीठध्वजवाहनानाम् ।
सुधाविलेपः सुरबिम्बधाम्नां सुधावगाहाय परेत्य भूयात् ।।
निर्माणमादौ महते फलाय चतुर्गुणं जीर्णसमुद्धृतं तु ।
प्रधानबेरोत्सवबेरधाम्ना प्रासादसद्गोपुरमण्डपानाम् ।।

Fol. 352:

इति जीर्णोद्धारे प्रथमः परिच्छेदः

End:

पादशैलादिशैलान्तं जीर्णं चेल्लक्षणान्वितम् ।
संत्यज्य स्थापनोक्तेन लिङ्गं वै स्थापयेन्नवम् ।।
जीर्णलिङ्गं समुद्धृत्य शिबिकायां रथेऽपि वा ।
आरोप्य नृत्तवाद्यैश्च सर्वालंकारसंयुतम् ।।
ततो भक्तजनैः सार्धं स्तोत्रमङ्गलवाचकैः ।
समुद्रे निक्षिपेच्छैलं निक्षिपेदथ वा जले ।।
क्षिपेच्च मृन्मयांस्तोये क्षिपेदग्नौ तु दारुजम् ।

कामिके—

प्रत्यहं चार्चनं कार्यं शान्तिहोमसमन्वितम् ।

2118

VB 1205 द्वादशान्तप्रकरणम्

Beginning:

आगमरहस्यम् ।

मूलात् कुण्डलिनीनिवासभवनात् पद्मान्त्रनालस्ततो
. . . रोचिदङ्कुरनिभो . . . . . ।

. . . . . .
. . . . . नाभ्यन्तमास्ते शिवः ।।
ऊर्ध्वान्तस्ववितस्तिलङ्घिन. . . वेदाङ्गुलावृत्पदं
फुल्लद्वह्निशिखाप्रभा तदुपरि व्याप्नोति मेधाप्लुति ।
तत्त्वानां कमलासनस्थभवनान्नाथश्चतुर्विंशते-
स्तत्त्वानामुपरि स्थिताखिलजगत्सृष्टिक्रमं कारणम् ।।
कर्णेष्टाङ्गुलतो हिमांशुतपन . . . मात्राङ्कितः
श्रुत्यन्तस्य च तत्त्वषट्कसहितो लक्ष्मीसहायः पुमान् ।
जिह्वायां चतुरङ्गुले विषकलामात्राङ्कितं स्मारयन्
चिल्लिद्दामयुतं रुचा जगद्विभुवदोमायाः सहायो हरः ।।

End:

इनि षोडशकलकळुक्कुं वर्ण अकारं स्वर्णवर्णमुकारं सोमसूर्यवर्णम् मकारं मिन्प्रकाशं बिन्दु दीपप्रकाशम् अर्धचन्द्रन् चन्द्र प्रकाशम् निरोधिपुकै कृष्णवर्णम् अपरबिन्दु अपरनादम् । माणिक्क प्रकाशं शक्ति क्षीर वर्ण व्यापिनि स्फटिक वर्णम् । व्योमरूपिणि कुरुवर्णम् अनन्तैमिन् प्रकाशम् । अनाथैशवर्णम् । अनाशृतै चन्द्रप्रकाशम् । शमानैर्धूमवर्णम् । उन्मनै सूर्यप्रकाशम् । उन्मनान्तं अलविटपोकात ओलियायिरुक्कुम् ।

Scribe adds:

परितापिवर्षं मार्कळिमातं १८ तियति वियाळक्किळमै दिनं द्वादशान्तप्रकरणं एळुति मुटिञ्चतु ।

2122

VB 1023 पाञ्चरात्रविषयः

The work consists of quotations from *Padmasaṃhitā* and *Pārameśvara-saṃhitā* and the topics are:

भोगयागः, अङ्गार्चनम्, षोडशोपचाराः, अङ्कुरार्पणम्, ध्वजारोहणम्, भेरीस्थापनम्, बलिपीठस्थापनम्, देवताह्वानम्, आचार्याभिषेकविधिः, प्रणवमन्त्रः, परवासुदेवमन्त्रः, नारायण-ध्यानम्, श्रीकराष्टाक्षरमन्त्रः ।

Beginning:

. . . मालायै नमः । ओं ह्रीं श्रियै नमः । ओं ह्रीं भूम्यै नमः । दशाङ्गुलीनां ओं पं ओं क्ष्मीं . . . ओं ओं स्व ओं ओं ह ओं इति . . . न्त्रं करयोरङ्गुलीनां क्रमान्न्यसेत् ।।

मूर्ध्नि नेत्रे मुखे चित्ते नाभ्यङ्गुल्ये च जानुनि ।
चरणौ क्रमशः स्पृष्ट्वा ओं नमो नारायणाय ।।

इत्यङ्ग . . . . क्रमान्न्यसेत् । विपरीतक्रमेण ज्ञेयान्यक्षराणि । पादादिशिरोऽन्तमक्षरन्यास . . नाभ्यादिहृदयान्तमक्षराणि न्यसेत् ।

End:

ध्यानम्—

अष्टबाहुं विशालाक्षं गरुडारूढमच्युतम् ।
अकलङ्कशशिप्रख्य . . . पूर्वप्रभाननम् ।।
सुभ्रूललाटमकुटं लावण्यामृतसागरम् ।
पीतकौशेयवसनं युवानं मृष्ट . . . . . ।।
चक्रं च मुसलं बाणमङ्कुशं दक्षिणे भुजे ।
शङ्खं कौमोदकीं शार्ङ्गं पाशं वामे च बिभ्रतम् ।।
सर्वलक्षणसंपूर्णं सर्वकल्पपरिष्कृतम् ।
दिव्यचन्दनलिप्ताङ्गं दिव्यस्रग्दामभूषितम् ।।
देव्योऽष्टौ . . . . तस्य पर्यायपाणयः ।
वीजयन्त्यः सदा देवं कामविह्वललोचनाः ।।
एवं सपरिवारं तं ध्यायेद्देवं. . . . . ।

2124

VB 308(a) प्रतिष्ठाकल्पः (शैवागमः)

This contains elaborate proceedings of Pūjā and Pratiṣṭhā as described in various Śaiva Tantra works such as *Kāraṇāgama, Makuṭāgama, Kriyārṇava,* etc. The leave are much damaged and have no fol. nos. Here and there the procedure is interpreted in Tamil also. Some Yantras-are also drawn.

Contents:

गणपतिबालालयप्रतिष्ठाविधिः, अनुशालापूजा, अङ्कुरार्पणम्, वास्तुपूजा (कारणागमे), नवचतिकान्यासः, मण्डपकलशदेवता, श्रीकण्ठमातृकान्यासः, ध्यानावलिः, सृष्टिक्रमः, विघ्नेश्वर-प्रतिष्ठापटलः (कारणे), प्रतिष्ठाविधिपटलः (मकुटे), त्रिखण्डन्यासार्चना, विमानप्रतिष्ठा, रक्षोघ्नहोमः, नयनमोक्षणक्रमः, शक्तिस्थापनविधिः (क्रियार्णवे), दिशाहोमः, अनुग्रहमन्त्रः, मृत्युंजयः, नीलकण्ठल्यक्षरी, गोलकान्यासः, पञ्चाक्षरध्यानम्, वलीपरिवारम्, मण्डलपूजा, अष्टबन्धः ।

Beginning:

. . . . . वक्ष्ये शृणु त्वं तत्प्रभञ्चन ।
आयुरारोग्यजयदं पुत्रपौत्र . . . . ।।
आद्यं द्वितीय . . चतुर्विधं तरुणालयम् ।
मूलालयस्य यत्पूर्वं तद्देवं तरुणालयम् ।।
पुनः प्रासादमेवं तु भिन्नैश्छिन्ने नवीकृते ।
यत्कृतं तद्वितीयाख्यं तरुणालयमुत्तमम् ।।

End:

पूर्वे च पश्चिमे चैव उत्तराभिमुखार्चयेत् ।
उत्तरे दक्षिणे चैव पूर्वस्याभिमुखार्चयेत् ।।
अग्नौ वा निर्ऋतौ वापि स्थित्वा देवं प्रपूजयेत् ।
मध्यमे वास्तुदेवानां पूर्वे शास्ता प्रतिष्ठितम् ।।
अग्निविश्वेश्वरस्थाने याम्ये ब्रह्मप्रतिष्ठितम् ।
नैर्ऋत्यां दुर्गया देवी पश्चिमे विष्णुदैवतम् ।।

2125

VB 976(c) **प्रतिष्ठाप्रयोगः (पाञ्चरात्रम्)**

Beginning:

भगव . . . . . मौपगायनवंशजम् ।
वासुदेवपदासक्तं श्रीनिवासगुरुं भजे ।।
पाद्मतन्त्रप्रकारेण बहुबेरे शिलामये ।
. . यां प्रयोगोऽयं श्री . . . विरच्यते ।।

प्रतिष्ठा . . . . पूर्वं द्वादशाहे नवाहे सप्ताहे पञ्चाहे तृतीयेऽह्नि वा । यजमानः शास्त्रोक्तप्रकारेणोपेतो मधुपर्कविधानेन संपूज्य, अस्मिन् प्रतिष्ठाकर्मणि ' त्वामाचार्यं वृणे ' इत्येकमाचार्यं कृत्वा . . .

End:

. . . . . मन्त्रैः पला . . . . चन्दनयुक्तैराग्नेयकुम्भं श्रीधरमन्त्रेण दध्ना याम्यकुम्भं मधुसूदनमन्त्रेण प्रत्येकमुष्टिपरिमितै . . . .अक्षतकुशाग्रसुपक्वफलयवतिलैः सुगन्धिपुष्पैर्नैर्ऋतकुम्भमृषीकेशमन्त्रेण गोक्षीरेण . . . . तक्कोलचम्पकमुकुलघनसारजातिफलैः लवङ्गत्वक्चन्दनपुष्पै . . . . . .वायव्यकुम्भं प्रपद्य पद्मनाभमन्त्रेण . . . . . .

2126

VB 995(a) **प्रतिष्ठाविधिः**

This contains the procedure of Pratiṣṭhā and Pūjā as shown by the colophons:

इत्यगस्त्यसंहितायां चरलिङ्गप्रतिष्ठाविधिः समाप्तः
इति कौशिकोक्तगृहार्चनसंप्रोक्षणविधिः समाप्तः
. . . तायां गृहार्चनदेवतासंप्रोक्षणविधिः समाप्तः
इति दीक्षाशास्त्रे प्रतिष्ठायां कालपरीक्षापटलः

Contents:

विष्णुप्रतिष्ठाकल्पः, रुद्रप्रतिष्ठाकल्पः, पुनः प्रतिष्ठा, शिवपूजाविधिः ।
इति शिवरहस्ये गौरीनारायणसंवादे शिवनामाष्टोत्तरशतदिव्य. . . . . .
इत्यादित्यपुराणे एकोनचत्वारिंशोऽध्यायः (शिवसहस्रनामस्तोत्रम्) शिवसहस्रनामावलिः
विष्णुनामाष्टोत्तरशतम्, हेमाद्रिकल्पः, मृत्तिकास्नानविधिः, संध्यावन्दनम्, मन्त्रकल्पः
(प्रणवः, भूतशुद्धिः, गायत्री, आसनम्, अन्तर्मातृका (अजपा), बहिर्मातृका)

2127

VB 1076 **प्रायश्चित्तसमुच्चयः**

This is a work dealing with expiations for petty as well as gross sins committed, according to the Śiva Āgama-s. The leaves are very brittle and the writing except in the middle folios is unreadable.

Beginning:

(fol. 1):

. . . संपूज्य स्नानं कृत्वा संकल्पं विधाय . . . . . विघ्नेश्वरं संपूज्य पुण्याहं वाचयित्वा . . . . . आचरेत् । अथ सायाह्ने व्रतस्नानं कृत्वा सर्वालंकारं कृत्वा संपूज्य संकल्प्य पुण्याहं वाचयित्वा मण्डपालंकारं विधाय . . . . . .

(fol. 4):

खट्वाङ्गखेटमुसलपाशमुद्गलशूलधृत् ।
ध्येयः सदा महादेवश्चन्द्रसूर्याग्निलोचनः ।।

एवं संपूज्य

वराभीतिकरं शान्तं चन्द्रबद्धजटं शुचिम् ।
शश्वद्ध्यायेद् हृदम्भोजे भयदारिद्र्यहारिणम् ।।

एवंप्रकारेण पूजादिक्रमेण . . . पूजयेत् ।

End:

पापभक्षणदेवस्य रूपं भिन्नाञ्जनप्रभम् ।
लेलिहानं च. . . राधं . . . . . ।।
महदास्यं महादंष्ट्रं रक्तमूर्तिं त्रिलोचनम् ।
रक्तमुण्डं जटाजूटं सप्तमण्डलमण्डितम् ।।
शूल . . . . . ।

2131

VB 980(b) **भगवदाराधनक्रमः**

Beginning:

सुप्रक्षालितपाणिपादः स्वाचान्तः सन् भगवदाराधनमारभेत । स्वोर्ध्वपुण्ड्रः सन्

देव्या च शुद्धे निःशब्दो भुवं संगृह्यतां पुनः ।
शोषणाद्यैश्च संशोध्य स्मरेद् गुरुपरंपराम् ।।
अस्मद्देशिकपद्यं च कूर्मादींश्च तदोच्चरेत् ।
द्वयं चैवानुसंधाय साष्टाङ्गं संप्रणम्य च ।।
हस्ततालत्रयं कृत्वा घण्टानादेन बोधनम् ।
वायुबीजेन मन्त्रेण चाङ्गमुद्रां प्रदर्शयेत् ।।

End:

प्रसादप्रतिपत्त्या तच्छेषं भुञ्जीत वैष्णवः ।
रामानुजकृते नित्ये संगृह्य लिखितो मया ।।
ईयुण्णि शठकोपेन भारद्वाजेन धीमता ।
दयालुना निर्मितोऽसौ हरेराराधनक्रमः ।।

2139

VB 254(a) **मूर्तिलक्षणम्**

Beginning:

अथ चतुश्चक्रसीतारामलक्षणम्—

पुरः पृष्ठे च पार्श्वे च चतुश्चक्रसमन्वितः ।
बाणतूणधनुः स्रग्वी सीतारामः सुखप्रदः ।।

अथ पञ्चचक्रसीतारामलक्षणम्—

. . . . . .अथ षट्चक्रश्चतुर्विधः । . . . . . इति श्रीराममूर्तिलक्षणम् । अथ बलराममूर्तिलक्षणम् । . . . . . अथ विष्णुमूर्तिलक्षणम्. . . . . अथ श्रीकृष्णमूर्तिलक्षणम् ।

P. 2. . . . इति दशावतारमूर्तिलक्षणम् ।। अथ केशवादिचतुर्विंशतिमूर्तिलक्षणमुच्यते ।

पुराणवचनानीह कानिचित् प्रेक्ष्य सादरम् ।
एकचक्रं समारभ्य यावद्द्वादशचक्रकम् ।।
लक्षणं **पद्मनाभेन** श्रीमूर्तीनां पृथक् पृथक् ।
संगृहीतं स्वबोधाय तेन तुष्यन्तु साधवः ।।

एकचक्रमूर्तिलक्षणमुच्यते ।

(fol. no. 9) p. 10:

गरुडध्वजस्य—

चतुर्द्वारोऽष्टचक्रस्तु वामदक्षिणपार्श्वयोः ।
कल्पवृक्षसमायुक्तो द्विपक्षः समलंकृतः ।।
सर्वसिद्धिकरो . . . .

श्रीकृष्णाय नमः ।

सालग्रामस्य माहात्म्यं श्रवणात् पठनादिभिः ।
तद्भक्तिर्जायते पुंसां ततः सर्वार्थसिद्धयः ।।

तत्र श्रीविष्णुधर्मोत्तरे मरीचिरुवाच—

P. 13 इति श्रीविष्णुधर्मोत्तरे श्रीगरुडेन मरीचि प्रत्युपदिष्टम् ।
स्कान्दपुराणे महेश्वरस्कन्दसंवादः ।
P. 14 इति स्कान्दे पुराणे महेश्वरस्कन्दसंवादे ।
अथ ब्रह्माण्डपुराणे भगवद्गरुडसंवादे ।
P. 16 इति पाद्मे पुराणे. . . . .
P. 17 एकचक्रं समारभ्य यावद्द्वादशचक्रकम् ।
लक्षणं **पद्मनाभेन** मूलशास्त्रानुसारतः ।।
संगृहीतं स्वबोधाय यथामति न गर्वितः ।
मत्स्याद्याः केशवाद्याश्च हेहयान्ताश्च मूर्तयः ।।
सलक्षणाः संगृहीताः सर्वलोकशुभप्रदाः ।
यन्नोक्तमत्र वक्तव्यं यदुक्तं च प्रमादतः ।।

क्षन्तुमर्हन्ति तत्सन्तः सारमात्रजुषो यतः ।
स्वचेतसः प्रसादाय कृष्णदेवस्य तुष्टये ।।
पुराणेभ्यः संगृहीतं सालग्रामस्य लक्षणम् ।

2140

VB 992(b) **योगजतन्त्रम्**

Contents:

मन्त्रोद्धारविधिपटलः, शौचविधिपटलः, आसनविधिपटलः, आत्मशुद्धिविधिपटलः, कृत्तिकादीपविधिपटलः, कामकोष्ठप्रतिष्ठाविधिपटलः, मुद्रालक्षणपटलः, पवित्रारोहणविधिः, कालसंख्याविधिपटलः, तालसंख्याविधिपटलः, बालस्थापनविधिः, परिवारस्थापनविधिः ।

Beginning:

. . . . . .
तेन ताश्चैव शिन्ध्याय ओं फट् च नय . . प्ररू ।
निनिशश्चैव भान्तं च भश्च न्येतश्च तु श्च ये ।।
नार्वज्ञमश्च पादे ते क्रमेण पदविन्यसेत् ।
पिश्रिस्थिश्चम . . . योनिपात्रं च वित्पुनः ।।
पुरश्च सश्च मुखे च च श्च सर्पिश्च सागवः ।
सश्च नश्च इति ख्याता द्वितीयावरणे न्यसेत् ।।

Fol. 3:

इति वेदारण्ययोगजे प्रतिष्ठातन्त्रे मन्त्रोद्धारविधिपटलः

End:

वामाङ्गुलीयप्रसृता अङ्गुष्ठं मूर्ध्नि संयुतम् ।
दक्षिणे दक्षिणे मुष्टिं चोर्ध्वगास्थित . . ।।
मुष्टिमूर्ध्वगत . . संहारं मुद्रया विदुः ।
उत्तानौ तु करौ धृत्वा मणिबन्ध . . रयेत् ।।
तर्जनीकनिष्ठौ . . प्रसृतौ संयुतौ तथा ।
मुद्रा सदाशिवाख्या . . आह्वानेव प्रदर्शयेत् ।।
उत्तानौ तु करौ कृत्वा कनिष्ठाङ्गुष्ठसंयुतम् ।
तर्जनीमध्यमौ युक्तौ .. . . . . तासनः ।।

Colophon:

इति योगजे प्रतिष्ठातन्त्रे मुद्रालक्षणपटलः

2143

VB 1158(b) **विज्ञानभैरवम्**

Beginning:

श्रुतं देव मया सर्वं रुद्रयामलसंभवम् ।
त्रिकभेदमशेषेण सारात् सारतरं विभो ।।
अद्याज्ञाननिवृत्तौ मे संशयः परमेश्वर ।
किं रूपं तत्त्वतो देव तत्वराशिकलामयम् ।।
किं वा नवात्मभेदेन भैरवे भैरवाकृतौ ।
त्रिशिरो भेदभिन्नं वा किं वा शक्तित्रयात्मकम् ।।

End:

निर्विकल्पमतीनां तु वीराणामुन्नतात्मनाम् ।
भक्तानां गुरुवर्गस्य दातव्यं निर्विशङ्कया ।।
ग्रामान् राज्यं पुरं देशं पुत्रान् दारान् कुटुम्बकम् ।
सर्वमेतत्परित्यज्य ग्राह्यमेतन्मृगेक्षणे ।।

देवी—

देव देव महादेव परितृप्तास्मि शंकर ।
रुद्रयामलतन्त्रस्य सारमद्यावधारितम् ।।
सर्वत्र शक्तिभेदानां हृदयं ज्ञातमद्य वै ।
इत्युक्त्वा नन्दिता देवी कण्ठलग्ना महेशितुः ।।

Colophon:

इति विज्ञानभैरवम्

2145

VB 992(a) **वीरतन्त्रम्**

The work deals with the following topics:

तन्त्रावतारपटलः	मन्त्रोद्धारकपटलः
पञ्चाक्षरकल्पपटलः	पुष्पलक्षणपटलः

कर्षणविधिपटलः
आचार्यलक्षणपटलः
दीक्षामण्डलपटलः
दीक्षाविधिपटलः
अभिषेकविधिपटलः
(अग्निमुखः)
(ऋतुसंगमनविधिः)
(गर्भाधानविधिः)
पुंसवनपटलः
जातकर्मविधिपटलः
नामकरणविधिपटलः
अन्नप्राशनविधिपटलः
चौलविधिपटलः
उपनयनविधिपटलः
(श्रावणीव्रतं)
(विवाहः)
(प्रेतसंस्कारः)
(तृणसंस्कारः)
(गर्भिणीसंस्कारः)
(अष्टकाविधिः)
(सपिण्डीकरणम्)
(अवान्तरशय्या)
(गृहाभिषेकविधिपटलः)
(मुद्रालक्षणविधिपटलः)
(नैवेद्यविधिपटलः)
शौचाचमनस्नानपटलः
भस्मस्नानपटलः
मन्त्रन्यासपटलः
अध्यर्चनपटलः
अग्निकार्यपटलः
परिवारलक्षणपटलः
रक्षादीपपटलः
अङ्कुरार्पणपटलः
(ध्वजारोहणविधिः)
(भेरीताडनविधिः)
(उत्सवविधिपटलः)
(मण्डपलक्षणविधिः)
(चूर्णोत्सवविधिः)
(उत्सवविधिपटलः)
प्रायश्चित्तपटलः
क्षीराभिषेकविधिपटलः
कुण्डलक्षणपटलः
चरलिङ्गप्रतिष्ठाविधिपटलः
(तीर्थविधिः)
(प्रतिष्ठाविधिः)
सृष्टिमूर्तिप्रतिष्ठापटलः
स्थितिमूर्तिप्रतिष्ठापटलः
संहारमूर्तिप्रतिष्ठापटलः
गौरीस्थापनपटलः
पादुकास्थापनपटलः
चित्रप्रतिष्ठापटलः
विमानस्थापनपटलः
जालसंप्रोक्षणविधिपटलः
स्थापनविधिपटलः
अग्निस्थापनविधिपटलः
स्कन्दस्थापनपटलः
ज्येष्ठास्थापनपटलः
सहस्रकलशस्नपनविधिः
पञ्चशतस्नपनविधिपटलः
अष्टोत्तरशतस्नपनविधिः
एकपञ्चाशत्स्नपनविधिः
एकोनपञ्चाशत्स्नपन-
विधिपटलः
पञ्चविंशतिस्नपनविधिः
षोडशस्नपनविधिः
नवकुम्भस्नपनविधिपटलः
शतकुम्भविधिपटलः
अद्भुतशान्तिविधिपटलः
कृत्तिकादीपविधिपटलः
उग्राशनविधिपटलः

2146

VB 970 **वैखानसागमः**

This contains the Tāntric procedure of installing the symbols of deities in temples and the mode of worshipping them, according to the Vaikhānasāgama. Most of the chapters are collections from *Marīci-saṃhitā* and *Bhṛgusaṃhitā* (metrical) as the colophons show. The quotations are the chapters from the Kriyādhikāra and Kalpādhikāra of these two Saṃhita-s. The following topics are dealt with herein:

प्रतिष्ठाविधिः

१. गुरुवरणम्
२. यागशालालक्षणम्
३. अरणिलक्षणम्
४. जुहूप्रमाणम्
५. उपजुहूप्रमाणम्
६. समिधलक्षणम्
७. श्रीकुण्डलक्षणम्
८. अग्निकुण्डलक्षणम्
९. अक्षिमोचनम्
१०. अधिवासत्रयम्
११. अरणिमथनम्
१२. अग्निप्रणयनम्
१३. परिस्तरणादिदेवता
१४. कुम्भध्यानम्
१५. महाधिवासम्
१६. सर्वदेवार्चना
१७. यागशालादेवता
१८. आवाहनम्
१९. सर्वदैवत्यम्
२०. श्रीदेवीप्रतिष्ठा
२१. दुर्गाप्रतिष्ठा
२२. गरुडप्रतिष्ठा
२३. विष्वक्सेनप्रतिष्ठा
२४. भक्तप्रतिष्ठा
२५. शेषस्थापनम्
२६. परिवारप्रतिष्ठा
२७. हनुमत्प्रतिष्ठा
२८. भास्करप्रतिष्ठा
२९. दीपस्तम्भप्रतिष्ठा
३०. वाहनप्रतिष्ठा
३१. अर्चनापात्रसंस्कारः
३२. सहस्रधारापात्रसंस्कारः
३३. कुम्भादिप्रतिष्ठा
३४. पादुकाप्रतिष्ठा
३५. आभरणप्रतिष्ठा
३६. शयनासनयानादिप्रतिष्ठा
३७. ध्वजदण्डप्रतिष्ठा
३८. कवाटस्थापनम्
३९. बृन्दावनप्रतिष्ठा
४०. विमानप्रतिष्ठा
४१. पुनः प्रतिष्ठा
४२. बलिपीठप्रतिष्ठा
४३. गरुडप्रतिष्ठा
४४. कूपतटाकप्रोक्षणम्
४५. महाशान्तिः
४६. अवताराणां प्रतिष्ठामासः
४७. चन्द्रप्रतिष्ठा
४८. अग्निप्राणन(?)
४९. रत्नन्यासः
५०. अष्टमङ्गलपञ्चायुधस्थापनम्

५१. चतुर्विधविग्रहम्
५२. दशावताराः
५३. वराहस्य
५४. नृसिंहस्य
५५. वामनस्य
५६. त्रिविक्रमस्य
५७. परशुरामस्य
५८. दशरथरामस्य
५९. बलभद्रस्य
६०. कृष्णस्य
६१. षोडशविभवाः
६२. लक्ष्मीनरसिंहस्य
६३. स्नपनोत्सवबलिः
६४. बेरप्रतिष्ठा
६५. सप्तदर्भलक्षणम्
६६. त्रिविध उत्सवः
६७. त्रिमूर्तिस्थापनम्
६८. द्विमूर्तिस्थापनम्
६९. श्रवणद्वादशी
७०. एकादशीव्रतम्
७१. फाल्गुनम्
७२. आषाढोत्सवविशेषणाराधनम्
७३. भूपरीक्षा
७४. प्रायश्चित्तम्
७५. शङ्कुस्थापनम्
७६. आग्नेयबिम्बस्थापनम्
७७. सौम्यबिम्बाग्नेयालयोद्धारप्रायश्चित्तम्
७८. कालोत्सर्गप्रायश्चित्तम्
७९. ध्रुवबेरजीर्णोद्धारक. . . .
८०. नित्यार्चनप्रायश्चित्तम्
८१. ध्रुवबेरसंघातप्रायश्चित्तम्
८२. अङ्गभेद . . .
८३. अर्चनाहीनप्रायश्चित्तम्
८४. उत्सवप्रायश्चित्तम्
८५. प्रतिष्ठाप्रायश्चित्तम्
८६. वल्मीकशान्तिः
८७. त्रिसंस्कारनिष्कृतिः
८८. अङ्गहोमसूत्रमौलिमालादि
८९. देवाङ्गस्थापनविधिः
९०. सामान्यनिष्कृतिः
९१. समिधलक्षणम्
९२. कूर्चलक्षणम्
९३. संक्रान्तिविषयः
९४. बलिपीठलक्षणम्
९५. ब्रह्मपैशाच. . .
९६. अग्रमण्डपम्
९७. द्वारम्
९८. विमानभेदः
९९. प्राकारलक्षणम्
१००. विमानलक्षणम्
१०१. प्राकारवृष्टिफलम्
१०२. रथप्रतिष्ठा
१०३. रथपूजा
१०४. रथारोहणम्
१०५. चक्राङ्गादिप्रायश्चित्तम्

2149

VB 996(b) शिवार्चनविधिः

Contents:

आत्मपूजाविधिः
आवाहनमन्त्रः
मुद्राविधिः
किरीटपञ्चपुष्पाञ्जलिः

पञ्चीकरणपुष्पाञ्जलिः
प्रणवकलामातृकाविधिः
श्रीकण्ठन्यासः
वैष्णवाद्यष्टाक्षरीमन्त्रः
केशवादिन्यासविधिः
पुष्पाञ्जलिविधिः
प्रपञ्चयागविधिः
शास्तृप्रतिष्ठाविधिः
अघोरमन्त्रः
पञ्चगव्यविधिः
आशौचविधिः
सोमवारविधिः
पञ्चबिम्बविधिः
दर्भलक्षणम्
पवित्रलक्षणम्
आलयशान्तिः
मण्डपकलशदेवतापूजाविधिः
निर्माल्यभोजनम्
प्रदक्षिणलक्षणम्
सोमास्कन्दसंमार्जनविधिः
नित्यपूजानुक्रमणिका
विघ्नेश्वरपूजा
नित्यपञ्चकृत्यविधिः
चूर्णोत्सवः
गौरीप्रतिष्ठा
गौरीपूजाविधिः

Beginning:

. . . . प्रकारस्तु कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् इत्याद्युक्तप्रकारेण तस्मिन् जले समावाह्य पुनः पूर्वोक्तानां मन्त्राणां मध्ये नेत्राभ्यामौषधात्यन्तेन नेत्रमन्त्रेण तज्जल . . . नेत्रमन्त्रेण न चोन्मूलेन मन्त्रवित् ।

End:

निर्माल्यभोजनं तुभ्यं प्रदत्तं तु शिवाज्ञया ।

इति विज्ञाप्य ओं हां चण्डहृदयाय हुं फट् स्वाहा इति पराङ्मुखार्घ्यं विसृज्य कपिलाय नमः अहःसु सौरादिचण्डान्तं रात्रौ द्वारादिक्षेत्रपालान्तम् अर्चयेत् ।

Colophon:

इति कारणविधाने परार्धार्चनविधिः समाप्तः

The scribe adds:

विलम्बिवर्षं ऐप्पशिमासं १० जटायिशुभागुरुक्कळ् पिळ्ळै सुब्रह्मण्यगुरुक्कळवतरित्त पुत्तकत्तिलिरुन्तेळुतिन श्रीकण्ठन्यासं जटायिशुभागुरुक्कळ् पोन्मुत्तु क्कुरुक्कळ् एळुतिन एळुत्ताणियेळुत्त्

2151

VB 1126 (g) **संग्रहाराधनम्**

Beginning:

संग्रहाराधनम् । पादौ प्रक्षाल्य द्विराचम्य भगवन्तं प्रणम्य घण्टानादेन हस्ततालत्रयेण च भगवन्तं प्रबोध्य कवाटोद्घाटनं कृत्वा दर्भदारुमयमासनं परिकल्प्य तत्रोपविश्य अखिलेत्यादि अनन्यशरणस्त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये ' इत्यन्तं बृहद्गद्यमनुसंधाय + + +

End:

अज्ञानादथवा ज्ञानादपराधेषु सत्स्वपि ।
प्रायश्चित्तं क्षमस्वेति प्रार्थनैकैव केवलम् ।।
उपचारापदेशेन कृतानहरहर्मया ।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम ।।

इज्यां समापयेत् । हरिः ओम् ।।

2152

VB 967 संप्रदायदीपिका

This is on the method of worship of Viṣṇu in temples as well as in homes. The author Alasiṅgabhaṭṭa was the son of Yogānanda-Nṛsiṃha bhaṭṭa of Yādavādri (Melkote). The work is divided into three Khaṇḍa-s.

Contents:

नित्यार्चनविधिः । पवित्रोत्सवः । डोलोत्सवः । जनोत्सवः । कृत्तिकादीपोत्सवः ।

Beginning:

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यं दैवतं पर्युपास्महे ।।
वन्दे फणिप्रवररूपयतीन्द्रयुग्मं
श्रीभाष्यकारवरसौम्यमुनीश्वराख्यम् ।
यत्संस्कृतद्रमिडसूक्तिभिरत्युदार-
माराधनं सुमनसां प्रकटीचकार ।।
रामानुजार्योक्तनित्यक्रमगोक्षीरमुत्तमम् ।
सौम्यजामात्रोक्तपूजाक्रमं . . . ।।
. . . . . .जीवजीवनसाधनम् ।
पिबध्वं वैष्णवाः सर्वे यतिराजपदाश्रिताः ।।

अथ परमैकान्तिनो भगवदाराधनविधिरुच्यते । परमैकान्ती ब्राह्मे मुहूर्ते समुत्थाय स्वगुरुपरंपराध्यानपूर्वकं भगवन्नाम संकीर्त्य शौचाचमनदन्तधावनपूर्वकं यथाविधि कृत्वा धृतवस्त्रोत्तरीयस्तत्तन्मन्त्रैः द्वादशोर्ध्वपुण्ड्रान् धृत्वा भगवत्कैङ्कर्यरूपस्वाश्रमोचितनित्यकर्माणि निर्वर्त्य आधारशक्त्यादितर्पणं कुर्यात् ।

Fol. 123:

एतदुक्तप्रकारेण पूजयन् वैष्णवोत्तमः ।
श्रीनृसिंहप्रसादेन प्राप्नोति विपुलां श्रियम् ।।

Colophon:

इति श्रीसंप्रदायप्रदीपिकायां नित्यार्चनविधिर्नाम प्रथमः खण्डः

द्वितीयः खण्डः—

श्रीमद्यादव + उपास्महे ।।

श्रीमद्रामानुजाचार्यविरचितं नित्यं श्रीमद्रम्यजामातृकृतमाराधनक्रमं चानुसृत्य नित्यार्चनविधिः पूर्वखण्डे निरूपितः । इदानीं स्वगृहेऽपि कर्तव्या भगवतः पवित्रोत्सवाद्युत्सवाः निरूप्यन्ते । आषाढशुक्लैकादशीमारभ्य कार्तिकशुक्लैकादश्यन्तं मासचतुष्टयेऽन्यतमे मासि भगवतः पवित्रोत्सवं कुर्यात् ।

Colophon:

इति श्रीसंप्रदायदीपिकायां पवित्राद्युत्सवविधिर्नाम द्वितीयोऽध्यायः

Fol. 139

इति गृहार्चनप्रतिष्ठाविधिः समाप्तः ।

पूर्वं स्थापितविम्बस्य न पुनः स्थापनं स्मृतम् ।
स्थापने तु महान्दोषस्तस्य संप्रोक्षणं स्मृतम् ।।

End (fol. 142b):

विष्णवे स्वाहा । विष्णव इदम् । एवं पीठकल्पनं वैष्णवाग्निं च हुत्वा पुंसूक्तेन प्रत्यर्चं हुत्वा मूलमन्त्रेण मन्त्ररत्नेन च मूर्ति(ल)मन्त्रेण शतं शतं प्रत्येकं श्रीभूसूक्ताभ्यां प्रत्यर्चं हुत्वा ततो जयादि परिषेचान्तं कृत्वा विष्वक्सेनं प्रपूज्य गुरूनभ्यर्च्य ब्राह्मणान् भोजयित्वा ताम्बूलदक्षिणां च दत्त्वा आशिषो वाचयित्वा आचार्यं वस्त्रभूषणादिभिरभ्यर्च्य यथापूर्वं समर्चयेत् ।

इति श्रीसंप्रदायदीपिकायां गृहार्चनप्रतिष्ठाप्रोक्षणप्रयोगो नाम तृतीयः खण्डः ।।

. . . पालिता श्रीमद्योगानन्दाख्यसूनुना ।
अलशिङ्गाख्यभट्टेन संप्रदायप्रदीपिका ।।

Colophon:

सत्संप्रदायप्रदीपिका संपूर्णा

2154

VB 1069 **सकलागमसारसंग्रहः**

This contains the following topics taken from different works:

वास्तुहोमः, मृद्ग्रहणम्, प्रवेशबलिः, शङ्कुस्थापनम्, प्रतिसरम्, मण्डपपूजा, प्रतिसरविधिः, अग्निसंस्कारः ।

(39a) इति कारणे प्रतिष्ठातन्त्रे अष्टबन्धन उत्सवसं. . . . . ण महायागमण्डप-मन्त्रसंयुक्तं होमसंख्याविधिक्रमपटलः ।

(40a) इति सकलागमसंग्रहाख्ये महातन्त्रे क्रियादीपिकायां शिवलिङ्गप्रतिष्ठाविधि-वासनविधिः समाप्तः ।

(49b) . . . . दीपिकायां शिवलिङ्गप्रतिष्ठाविधिः समाप्तः ।

(101a) . . . . काख्ये महातन्त्रे सुब्रह्मण्यस्थापनविधिपटलः ।

(104a) इति कामिकाख्ये महातन्त्रे चण्डेश्वरप्रतिष्ठापटलः ।

(107b) इति श्रीकामिकाख्ये महातन्त्रे शिवभक्तप्रतिष्ठापनादिपटलः ।

(112a) इति क्रियाक्रमपद्धत्याम् ।

(115a) इति क्रियादीपिके जीर्णोद्धा . . . . . .

(116b) कामिके

(119b) इति क्रियादीपिके महातन्त्रे अष्टबन्धनविधिपटलः ।

(139b) इति क्रियादीपिके कुण्डलक्षणविधिपटलः ।

(142b) इति दर्भमालालक्षणम् ।

(144a) एवमित्यादिद्रव्यसंग्रहणविधिः ।

(160a) इति मयमते लिङ्गलक्षणोद्धारविधिः । पश्चात् पीठलक्षणोद्धारविधिः । विनायकभट्टविरचिते साधारणविधौ ।

(163b) इति सुप्रभेदे प्रतिष्ठातन्त्रे क्रियापादे कर्षणविधिपटलश्चतुर्विंशः ।

(167b) इति सुप्रभेदे प्रतिष्ठातन्त्रे क्रियापादे प्रासादवास्तुपटलः ।

(168b) इति सुप्रभेदे क्रियापादे अद्येष्टापटलः सप्तविंशः ।

गर्भन्यासविधिः	अन्तर्मातृकान्यासः
अस्त्रदेवपूजा	तत्त्वन्यासः
देवीकलान्यासः	शास्तृप्रतिष्ठा

इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे उमास्कन्दप्रतिष्ठाविधिर्नाम एकोनत्रिंशः पटलः ।

इति दीप्त + तन्त्रे मूर्तिस्थापनविधिर्नाम द्वात्रिंशः पटलः । इति दीप्त + तन्त्रे चन्द्र-शेखरस्थापनविधिर्नाम त्रयस्त्रिंशः पटलः ।

इति दीप्त + तन्त्रे महास्नपनविधिर्नाम त्रिपञ्चाशः पटलः ।। इति कामिकाख्ये महातन्त्रे अद्भुतशान्तिपटलो . . . . . धिकशततमः ।

इति कारणे प्रतिष्ठातन्त्रे . . . . देयुक्ते क्षेत्रपालप्रतिष्ठाविधिपटलः ।

इति सूक्ष्मागमे प्रतिष्ठातन्त्रे वाणलिङ्गलक्षणविधिः सप्तषष्टितमः पटलः ।

इति सकलागमसंग्रहाख्ये महातन्त्रे क्रियादीपके एकादशलिङ्गलक्षणपटलः ।

इति सकलागम + दीपके आश्रयलिङ्गलक्षणविधिपटलः ।

इति सकलागम + दीपके प्रतिमालक्षणपटलस्त्रयस्त्रिंशः ।

इति सकलागमसंग्रहाख्ये क्रियादीपके आचार्यलक्षणविधिपटलः ।

इति सकल + दीपके मुहूर्तविधानपटलः ।

(265) इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पञ्चान्तस्नपनविधिर्नाम चतुष्पञ्चाशः पटलः ।

अथ केदारव्रतम्

(269) इति पूजां समापयेत्

(270) कृत्तिकादीपम्

(271) इति कारणे प्रतिष्ठातन्त्रे कृत्तिकादीपनक्षत्रविधिपटलः ।

(272) नवरात्रिविधिः

इति कारणे प्रतिष्ठातन्त्रे क्रियापादे नवरात्रिविधिपटलः ।

इति कारणे धनुर्मासपूजाविधिपटलः ।

इति कारणे प्रतिष्ठातन्त्रे संक्रमपूजाविधिपटलः ।

(286) इति श्रीमत्स्कान्दे महापुराणे . . . . . ईशानसंहितायां शतरुद्रीयमाहात्म्ये द्वितीयोऽध्यायः ।

इति श्री + माहात्म्ये तृतीयोऽध्यायः ।

(325) इति वातुले तन्त्रे सहस्रसंहितायां नित्यार्चनविधिपटलः समाप्तः ।

(329b) इति . . . महातन्त्रे क्रियादीपिकायां ग्रामशान्तिविधिपटलः ।।

2157

VB 1000 सूक्ष्मतन्त्रम्

Contents:

पुण्याहविधिः
पञ्चगव्यविधिः
पञ्चामृतविधिः
अर्चनाङ्गविधिः
शिवपूजाविधिः
लीलावत्यग्निकार्यम्
नित्योत्सवः
उत्सवः
शुद्धोत्सवः
पवित्राहोर. . . . . पटलः

आषाढपूरविधिः
दीपारोपणविधिः
वसन्तोत्सवः
शीतकुम्भः
पवित्रारोहणम्
स्नपनकर्म
घटस्नानविधिः
मन्त्रोदकविधिः
जलधाराविधिः
घृतशिरोऽर्पणविधिः
क्रियासमर्पणविधिः
पञ्चप्रत्ययविधिः
परशुप्रत्येकविधिः
पञ्चप्रत्ययविधिः
नक्षत्रयज्ञविधिः
सुवर्णपुष्पविधिः
शक्तिपीठार्चना
पूजाचक्रविधिः
आत्मार्थपूजा
लिङ्गार्चनम्
पादुकादानम्
रक्षाविधिः
रक्षादीपविधिः
करणाधिकारः
सहस्रधारा
नामलक्षणम्
बलिविधिः
गोपुरलक्षणम्
मासोत्सवविधिः ।
मण्डपलक्षणम्
कामकोष्टविधिः
मकुटारोपणविधिः
ग्रामशान्तिविधिः
गौरीपूजा
गौरीव्रतपटलः
बालस्थापनपटलः
कल्याणकर्म
रथारोहणविधिः
अन्त्यहोमविधिः

2158

VB 1006 **सोमभुजगवल्ली**

Beginning:

वन्दे गुरुं च गुर्वाज्ञां विघ्नेशं विघ्नशातनम् ।
. . . . . .क्षत्रपं क्षेत्रभेषजम् ।।
ज्ञातृज्ञेयप्रमारूपां संविदं नौमि भारतीम् ।
. . . . . .साक्षाज्ज्ञानसमृद्धये ।।
सौराभा. . व विश्वस्य तमःसंहारकारिणीम् ।
एं क्लीबामैन्दवीं वन्दे शिवं यान्तीं परां कलाम् ।।
पुत्रेप्सुर्देवकीपुत्रः. . दा बदरिकाश्रमे ।
शंभोस्तृप्तिकृते तीव्रं तपस्तेपे जगत्पतिः ।।
उग्रस्तस्योग्रतपसा तुष्टो दृष्टिपथं ययौ ।

सस्मितं प्राह गोविन्दं किमेतदिति कामहा ।।
ततः प्रणम्य तं कृष्णो निजकार्यं न्यवेदयत् ।
पुनस्तं प्राह पुत्रेप्सुं भगवान् पार्वतीपतिः ।।
प्रवृत्तिहेतुं विश्वस्य कामं दास्यामि ते सुतम् ।
हृदयं विद्धि तत् कृष्ण विद्यायास्त्वपदा. . ।।
ततः कौतूहलाविष्टो हरिः प्राहाम्बिकापतिम् ।
हृदयत्वं कथं तस्या विद्यायाः पु . . म्पनः ।।
तां च विद्यां मम ब्रूहि साङ्गोपाङ्गां त्रयीमय ।
. . . . .श्रान्तां विद्यां तस्मै वक्तुं प्रचक्रमे ।।

महादेव उवाच—

. . . .प्रवक्ष्ये बहुलां विचित्रां
द्विवर्णरूपां च तथाप्यवर्णाम् ।

Colophon:

श्रीसोमभुजगवल्लभ्यां चतुर्थः पटलः

End:

. . क्तविकल्पितैश्चापि तावन्तो मात्रा भवन्ति । एव . . . . . क् पृथक् शक्ति-विकल्पितैश्च तावन्त एवं चतुर्थे . . . . . सप्तचत्वारिंशत्सहस्रैः कोटिभिः सह. . .
. . . . . स्रोत्तर नवलक्षसंख्यातानुलोमा . . . . . .
इति मन्त्रक्रमो द . . म्
श्रीदेववाणिश्र . . . . . लज्जितः ।।

Colophon:

श्रीसोमभुजगवल्लभ्यां सप्त . . . . . .

2160

VB 1125(e) **अमासोमवारव्रतोद्यापनम्**

Beginning:

अनुज्ञा । विनायकसंकल्पः । अश्वत्थसंनिधौ अमासोमवारसंयुक्तपुण्यकाले अमासोमवारव्रतोद्यापनं करिष्ये । नान्दी । पुण्याहं कृत्वा आवाहनम् ।

आग्नेयाभिमुखं देवमन्यथाकाररूपिणम् ।
इष्टकाम्यार्थसिद्धयर्थं पुत्रपौत्राभिवर्धनम् ।।

श्वेतवर्णं सलक्ष्मीकं भुजाष्टकविभूषितम् ।
शङ्खचक्रधरं देवं पीतवाससमच्युतम् ।।
अभयं वरदं शान्तं खड्गखेटकधारिणम् ।
धनुर्बाणसमायुक्तं चिन्तयेत् पुरुषोत्तमम् ।।

इति ध्यानम् । अष्टोत्तरशतं प्रदक्षिणं कृत्वा ततः परमुद्यापनप्रार्थना ।

Fol. 30:

कुम्भमुद्वास्य अभिषिच्य आचार्यपूजां च ऋत्विक्पूजां च दक्षिणां च दत्वा दशापूपदानं कृत्वा दशदानानि कन्यकादानानि दत्वा कल्पवृक्षफलताम्बूलादीन् दत्वा नालिकेरं च दत्वा ब्राह्मणाशीर्वचनं कारयेत् ।

एवं यः कुरुते मर्त्यो दीर्घमायुः स विन्दति ।

End:

इति तस्य वचः श्रुत्वा राजा धर्मभृतां वरः ।
उत्तरां च समाहूय कथयामास तद्व्रतम् ।।
चकार तद्व्रतं बाला पुत्रं लेभे परीक्षितम् ।
सर्वलक्षणसंपूर्णं व्रतराजप्रभावतः ।।
या करोति व्रतं तत्र सापि जीवप्रजा भवेत् ।
इति सत्यं प्रजानीहि नात्र कार्या विचारणा ।।
व्रतमिदमखिलं नरेन्द्र विष्णोः
कृतमनघं परमस्य तस्य तत्वम् ।
या च भूतिधनपुत्रमृच्छति
करोति न चात्र चित्रमस्ति . . . . ।।

Colophon:

इति भविष्योत्तरपुराणे भीष्मयुधिष्ठिरसंवादे अमासोमावरव्रतोद्यापनं नाम सप्तमोऽध्यायः

2163

VB (b)998 **कामाक्षीव्रतकल्पः (कथासहितः)**

Beginning:

विद्यावैशद्यमस्मासु दद्यादायुश्च पुष्कलम् ।
कैवल्यमपि कामाक्षी किमुदारैर्न दीयते ।।
एकाम्रकामनिलयमिन्द्रादिविनतं सदा ।
कर्पदिनमहं वन्दे शंकरं लोकशंकरम् ।।

ध्यानम् ।

आवाहयामि गिरिशमनन्तानन्दशेवधिम् ।
प्रणतार्तिहरं देवं पार्वतीप्राणनायकम् ।।

आवाहनम् ।

End:

अद्यापि परिदृश्येते कामाक्ष्येकाम्रनायकौ ।
तस्मात्तौ कामदौ नृणां तस्मा . . . द्रौपदि व्रतम् ।।
आ. . . कुरु कल्याणि पत्न्यैक्यकरणं परम् ।
तत्ते सर्वं समाख्यातमुक्तं स्याच्छंभुवैभवम् ।।
या न . . . . .त भक्त्या सर्वसौभाग्यमश्नुते ।
प्रतिवर्षं यथावच्च . . . . . ते ध्रुवम् ।।
नारदस्य वचः श्रुत्वा कृष्णः पाण्डुसुता . . . यः ।
सहर्षं नारदं पूज्य विस्मयं परमं गताः ।।

Colophon:

इति श्रीब्रह्माण्डपुराणे द्रौपदीनारदसंवादे कामाक्षीव्रतकल्पं नाम सप्तविंशोऽध्यायः । इति कामाक्षीव्रतकथा समाप्ता

2164

VB 1015 **कृत्यतत्त्वम्**

Contents:

शिवकवचः, पार्वणश्राद्धविधिः, जातषष्टीपूजा, शिवरात्रिव्रतकथा, श्रीरामनवमीव्रतम्, अवधानसप्तमीव्रतम्, रोगसप्तमीव्रतम्, भीष्माष्टमीव्रतम्, सुखरात्रिलक्ष्मीपूजा, द्यूतप्रतिपत्, भ्रातृद्वितीया, अनन्तव्रतम्, भाद्रकृत्यम्, धान्यच्छेदनम् ।

Beg.: निश्चितं मुच्यते रोगाच्छंकरस्य प्रसादतः ।
यः शृणोति सदा भक्त्या स्तवराजमिमं द्विजः ।।

End: अभार्यो लभते भार्यां सुखं विदित . . .
इति शिवकवचं समाप्तम् ।।

Beg.: अथ पार्वणश्राद्धविधिः—एतस्मै सोपकरण भर्गाय नमः ।

End: उज्ज्वलज्योति . . . पश्यन्तु व्रजन्तु ते । इति मन्त्रेण विसर्जयेत् ।
अथ जातषष्टीपूजा

Beg.: असौ स्नात्वा धौते वाससी परिधाय अरिष्टं स्मृत्वा अङ्गणे गोमय . . .
आसने उपविश्य ।

End: . . . महाषष्टी सर्वारिष्टविनाशिनी ।
षष्ठीरूपेण सर्वत्र बालरक्षां समाचरेत् ।।

इति प्रणमेत् । ततो दक्षिणां दत्वा अच्छिद्रावधारणं कृत्वा . . . इति जातषष्ठीपूजा समाप्ता

ओं श्रीरामः वानरेश्वरमुवाच—

Beg.: कथं ते अद्य कथितं स्तोत्रं च शृणु शौनक ।
मन्त्रराजः कल्पतरुर्वसिष्ठो दत्तवान् पुरा ।।

ओं नमः शिवाय । वानरेश्वर उवाच—
वन्दे सुराणां सारज्ञं सुरेशं नीललोहितम् ।

End: शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः ।
सर्वपूजाफलं हृन्ति शिवरात्रिबहिर्मुखः ।।
इति नृसिंहाचार्यधृतेश्वरसंहितावचनेनास्य नि. . येत् ।।
इति शिवरात्रिव्रतकथा समाप्ता ।।

Beg.: अथश्रीरामनवमीव्रतम्—
तत्र दशमीपारण . . . सर्ववेधाष्टमीसिद्धा ।

End: ततः परदिने प्रातः संपूज्य दशम्यां पारणं कुर्यात् ।

अथावधानसप्तमीव्रतम्—

Beg.: ब्राह्मणाः स्वस्ति वाच्यं ओं सूर्यः सोम इत्यादि पठित्वा ओं

End: अत्र मासविशेषाल्लेखालम्भादिव्रतव . . मासे तत्र कर्तव्यम् ।।

अथ रोगसप्तमीव्रतम्—

Beg.: अत्र पूर्ववत्सर्वसप्तमीतिथावित्युक्ता । अद्यारभ्येति ऐहिका . . .

End: अत्र विशेषमासानुद्देशासारा . . . व्रतवन्मनसा . . . पि कर्तव्यम् ।।

अथ भीष्माष्टमीव्रतम्—

Beg.: अष्टम्यां ब्राह्मणः पितृतर्पणं विधाय—ओं वैयाघ्रपाद . . .

End: मघानक्षत्रयोगे महामा . . . अक्षयफल . . . प्रमाणं तु तिथित . . .

अथ सुखरात्रिलक्ष्मीपूजा—

Beg.; तत्रोभयीनप्रदोषलाभेऽपि परदिने सर्वं कार्यम् ।

End: मात(रे)सर्वभूतानां देवानां सृष्टिसंभवा ।
आख्यातादभुत(ने) देवि सुखरात्रि नमोऽस्तु ते ।।
इति सुखरात्रिलक्ष्मीपूजा समाप्ता

अथ द्यूतप्रतिपत्—

Beg.: तत्र प्रभाते . . . क्षे क्रियादिकर्तव्यम् । तत्र जये . . .

End: स्नानं दानं शतगुणं कार्तिकेऽस्यां तिथौ भवेत् ।।

अथ भ्रातृद्वितीया—

Beg.: तत्र उभयदिने अष्टधाविभक्तपञ्चमार्धयामे द्वितीयायाः . . .

End: पुष्टिवर्धनमिति वचनात् पुष्टिकामो भुञ्जीत ।।

अथानन्तव्रतम्—

Beg.: तत्राङ्गणे पूर्वाह्णे नाभक्ताङ्गने उभयदिने चेत् परदिने मुच्यते ।

End: भक्षितो येन वा ताश्चे . . . महाशूरः सुमु . . ति,
येन समेऽन्त्यः . . . दत्त इति प्रार्थयेत् ।।

अथ भाद्रकृत्यम् । तत्र जन्माष्टमीव्रतम्—

Beg.: भ्रमान . . . तत्रानुसंधेयम् । श्रावणानन्तरितभाद्रकृष्णाष्टम्यां रात्रि . . .
मुहुर्ताष्टमीरोहिणीरुपजयन्ति . . . तत्रैवोपवासः ।

End: ओं भूताय भूतेश्वराय भूतपतये भूतसंभवाय गोविन्दाय नमोनमः ।
इति पठित्वा व्रतं समापयेत् ।।

अथ धान्यच्छेदनम्—

Beg. कार्तिके पौषेतरमा . . . मार्गशीर्षेऽपि शुभवारे पुष्यनक्षत्रे रविशनि-
मङ्गलवारेतरत्र रिक्तेतरतिथिषु. . . . .

End: ब्राह्मणाय घृतं गन्धान् . . . स्वप्नाद्यनिष्टदर्शनेषु ब्राह्मणाय
काञ्चनघृतं वा दद्यात् । ततो ब्राह्मणान् भोजयित्वा. . .

Colophon:

इति वन्धघटीयहरिहरभट्टाचार्यात्मजश्रीरघुनन्दनभट्टाचार्यविरचितं
कृत्यतत्वं समाप्तम् ।

Scribe adds:

शकाब्दः १७०४. व्यलेखि श्रीजयगोविन्ददेवशर्मणेति ।।

2165

VB 1125 (c) **प्रदोषव्रतकथा**

Beginning:

. . . . . वलोद्धतैः ।
पाताले पन्नगेन्द्रस्य गन्धर्वैरिव दुर्मदैः ।।
विदर्भनृपतिः सोऽथ कृत्वा युद्धं सुदारुणम् ।

प्रनष्टोरुबलैः शाल्वैर्निहतो रणमूर्धनि ।।
तस्मिन् महारथे वीरे निहते मन्त्रिभिः सह ।
दुद्रुवुः समरे भग्ना हतशेषाश्च सैनिकाः ।।

End:

य एतच्छृणुयात् पुण्यं माहात्म्यं परमाद्भुतम् ।
प्रदोषे शिवपूजान्ते कथयेद्वा समाहितः ।।
भवेन्न तस्य दारिद्र्यं जन्मान्तरशतेष्वपि ।
ज्ञानैश्वर्यसमायुक्तः सोऽन्ते शिवपुरं व्रजेत् ।।
ये प्राप्य दुर्लभतरं मनुजाः शरीरं
कुर्वन्ति हन्त परमेश्वरपादपूजाम् ।
धन्यास्त एव निजपुण्यजितत्रिलोका-
स्तेषां पदाम्बुजरजो भुवनं पुनाति ।।

Colophon:

इति ब्रह्मोत्तरखण्डे प्रदोषव्रतपूजामहिमानुवर्णनं नाम एकोनत्रिंशोऽध्यायः

2166

VB 291(i) **लक्ष्मीव्रतकल्पः**

Beginning:

एवंगुणविशेषणविशिष्टायां अस्यां पुण्यतिथौ मम सर्वसौभाग्यसिद्धयर्थं वरलक्ष्मीपूजां करिष्ये ।

वरलक्ष्मीर्महादेवी भूमिमाता च कन्यका ।
लोकमाता महालक्ष्मीः सर्वाभरणभूषिता ।।
कुचकुम्भधरा चारुपादलक्षणसंयुता ।

इति दोरस्थापनम् ।

End:

इदं सत्यमिदं सत्यं नरो भद्राणि पश्यति ।
तथा चारुमती मुख्या उपलब्धमनोरथा ।।
पुण्या चारुमती चैव भूयो भाग्यवती चिरम् ।
ततश्चारुमती साध्वी चचार व्रतमुत्तमम् ।।

Colophon:

इति भविष्योत्तरपुराणे वरलक्ष्मीव्रतकल्पः समाप्तः

2170

VB 1183(c) **वरलक्ष्मीव्रतकल्पः**

Beginning:

क्षीराम्भोधिसुतां रमां सुनयनां चन्द्रार्कवह्निप्रभां
श्वेतद्वीपगतां चतुर्भुजयुतां लक्ष्मीशवक्षःस्थिताम् ।
नानारत्नविराजितां. . . . केयूरहारोज्ज्वलां
दिव्यस्त्रीपरिसेवितां सुरगणैः संस्तूयमानां भजे ।।
अत्रागच्छ जगद्वन्द्ये सर्वलोकैकपूजिते ।
. . . .देवि नानामणिविराजिते ।।

आवाहनम्

End:

इदं तु श्रावयेद्यो वै सोऽपि भाग्यमवाप्नुयात् ।
भाग्यादिदं तत्कथितं व्रतमेतन्मया तव ।।

Colophon:

इति भविष्योत्तरपुराणे. . . . श्वरसंवादे वरलक्ष्मीव्रतकल्पः संपूर्णः

Scribe adds:

मन्न्यूनातिरिस्क्तानि परिस्फुटानि
यानीह कर्माणि मया कृतानि ।
क्षम्याणि चैतानि. . . . .
. . . . . .नराधमाय ।।

2172

VB 1132 **व्रतकल्पसमुच्चयः**

Contents:

विनायकव्रतकल्पः (स्कान्दे)
वरलक्ष्मीव्रतम् (भविष्योत्तरपुराणे)
पारणव्रतम् (भविष्योत्तरपुराणे)
अनन्तव्रतोद्यापनम् (स्कान्दे)
स्वर्णगौरीव्रतम्
यमुनापूजा
अनन्तव्रतकल्पः (भविष्योत्तरे)
दशाफलव्रतम्
शंकरव्रतकल्पः

Beginning:

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ सर्वकार्यसिद्धिप्रदविघ्नेश्वरप्रीत्यर्थं कल्पोक्त-प्रकारेण सिद्धिविनायकपूजां करिष्ये ।

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम् ।।

श्रीसिद्धिविनायकाय नमः ध्यानं समर्पयामि ।

विनायक नमस्तेऽस्तु उमामलसमुद्भव ।
इमां मया कृतां पूजां गृहाण सुरसत्तम ।।

आवाहनम् ।

End:

इति स्तुत्वा कामदेवश्चकार व्रतमुत्तमम् ।
सर्वाभीष्टानवाप्याशु मुमोद बहुवत्सरम् ।।

सूतः—

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्व . . . . . नन्ते शाश्वतमाप्नुयात् ।।

Colophon:

इति श्रीस्कान्दे पुराणे शंकरव्रतकल्पः

2173

VB 246 **व्रतकल्पसमुच्चयः**

Contents:

१. कृष्णजयन्ती (कथा)
२. सोमवारव्रतम् (कथा)
३. वरलक्ष्मीव्रतम्
४. विनायकव्रतम्
५. दशाफलव्रतम्

Beginning:

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ श्रीकृष्णप्रसादेन पुत्रपौत्राभिवृद्ध्यर्थं श्रीगोपाल-कृष्णमुद्दिश्य श्रीगोपालकृष्णप्रीत्यर्थं सनत्कुमारसंहितोक्तप्रकारेण कृष्णजयन्तीव्रतं करिष्ये । इति संकल्प्य ।

End:

इति पूजाविधानं संपूर्णम्
जयन्तीमाहात्म्यम्

Colophon:

इति स्कान्दपुराणे कृष्णजयन्तीव्रतकल्पः संपूर्णः
अमासोमवारव्रतम्—

Beginning (fol. 12):

आग्नेयाभिमुखं देवं मुखतः कामरूपिणम् ।
इष्टकाम्यार्थसिद्धचर्थं पुत्रपौत्रप्रवर्धनम् ।।
ध्यायेन्नारायणं देवं नित्यमश्वत्थरूपिणम् ।

ध्यानम्—

अश्वत्थक महाभाग गोविन्दसमदर्शन ।
अशेषं हर मे पापं वृक्षराज नमोऽस्तु ते ।।

Colophon (fol. 14):

इति भविष्योत्तरपुराणे अमासोमवारव्रतोद्यापनं संपूर्णम्

Beginning (fol. 15):

वैशम्पायन उवाच—

शरतल्पगतं भीष्ममुपगम्य पितामहम् ।
कृतप्रणामो धर्मात्मा इदं वचनमब्रवीत् ।।

End (fol. 16):

द्विजः—

सोमागमनमात्रेण पुत्रीवैधव्यनाशनम् ।

धनवती—

का च सोमा त्वया प्रोक्ता का जातिः कुत्र संस्थिता ।।
तस्या वद महाभाग न कालो विस्तरस्य मे ।।

द्विजः—

सा सोमा रजकी जात्या स्थितिस्तस्यास्तु निष्कले ।
सा यदा संस्थिता वेश्म तदा वैधव्यभाजनम् ।।

वरलक्ष्मीकल्पम् (fol. 17):

पद्मानने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि प्रीता भवतु सर्वदा ।।

Colophon (fol. 20):

इति भविष्योत्तरपुराणे वरलक्ष्मीव्रतकल्पः समाप्तः

विनायकव्रतम् (fol. 21):

ध्यायेद् गजाननं देवं तप्तकाञ्चनसंनिभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ।।

Colophon (fol. 25):

इति स्कान्दपुराणे विनायकव्रतकल्पः संपूर्णः

दशाफलव्रतम् (fol. 26):

चक्रपाणिं शिवं विष्णुं नारायणमजं हरिम् ।
श्रीधरं बलभद्रं च कृष्णं दामोदरं क्रमात् ।।
आगच्छ देव श्रीपुत्र शङ्खचक्रगदाधर ।
नीलमेघनिभश्याम पुण्डरीकनिभेक्षण ।।

End (fol. 31):

तदिदं शृणुयान्नित्यं श्रावयेद्वचानमास्थितः ।
सिध्यन्ति सर्वकार्याणि बालकृष्णप्रसादतः ।।

Colophon:

इति भविष्योत्तरपुराणे दशाफलव्रतकल्पः संपूर्णः

2174

VB 358(j) **व्रतकल्पसमुच्चयः**

Contents:

१. ऋषिपञ्चमीव्रतम्	५. अमासोमवारव्रतम्
२. अनन्तव्रतम्	६. बुधाष्टमीव्रतम्
३. मथनद्वादशीव्रतम्	७. गोपद्मव्रतम्
४. केदारव्रतम्	८. कृष्णाष्टमीव्रतम्

Beginning:

विशेषेण प्रथमरजोदर्शनात् प्रभृति रजोनिवृत्तिपर्यन्तं तत्तद्दर्शनवेलायां स्पृष्टास्पृष्टवस्तु-दर्शनभाण्डस्पर्शन - शूद्रसंभाषण-परपुरुषादिदर्शनवस्त्रमाल्याद्यनेकविधकामचारकाम्यभक्ष्यभक्षण -

जनितसमस्तपापक्षयार्थम् उत्कृष्टसाध्वी . . . प्राप्त्यर्थं भाण्डस्पर्शनदोषनिवृत्यर्थं + + + कश्यपादिसप्तर्षिदेवताप्रीत्यर्थं ब्रह्माण्डपुराणोक्तसप्तवर्षसाध्यऋषिपञ्चमीव्रतं करिष्ये ।

End:

श्रीकृष्णप्रतिमादानमुत्तमं श्रोत्रियस्य तु ।
वस्त्रालंकारभूषाद्यैस्ताम्बूलं च सदक्षिणम् ।।
श्रीकृष्णः प्रतिगृह्णातु श्रीकृष्णो वै ददाति च ।
श्रीकृष्णस्तारको द्वाभ्यां श्रीकृष्णाय नमो नमः ।।

इति मन्त्रेण कृष्णप्रतिमादानमाचरेत् ।

कोटिजन्मकृतं पापम् + । इह भुक्त्वाखिलान् भोगान् + । करारविन्देन + । कायेन वाचा + समर्पयामि ।।

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे श्रीकृष्णजयन्तीकथाविधानं संपूर्णम्

Scribe adds:

लक्ष्मीनारायणस्वहस्तलिखितम् ।।

2175

VB 1148 **व्रतकल्पसमुच्चयः**

Contents:

१. सिद्धिविनायकव्रतकल्पः
२. श्रीरामनवमीव्रतम्
३. ऋषिपञ्चमीव्रतम्
४. केदारगौरीव्रतम्
५. वैशाखपौर्णमीव्रतम्
६. कृष्णाष्टमीव्रतम्
७. उमामहेश्वरव्रतम्
८. हरितालगौरीव्रतम्
९. गौरीव्रतम्
१०. ललितागौरीव्रतम्
११. सोमवारव्रतम्

Beginning:

. . . कल्पोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादि षोडशोपचारपूजां समर्पयामि ।
पाशाङ्कुशधरं देवं वरदाभयपा . . . ।
. . . . . .
ध्यानम् ।

End:

अन्तकालानलप्रख्यं . . कोटिसमप्रभम् ।
कोटिसूर्यप्रतीकाशं शशिभेन . . . . ।।

2176

VB 1177 **व्रतकल्पसमुच्चयः**

Contents:

१. विघ्नेश्वरव्रतकल्पः
२. सरस्वतीव्रतकल्पः
३. अनन्तव्रतकल्पः
(कथासहितः स्कान्दे)
४. उमामहेश्वरव्रतकल्पः
(कथासहितः, ब्रह्मवैवर्ते)
५. सोमवारव्रतकल्पः
६. द्वादशीव्रतकल्पः
७. अमासोमवारव्रतकल्पः
(कथासहितः, ब्रह्माण्डे)
८. चण्डीपूजाकल्पः
९. ऋषिपञ्चमीव्रतकल्पः
(कथासहितः, ब्रह्माण्डे)
१०. अश्वत्थपूजाविधिः
११. अग्निपूजाविधिः

विनायकव्रतकल्पः

Beginning:

विघ्नेश्वर . . . उपासनप्राणायामे विनियोगः । एवंगुणविशेषणविशिष्टायां शुभतिथौ मम . . . . व्रतकल्पोक्तसकलफलसिद्धयर्थं कनकवस्त्र . . . पुत्रपौत्राभिवृद्धयर्थं . . . वासरे षोडशोपचारपूजां करिष्ये । तदङ्गं प्राणप्रतिष्ठापनं करिष्ये ।

End:

एषामृषीणां च तपोधनानां व्रतेन साङ्गेन मनुष्यलोके ।
निस्तीर्य नार्यो निखिलं च पापं लोके च तस्मिन्नुपयान्त्यकल्मषाः ।।

Colophon:

इति ब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतकथाश्रवणं संपूर्णम्

2177

VB 1131 **व्रतकल्पसमुच्चयः**

Contents:

गौरीव्रतकल्पः
(कथासहितः, भविष्योत्तरपुराणे)
सोमवारव्रतकल्पः
(कथासहितः, मार्कण्डेयपुराणे)
गोद्वादशीव्रतकल्पः
ऋषिपञ्चमीव्रतकल्पः
धारणपारणव्रतम्
केदारेश्वरव्रतकल्पः

उमामहेश्वरव्रतकल्पः
शनिप्रदोषव्रतकल्पः
हरितालगौरीव्रतकल्पः
चतुर्दशीव्रतकल्पः
हरितालगौरीव्रतम् (स्कान्दे)
वरचतुर्थीव्रतम्
(पाद्मे)
वरलक्ष्मीव्रतम्
गरुडपञ्चमीव्रतम्
शिवभुजङ्गस्तोत्रम्

Beginning:

. . .नानाविधानि हृद्यानि पुष्पाणि प्रतिगृह्यताम् ।

. . . गणाधिपतये नमः बृहतीपत्रम् । उमापुत्राय नमः बिल्वपत्रम् । गजाननाय नमः दूर्वायुग्मम् । . . . . पत्रम् । शूर्पकर्णाय नमः तुलसीपत्रम् । . . . नमः अपामार्गपत्रम् । एकदन्ताय नमः बृहतीपत्रम् ।

End:

भुजङ्गप्रियाकल्प शंभो मयेदं भुजङ्गप्रयातेन वृत्तेन क्लृप्तम् ।
तव स्तोत्रमेतत् पठेद् यस्तु भक्त्या शिवादायुरारोग्यमैश्वर्यमेति ।।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमच्छंकराचार्यविरचितं शिवभुजङ्गस्तोत्रं संपूर्णम्

2178

VB 305 (c) **व्रतकल्पसमुच्चयः**

Contents:

स्वर्णगौरीव्रतम् (कथासहितम् स्कान्दे)
विनायकव्रतम् (,, भविष्योत्तरे)
वरलक्ष्मीव्रतम् (,, ,,)
ज्योतिस्तम्भव्रतम् (,, ,,)

Beginning:

स्वर्णगौरीव्रतम् ।

पूर्वोक्त एवंगुणविशेषणविशिष्टायां शुभतिथौ मम संभावितसमस्तपापक्षयार्थं सत्संतान-सौभाग्यसिद्धयर्थं पुत्रपौत्राभिवृद्धयर्थं दीर्घसौमङ्गल्याभिवृद्धयर्थं मया आचरितव्रतसंपूर्णसाफल्यावाप्त्यर्थं स्कन्दपुराणोक्तप्रकारेण श्रीस्वर्णगौरीप्रीत्यर्थं कल्पोक्तप्रकरेण यावच्छक्त्यावाहनादि-षोडशोपचारपूजां करिष्ये ।

End:

(ज्योतिःस्तम्भव्रतम्)

तस्मादिदं व्रतं पुण्यं पतिप्राणप्रदायकम् ।
नववर्षविधिं भक्त्या सदा कुर्यात् सुवासिनी ।।
अन्ते नव द्विजाः पूज्या वस्त्रालंकारभूषणैः ।
गोधूमं दक्षिणां पात्रं ताम्बूलसहितं शुभम् ।।
सर्वालंकारसंयुक्तं दद्याद् व्रतफलाप्तये ।
उमामहेश्वरो देवः प्रीयतां मे सनातनः ।।
इति दत्वा भक्तिपूर्वं कुर्याद् व्रतसमर्पणम् ।
एवं क्रमेण या कुर्यात् पतिभक्तिपरायणा ।।
सौभाग्यं समवाप्नोति पातिव्रत्यं सुवासिनी ।
य इदं शृणुयान्नित्यं वाच्यमानं नरोत्तमैः ।।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ।

Colophon:

इति श्रीभविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे ज्योतिस्तम्भव्रतं संपूर्णम्

2179

VB 509(b) **श्रवणद्वादशीव्रतकल्पः**

Beginning:

श्रवणद्वादशीयोगे समुपोष्य जनार्दन ।
अर्चयित्वा विधानेन भोक्ष्याम्यहं परेऽहनि ।।

इति संकल्पः । तत्क्षणान्विते पीतवस्त्रवेष्टिते तेजसा संभवन्ति . . . प्रस्थेन वास . . . . श्रीवामनं पूजयेत् । शङ्खोदकेन आत्मानं मण्डपद्रव्यादिकं सर्वं संप्रोक्ष्यास्त्रेण पीठपूजां समारभे ।

End:

प्राणप्रतिष्ठापनं कृत्वा

पीताम्बरयुगं दिव्यं गृहाण ज्ञानसंभव ।

तं यज्ञमिति पुरुषोत्तमाय वस्त्रम् ।

यज्ञोपवीतं सुचिरं सुवर्णं सुमनोहरम् ।
गृहाण देवदेवेश बलिबन्धनकारण ।।

तस्माद्यज्ञादिति . . . . . उपवीतम् ।

हारकङ्कणकेयूरमुद्रिकाकुण्डलानि च ।
. . . . . भूषणानि श्रियःपते ।।

आभरणम् ।

चन्दनागरुकस्तूरीघनसारसमन्वितम् ।
गन्धं गृहाण गोविन्द सर्वमङ्गलदायक ।।

2181

VB 1125(d) **सोमवारव्रतकथा**

Beginning:

सूतः—

नित्यानन्दमयं शान्तं निर्विकल्पमनामयम् ।
शिवतत्त्वमनाद्यन्तं ये विदुस्ते परां गताः ।।
विरक्ताः कामभोगेभ्यो ये च कुर्वन्त्यहैतुकीम् ।
भक्तिं परां शिवे धीरास्तेषां मुक्तिर्न संशयः ।।
विषयानभिसंधाय ये कुर्वन्ति शिवे रतिम् ।
विषयैर्नाभिभूयन्ते भुञ्जानास्तत्फलान्यपि ।।

End:

एषा सामवती नाम सुतामुष्य द्विजन्मनः ।
भूत्वा सुमेधसः पत्नी कामभोगेन युज्यताम् ।।

सूतः—

इत्युक्त्वान्तर्हिता देवी तेऽपि राजपुरोगमाः ।
गत्वा स्वं स्वं गृहं सर्वे चक्रुस्तच्छासने स्थितिम् ।।
सोऽपि सारस्वतो विप्रः पुत्रं सूर्यशतोपमम् ।
लेभे देव्याः प्रसादेन न चिरादेव कालतः ।।
ताश्च सामवतीं कन्यां ददौ तस्मै सुमेधसे ।
तौ दंपती चिरं कालं भुञ्जाते परमं सुखम् ।।
इत्येतच्छिवभक्तानां माहात्म्यं विस्मयावहम् ।
समासाद्वर्णयिष्यामि श्रोतृणामघनाशनम् ।।

Colophon:

इति ब्रह्मोत्तरखण्डे सोमवारव्रतमहिमानुवर्णनं नाम एकत्रिंशोऽध्यायः

सूतः—

विचित्रं विश्वनिर्माणं विचित्रं शिवचेष्टितम् ।
विचित्रं शिवमाहात्म्यं विचित्रं शिवभाषितम् ।।

2184

VB 308(b) **सोमवारव्रतोद्यापनम्**

Beginning:

यजमानः आदौ परिषदनुज्ञां कृत्वा संकल्प्य पुण्याहं वाचयित्वा आचार्यवरणम् ऋत्विग्वरणं च कृत्वा . . . मध्ये अष्टदलपद्मं विलिख्य व्रीहितण्डुलतिललाजमाषमुद्गादीन् निधाय + + उमामहेश्वरमावाहयेत् । एवं द्वादशकुम्भान् परितः स्थाप्य द्वादशनामभिः पूजयेत । कलशपूजां शङ्खपूजां च कृत्वा ।

End:

उमामहेश्वरप्रतिमादानम् ।

त्रिनेत्रः शूलपाणिश्च उमया सह शंकरः ।
वृषपृष्ठे समारुढो रुद्रो दिशतु नः शिवम् ।।

उपकरणदानमन्त्रः—

शिवाय पूजनार्थाय सर्वोपकरणं मया ।
संपूर्णं यत्तु दानार्हमतः शान्तिं प्रयच्छ मे ।।
यस्य धारणमात्रेण नरो रुद्रत्वमाप्नुयात् ।
रुद्राक्षं तव दानेन प्रीतो भव. . . . . ।।
आ जन्मात् सर्वपापानां स्मरणाद्वा महेशितुः ।
भस्मेति कीर्तितं यस्मात्. . . . . ।।

Colophon:

शैवपुराणे सोमवारव्रतोद्यापनं समाप्तम्

2188

VB 276 (a-7) **दीपपूजाविधिः**

This is on the worship of light (Dīpa) for general welfare.

Beginning:

प्राणायामः । संकल्पः । शान्तिदुर्गाप्रीत्यर्थं पीडापरिहारद्वारा वाञ्छितार्थसिद्धयर्थं दीपपूजां करिष्य इति संकल्प्य कलशपूजां कृत्वा आत्मानं गन्धपुष्पाक्षतैरलंकृत्य + + +

End:

मूलेन सहस्रं त्रिशतं वाभ्यर्च्य पुनश्च धूपदीपनैवेद्यादि कृत्वा देवीं वाचमितिमन्त्रेण मन्त्रपुष्पं दत्वा प्रदक्षिणनमस्कारस्तोत्रादिकं कृत्वा यथाशक्ति मूलमन्त्रं जपित्वा प्रसन्नार्घ्यं दत्वा समस्तापराधं क्षमस्वेति प्रार्थ्य विघ्नेश्वरमुद्वास्य देवीमप्युद्वास्य दीपज्वालां हस्तेन परिमज्य एकीकृत्य आत्मनि स्थापयेत् ।

Colophon:

इति दीपपूजाविधिः समाप्तः

2189

VB 1014(a) **देवीपूजाविधिः**

Beginning:

ब्राह्मे मुहूर्ते उत्थाय शुचिर्भुत्वा समाहितः ।
शिवेति कीर्तयन्मर्त्यः सर्वपापैः प्रमुच्यते ।।
नमः शिवायेति शिवं प्रपद्ये शिव प्रसीदेति शिवं प्रपद्ये ।
शिवात्परस्येति शिवं प्रपद्ये शिवोऽहमस्मीति शिवं प्रपद्ये ।।
कृतस्य सर्वपापस्य ज्ञानतोऽज्ञानतोऽपि वा ।
प्रायश्चित्तमिदं प्रोक्तं पाराशर्यपदस्मृतिः ।।
नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ।।
श्रीशंकराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्त्तिककारमन्यमस्मद्गुरुं संततमानतोऽस्मि ।।
पूर्णानन्दमुनिश्रेष्ठं पुरुषोत्तमयोगिनम् ।
शिवराममुनिं वन्दे **श्रीमद्गोपाल**योगिनम् ।।
तद्गुणानां च सर्वेषां राशीभूतमहोज्ज्वलम् ।
श्रीमत्स्वयंप्रकाशाख्यं परंज्योतिरुपास्महे ।।
श्रीगोपालमहं वन्दे सच्चिदानन्दरूपिणम् ।
सदानन्दमुनिं वन्दे नित्यमानन्दकारणम् ।।

ममोपात्तसमस्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं मम स्वरूपस्फूर्तिप्रबोधकद्वारा अविद्या-निवृत्त्यर्थं च प्रातः स्मरणमहं करिष्ये । इति संकल्प्य ।

प्रातः शिरसि शुक्लाब्जे त्रिनेत्रं द्विभुजं गुरुम् ।
वराभयकरं शान्तं स्मरेत् तन्नामपूर्वकम् ।।

दिव्यवस्त्रपरीधानं दिव्यगन्धानुलेपनम् ।
वामाङ्कशक्तिसहितं कृपासान्द्रं स्मिताननम् ।।
अकथादित्रिरेखात्मत्रिकोणेषु च कौलिकम् ।
हंसपात्वोदये(?)बिन्दुं ध्यायेत्तं जगतो गुरुम् ।।

End:

इति नवमावरणपूजाविधिः । मूलेन ऋषिन्यासं कृत्वा यथाशक्ति मूलेन तर्पयेत् । पुनर्धूपदीपादिकं कुर्यात् । महानिवेद्यं कृत्वा स्थलशुद्धिं कृत्वा पुनर्धूपदीपं दर्शयित्वा शक्तिं आहूयात् । नमस्कारत्रयं कृत्वा वामभागे आसने उपविश्य शङ्खतीर्थेन प्रोक्ष्य गन्धपुष्पाणि दत्वा सम्यग्ध्यात्वा गन्धपुष्पाक्षतान् हस्ते गृहीत्वा मूलमुच्चार्य ह्रीं महापद्म + एह्येहि परमेश्वरि ।। आगच्छ आगच्छ साङ्गाः सपरिवाराः सायुधाः सालंकारा अस्मिन् देहे श्रीमहात्रिपुरसुन्दरीं आवाहयामि इत्यावाहनमुद्रां तत्तन्मन्त्रेण प्रदर्श्य पुनर्गन्धपुष्पाक्षतैर्मूलेन व्यापकं कृत्वा षडङ्गमन्त्रेण सकलीकृत्य–

श्रीविद्ये परिपूर्णमेरुशिखरे बिन्दुत्रिकोणस्थिते
वागीशेशमहेशभूतशरणे मञ्चे शिवाकारके ।
कामाक्षीं करुणारसार्णवमयीं कामेश्वराङ्के स्थितां
कान्तां चिन्मयकामकोटिनिलयां श्रीसिद्धविद्यां भजे ।।

इति ध्यात्वा पञ्चमुद्रां प्रदर्श्य धूपदीपैरुपचर्य मानसपूजां कृत्वा—

अलिपात्रमिदं तुभ्यं दीयते पिशितान्वितम् ।
स्वीकृत्य सुभगे देवि श्रियं देहि रिपून् दह ।।

इति पात्रं दद्यात् । श्रीगुरवे नमः । परमगुरवे नमः । परमेष्ठिगुरवे नमः । समस्तापराधं क्षमस्वाखिलेश ।

2191

VB 1024(a) नृसिंहाराधनरत्नमाला

This is a work dealing with the detailed worship of Nṛsiṃha and seems to be rare. No other notice of the work is known.

Beginning:

श्रीनृसिंहं चिदानन्दविग्रहं करुणानिधिम् ।
प्रणम्य पद्धतिं कुर्वे शंकरोक्त्यनुसारतः ।।
श्रीतापनीयश्रुतिसारसूत्रात् सत्संप्रदायामलग्रन्थशोभा ।
नित्यं नृसिंहाख्या(?)करोतु सैषा संतोषमाराधनरत्नमाला ।।

उपासनाशेषमतानुसारिणी सच्छ्रौतमार्गेण सदा विधेया ।
साङ्गा समुद्रा सुविधानयुक्ता नृसिंहसेवानिरतैर्विचक्षणैः ।।

End:

इत्थं ध्यात्वा नरहरिं कुरु कर्माणि साधयेत् ।
मुक्तौ स्वर्णनिभो देवो गौरः शान्तौ च प . . ।।
जपाकुसुमसंकाशो वश्याकर्षणकर्मणि ।
मन्त्रस्यास्य ग्रहादेव दग्धकिल्बिषसंचयः ।।
भुक्त्वा भोगाननन्तांश्च प्रेत्य जन्मान्त . . . ।।

Colophon:

इति नृसिंहैकाक्षरविधानम् ।

2193

VB 393 पूजापद्धतिः

Beginning:

भगवन् मर्त्यलोकेऽमुकस्य रुद्रप्राप्तिर्नित्या . . . . . वरुण इह गच्छ इह तिष्ठ इह सन्निक . . . . . द्धो भव । अत्रा . . . . . ष्टानां . . . . . तां पूजां गृहाण, ओं वरुणस्यो . . . . . न्त्रस्य वह्निः ऋषिः, देवीगायत्री छन्दः । वरुण . . . . . विनियोगः । ओं वरुणस्यो (स्य)स्कंभन इति मन्त्रेण पञ्चोपचरैर्वा दशोपचारैः पूजयेत् । शुक्लचन्दनं शु . . . . . स्वाञ्जलिं गृहीत्वा . . . . .

ओं वरुण त्वं . . . . . जलानामधिकारिणि ।
पूजयिष्याम्यहं भक्त्या सर्वकामार्थसिद्धये ।।

Fol. 55:

कालाभ्राभां कटाक्षैररिकुलभयदां मौलिमध्येन्दुरेखां
शङ्खं चक्रं . . तां त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा स्फारयन्तीं
ध्याये दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धकामैः ।।

जयदुर्गायै नमः । अत्र पूजितदेवेभ्यो . . . .

इति वराहयज्ञेन कलशपूजा समाप्ता ।

End:

ग्रहास्त्वामभिषिञ्चन्ति राहुकेतुसमन्विताः ।
देवदानवगन्धर्वा यक्षराक्षस . . . . . ।।
ऋषयो मुनयो गावो वेदसा . . . . . रः ।
. . . . पत्यधिपो नागा दैत्याश्चाप्सरोगणाः ।।
. . . णि सर्वशास्त्राणि राजानो . . . . . ।
. . धानि च रत्नानि . . श्च . . यवश्च ते ।।
. . . शिलानां मे तेषां द . . . . वः ।
. . . . . .

गोपूजा—

ओं गोस . . . सर्वब्रह्मणे नमः ।

2194

VB 1158(i) **पूजापद्धतिः**

Beginning:

चक्रतेजांसि तेजांसि तमांसि च तमांस्यलम् ।
तेजांसि च तमांस्येतद् वन्दे ज्योतिरनुत्तरम् ।।
सदाभिनवगुप्तं यत् पुराणं च प्रसिद्धिमत् ।
हृदयं तत्परोल्लासैः स्वयं स्फूर्जत्यनुत्तरम् ।।

End:

ततः पश्चात् . . . .मतश्च भुवनेश्वरी ।
अन्नपूर्णा कामकला पश्चादाम्नायपादुका ।।
तुरीयाम्बा महादेवी अश्वारूढा ततः परम् ।
श्यामा वाग्वादिनी या स्यादुत्तराम्नायपादुका ।।
परापरा च सा देवी परा शांभवमेव च ।
ततः परतरो मन्त्र ऊर्ध्वाम्नायस्य पादुका ।।

2198

VB 1025(a-19) **राममानसपूजाविधिः**

Beginning:

मानसिकपूजाविधानम

सुतीक्ष्ण उवाच—

हृदये मानसी पूजा कीदृशी वा वद प्रभो ।
उपचारैः कतिविधैः पूज्यते रघुनन्दनः ।।

अगस्त्य उवाच—

पद्मपत्रविशालाक्षः कालाम्बुदसमप्रभः ।
स्मितवक्त्रःसुखासीनश्चिन्तितः पूज्यतां त्वया ।।
रागादिकलुषं चित्तं वैराग्येण सुनिर्मलम् ।
कृत्वा ध्यायेत् सदा रामं भवबन्धविमुक्तये ।।
प्रातः शुद्धतनुर्भूत्वा शौचादिभिरतन्द्रितः ।
विविक्तदेशमाश्रित्य ध्यानपूजां समारभेत् ।।

End:

स्वर्णपुष्पं रघुश्रेष्ठ दास्यामि स्वीकुरु प्रभो ।।
हृत्पद्मकर्णिकामध्ये सीतया सह राघव ।
निवस त्वं सुरश्रेष्ठ सर्वैरावरणैः सह ।।
मनोवाक्कायजनितं कर्म यद्वा शुभाशुभम् ।
तत्सर्वं प्रीतये भूयान्नमो रामाय वेधसे ।।
एवं यः कुरुते पूजां बहिर्वा हृदयेऽथवा ।
सकृत्पूजनमात्रेण रामो यः स भवेन्नरः ।।
किं पुनः सततं कुर्याद् ब्रह्मण्येव स्थितो हि सः ।
सर्वान् कामानवाप्नोति इह लोके परत्र च ।।

Colophon:

इत्यगस्त्यसंहितायां परमरहस्ये श्रीराममानसपूजाविधानं नाम पञ्चत्रिंशोऽध्यायः

2200

VB 332(d) लक्ष्मीनृसिंहपूजाविधिः

Beginning:

श्रीमहागणपतये नमः । देवतार्चनविधिः ।

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टारवं तत्र देवताह्वानकारणम् ।।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ।।

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
. . . . . यान्ति तस्मै श्रीगुरवे नमः ।।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।।

ॐ गं गुरुभ्यो नमः । . . परमगुरुभ्यो नमः । . . परमेष्ठिगुरुभ्यो नमः ।

End:

नैवेद्यम् । नाभ्या आसीदिति ताम्बूलम् । . . . .
तदुपरि नमोऽस्तु ते देववर प्रसीद ।

2201

VB 919(c) **विघ्नेश्वरकल्पः**

Beginning:

वागीशाद्याः सुमनसः + गजाननम् ।।
विनायकाय राजाय गणनाथाय वेधसे ।
मन्त्रेणानेन विघ्नेशं प्रणम्य प्रयतो व्रती ।।

संकल्पं कृत्वा । आवाहनम् ।

End:

गणेशः प्रतिगृह्णातु गणेशो वै ददाति च ।
गणेशस्तारको द्वाभ्यां गणेशाय नमो नमः ।।

Scribe adds:

. . . .कंसवधार्थाय भूभारोद्धारणाय च ।
पाण्डवानां हितार्थाय दैत्यानां निधनाय च ।।

कृष्णाय नमः ।

कौरवाणां विनाशाय धर्मसंस्थापनाय च ।
गृहाणार्घ्यं मया दत्तं देवक्या सहित प्रभो ।।

कृष्णाय नमः

क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ।
पीयूषधामन् रोहिण्या सहितोऽर्घ्यं गृहाण भोः ।।
ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषांपते ।
नमस्ते रोहिणीकान्त स्वधाधामन्नमोऽस्तु ते ।।

सोमाय नमः

दक्षस्य दुहिता साध्वी रोहिणी नाम नामतः ।
सोमेन सह देवि त्वं गृहाणार्घ्यं नमोऽस्तु ते ।।

रोहिण्यै नमः

त्राहि मां देवदेवेश हरे संसारसागरात् ।
जयन्त्यामुपवासेन प्रसीद पुरुषोत्तम ।।

2205

VB 276(a-2) **शिवपूजामहिमा**

Beginning:

ब्रह्मणः सृष्टिकर्तृत्वं विष्णोर्दानवमर्दनम् ।
स्वर्गाधिपत्यमिन्द्रस्य शिवपूजाविधेः फलम् ।।
महत्वं वामदेवस्य वाग्विभूतिर्बृहस्पतेः ।
ब्रह्मतेजो वसिष्ठस्य शिवपूजाविधेः फलम् ।।
अगस्त्येनार्णवः पीतस्तारितश्च हनूमता ।
राघवेणोदधिर्बद्धः शिवपूजाविधेः फलम् ।।

End:

सौभाग्यं कान्तिमद्रूपं सत्यं त्यागः प्रव . . . . ता ।
शौर्यं च जगति ख्यातिः शिवपूजाविधेः फलम् ।।
योगिनां योगसंसिद्धिस्तपःसिद्धिस्तपस्विनाम् ।
भूपानां राज्यसिद्धिश्च शिवपूजाविधेः फलम् ।।
मनुमान्धातृभरतभगीरथनलादिकान् ।
राज्यैश्वर्यादिसंसिद्धिः शिवपूजाविधेः फलम् ।।
स्त्रीणां नृणां किरातानां दैत्यानां सकलात्मनाम् ।
राज्यैश्वर्यादिसंसिद्धिः शिवपूजाविधेः फलम् ।।

2212

VB 645(g) **सालग्रामलक्षणम्**

Beginning:

श्रीनृसिंहीये प्रयोगपारिजाते आह्निकप्रकरणे दृष्टं सालग्रामलक्षणं लिख्यते—

पूजार्थमुत्तमं स्थानं सालग्रामं तथोच्यते ।
प्रतिमादौ षड. . . . . पूजिते यत्फलं लभेत् ।।
सालग्रामेऽर्चिते देवेऽप्येका प्रीत्यापि तल्लभेत् ।
नृसिंहपूजने श्रेष्ठा सालग्रामोद्भवा शिला ।।
द्वारकीजातचक्राङ्का शिला श्रेष्ठा तथैव च ।
तयोश्च संगमं कृत्वा पूजयन्मुक्तिभाग् भवेत् ।।

End:

षट्स्वेतेषु हरिं सम्यगर्चयेच्चिन्तयेत् तथा ।
कर्मिणाग्नौ जले सर्वैर्योगिभिर्हृदये हरिः ।।
सूर्ये मनीषिभिः पूज्यः स्थण्डिले भावितात्मभिः ।
प्रतिमास्वल्पबुद्धिः स्यात् स्थानेष्वेतेषु पूजयेत् ।।
हविषाग्नौ जले पुष्पैर्ध्यानेन हृदयेऽर्चयेत् ।
जपेन सूर्यबिम्बे स्यात् स्थण्डिले भावितात्मकैः ।।
बाह्यैर्द्रव्यगणैरेव प्रतिमां पूजयेत् सदा ।
एवं. . . . . मितस्थानात्सर्वेषां सर्वसाधनैः ।।
पूजार्थमुत्तमस्थानं यदि वा . . . . . र्चयेत् ।।

2213

VB 358(b) सिद्धिविनायकपूजाविधिः

Beginning:

शुक्लाम्बरधरं+शान्तये । अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः । +भूतोच्चाटनं कुर्यात् । अपक्रामन्तु भूताद्याः सर्वे ते भूमिभारकाः+घण्टानादं कुर्यात् ।

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टारवं तत्र देवताह्वानकारणम् ।।

End:

विनायक नमस्तुभ्यं सर्वदा मोदकप्रिय ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।
गणेशः प्रतिगृह्णातु गणेशो वै ददाति च ।
गणेशस्तारकोभाभ्यां गणेशाय नमो नमः ।।

उपायनदानं करोमि ।

Colophon:

इति पूजाविधानं समाप्तम्

2214

VB 991(b) **सिद्धिविनायकपूजाविधिः**

Beginning:

उत्तमं गणनाथस्य व्रतं संपत्करं शुभम् ।
भक्तवाञ्छितदातारं सूर्यकोटिसमप्रभम् ।।
एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम् ।।

सिद्धिविनायकाय नमः । ध्यानं समर्पयामि ।

End:

यात्रादौ देवकार्येषु युद्धसंनह्नेषु च ।
पूजनीयः प्रयत्नेन अर्थसिद्धिर्भवेद् ध्रुवम् ।।
वाणिज्यं कर्तुकामेन वैश्येनाराधितः पुरा ।
पूजनीयः प्रयत्नेन अर्थसिद्धिर्भवेद् ध्रुवम् ।।
कृषिप्रारम्भसमये कर्षकेण विनायकः ।
चण्डिकाद्या मातृगणाः परितुष्टा भवन्ति च ।।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सिध्यन्ति सर्वकार्याणि सिद्धिस्तस्य प्रसादतः ।।

Colophon:

इति स्कान्दपुराणे सिद्धिविनायकव्रतकल्पः संपूर्णः

2225

VB 995(m) **गायत्रीकल्पः (वसिष्ठसंहिता)**

Beginning:

विश्वामित्र ऋषिश्रेष्ठ ज्वलन्तमिव पावकम् ।
\+ \+ \+
. . . . . .तपोनिधिः ।।
भगवन् कीदृशं रूपं . . . . . .
इति पृष्टः प्रसन्नात्मा तमाह मुनिपुङ्गवम् ।

. . . . . .
. . . . . ज्ञेया गायत्री त्रिपदान्विता ।।

Fol. 15b:

इत्यगस्त्यगायत्रीकल्पः समाप्तः ।।

End:

तस्य निष्फलितं कर्म . . मन्त्रफलं नहि ।
तस्मात् सर्वप्रयत्नेन एतद्यन्त्रं प्रपूजयेत् ।।
धर्मार्थिकाममोक्षार्थी सत्यमेतन्महामुने ।

Colophon:

इति वसिष्ठसंहितायां ब्रह्मविद्योपदेशे वसिष्ठपराशरसंवादे पञ्चचत्वारिंशोऽध्यायः

2227

VB 1018(a) **गायत्रीमन्त्रकल्पः**

Contents:

१. अजपामन्त्रः २. गायत्रीसहस्रनामस्तोत्रम्

Colophon:

विश्वामित्रसंहितायां उमामहेश्वरसंवादे गायत्रीसहस्रनामस्तोत्रं संपूर्णम् ।।

Scribe adds:

उदयमूर्तिशर्मणा लिखितम् ।।

३. प्रणवन्यासः ४. गायत्रीचक्रस्तवः

Colophon:

इति श्रीविष्णुयामलपुराणे शतसहस्रिकायां शतसहस्रकोटिविस्तारे उमामहेश्वरसंवादे गायत्रीमहाचक्रप्रस्तारस्तोत्रं नाम चतुर्विंशोऽध्यायः ।।

५. गायत्रीस्तवराजः ६. अङ्गमन्त्रः ७. गायत्रीपञ्जरम्

Colophon:

इति वसिष्ठसंहितायां सावित्रीपञ्जरं नाम एकसप्ततितमोऽध्यायः

८. मातृकान्यासः

शुद्धमातृकान्यासः । मातृकासरस्वतीमन्त्रः । प्रणवभुवनेश्वरीमातृकामन्त्रः । प्रणवमातृकामहालक्ष्मीमन्त्रः । प्रणवमातृकासकलजननीमन्त्रः । प्रणवमातृकासरस्वतीमन्त्रः । प्रणवमातृकाकलान्यासमन्त्रः । केशवादिमातृकासरस्वतीमन्त्रः । ककुभादिमातृकामहामन्त्रः ।।

९. गायत्रीजपविधिः १०. गायत्रीप्राणप्रतिष्ठा ११. गायत्रीहृदयम् १२. गायत्रीकवचः १३. गायत्रीमालामन्त्रः १४. संध्यागायत्रीस्तवः १५. गायत्र्यष्टोत्तरम्

Colophon:

विश्वामित्रकल्पे विश्वामित्रराघवसंवादे गायत्र्यष्टोत्तरशतं संपूर्णम्

१६. गायत्रीस्नानम् १७. गायत्र्यर्घ्यम् १८. गायत्रीमन्त्रसंस्काराः

2228

VB 1020 **गायत्रीमन्त्रकल्पः**

Contents:

१. गायत्रीध्यानम् २. गायत्रीपञ्जरम्

Colophon:

इति वसिष्ठसंहितायां सावित्रीपञ्जरं नाम सप्तमोऽध्यायः ।।

३. गायत्रीदिव्यनामाष्टोत्तरशतम् ४. महाचम्पकन्यासः ५. गायत्र्यष्टसहस्रकम् ६. गायत्रीचक्रम्

Beginning:

तत्कारं चम्पकापीतं ब्रह्मविष्णुशिवात्मकम् ।
शान्तं पद्मासनारूढं ध्यात्वा दहति पावकम् ।।
सकारं चिन्तयेद्धीमानतसीपुष्पसंनिभम् ।
पद्ममध्ये स्थितं सौम्यमुपपातकनाशनम् ।।
विकारं पिङ्गलं चिन्त्यं कमलासनसंस्थितम् ।
ध्यायेत् सदा द्विजश्रेष्ठो महापातकनाशनम् ।।
तुकारं चिन्तयेत् प्राज्ञ इन्द्रनीलमणिप्रभम् ।
निर्दहेत् सर्वदुःखानि ग्रहताराद्युपद्रवान् ।।

End:

. . . . अनामिकाङ्गुष्ठाभ्यं चक्षुषी संस्पृशति । तर्जन्यङ्गुष्ठाभ्यां घ्राणं संस्पृशति . . . . . ष्ठकाभ्यां श्रोत्रौ संस्पृशति मध्यमाङ्गुष्ठाभ्यां दोर्मूलं संस्पृशति । अङ्गुष्ठेन नाभि

संस्पृशति । . . . चतुरङ्गुलिभिः हृदयं संस्पृशति । पञ्चाङ्गुलिभिर्मूर्धानं संस्पृशति । केशवादिद्वादशनामभिः क्रमशः . . . .

Colophon:

इति विष्णुयामले उमामहेश्वरसंवादे . . . . गायत्रीमहाचक्रप्रस्तारे संपूर्णचक्रोद्धारणं नाम अष्टमोऽध्यायः ।

गायत्रीस्तोत्रम्—विश्वामित्रकृतम्

2231

VB 323(d) **तृचकल्पः**

Beginning:

उद्यन्नद्यमित्रमहः	मित्राय नमः ।	हरिमाणं च नाशय	भानवे नमः ।
आरोहन्नुत्तरां दिवं	रवये नमः ।	शुकेषु मे हरिमाणं	खगाय नमः ।
हृद्रोगं मम सूर्य	सूर्याय नमः ।		

रोपणाकासु दध्मसि, पूष्णे नमः । अथो हारिद्रवेषु मे, हिरण्यगर्भाय नमः । हरिमाणं निदध्मसि, मरीचये नमः । उदगादयमादित्यः, आदित्याय नमः ।

End:

उद्यन्नद्यमित्रमहः आरोहन्नुत्तरां दिवं हृद्रोगं मम सूर्य हरिमाणं च नाशय । शुकेषु मे हरिमाणं रोपणाकासु दध्मसि अथो हारिद्रवेषु मे हरिमाणं निदध्मसि उदगादयमादित्यो विश्वेन सहसा सहा द्विषन्तं मह्यं रन्धयन्मो अहं द्विषतो रथम् । मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्य-सवित्रर्कभास्करेभ्यो नमः ।

भानो दिवाकर । हरिः ओम् ।।

2235

VB 345(a) **दक्षिणामूर्तिमन्त्रकल्पः**

Contents:

कवचम्, मन्त्रः, न्यासः, मन्त्रवर्णमालिका, हृदयम्, स्तवराजः, सहस्रनामस्तोत्रम् (inc.).

Beginning:

पराशक्त्युवाच—

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
यन्न कस्यापि संप्रोक्तं गोपितं वर्णरूपकम् ।।

शिव उवाच—

शृणु देवि रहस्यं च गोप्यं गोप्यं महत्तरम् ।
गोपितं सर्वतन्त्रेषु सारः सारतरं परम् ।।
कथ्यते देवदेवेशि सावधानमना शृणु ।
त्रैलोक्यजयदं नाम कवचं मन्त्रविग्रहम् ।।
सर्वमन्त्रमयं शैवं शैवषट्कसमन्वितम् ।
कवचं शुभदं देवि दक्षिणामूर्तिशर्मणः ।।

End:

कार्यसिद्धिं मन्त्रसिद्धिं शास्त्रसिद्धिं च विन्दति ।
शिवपूजारतो नित्यं भस्मरुद्राक्षभूषणः ।।
नियमेन जपेद्यस्तु मन्त्रसिद्धिमवाप्नुयात् ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।।
स्वयोनिमिव गोप्तव्यं न देयं यस्य कस्यचित् ।

इति श्रीदक्षिणामूर्तिकवचं समाप्तम् ।।

Beginning:

(Fol. 1a):

देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ।।

अस्य श्रीदक्षिणामूर्तिमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीदक्षिणामूर्तिर्देवता ।

End:

इति ध्यात्वा मानसैः संपूज्य जप्त्वा पुनः षडङ्गन्यासं विधाय ध्यात्वोपचारैः समर्पयेति ।।

कवचम्—

Beginning:

देवदेव जगन्नाथ विश्वमूर्ते परात्पर ।
कवचं दक्षिणामूर्तेः कृपया वद मे प्रभो ।।

ईश्वर उवाच—

वक्ष्यामि दक्षिणामूर्तेः कवचं परमेश्वरि ।
सर्वबाधाप्रशमनं वेदान्तज्ञानगोचरम् ।।

Colophon:

इति श्रीमार्कण्डेयविरचिते काण्डशतके षड्विंशतितमे काण्डे दक्षिणामूर्तिमाहात्म्ये दक्षिणामूर्तिकवचं नाम नवमः परिच्छेदः

मन्त्रवर्णमालिका—

Beginning: (fol. 1b):

देवर्षिब्रह्मर्षय ऊचुः—

देवदेव महेशान सर्वज्ञ करुणानिधे ।
वीणापुस्तकाक्षमालां चन्द्रं विज्ञानमुद्रिताम् ।।
चतुर्भुजैर्दधानेश प्रसीद करुणानिधे ।
अज्ञानं मामकं क्रूरं मूर्तीकृत्य कृतार्थय ।।
त्वं देवताकमन्त्रस्य ज्ञानविज्ञानसंपदाम् ।
\+ \+ \+

दक्षिणामूर्तिरुवाच—

प्रथमं कवचं दिव्यं पञ्जरं तदनन्तरम् ।
वर्णमालापुरश्चर्यां मालामन्त्रमनुस्मृतिम् ।।
नाम्नां सहस्रं दिव्यानां शतमष्टोत्तरं तथा ।
दक्षिणामूर्तिगायत्री यन्त्रत्रयनियन्त्रणम् ।।
\+ \+ \+
अथातः संप्रवक्ष्यामि मन्त्रवर्णान् विशिष्य ते ।

Colophon (fol. 3a):

इति प्रपञ्चसारे महामन्त्रे दक्षिणामूर्तिमन्त्रकल्पे श्रीदक्षिणामूर्तिमन्त्रवर्णमालिका समाप्ता हृदयम्—

Beginning (fol. 3b):

ओं नमो भगवते दक्षिणामूर्तये वीरासनस्थिताय + + + सर्वग्रहान् दह दह त्रासय त्रासय हुं फट् स्वाहा । शिवाय नमः ।

नारदमुनिर्ब्रह्माणं प्रत्याह—

मत्तात लोकेश नमस्करोमि धातारं त्वां शिरसा मनसा. . . ।
दक्षिणामूर्तिहृदयं श्रोतुमिच्छामि त्वन्मुखाम्बुजात् कृपया वद ब्रह्मन् ।।

Colophon:

इत्यथर्वरहस्ये दक्षिणामूर्तिहृदयं समाप्तम् ।।

स्तवराजः—

Beginning:

नारायणेन्द्रपादाब्जं विद्येन्द्रचरणाम्बुजम् ।
नृसिंहेन्द्रपदाम्भोजं कैवल्येन्द्रपदाम्बुजम् ।।
यो विभावयते नित्यं कुल . . . . .नरः ।
शाश्वतेन्द्रो महाभागो दक्षिणामूर्तिदैवतम् ।।
देवर्षयो देवपूज्यदिव्यतेजोबलान्विताः ।
ब्रह्मर्षयो ब्रह्मपूज्याः शौर्यौदार्यपराक्रमाः ।।
कदाचित् ते तु गहनं विपिनं दिव्यपादपम् ।

Colophon:

इति श्रीदक्षिणामूर्तिकल्पे प्रपञ्चसारे दक्षिणामूर्तिस्तवराजः संपूर्णः

सहस्रनामस्तोत्रम्—

Beginning:

अस्य श्रीदक्षिणामूर्तिसहस्रनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीमेधा-दक्षिणामूर्तिर्देवता ।

End:

कलङ्कहीनः कङ्कालः क्रूरः कुक्कुटवाहनः ।
कामिनीवल्लभः कामी कामितार्थः कलाधरः ।। ७८ ।।
कलानिधिः कीर्तिनाथः कामेशीहृदयंगमः ।

2237

VB 1016(d) देवीमन्त्रयन्त्रविधिः

Contents:

वागीश्वरीमन्त्रः, वागीश्वरीमन्त्रान्तरम्, सरस्वतीमन्त्रः, सरस्वतीमन्त्रान्तरम्, यश्छन्द-सायन्त्रम्, श्रीचक्रलेखनविधिः

There is a detailed explanation of the topics in Malayalam.

Beginning:

वागीश्वरीमन्त्रान्तरविधिः ऐं ह्रां ऐं ह्रीं इत्याद्यङ्गम् । ब्रह्मा ऋषिः, त्रिष्टुप् छन्दः वागीश्वरी देवता ओं ह्रीं ऐं सरस्वत्यै नमः । ह्रीं ओं हंसारूढा

हंसारूढा हरहसितहारेन्दुकुन्दावदाता
वाणी मन्दस्मितयुतमुखी मौलिबद्धेन्दुरेखा ।
वीर्यं वामृतधटाक्षस्रगादीप्तहस्ता . . .
. . . स्थभवदभिमतप्राप्तये भारती स्यात् ।।

End:

तत्रैतच्चक्रं शिवशक्त्यात्मकम् । तदुक्तमर्णवे—

चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ।
नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ।।

इति । तत्र शक्तिचक्रमुखं यस्यां दिशि वर्तते तद्दिङ्मुखस्थो पूजां कुर्यात् । शक्तिचक्र-प्राधान्यात् ।

Colophon:

इति श्रीचक्रलेखनविधिः समाप्तः

2238

VB 333(j) **द्वयमन्त्रः**

Beginning:

अस्य श्रीद्वयमहामन्त्रस्य श्वेतद्वीपवासी नारायण ऋषिः । गायत्री छन्दः । लक्ष्मीनारायणो देवता । ओं बीजम् । नमः शक्तिः । नारायणायेति कीलकम् । लक्ष्मीनारायणप्रीत्यर्थं जपे विनियोगः ।

End:

ध्यानम्—

क्षीराम्भोनिधिमध्यमण्डपमहासौवर्णसिंहासने
वामाङ्के स्थितया प्रसन्नवपुषा . . . .

2240

VB 1025(a-30) **धनदामन्त्रकल्पः (रुद्रयामले)**

Beginning:

धनदाकवचम्—

कथयस्व महादेवि धनदाकवचं शुभम् ।
यद्यत्त्वां यदि दुर्गेऽपि कुबेर इति भैरव ।।

कथयस्व महादेवि धनदाकवचं प्रिये ।
दारिद्र्यखण्डितं नाम सर्वसौभाग्यदायकम् ।।
कुबेर ऋषिरित्युक्तं पङ्क्तिच्छन्दमुदीरितम् ।
देवता धनदा यच्च दं बीजं शक्तिः श्रीस्तथा ।।
विनियोगश्च धनदा दामिति न्यासमुच्यते ।
एकत्र येन दिग्बन्धो ध्यानं वक्ष्यामि तच्छृणु ।।

End:

सर्वाभीष्टं ददाम्याशु इह लोके सुखी भवेत् ।
अन्ते पदमहर्ज्योतिर्नात्र कार्या विचारणा ।।
इदं रहस्यं परमं न देयं यस्य कस्यचित् ।
तव प्रीत्या महादेव धनदायन्त्रमीरितम् ।।

Colophon:

इति श्रीरुद्रयामले उमामहेश्वरसंवादे धनदायन्त्रमन्त्रकवचं नाम चतुर्नवतितमः पटलः

2242

VB 456(c) **नृसिंहमन्त्रराजानुष्ठानक्रमः**

Beginning:

अथ मन्त्रराजानुष्ठानक्रमः कथ्यते । स्नानादिनित्यक्रियाः समाप्य विविक्तदेशे सुखासने सम्यगुपविश्य गुरुपरंपरा . . . . . .ण्डलेन भूमिं धृत्वा योऽनन्तौ निश्चलेन तिष्ठति सोऽहमस्मीति ध्यात्वा भूतशुद्धिप्राणप्रतिष्ठामातृकान्यासादियोगपीठान्तं कृत्वा + +

End:

वाराहीमभयं चैव गरुडं गरुडवाहिनी ।
नाराचाख्या भूतहरा संसराख्यावसानिका ।।
वरदा दक्षिणा चैव पादादौ धेनुमुद्रिका ।
एता मुद्राः प्रदर्श्यान्ते नृसिंहो भवति स्वयम् ।।

2243

VB 311(a) **प्रपञ्चसारसंग्रहः**

Beginning:

नत्वा श्रीशंकराचार्यममरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसंग्रहमुत्तमम् ।।

तत्र प्रपञ्चसारे यद्यत् शंकराचार्यैरुक्तं मन्त्रयन्त्रप्रयोगादि तत्सर्वमपि सारभूतमेव । तथापीदानीं मन्दप्रज्ञानां विस्तरशो ज्ञातुं चाशक्यत्वाद् अत्यन्तोपकारभूतत्वेन यत्सारतरं तदल्पग्रन्थेनैव यथा मन्त्रयन्त्रतन्त्रग्रहणं स्यात् तथा सर्वतः सारं गृहीत्वा मया सत्संप्रदायसर्वत्राभिधव्याख्यानोक्तमार्गेण वक्ष्यते ।

End:

तदुक्तं च क्रम(दीपिका)याम्—

प्रणवहृदोरवसाने सचतुर्थी सुदर्शनं चास्त्रम् ।
उक्त्वा फडन्तममुना कलयेन्मनुनास्त्रमुद्रया दश हरितः ।।

इति । एवं वा कृत्वा पुनर्भूतशुद्धिं कुर्यात् । तत्प्रकारस्तु . . .

Fol. 13:

शेषपर्यङ्कशायी नारायण ऋषिः जगती छन्दः शेषपर्यङ्कशायिनी नारायणी देवता ।

2244

VB 1022(b) **प्रपञ्चसारसंग्रहः**

Contents:

अथ नृसिंहमन्त्रः, नृसिंहसंध्यावन्दनम्, श्रीनृसिंहभस्मस्नानविधिः, नृसिंहपूजाविधिः, लक्ष्मीनृसिंहमन्त्राः, विश्वरूपमन्त्रः ।

Beginning:

अथ नृसिंहानुष्टुभो विधानमुच्यते । ब्रह्मा प्रजापतिर्नारदो वा ऋषिः । अनुष्टुप् छन्दः । श्रीनृसिंहो महाविष्णुर्देवता । रां बीजम् । . . . शक्तिः । . . . . कीलकम्। । अथ नृसिंहबीजविधानं कलान्तरोक्तप्रकारेण विलिख्यते । अथ नृसिंहसांनिध्यका दशविधन्यासाः + +

Colophon:

. . . . सारसंग्रहे गीर्वाणेन्द्रविरचित . . . . ति . . . . पटलः

End:

. . . . . विश्वरूपं नमामि ।।

इति विश्वरूपस्य मन्त्राः ।

2245

VB 995 **मन्त्रकल्पः**

Contents:

संध्यावन्दनम्, गायत्रीप्रणवः, भूतशुद्धिः, आसनम्, अन्तर्मातृका, अजपागायत्री, बहिर्मातृका, दशविधमातृकासरस्वतीन्यासः, शुद्धमातृका, सबिन्दुमातृका, केशवादिमातृका, प्रणवकलामातृका, श्रीकण्ठादिमातृका, शक्तिमातृका, बीजयुतमातृका, कामबीजयुतमातृका, शाक्तिश्रीकामबीजयुतमातृका, प्रपञ्चयागमातृका, जातवेदसमन्त्रः, गायत्रीकवचम्, प्राणाग्निहोत्रम्, शकलहोमम्, वैश्वदेवम्, त्रिपुण्ड्रधारणविधिः

Beginning:

वस्त्रधारणात्परं प्रणवाचमनं कृत्वा प्रातःसंध्यामुपासीत वस्त्रनिष्पीडनात् परम् । मध्याह्ने विपरीतं च सायंसंध्या तथैव च । आदित्यादिनवग्रहतर्पणम् । ब्रह्मार्पणमस्तु ।

सायंसंध्या वसिष्ठ ऋषिः जगती छन्दः विष्णुर्देवता । सुवः पुरुषं तर्पयामि । सामवेदं तर्पयामि । मण्डलं तर्पयामि । सवितारं तर्पयामि । विष्णुरूपिणं तर्पयामि । परमात्मानं तर्पयामि । + + +

End: (fol. 140)

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवानां त्र्यायुषं तन्मेऽस्तु त्र्यायुषम् ।।

इति शिरसि । त्र्यम्बकमिति ललाटे । हव्यवाहमभिमातिषाहं रक्षोहणं पृतनासु जिष्णुम् । ज्योतिष्ठं . . . पुरन्धिम् । अग्निं स्विष्टकृतममहवेम स्विष्टमग्ने अभितत् प्रणाहि । विश्वेदेवापृतना अभिष्य । इन्द्रं नः पन्था प्रतिशन्विभाहि । ज्योतिष्मध्ये ह्यजरन्न आयुरिति उरसि । स्कन्दाय नमः नाभौ । पूष्णे नमः कण्ठे । रुद्रायनमः, आदित्याय नमः चन्द्राय नमः इति दक्षिणहस्ते । वामदेवाय नमः प्रभञ्जनाय नमः वासुदे . . . .

2246

VB 996(d) **मन्त्रकल्पः**

Contents:

आसनमन्त्रः महागणपतिमन्त्रः बालामन्त्रः भैरवीमन्त्रः वीरभद्रमन्त्रः

There are also explanations in Tamil of the above topics. Three leaves at the end contain certain astrological notes in Tamil.

Beginning:

वन्दे गुरुपदद्वन्दमवाङ्मनसगोचरम् ।
रक्तशुक्लप्रभामिश्रं . . . त्रैपुर. महाः ।।

ओं अस्य श्री आसनमन्त्रस्य पृथिव्या मेरुपृष्ठ ऋषि . . . सुतलं छन्दः कूर्मरूपिनारायणो देवता अं बीजं ह्रीं शक्तिः क्रों कीलकं आसने विनियोगः । आं अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । क्रों मध्यमाभ्यां नमः । दिग्बन्धः । ध्यानम्

पृथिवि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु आसनम् ।।

End:

परमन्त्रपरयन्त्रपरतन्त्रानुच्छेदयोच्छेदय स्वविद्यामन्त्रयन्त्रान् प्रकटय प्रकटय सर्वं संहर संहर सर्वरोगहराय श्रीवीरभद्राय ओं ह्रां ह्रीं ह्रूं ह्रें ह्रैं ह्रों ह्रौं ह्रः अघोरास्त्राय हुं फट् स्वाहा । स्त्रं ध्रं विद्वेष हन हन वीरभद्राय फट् ह्रीं दक्षध्वंसनाशनाय द्रां ह्रां अघोरास्त्राय नमः ।। ओम्

2247

VB 1001(b) **मन्त्रकल्पः**

Contents:

धूमावतीमन्त्रः प्रत्यङ्गिरामन्त्रः मदनावतीमन्त्रः ज्येष्ठादेवीमन्त्रः

Beginning:

धूं धमावती स्वाहा ।
प्रथमं धूं समुच्चार्य धूमावतीं ततोच्चरेत् ।
वह्निजायां समुच्चार्य सप्ताक्षरमनुत्तरम् ।।
जपेत् सप्तसहस्रं च कार्यसिद्धिर्भविष्यति ।
कवचं शरभेशस्य स्वदेहे स्वस्य तत्त्वतः ।।
पश्चाज्ज्येष्ठां जपेद्दीर्घमतिक्रूरां दृढव्रतः ।
धूमावत्यस्त्रमन्त्रं तु यो जपेत् कवचं विना ।।
स्वयं . . तिका ज्येष्ठा तस्य भाग्यक्षयंकरी ।

End:

ध्यानम्

ध्यायेत् कालाभ्रलीलां विकसितवदनां काकनासाविकीर्णां
. . जंन्युल्कशूल्पोद्यतमुसलकरां वक्रदन्तां दशास्याम् ।

ज्येष्ठां निर्वाणवेषां भ्रुकुटिलनयनां मुक्तकेशावलोलां
वन्दे तुङ्गार्तितुर्यां स्तनभरयुगलां निष्कलां शत्रुहन्त्रीम् ।।

2249

VB 311(b) **मन्त्रसमुच्चयः**

Beginning:

नत्वा श्रीशंकराचार्यममरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसंग्रहमुत्तमम् ।।

श्रीदेव्युवाच—

देवदेव महादेव गिरीश जगतां पते ।
त्राहि मां . . . सच्चिदानन्द शाश्वत ।।

Colophon:

इति दुर्गाक्रिया . . . . . विधाने विश्वरूपस्तुतिर्नामाष्टमोपदेशः

प्रत्यङ्गिरामन्त्रः—मन्त्रशुद्धिः चिदम्बरनाडीशुद्धिः

इति सर्वपूजारम्भविधिः

Fol. 36-48:

श्रीगणपतये नमः

गजवक्त्रं नमस्कृत्य वाग्देवीं च गुरूनपि ।
नत्वा बालप्रबोधाय वक्ष्ये षट्कर्मसंग्रहम् ।।

Fol. 67-79:

ब्राह्मे मुहूर्ते उत्थाय . . . .

Fol. 80-101

पुलिन्दिन्याः प्रभावम्, कच्छपुटयन्त्रम्, शीतलास्तोत्रम्

Colophon:

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धे शंकरेण विरचिते शरभसालुवपक्षिराजकल्पं नाम षोडशोऽध्यायः

Breaks off in Adhyāya 23.

Colophon:

इति महाशैवतन्त्रेऽतिरहस्य आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शंकरेण विरचिते शरभसालुवपक्षिराजकल्पे मन्त्रकवचं नाम . . .

इति शरभाष्टोत्तरशतं संपूर्णम्, इति शरभहृदयं संपूर्णम्

2250

VB 1068(a) **मन्त्रसमुच्चयः**

Contents:

१. सुदर्शनषडक्षरमन्त्रः
२. गणपत्येकाक्षरमन्त्रः
३. मूलदुर्गाविधानम्
४. वनदुर्गामन्त्रः
५. मालिनीध्यानम्
६. पथिदुर्गामन्त्रः
७. गणिदुर्गामन्त्रः
८. ज्वालाभिन्नभैरवीमन्त्रः
९. बगलाविधानम् (रुद्रयामले)
१०. बगलामुखीमन्त्रः
११. बगलामुखीस्तोत्रम्
१२. शान्तिदुर्गामन्त्रः
१३. महावाराहीमन्त्रः
१४. मध्याह्नवाराहीमन्त्रः
१५. लघुवाराहीमन्त्रः
१६. राजमुखीमन्त्रः
१७. नृसिंहैकाक्षरमन्त्रः
१८. साम्बदक्षिणामूर्तिमन्त्रः
१९. संहारदक्षिणामूर्तिमन्त्रः
२०. लगुडदक्षिणामूर्तिमन्त्रः
२१. मेधादक्षिणामूर्तिमन्त्रः
२२. मन्मथमन्त्रः
२३. धरणीमन्त्रः
२४. रक्तचामुण्डीमन्त्रः
२५. पुलिन्दिनीमन्त्रः
२६. क्षोभिणीमन्त्रः
२७. त्वरितापार्वतीमन्त्रः
२८. देवीविषयः
२९. स्थानसिद्धिः
३०. भूतसिद्धिः
३१. प्राणप्रतिष्ठा

Beginning:

अस्य श्रीसुदर्शनषडक्षरमहामन्त्रस्य अहिर्बुध्न्यऋषये नमः। अनुष्टुप् छन्दसे नमः। सुदर्शनरूपिणे महाविष्णवे देवतायै नमः। ईं बीजायै नमः। हुं शक्तये नमः। फट् कीलकाय नमः। इष्टार्थे विनियोग इति ऋष्यादिकं विन्यस्य चक्राय स्वाहा।

End:

इत्येतत्त्रिवारं संतर्प्य तत्त्वचतुष्टयेनाचम्य तदर्थं संहारमुद्रया त्रयस्त्रिंशत्फलोपलक्ष्यमाणया सवितर्युपसंहृत्य नियतवचनो निजसमात्रावोकनबाह्याजननस्पर्शनजन . . . देव्यर्चनाय समागच्छेत्।

2260

VB 276(s) **लक्ष्मीनृसिंहकवचम्**

Beginning:

श्रीपराशरः—

जगन्नाथं प्रणम्येशं सर्वविघ्ननिवारणम् ।
नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा ।।
सर्वरक्षाकरं नृणां सर्वोपद्रवनाशनम् ।
सर्वसंपत्प्रदं चैव स्वर्गमोक्षप्रदायकम् ।।
ध्यात्वा नृसिंहं देवेशं स्वर्णसिंहासने स्थितम् ।
विवृतास्यं त्रिनयनं शरदिन्दुसमप्रभम् ।।
लक्ष्म्यालिङ्गितवामाङ्गं विभूतिभिरुपासितम् ।

End:

किमत्र बहुनोक्तेन नृसिंहकवचे भवेत् ।
मनसा चिन्तितं यद्यत्तत्तदाप्नोत्यसंशयः ।।
इति परमरहस्यसारमेतत् कवचं तत्पठतीह भक्तिमान् यः ।
स भवति पुनरुक्तभाग्यभोगी तनुविभवं समुपैति नारसिंहम् ।।

Colophon:

इति श्रीमदष्टादशपुराणसंग्रहे **विष्णुधर्मोत्तरे** प्रह्लादविजये श्रीपराशरमैत्रेयसंवादे प्रह्लादोक्तं श्रीलक्ष्मीनरसिंहकवचं समाप्तम्

Scribe adds:

रामभद्रन् स्वहस्तलिखितम् ।

2263

VB 347(c) **वन्दनमन्त्रः**

Beginning:

अस्य श्रीवन्दनमहामन्त्रस्य सान्दीपनिर्भगवान् ऋषिः, गायत्री छन्दः, ब्रह्मा देवता, शोभनवक्त्रं बीजम्, नीलग्रीव इति शक्तिः, मोक्षार्थे जपे विनियोगः ।

End:

सायाह्नध्यानम्—

वन्दे चतुर्भुजां देवीं सामात्मां दक्षिणाग्निकाम् ।
प्रवृद्धां गरुडारूढां नानाकल्पां सरस्वतीम् ।।

ब्रह्मन् विवस्वते भास्वते नमः । मूलमन्त्रं कृत्वा प्रमुच्यते ।।

2264

VB 996(a) विघ्नेश्वरकवचम्

Beginning:

ओं ब्रह्मा उवाच—

नन्दिकेश्वर सर्वज्ञ भक्तानुग्रहकारक ।
भुक्तिमुक्तिप्रदं नृणां सर्वरक्षाकरं परम् ।।
त्रिषु लोकेषु विख्यातमायुर्वर्धनमुत्तमम् ।
कवचं श्रोतुमिच्छामि सर्वकामार्थसाधकम् ।।
आधिव्याधिहरं श्राव्यं कमलावासकारकम् ।
वाक्सिद्धिं लभते मर्त्यः काम्यकारणभूतिदाम् ।।
वक्तुमर्हसि देवेश नन्दीश्वर सुरोत्तम ।

श्रीनन्दिकेश्वर उवाच—

शृणु ब्रह्मन् प्रवक्ष्यामि गुह्याद्गुह्यतमं परम् ।
विघ्नेशकवचं पुण्यं पवित्रं पापनाशनम् ।।

End:

भूतप्रेतपिशाचाद्या डाकिनी शाकिनी तथा ।
हाहाहूहूश्च काकिन्यो डाकिन्यो ब्रह्मराक्षसाः ।।
यक्षगन्धर्व . . . . . पलायिनः . . . . . ।
. . . . . पलायिनः ।।
दासास्तस्य नृपाः सर्वे दास्यो मृगविलोचनाः ।
बहुना किमिहोक्तेन लोकास्तस्य . . . . . .

Colophon:

. . . णे ब्रह्माश्वलायनसंवादे शम्बुकस्तवराजो नाम सप्तमोऽध्यायः

2271

VB 724(a) श्रीविद्याभाष्यम्

Beginning:

ओं कन दीप्तावित्यस्मात् क्वि . . . . प्रकाश्यन्ते अनेन शब्दजालानीति क । उणादयो बहुलमिति नलोपः । स्वरादित्वादव्ययम् । इक् इत्यस्माद्वा इङ अध्ययने इत्यस्माद्वा गुणे . . प्रत्यये सति प्रत्ययलोपे निपात एकाजनाङ इति निपातत्वात् प्रकृतिभावेन ये इति शब्दः ।

End:

तत्र क स क ल सौ ह्रीं च क एं ईं ह्रीं अ स क इ ल ह्रीं स क ल ह्रीमिति एकपदात्मको मन्त्रः ।
अस्य मन्त्रस्यायमर्थः । उत्तरोत्तरप्रकाशमान-बुद्धिव्याप्त्यतिशयप्रकाशहेतुक-वाग्विभूत्या ।।

2274

VB 276(u) सिद्धिविनायककवचम्

Beginning: Same as in Ser. no. 2264.

End:

यः पठेच्छृणुयाद्वापि करस्थाः सर्वसिद्धयः ।
यत्र यत्र गतो वापि तत्रार्थसिद्धयः ।।
यः शृणोति जगति द्विजोत्तमो यक्षरक्षसुरसिद्धपूजितः ।
अग्रगण्यकवचं विसंशयः सर्वकामफलभाक् सदा नरः ।
पुत्रमित्रसुकलत्रसंयुतः कामभोगमखिलान् स भुञ्जति ।।
यं ब्रह्मचारिणमचिन्त्यमनेकरूपं ध्यायेज्जगत्रयहिते रतमापदाघ्नम् ।
सर्वार्थसिद्धिं लभते स मर्त्यो विघ्नेशसायुज्यमुपैत्यसंशयः ।

Colophon:

इति **ब्रह्माण्डपुराणे** ब्रह्मनन्दिकेश्वरसंवादे सिद्धिविनायककवचं संपूर्णम्

2282

VB 1008(c) सुब्रह्मण्यषोडशाक्षरीमन्त्रः

Beginning:

अस्य श्रीसुब्रह्मण्यषोडशाक्षरीमहामन्त्रस्य काश्यप ऋषिः, गायत्री छन्दः, श्रीसुब्रह्मण्यो देवता, शं बीजं, रं शक्तिः, वं कीलकम् । श्रीसुब्रह्मण्यप्रसादसिद्धचर्थे जपे विनियोगः । शं रं वं णं भं वं इत्यादि कराङ्गन्यासः । ध्यानम् । सिन्दूरारुण + + + मूलम् । वान्तं यान्तं लान्तं डान्तं लान्तम् ।।

ओं नमो भगवते सुब्रह्मण्याय प्राच्यां दिशे इन्द्रो देवता ऐरवतारूढाय हेमवर्णाय वज्रहस्ताय इन्द्रमण्डलं बन्धय बन्धय मां रक्ष रक्ष अचलमचलं आक्रम्य आक्रम्य महावज्रशक्तिहस्ताय शिखिवाहनाय हुं फट् स्वाहा ।

End:

ओं नमो भगवते महासुब्रह्मण्याय कुबेरदिशे कुबेरो देवता अश्वारूढाय पीतवर्णाय गदाखड्गहस्ताय कुबेरमण्डलं बन्धय बन्धय मां रक्ष रक्ष अचलमचलं आक्रम्याक्रम्य महावज्रशक्तिहस्ताय शिखिवाहनाय हुं फट् स्वाहा ।

ओं नमो भगवते महासुब्रह्मण्याय ईशान . . . . . .

2285

VB 1016(a) **सौभाग्यकवचम्**

Beginning:

इक्षुकोदण्डपुष्पेषुपाशाङ्कुशलसद्भुजाम् ।
उद्यत्सूर्यनिभां बन्दे महात्रिपुरसुन्दरीम् ।।
कैलासशिखरे रम्ये सुखासीनं सुरार्चितम् ।
गिरीशं गिरिजा स्तुत्वा स्तोत्रैर्वेदार्थसंमितैः ।।
प्रणम्य परया भक्त्या तमपृच्छत् कृताञ्जलिः ।

पार्वत्युवाच—

प्रकाशानन्दनाथात्मन् परामर्शस्वभावतः ।
भक्तपाशविनाशाय त्रिलोकीदेशिकाय ते ।।

End:

वश्यं भवति शीघ्रेण त्रैलोक्यं सचराचरम् ।
भूपाला महिला बालाः किमु मायाविमोहिताः ।।
एतत्सौभाग्यकवचं रक्षाकरमनुत्तमम् ।
जपेज्जन्मजरामृत्युविनाशाय महेश्वरि ।।

Colophon:

इति महात्रिपुरसुन्दरीकवचं समाप्तम्

2286

VB 1026 **सौभाग्यरत्नाकरः**

Beginning:

शुक्लारुणपीतवर्णं चतुरश्रत्रयं ध्यात्वा पाशाङ्कुशपद्मद्वयकरा रक्तवर्णा अणिमादीर्ध्यात्वा रक्तोत्पलकपालहस्ता नीलवस्त्रा रक्तवस्त्राद्याभरणा ब्राह्म्याद्यष्टमातॄर्ध्यात्वा पाशाङ्कुशस्व-स्वमुद्राङ्कितचतुर्भुजा रक्तास्त्रिनेत्राः सालंकारा दशमुद्रादेवीर्ध्यात्वा + + +

End:

इत्यन्त्येष्टिविधिः ।

इति गदितमशेषं त्रैपुरब्रह्मविद्या-
यजनजपहतानां शास्त्रदृष्टं विधानम् ।

गुरुचरणसरोजाराधनाल्लभ्यमेतत्
पशुषु परमगोप्यं भावितं सिद्धसङ्घैः ।।
श्रीविद्यातत्त्ववेत्ता जगति करुणयोपात्तकायः शिवो यः
स श्रीमान् सुन्दराख्यः क्षितिसुरतिलकः सच्चिदानन्दनाथः ।
सच्छिष्यश्रीनिवासे द्रविडविषयजित्तत्प्रसादात्ततत्त्वः
श्रीविद्यानन्दनाथः परिशववचसां भावयेत्तां विधाय ।।
सौभाग्यरत्नाकरनामधेयं सौभाग्यविद्यादिसुमन्त्ररत्नैः ।
अलंकृतं ग्रन्थवरं तरङ्गैः सुशोभितं शैवसुतत्त्वसंख्यैः ।।
अध्यापयन्नात्मविदः स्वशिष्या-
नभ्यर्थितान्यैरपि तानदृष्टान् ।
क्षेत्रे विमुक्ते शिवराजधान्या-
मास्ते निजाराध्यनिदेशवर्ती ।।
यथा पित्रोर्मुदे भूयादश्लीलमपि भाषितम् ।
बालस्य महतामस्तु ममापि भणितं तथा ।।
त्यक्त्वा कुलं कुलवधूः पुरमध्यवीथ्यां
गत्वा कुलं मधु निपीय यथेप्सितं या ।
मत्ता परं पुरुषमेत्य तदीयसंगात्
तुष्टा पुनः सकुलमेति पुनातु सा माम् ।।
श्री**विद्यानन्दनाथेन** शिवयोः प्रियसूनुना ।
कृते **सौभाग्यरत्नाब्धौ** षट्त्रिंशोऽगात् तरङ्गकः ।।

Colophon:

इति श्रीसौभाग्यरत्नाकरे षट्त्रिंशस्तरङ्गकः

After the colophon:

राज्यलाभोपकाराय प्रारभ्यारिखरःकुरून् ।
गोपालककुटिं प्रायात् फुल्लावेत्युदिता लिपिः ।।

इति मभन्तारचक्रम्

दमरोमन्दमन्दादि रुरुमेदमरोदर ।
दरारामसुदारारि मुमुदे देवमानुषः ।।
भवराठाररोमाणि शोणीमोघाय तानि च ।
शसो सहो लक्ष इति सिंहराशौ लिखेत् . . . ।।

इति राशिचक्रम्

उत्तरादिशि संभूतगोविन्दस्याज्ञयाधुना ।
श्रीनीलकण्ठपुत्रेण कृष्णेन लिखितं शुभम् ।।

2307

VB 327(c) **अर्गलास्तोत्रम्**

Beginning:

अर्गलास्तोत्रमहामन्त्रस्य स्वर्णाकर्षणभैरव ऋषिः । अनुष्टुप् छन्दः । श्रीमच्छक्तिर्देवता । दुं बीजं, वागीश्वरी शक्तिः, महाकालीति कीलकम् । मम वागीश्वरीप्रसादसिद्धयर्थे जपे विनियोगः ।

अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् ।
जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः ।।

End:

स तु सप्तशतीसंख्यां प्रतिश्लोकमवाप्नुयात् ।
महादेव्याः प्रसादेन लभते नात्र संशयः ।।
अर्गलं पापजातस्य दारिद्र्यस्य तथार्गलम् ।
इदमादौ पठित्वा तु पश्चाच्चण्डीकथां पठेत् ।।

Colophon:

इत्यर्गलास्तोत्रं संपूर्णम्

2321

VB 276(h) **तटातकास्तोत्रम्**

Beginning:

अगस्त्य उवाच—

देवदेव . . . . . ।
स्तोत्रं तटातकायास्तु ध्यानपूर्वमशेषतः ।।
. . . . . .करुणामय ।

ईश्वर उवाच—

मुने कुम्भज वक्ष्यामि शृणु सर्वमशेषतः ।
स्तोत्रं तटातकायास्तु दुर्लभं चाकृतात्मनाम् ।।
मधुरेति पुरी नाम्ना प्रख्याता दक्षिणादिशि ।
मलयस्योत्तरे भागे कावेर्या दक्षिणे तथा ।।

End:

सर्वमङ्गलमाङ्गल्ये सर्वैश्वर्यप्रदायिके ।
आयुरारोग्यमैश्वर्यमिष्टसिद्धिं च देहि मे ।।
नमस्ते देवभूदेवैः सेव्यमानपदाम्बुजे ।
देहि मे भक्तिमचलां त्वत्पादयुगलं व्रजे ।।
इदं त्रिपुरभैरव्या मीनाक्षीध्यानवैभवम् ।
अगस्त्याय पुरा प्रोक्तमशेषार्थफलप्रदम् ।।
यः पठेच्छृणुयाद्वापि स जीवन्मुक्तिभाग् भवेत् ।
सकृद्ध्यानेन सर्वेषां कोटिजन्मविनाशनम् ।।
त्रिसंध्यं च पठेद्यस्तु षण्मासं शंभुसंनिधौ ।
यावज्जीवं पठेद्यस्तु त्रिसंध्यं श्रद्धयान्वितः ।।
स भुक्त्वा सकलान् भोगानन्ते शिवपदं व्रजेत् ।

Colophon:

इत्यगस्त्यसंहितायामीश्वरागस्त्यसंवादे **तटातकास्तोत्रं** नाम सप्तपञ्चाशोऽध्यायः

2324

VB 1014(c) त्रिपुरसुन्दरीस्तवराजः

Beginning:

यत्रैव यत्रैव मनो मदीयं तत्रैव तत्रैव तव स्वरूपम् ।
यत्रैव यत्रैव शिरो मदीयं तत्रैव तत्रैव पदद्वयं ते ।।
नमामि सद्गुरुं शान्तं प्रत्यक्षशिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ।।
या नित्या परमा शक्तिर्जगच्चैतन्यरूपिणी ।
तां नमामि महादेवीं पञ्चमीमात्मरूपिणीम् ।।
यस्यां सर्वं समुत्पन्नं यस्यां तत् प्रतितिष्ठति ।
लयमेति च यस्यां तां पञ्चमीं प्रणमाम्यहम् ।।

End:

यत्र कुत्र स्थितो वापि शुचिर्ज्ञात्वा यथाशुचिः ।
देव्यास्तोत्रं पठित्वा च ध्रुवं मुच्येत बन्धनात् ।।
अत्यन्तरोगयुक्तोऽपि यदि देवीं प्रपूजयेत् ।
सर्वं वा श्लोकमेकं वा सद्यो रोगात् प्रमुच्यते ।।

मोहनं स्तम्भनाकर्षं मारणोच्चाटनं तथा ।
कल्पकालेन जगति सर्वां सिद्धिमुपालभेत् ।।
इत्थं त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ।
रक्षामन्त्रं च विधिवच्छिवेन परिकीर्तितम् ।।

2326

VB 1158(h) **दक्षिणाम्नायसंध्यात्रयध्यानम्**

Beginning:

पीतां पीताम्बरां पीतहृदग्निभूषानुलेपनाम् ।
तटित्कोटिसमाभासां बालामक्षस्रगुज्ज्वलाम् ।।
पुस्तकाढ्यकराम्भोजां वह्निपीठनिषेदुषीम् ।
वाग्भवां वाग्भवोद्भूतां त्रीक्षणां सुस्मितां स्मरेत् ।।

इति प्रातः ।

रक्तां सुरक्ताम्बरभूषणाढ्यां पाशाङ्कुशाभीतिवरां दधानाम् ।
शुचिस्मितामुद्भटयौवनाढ्यां कामेश्वरीं संस्मरत त्रिनेत्राम् ।।

इति मध्याह्ने ।

शुक्लां शुक्लाम्बरालेपवस्त्रद्वयविभूषिताम् ।
जटाजूटधरां नेत्रत्रयोद्भासिमुखाम्बुजाम् ।।
ईषत्स्फुरितदंष्ट्रां च भैरवीरूपमाश्रिताम् ।
जरावलितसंकीर्णां लम्बमानपयोधराम् ।।
पाशाङ्कुशौ पुस्तकं च स्फटिकाक्षस्रजं करैः ।
दधानां शक्तिबीजोत्थां पूर्णेन्दोर्मण्डले स्थिताम् ।।

End:

ध्यायेदाद्यां परां शक्तिं शक्तिमद्भिर्निषेविताम् ।
भोगमोक्षप्रदां शान्तामनन्तामामृतेश्वरीम् ।।

इति सायम् ।

अक्षं धं सारनाकं सलघुरक नमो नाम तत्सामदैस्त्री-
त्रामालाजाक्षगाख्यैर्विघटितलिपिभिः स्वात्मराज्याभिधानैः ।
श्रीमत्साम्राज्यलक्ष्मीं स्मरतु जपतु संतर्पयत्वात्मबोधा-
नन्वब्दं नत्वचारं त्वभिमृशतु नृपः सर्वसाम्राज्यसिद्धचै ।।

अस्यार्थः । अक्षम् हति मातृका अकारादिक्षकारान्तः । धमिति . . .

2335

VB 696(a) देवीचूर्णिका

Beginning:

जय जयाखिलजगदम्बिके शिवशक्त्यात्मिके, सोदरसंस्थितापरिमितशतकोटिब्रह्माण्डनिकरे, निगमान्तकञ्जवरहंसकाकारे स्वकरुणापात्रीकृतवरुणालयसुते नगवरसुते निखिलजगदाधारे अखिलहृदयागारे तथापि लीलया सर्वातिशयसौन्दर्यनिलयसकलावयवोपेतसेवकजनाह्लादकरे हरसमस्तकरणसाफल्यप्रदाद्भुतानिर्वचनीययोषिद्रूपे + + +

End:

महिषासुरप्रमुखनिखिलसुररिपुमर्दनाद्भुतचरित्रे मञ्जुलविशालनेत्रे, अङ्गुलीयकर्किकिणी-समूहमञ्जुमञ्जीरकाञ्चनकृतवसनकाञ्चीकङ्कणकटककेयूरहारमणिमकुटविलसिताङ्गे, स्वालय-विराजमानश्रीगुप्तगङ्गे, ब्रह्मेन्द्रादिसुरवृन्दवन्दिते, श्रीमदखिलजगज्जनानि मङ्गलेश्वरि परदेवते पाहि मां पाहि मां नमस्ते नमस्ते ।।

There is also a small *cūrṇikā* on Maṅgalanāyikeśa (Śiva).

2336

VB 27(b) देवीभुजङ्गस्तोत्रम्

Beginning:

वसन्नैक्षवाब्धौ मणिद्वीपमध्ये मुनिध्येयकल्पद्रुमूले च पीठे ।
सदाराच्युतेन स्मरक्रोडलक्ष्म्या सदा वल्लभाङ्को गणेशो निधिर्मे ।।
उदञ्चद्दिनेशप्रपञ्चप्रकाशामुदूढेन्दुरेखामुदारां त्रिनेत्राम् ।
वहन्तीं वराभीतिकोशाक्षमालां वसन्तीं स्फुटे हल्लके नौमि बालाम् ।।
विरिञ्चादिभिः पञ्चभिर्लोकनाथैः समूढे महानन्दपीठे निषण्णम् ।
धनुर्बाणपाशाङ्कुशप्रोतहस्तं महस्त्रैपुरं शंकराद्वैतमव्यात् ।।

End:

जगज्जालमेतत् त्वयैवानुसृष्टं त्वमेवाददासीन्द्रियैरर्थजालम् ।
त्वमेकैव कर्त्री त्वमेकैव भोक्त्री न मे पुण्यपापे न मे बन्धमोक्षे ।।
इति प्रेमभारेण किंचिन्मयोक्तं न बुद्ध्वैव तत्त्वं त्वदीयं मदीयम् ।
विनोदाय बालस्य मौढ्यं हि मातस्तदेतत्प्रलापं स्तुतिं मे गृहाण ।।

Colophon:

इत्यभिनवनगुप्ताचार्यकृतिषु देवीभुजङ्गस्तोत्रं संपूर्णम्

Scribe adds:

पञ्चब्र . . .पञ्चस्फुटघटितमहामञ्चसंचारकेली
पाञ्चाली पञ्चकृत्यप्रणयनरभसोदञ्चितभ्रूविलासा ।
भासां नानाविलासैरखिलमपि जगद् भासयन्ती स्वभावात्
सत्तासंवित्स्फुरत्तात्मकवपुरशिवं भस्मसान्मे करोतु ।।

2337

VB 1103(n) **धरणीस्तोत्रम्**

Beginning:

नारायण . . . . . ।
. . . . . श्रोतुं कौतूहलं हि मे ।।

श्रीवराह उवाच—

अयमेव पुरा प्रश्नः कृतश्चन्द्रार्धमौलिना ।
न कस्यापि मयाख्यातो रहस्यत्वाच्छुचिस्मिते ।।

End:

इति त्रैलोक्यनाथस्य विष्णोर्नाम वरानने ।
नाम्नां . . . . . अदोषेण प्रकीर्तितम् ।।
यः पठेच्छृणुयाद्वापि नित्यमेव समाहितः ।
. . . . . ।।

Colophon:

श्रीवराहपुराणे धरणीवराहसंवादे धरणीस्तोत्रं संपूर्णम्

2347

VB 27(t) **महाषोडशीवर्णरत्नावलीस्तोत्रम्**

Beginning:

ह्रींकाराङ्कणदीपिकां श्रितजनानन्दप्रदां श्रीमतीं
श्रीनाथाद्यमरार्चिताङ्घ्रिकमलां श्रीसुन्दरीं भावये ।

श्रीमन्मञ्जुलरत्नसानुविलसन्मध्यस्थगूढाग्रग-
श्रीमन्नागरमध्यलासिसुमहच्छ्रीचक्रबिन्दौ स्थिताम् ।।

End:

श्रींकारामृतपादमञ्जुलमणीवेद्यन्तरे भासुरां
श्रीदेवीं श्रितसर्वलोकसकलाभीष्टप्रदानोत्सुकाम् ।
श्रीमत्त . . . मुद्यदर्ककिरणां श्रीशांभवीं श्रीकरा-
मात्मन्यैक्यमुपास्महे परतरां निर्वाणसंसिद्धये ।।

Colophon:

इति श्रीमहाषोडशीवर्णरत्नावलीस्तोत्रं संपूर्णम्

2351

VB 27(d) रेणुकास्तोत्रम्

Beginning:

कालाग्न्यादिशिवावसानमखिलं ते गुल्फदघ्नं शिवे
मूर्तिं कीर्तयितुं न कस्य रसना लज्जाम्बुधौ मज्जति ।
तस्मात् त्वच्चरणैकदेशनखरज्योतिस्फुलिङ्गा इव
स्फूर्जन्ति प्रभविष्णवश्च सततं ते पद्मनाभादयः ।।
कल्पः कोऽपि स शांभवो विजयते मातस्त्वया कल्पतो
यत्रानल्पविकल्पजालविमुखः कश्चिद्विपश्चित्परः ।
सा त्वं सत्त्ववतामुपेहि सुलभा नैवासि किं स्तूयसे
स्वच्छन्दं शिशवो यथा तव पुनः क्रीडन्ति वेदा इमे ।।
लीलाचामरधारिणीसहचरीगीता महासिद्धये
नूनं वञ्चयितुं स्फुरन्ति भवतीकारुण्यशून्यं जनम् ।
अम्ब त्वन्नयनाञ्चलं करुणया यस्मिन् परिक्रीडते
तस्य द्वारि निवारितोऽपि कुरुते सेवां सुराणां गणः ।।

End:

मातर्भैरवि भर्गपत्नि गिरिजे गायत्रि गोत्रात्मिके
दुर्गे गौरि सरस्वति त्रिनयने श्रीसिद्धलक्ष्मीभृते ।
नित्ये मृत्युविकारहारिणि शिवे श्रीरेकवीराम्बिके
सोऽहं ते शरणागतः करुणया त्वं रेणुके रक्ष माम् ।।

Colophon:

इति रेणुकास्तोत्रं संपूर्णम्

2352

VB 27(m) **लघुषोडशार्णकलाविलासस्तोत्रम्**

Beginning:

कल्याणं जगतामहं कथमुमे ध्यायामि सच्चिद्वपु-
स्त्रैय्यन्तैर्मनसापि ते सह चिरं मृग्यापि यत्नेन च ।
ज्ञातुं नो वदितुं च शक्यमभवद्यस्मात् तथा भक्तितः
श्रीचक्राग्रगशैवमञ्चपरशैवाङ्कस्थितां भावये ।।
एलासौरभकुन्तले परमुमे त्वां व्याप्य सर्वं स्थितं
काष्ठादिष्विव वह्नितैलनवनीताम्बुप्रवाहादिकम् ।
श्रीमूर्तिष्वतिसुन्दरासु नवबन्धूकप्रभास्वम्बिके
शक्यं किं नु तथापि ते परशिवे चास्थानमावाहये ।।

End:

ह्रींकारोन्नतरत्नमञ्जुलमहत्सिंहासने भासुरा-
मूढे ब्रह्महरीश्वरादिभिरलं श्रीकामराजाङ्कगे ।
सर्वज्ञातिसमस्तशक्तिनिवहैः संसेवितामम्बिकां
सैवास्मीति विभावना नतिशतैः संतोषयाम्यान्वहम् ।।
ये ये सन्ततमन्तकारिगृहिणीस्तोत्रं समस्तार्थदं
ज्ञात्वार्थं हृदि मन्त्रराजविमलश्रीबीजवर्णक्रमात् ।
प्रोक्तं मन्त्रविदः पठन्ति सहसा कालत्रयेऽप्यम्बिका-
सांनिध्ये तदनन्यभावनधियस्तत्रैक्यतां प्राप्नुयुः ।।

Colophon:

इति श्रीलघुषोडशार्णकलाविलासस्तोत्रं संपूर्णम्

2353

VB 663(d) **लघुस्तवः**

Beginning:

आधारे तरुणार्कबिम्बरुचिरं वाग्बीजमत्यद्भुतं
बीजं मान्मथमिन्द्रको . . . हृत्पङ्कजे संस्थितम् ।

रन्ध्रे ब्रह्मपदस्य शाक्तमपरं चन्द्रप्रभाभास्वरं
ये ध्यायन्ति पदत्रयं तव शिवे ते यान्ति सौख्यास्पदम् ।।
ऐन्द्रस्येव + ज्योतिर्मयी वाङ्मयी

End:

सावद्यं निरवद्यमस्तु यदि वा किं वानया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि ।
संचिन्त्यापि . . . . . हठात्
त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवम् ।।

2357

VB 349(b) **ललिताम्बिकानवरत्नमालिका**

Beginning:

हेमाम्बुजान्तरे राजमानं शक्त्याश्लेषितमूर्त्या विराजमानम्
आनन्दरूपं वरदाभयदाननिरतं सदा धृतकारुण्यतोयम् ।
निजपादसेवापरपावनशीलं वन्दे सदा गुरुमात्मभूतं
सदास्वात्मभूताखिलविश्वमहम् ।।
दन्तावलानन गौरीसुत जय विघ्नप्रदयन्त्रनाशक
रे वल्लभाकान्त गजासुरप्राणविभेद सदाधृतकारुण्यमूर्ते ।
भक्तचिन्तितकामवरदानदक्ष दीनपोषक मामव
भो दयापूरितदृष्ट्या विलोकय माम् ।।

End:

नृसिंहदेशिकदासेन मयाद्वैतानन्दाख्यानाथेन मोदायैषा ते
नवरत्नमालिकानिन्द्ये . . . . . ।
सदास्त्वम्ब बिन्दुनिलये प्रीत्या दृष्ट्या ते मह्यमभीष्टमखिलं
देहि नित्यं ललिताम्बिके शिवशक्तिरूपिणि पालय माम् ।।

2391

VB 1014(i) **आम्नायस्तोत्रम्**

Beginning:

प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।

विष्णुब्रह्ममरुद्गणार्चितपदम् ऋग्वेदनादोदयं
वन्देऽहं सपदं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ।।
गौरं कुङ्कुमपङ्किलं सतिलकं ह्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ।
स्निग्धं विम्बफलाधरं प्रहसितं नीलालकालंकृतं
वन्दे याजुषवेदघोषजनकं वक्त्रं हरस्योत्तरम् ।।

End:

मूलविद्या परा येति रहस्या योगिनी तथा ।
शांभवी चैव हृल्लेखसमया परबोधिनी ।।
कुलपञ्चाक्षरी पञ्चदशार्णानुत्तरानुगा ।
कौलविद्या ततः प्रोक्ता गुरुक्रमविमर्शिनी ।।
अनामाख्येति संकेतविद्यानुत्तरपूर्वगा ।
षोडशी पूर्तिविद्या च महात्रिपुरसुन्दरी ।।
यस्त्रिसंध्यं पठेद्विद्वानाम्नायस्तोत्रमुत्तमम् ।
सर्वपापविशुद्धात्मा सर्वैश्वर्यसमन्वितः ।।
भुक्त्वा भोगान् यथाकामाञ् श्रीविद्यालोकमाप्नुयात् ।

Colophon:

इति श्रीकुलार्णवतन्त्रे उमामहेश्वरसंवादे आम्नायस्तोत्रं संपूर्णम्

2402

VB 314(a-11) **दक्षिणामूर्तिस्तोत्रम्**

Beginning:

उपासकानां यदुपासनीयमुपात्तवासं वटशाखिमूले ।
तद्धाम दाक्षिण्यजुषा स्वमूर्त्या जागर्ति चित्ते मम बोधरूपम् ।।
अद्राक्षमक्षीणदयानिधानमाचार्यमार्यं वटमूलभागे ।
मौनेन मन्दस्मितमूर्तिमन्तं महर्षिलोकस्य तमो नुदन्तम् ।।
विद्राविताशेषतमोगुणेन मुद्राविशेषेण मुहुर्मुनीनाम् ।
निरस्य मायां दयया विधत्ते देवो महांस्तत्वमसीति बोधम् ।।

End:

उपासकानां त्वमुमासहायः पूर्णेन्दुभानं प्रकटीकरोषि ।
यदद्य ते दर्शनमात्रतो मे द्रवत्यहो मानसचन्द्रकान्तः ।।

श्रीकान्तद्रुहिणो धि . . . . . .
य: . . प्रसन्नानुसंद . . . ना . . . मूर्ति . दाम . . ।
. . . . . शशाङ्कमौले
ऐश्वर्यमायुर्लभते च विद्यामन्ते च वेदान्तमहारहस्यम् ।।

2409

VB 919(b) **दक्षिणामूर्त्यष्टकव्याख्या (तत्त्वसुधा)**

Beginning:

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठै: ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ।।

\+ + +

इह खलु सर्वज्ञो भगवान् भाष्यकार: लोकानुग्रहैकप्रयोजनकृतशरीरपरिग्रह: सन् सकलवेदान्तदुग्धोदधे: न्यायमन्दरेण विचारनिर्मथनात् आविर्भूताद्वैतामृतस्य विन्यासकलशभूतं दक्षिणामूर्तिस्तोत्रं सकललोकानुजिघृक्षया + + विश्वं दर्पण . . . मीडे । विश्वं विविधप्रत्ययगम्यं वियदादि सर्वमिदं जगत् निजान्तर्गतं निजं स्वीयमन्तर्मध्यं गतं प्राप्तम्; प्रत्यक्स्वरूपे स्थितमिति यावत् । + + +

End:

पुनर्भूय: अष्टधा अष्टप्रकारेण परिणतं मायापरिणामरूपमैश्वर्यं च अणिमादिकमव्याहतं क्वचिदप्यप्रतिहतं सिध्येत् ; स एकधा भवति त्रिधा भवति स यदि पितृलोककामो भवति संकल्पादेवास्य पितर: समुत्तिष्ठन्ति इत्यादिश्रुत्युक्तं सर्वं भवेदित्यर्थ: ।।

एवमेषा कृता व्याख्या दक्षिणाशामुखस्तुते: ।
यथामति तया तुष्टो दक्षिणामूर्तिरस्तु न: ।।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीकैवल्यानन्दयोगीन्द्रपदकमलभृङ्गायमाणेन **स्वयंप्रकाश**यतिना विरचिता दक्षिणामूर्तिस्तोत्रव्याख्या **तत्त्वसुधा**ख्या समाप्ता ।

After the colophon:

इति सकलविद्वज्जनप्रसिद्धम् । हरि: ओँ ।।

माये जाये जहिहि न हि ते प्रेमपूर्वा प्रवृत्ति:
त्वत्कौटिल्यं चिरमवगतं तत्त्वयालं प्रयाहि ।

सर्वज्ञं मामसकलविदं सर्वगं देहमात्रं
नित्यानन्दं जनिमृतियुतं कुर्वती किं न कुर्याः ।।

After these two leaves contain a commentary on a part of the 2nd verse of *Dakṣiṇāmūrtyaṣṭaka* and a portion in praise of Rudra and the study of *Rudrādhyāya*.

2415

VB 327(m) **पञ्चनदीशाक्षरमालिकास्तोत्रम्**

Beginning:

विघ्नविनायक विधिपूजित निर्विघ्नं कुरु कार्येषु सदा ।
हर हर शंभो जगदीश भवहर पुरहर पञ्चनदीश ।।
अजमुखदेवागणितगुण नमदभयप्रद परमेश शिव ।
हर हर शंभो जगदीश भवहर पुरहर पञ्चनदीश ।।
आपन्नजनशरण्य शिवासुहृदपहतकारुण्यशिव ।
हर हर शंभो जगदीश भवहर पुरहर पञ्चनदीश ।।

End:

लक्षणसहिता पञ्चनदीशितुरक्षरमालाङ्गलीतधरा
रक्षितनतजन्मनसाम्बमूर्तेरक्षयफलदा भवति सदा ।
हर हर शंभो जगदीश भवहर पुरहर पञ्चनदीश ।।

2417

VB 327(q) **पञ्चापगेशगीतिः**

Beginning:

पाहि गौरीश पञ्चापगेश पाहि गौरीश ।
अङ्गजदेह विभङ्गकरेन्दुपतङ्ग विलोचन तुङ्गधवल ।।
पुङ्गवराजराजधर तुरङ्गलसितगिरिपुङ्गव-
तनयालिङ्गनपुलकितमङ्गलदेह ।
सुरङ्गलसितगिरिगङ्गाधर सारङ्गाजिनधर
गङ्गाभवमातङ्गाननकृतश्रृङ्गारस्तवमङ्गलपूरित ।।
पाहि गिरीश पञ्चापगेश पाहि ।

End:

चण्डहेरण्डपिचण्डकखण्डन धृतभूमण्डलाधिपतिमण्डनवेष पाहि (ध्रु)

2418

VB 314(a-4) **पतञ्जलिस्तोत्रम्**

Beginning:

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने
सुपर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणाधरेन्द्रहारिणे
सदा नमः शिवाय ते सदाशिवाय शंभवे ।।
सुतुङ्गभङ्गजह्नुजासुधांशुखण्डमौलये
पतङ्गपङ्कजासुहृत्कृपीटयोनिचक्षुषे ।
भुजङ्गराजकुण्डलाय पुण्यशालिबन्धवे
सदा नमः शिवाय ते सदाशिवाय शंभवे ।।

End:

मृकण्डुसूनुरक्षणावधूतदण्डपाणये
सुगण्डमण्डलस्फुरत्प्रभाजि. . . . ।
अखण्डभोगसंपदस्त्रिलोकभावितात्मने
सदा नमः शिवाय ते सदाशिवाय शंभवे ।।
मधुरिपुविधिशक्रमुख्यदेवैरपि नियमार्चितपादपङ्कजाय ।
कनकगिरिशरासनाय तुभ्यं रजतसभापतये नमः शिवाय ।।
हालास्यनाथाय महेश्वराय हालाहलालंकृतभूषणाय ।
मीनेक्षणायाः पतये शिवाय नमो नमः सुन्दरताण्डवाय ।।
इति स्तुत्वा महादेवं सोमसुन्दरताण्डवम् ।
दण्डवत्संनिधौ नत्वा भक्तया परवशोऽभवत् ।।
ततस्ताण्डवमूर्तिस्तं शिवः प्राह सदुत्तरम् ।।

2432

VB 322(a) **महिम्नस्तवः (शिवप्रकाशिकाव्याख्यासहितः)**

Beginning:

श्रीसाम्बाय परमगुरवे नमः ।

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।

अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ।।

महिम्नः पारमिति । शिवमहिम्नः पारमजानन् स्तोतुं प्रवर्तसे । अहो त्वमुद्धत इत्याशङ्कच **स्वौद्धत्यं परिहरत्याद्येन** श्लोकेन ।

End:

ईश्वरप्रणामान्मोक्षो भवतीति तात्पर्यार्थः—

त्वत्पादमुद्दिश्य कृतप्रणामः
संसारदुःखानि निरस्य लोके ।
दहत्यसंख्यानि नमो ऽस्तु तस्मै
भवच्छिदे चन्द्रविभूषणाय ।।

'एकोऽपि कृष्णस्य कृतप्रणाम' इत्यादि वाक्यानि ईश्वरप्रणामान्मोक्षं कथयति । अतो मुमुक्षूणां ज्ञात्वार्थमेतत्स्तोत्रं जप्यम् ।।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्य-श्रीनृसिंहगिरिमुनीन्द्रशिष्य-श्रीमच्छ्वेतगिरिमुनिविरचिता **श्रीमहिम्नस्तवटीका** शिवप्रकाशिका संपूर्णा

2434

VB 323(y) **मार्गबन्धुस्तोत्रम्**

Six verses ending in *bhaje mārgabandhum* and *śambho mahādeva* as refrain.

Beginning:

बालावनम्रत्किरीटं फालत्रिनेत्रार्चिषा दग्धपञ्चेषुकीटम् ।
शूलाहतारातिकूटं शुद्धमध्येन्दुचूडं भजे मार्गबन्धुम् ।
शंभो महादेव देव शिव शंभो महादेव देवेश शंभो शंभो महादेव देव ।।

End:

मन्दारभूतमुदारं मन्द-
रागेन्दुसारं महागौरिदूरं संचारम् ।
सिन्धुराजातिधीरं भजे मार्गबन्धुं
शंभो महादेव देवेश शंभो शंभो महादेव देव ।।
वेदान्तगम्यप्रभावं वेगदुर्वारसंसारपाथोधिनावम् ।
बोधात्मतेजस्वभावं भोगिभूषं दयाब्धिं भजे ।।

2436

VB 327(f) **मृत्युंजयमानसिकपूजा**

Beginning:

कैलासे कमनीयरत्नखचिते कल्पद्रुमूले स्थितं
कर्पूरस्फटिकेन्दुसुन्दरतनुं कात्यायनीसेवितम् ।।
गङ्गातुङ्गतरङ्गरञ्जितजटाभारं कृपासागरं
कण्ठालंकृतशेषभूषणममुं मृत्युंजयं भावये ।।

End:

प्रातर्लिङ्गमुमापतेरहरहः संदर्शनात्स्वर्गदं
मध्याह्ने हयमेधतुल्यफलदं सायंतने मोक्षदम् ।
भानोरस्तमये प्रदोषसमये पञ्चाक्षराराधनं
तत्कालत्रयतुल्यमिष्टफलदं सद्योऽनवद्यं दृढम् ।।

Colophon:

इति शंकराचार्यविरचिता मृत्युंजयमानसिकपूजा

Extra śloka at the end:

गण्डस्थलप्रविलसन्मदवारिधारि-
गण्डभ्रमद्भ्रमरविभ्रमलोलकर्णम् ।
गन्धर्वयक्षसुरकिंनरगीयमानं
गङ्गाधरस्य तनयं शरणं भजामि ।।

2453

VB 947(a) **शिवस्तुतिटीका**

Beginning:

ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः ।
लक्ष्मीनारायणमुनीन् वन्दे विद्यागुरून् मम ।।

स्फुटं स्फटिकसत्प्रभं स्फुटस्फटिकवत् शुभ्रस्फटिकवत् शुभ्रा निर्मला द्युतिर्यस्य तत् तथोक्तं तत् ।। 'स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः' इत्यमरः । स्फुटितहाटकश्रीजटं स्फुटितं पुटपाकशोभितं हाटकं सुवर्णं तस्य श्रीरिव श्रीः तत्तथोक्ताः तादृशाः जटाः यस्य तत् तथोक्तम् । शशाङ्ककदलशेखरं शशाङ्कस्य चन्द्रस्य दला कला शेखरे जटाजूटे यस्य तत् तथा । कपिलफुल्लनेत्रत्रयं कपिलं पिङ्गलवर्णं फुल्लं विकसितं नेत्राणां त्रयं नेत्रत्रयं यस्य तत् तथा तत् ।

End:

प्रथितमानसः प्रसिद्धबुद्धिर्यः . . . सूरिसूनुः . . . . . आचार्यः तस्य सूनुः नारायणो नाम नारायणाह्वयः सुधीः . . . शिवां शोभनां शिवस्तुतिं शिवस्य महादेवस्य स्तुतिं स्तोत्रं कथितवान् ।।

Colophon:

इति **तिरुमलाचार्य**कृतं शिवस्तुतिव्याख्यानं संपूर्णम्

2457

VB 327(n) **शिवानन्दलहरी**

Beginning:

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाड्
विघ्नव्यालगलोपमर्दगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाब्धिकुम्भोद्भवः
विघ्नाघौघघनप्रचण्डपवनो विघ्नेश्वरः पातु नः ।।

गुरुभ्यो नमः ।

कलाभ्यां चूडालंकृतशशिकलाभ्यां + + +

End:

सा रसना ते नयने तावेव करौ स एव कृतकृत्यः ।
या ये यौ यो भर्गं वदतीक्षेते सदार्चतः . . . . ।।

2461

VB 323(w) **शिवोत्कर्षमञ्जरी**

Beginning:

या लक्ष्मीस्त्रिजगच्छरण्यचरणा तस्याः पतिर्यच्छरो
यद्देयं निखिलैर्वदान्यनिवहैस्तद्यस्य जीर्णं धनुः ।
या संविच्छ्रुतिषु स्मृता रहसि सा यत्पादसंसेविनी
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ।।
अर्चामीति धिया यदेव कुसुमं क्षिप्त्वा जनो मुच्यते
विध्यामीति धिया तदेव विकिरन् भस्मीकृतो मन्मथः ।

इत्याभ्यन्तरवृत्तिमात्ररसिको बाह्यानपेक्षश्च यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ।।

End:

नाम्ना मां श्रुतिरग्रहीदिति सुराः ख्यातिं लभन्ते परां
मां वेदाहमिति श्रुतिः कथयतीत्युत्सिच्यते माधवः ।
ता यद्दोरिषुधन्वमन्युषु नमोवाकान्वहं ते शतं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ।।

Colophon:

शिवोत्कर्षमञ्जरी समाप्ता

Scribe adds:

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । रामन् स्वहस्तलिखितम् ।

2462

VB 314(u) **शोणगिरिस्तवः**

Beginning:

वन्दे शंभुमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ।।
वन्दे सर्वजगद्विहारमतुलं वन्दे करित्वग्धरं
वन्दे देवशिखामणिं शशिनिभं वन्दे हरेर्वल्लभम् ।
वन्दे नागभुजङ्गभूषणधरं वन्दे शिवं चिन्मयं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ।।

End:

वन्दे पावनमम्बरात्मममलं वन्दे महादैवतं
वन्दे भक्तपराश्रयामरतरुं वन्दे नताभीष्टदम् ।
वन्देऽपीतकुचाम्बिकेशमनिशं वन्देऽरुणाद्रीश्वरं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ।।
शान्तं जन्मजरापहं शुभकरं धर्मार्थिकामप्रदं
सत्यं दैवफलप्रदं शुचिकरं दारिद्र्यदुःखापहम् ।
भतप्रेतपिशाचराक्षसहरं पापघ्नमायुष्करं
नित्यं शोणगिरिस्तवं पठति यो मोक्षं लभेच्छाश्वतम् ।।

2463

VB 13(l) **सदाशिवस्तोत्रम्**

Beginning:

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने
सुपर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे . . . धरेन्द्रधारिणे
सदा नमःशिवाय ते सदाशिवाय शंभवे ।।
सु . . . ङ्ग भङ्गजह्नुजासुधांशुखण्डमौलये
पतङ्गपङ्कजासुहृत्कृपीडयोनिचक्षुषे ।
भुजङ्गराजकुण्डलाय पुण्यशालिबन्धवे
सदा नमः शिवाय ते सदाशिवाय शंभवे ।।

End:

अतिप्रगल्भवीरभद्रसिंहनादगर्जित-
श्रुतिप्रभीतदक्षयाग भोगिनागसद्मनाम् ।
गतिप्रदाय गर्जिताखिलप्रपञ्चसाक्षिणे
सदा नमः शिवाय ते सदशिवाय शंभवे ।।

2464

VB 347(b) **सभापतिस्तोत्रम्**

Beginning:

यत्कारुण्यकटाक्षवीक्षणमहो जन्मादिदुःखापहं
यत्पादाम्बुजसेवनं तनुभृतां स्वात्मावबोधाङ्कुरम् ।
यन्नामस्मरणं कृतान्तपरिभृत्संसारिणां तारकं
तं वन्दे गिरिजासहायममलं श्रीचित्सभानायकम् ।।
लोकानाहूय सर्वान् डमरुकनिनदैर्घोरसंसारमग्नान्
दत्वाभीतिं दयालोः प्रणतभयहरं कुञ्चितं पादपद्मम् ।
उद्धृत्येदं विमुक्तेरयनमिति कराद्दर्शयन् प्रत्ययार्थं
बिभ्रद्वह्निं सभायां कलयति नटनं यत्स पायात् शिवो नः ।।

End:

धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या
नामैवास्यास्तदेतत् परिचितमपि ते विस्मृतं कस्य हेतोः ।

नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ।।
भगवन् भूतभव्येश न जाने हितमात्मनः ।
त्वमेव संचिन्त्य विभो हितं मे दातुमर्हसि ।।

2467

VB 995(d) **शिवसहस्रनामस्तोत्रम्**

Beginning:

ऋषय ऊचुः—

सुदर्शनाख्यं यच्चक्रं लब्धवांस्तत्कथं हरिः ।
महादेवाद् भगवतः सूत तद्वक्तुमर्हसि ।।

सूत उवाच—

श्रीमन्महर्षयः सर्वे तद्वृत्तान्तं ब्रवीमि वः ।
श्रवणात्पुण्यदं पुंसां महापापहरं परम् ।।
देवासुराणामभवत् संग्रामोऽद्भुतदर्शनः ।
देवाश्च निर्जिता दैत्यैर्विष्णुं शरणमागताः ।।

End:

प्रशान्तबुद्धिरक्षुद्रः क्षुद्रहा नित्यसुन्दरः ।
. . . . . .
रसो रसज्ञः सारज्ञः सर्वसत्त्वावलम्बनः ।।
इति नाम्नां सहस्रेण पुण्डरीकेण च क्रमात् ।
संपूज्य स महाविष्णुस्तुष्टाव गिरिजापतिम् ।।
+ + +
तस्मान्नाम्नां सहस्रेण स्तोतव्यो भगवाञ्छिवः ।

Colophon:

इत्या**दित्यपुराणे** एकोनचत्वारिंशोऽध्यायः

Additional verses at the end:

अगजानन + उपास्महे ।। ओं हंसानुसंधानमानसपूजां करिष्ये ।

गमागमस्थं गमनादिशून्यं
दिग्व्यापि दीप्तं तिमिरान्धकारम् ।

पश्यन्ति यं सर्वजनान्तरस्थं
नमामि हंसं परमात्मरूपम् ।।

हंसो नाम सदाशिवः ।

देहो देवालयः प्रोक्तो जीवो देवः सदाशिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन भावयेत् ।।
तैलाग्निवर्तिसंयुक्तमधूमज्योतिरूपकम् ।
अङ्गुष्ठमात्रमचलं ध्यायेदोंकाररूपिणम् ।।
सर्वभूतान्तरस्थाय चैत्यमुक्तिचिदात्मने ।
प्रत्यक्चैतन्यरूपेण . . . त्यमेव नमो नमः ।।
आत्मा त्वं गिरिजा मतिः परिचराः प्राणाः शरीरं गृहं
पूजान्तर्विषयोपभोगरचना निद्रा समाधिः स्थितिः ।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोति तत्तदखिलं शंभोस्तवाराधनम् ।।

2475

VB 27(r) **श्रुतिसारसहस्रनामस्तोत्रम्**

Beginning:

एकदा मुनयः सर्वे द्वारकां द्रष्टुमागताः ।
वासुदेवं च सोत्कर्णाः कृष्णदर्शनलालसाः ।।
ततः स भगवान् प्रीतः पूजां चक्रे यथाविधि ।
तेषामासीत् ततो पूजा बहुमानपुरःसरम् ।।
चरितं भूमिभारघ्नं लोकानन्दकरं परम् ।
मार्कण्डेयमुखाः सर्वे माध्याह्निकक्रियोत्थिताः ।।
शिवपूजां ततः कृष्णो गन्धपुष्पाक्षतादिभिः ।
चकार विधिवद् भक्त्या नमस्कारयुतां शुभाम् ।।
जय शंकर सोमेश रक्ष रक्षेति चाब्रवीत् ।
जजाप शिवसाहस्रं भुक्तिमुक्तिप्रदं विभुः ।।
अनन्यमनसा शान्तः पद्मासनपरः शुचिः ।
ततस्ते विस्मयापन्ना दृष्ट्वा कृष्णस्य चेष्टितम् ।।
मार्कण्डेयोऽवदत् कृष्णं बहुशो मुनिसत्तमम् ।
ओं नमः पराय देवाय शंकराय महात्मने ।।

खड्गिने नीलकण्ठाय निर्मलाय कपर्दिने ।
निर्विकल्पाय शान्ताय निरहंकारिणे नमः ।।
अनर्घ्याय विशालाय शूलहस्ताय ते नमः ।
निरञ्जनाय शर्वाय शंकराय परात्मने ।।
नमः शिवाय भर्गाय गुणातीताय वेधसे ।
महादेवाय पीताय पार्वतीपतये नमः ।।
प्रसन्नाय नमस्तुभ्यं सर्वान्तर्ज्योतिषे नमः ।
स्वयंभुवे कलेशाय क्षराक्षरपराय च ।।

श्रीसदाशिव उवाच—

जपन्तु सततं देवा नाम्नां दशशतीमिमाम् ।
मम चातिप्रियकरीं महामोक्षप्रदायिनीम् ।।

End:

शिवतः कथितं सर्वं हितार्थं मुनिसत्तम ।
गृह्णन्तु मम वाक्येन मुक्तिं प्राप्नुत निश्चिताम् ।।
भवद्भिरात्मशिष्येभ्यो दीयतामिदमादरात् ।
नाम्नां सहस्रमेतद्धि लिखितं यन्निकेतने ।।
अविमुक्तं तु तद्गेहं नित्यं तिष्ठति शंकरः ।
अनेन मन्त्रितं भस्म खलु दुष्टविनाशकम् ।।
पिशाचस्य विनाशाय जप्तव्यमिदमुत्तमम् ।
नाम्नां सहस्रं नानेन समं किंचिच्च विद्यते ।।

Colophon:

इति श्रीपाद्मपुराणे उत्तरभागे बिल्वकेश्वरकृष्णमार्कण्डेयसंवादे श्रीश्रुतिसारसहस्रनामा नाम एकोनविंशतितमोऽध्यायः

2482

VB 347(h) आपन्निवारणस्तोत्रम्

Beginning:

नमः काकुत्स्थवंशाय कौसल्यातनयाय च ।
हनूमत्सेवितपादाय रामायापन्निवारणे ।।
नमः फुल्लाब्जनेत्राय पल्लवारुणपाणये ।
विशालवक्षोहस्ताय रामायापन्निवारणे ।।
नमः कोदण्डहस्ताय संधीकृतशराय च ।
दण्डिताखिलदैत्याय रामायापन्निवारणे ।।

End:

नमः सीतासहायुक्तं करे शृङ्गारधारिणे ।
कारुण्यधारिणे माता रामायापन्निवारणे ।।
नमः कोमलदेहाय अहल्याशापहारिणे ।
शिवलिङ्गप्रतिष्ठात्रे रामायापन्निवारणे ।।

Colophon:

आपन्निवारणस्तोत्रं संपूर्णम्

Scribe adds:

रामस्तोत्रमिदं पुण्यं यः पठेद्रामसंनिधौ ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ।।
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न दैवं राघवात्परम् ।।

Additional verses at the end:

हे राम त्वदपाङ्गमुग्धवदनं त्वन्नीलनीलालकं
त्वद्बिम्बाधरमद्भुतं च चिबुकं संपूर्णचन्द्राननम् ।
त्वद्गण्डस्थलशोभिकुण्डलयुगं संपश्यतो मे मनः
स्तोतुं वाञ्छति शेषतामिति सहस्राक्षात्मतां वीक्षितुम् ।।
कः कौ कोदण्डपाणिं कथमपि कलयन्नन्तरानन्दमूर्तिं
बुद्धचा तं भावयन्तं कृतपुलकतनुर्नेत्रयोरश्रुपूर्णः ।
वाचा संकीर्तयन् तच्चरितमपि सदा संस्मरन् रामनाम
श्रीमान् धन्यः स एको नयति च दिवसान् सार्थकान् पाति लोकान् ।।
अच्युतचरणतरङ्गिणि मदनान्तकमौलिमालतीमाले ।
मम तनुवितरणकाले हरता देया न मे हरिता ।।
मदन परिहर स्थितिं मदीये मनसि मुकुन्दपदारविन्दधाम्नि ।
हरनयनकृशानुना कृशोऽपि स्मरसि न चक्रपराक्रमं मुरारेः ।।

2487

VB 369(a-14) **कृष्णमङ्गलम्**

Beginning:

मत्स्यकूर्मवराहश्रीहरये वामनाय च ।
कुठारज्याहलास्त्राय श्रीमत्कृष्णाय मङ्गलम् ।।

सर्वत्रवसते सर्वनियन्त्रे सर्वशेषिणे ।
सर्ववस्तुनिवासाय वासुदेवाय मङ्गलम् ।।

End:

कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्तते ।
भस्मीभवन्ति . .न्धेन महापातककोटयः ।।
मुनिमानसहंसाय मारसुन्दरमूर्तये ।
सिताब्जपत्रनेत्राय सीतारामाय मङ्गलम् ।।

2512

VB 1070(c) **दशश्लोकी**

Beginning:

श्रीमच्चन्द्रमसः कुले जनिमते पित्रोः पुरः प्राकृतां
मूर्तिं दर्शयते क्षणेन शिशुतां संपश्यतोर्गृह्णते ।
नन्दं प्राप्तवते व्रजन्त्वनितराभिज्ञं मुदं निर्भरां
चित्ते नन्दयशोदयोर्जनयते कृष्णाय तुभ्यं नमः ।।

End:

द्वार्वत्यां वसते च षोडशरमांशस्त्रीसहस्रैः समं
सोल्लासं त्वितरेतरं नवजलक्रीडारतिं कुर्वते ।
ब्रह्मेशानमुखैः समर्चितपदाम्भोजाय लेखर्षभै-
र्भक्तान् पालयते त्वनन्यशरणान् कृष्णाय तुभ्यं नमः ।।
श्रीशैलाचार्यरचितां कृष्णलीलापरिष्कृताम् ।
दशश्लोकीमिमां सन्तो गृह्णन्तु निरसूयवः ।।

After this one page contains seven verses on one's duties.

On the margin of fol. 1 is found *Bhāgavatam* daśamaskandhattukku Tirumalācāryan kavanam.

2525

VB 341(b) **नरसिंहाष्टकम्**

Beginning:

श्रीमदकलङ्कपरिपूर्णशशिकोटि-
श्रीधर मनोहर सटापटलकान्त ।

पालय कृपालय भवाम्बुधिनिमग्नं
मामसुरकाल नरसिंह नरसिंह ।।

End:

अष्टकमिदं सकलपातकभयघ्नं
कामदमशेषदुरितामयरिपुघ्नम् ।
यः पठति संततमनन्यशरणस्ते
गच्छति पदं च नरसिंह नरसिंह ।।

2535

VB 1025(j) **पतितपावनाष्टकम्**

Beginning:

सचिन्त इव लक्ष्यसे सपदि मे चरित्रं स्मरन्
परं कलितसाहसः पतितपावनत्वव्रतात् ।
न मामगणयन् पुरा स हि विचारकालोऽधुना
व्रतं सफलमस्तु ते वरद पालयैनं जनम् ।। १ ।।
कदापि हि पदामृतं तव मयापि नास्वादितं
वृथा भवकथाभरैरपि च नाथ नीतं वयः ।
तया यदपि हेलया मयि न चेद्विधेया दया
तवैव तदपीक्षितः पतितपावनत्वव्रतात् ।। २ ।।

End:

परित्राणं त्वं मे यदि न कुरुषे नाथ भवतो
न तेनाहं [भीतो] नहि गरलभीतो विषकृमिः ।
परं त्वेतद्दुःखं पतितजननि[ष्कास]जनितः
कलङ्कोऽयं सद्यो मलिनयति शुद्धं तव यशः ।। १० ।।

Scribe adds:

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये
धर्मश्च जानाति नरस्य वृत्तम् ।। ११ ।।

2541

VB 420(i) **बालकृष्णाष्टकम्**

The last line of each verse ends in:

(गो)पालबालजारचोरबालकृष्णमाश्रये ।।

Beginning:

लीलया कुचेलमौलिपालितं कृपाकरं
नीलनीरदेन्द्रनीलनीलकान्तिमोहनम् ।
फाललोलचारुकोमलालकं विलासगो-
पालबालजारचोरबालकृष्णमाश्रये ।।
इन्दुकुन्दमन्दहासमन्दराधराधिपं
नन्दगोपनन्दनं धनंजयादिवन्दितम् ।
मन्दरोद्धरं सुरारिमर्दनं सुरेशगो-
पालबालजारचोरबालकृष्णमाश्रये ।।

End:

रङ्गविद्यारङ्गसंगमङ्गलाङ्गसौरभं
